
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

॥ अथर्ववेद प्रयोगभानुप्रारंभः ॥

श्रीगणेशायनमः ॥ श्रीमन्महागुरुगणपतीष्ट देवताभ्योनमः ॥ अथाथर्ववेदस्य प्रयोगभास्करःप्रारभ्यते ॥ तत्रादौमंगलमाचरति ॥ प्रणम्यश्रीकालीं हरिहरगणेशेन सहितांगुरुं दत्तात्रेयं निलगिरिगतां श्रीभगमयीम् ॥ अथर्वार्थान्दृष्ट्वाबुधजनमनोह्लादजनकंप्रकुर्वेहंग्रंथंसुगममिहसंस्कारसहितम् ॥ १ ॥ रविशंकरनागरद्विजेनक्रियतेऽयंप्रवरःप्रयोगभानुः ॥ सहृदंबुधपंकजेषुरम्यः सदयंरश्मिभिरातनोतुगौरैः ॥ २ ॥ तत्रादौप्रारीप्सितग्रंथविघ्ननिरासार्थंमहत्सुविज्ञप्तिः ॥ कृपालवःकृपालुभिःक्रियतेचेन्ममोपरि ॥ मदेनसंमिदेनसांतरायतात्रनोभवेत् ॥ १॥ कौशिकगृह्यसूत्रादीन्ग्रंथानालोक्यगवतः ॥ कुर्वेहंबाल्बोधायशाखांस्वीकृत्यशौनकीम् ॥ २ ॥ तदुक्तंचरणव्यूहपरिशिष्टभाष्ये ॥ नर्मदोत्तरदेशेतुशाखाशांखायनीस्मृतेत्युपक्रम्यचतुर्णांवेदानांशाखानांच व्यवस्थापितत्रैवोक्ता ॥ एवंपरिशिष्टानुसारेण नर्मदोत्तरदेशेब्रह्मवेदस्यशौनकीशाखेतिसिद्धं ॥ अतएवस्वीकृत्यशौनकीमित्युक्तम् ॥ इहहिधर्मादिचतुर्षुपुरुषार्थेषुपुरुषस्यप्राधान्येनधर्मएवसेव्यः ॥ इतरेषांधर्मादेवप्राप्तिःतत्रव्यासः ॥ धर्मात्संजायतेह्यर्थोधर्मात्कामोभिजायते ॥ धर्मादेवपरंब्रह्मतस्माद्धर्मंसमाश्रयेत् ॥१॥ सचवेदोक्तएवनान्यःयःकश्चिन्नास्तिकादिग्रंथप्रतिपादितः ॥ तदुक्तमभियुक्तैः ॥ वेदेनप्रयोजनमुद्दिश्यविधीयमानोर्थोधर्म इति ॥ तथाच ॥ वेदप्रणिहितोधर्मोह्यधर्मस्तद्विपर्ययः वेदोनारायणः साक्षादितिमेनिश्चितामतिरिति ॥ वेदस्यच स्वतः प्रामाण्यमपौरुषेयत्वात् ॥ तथाचपराशरः ॥ नकेचिद्वेदकर्त्तारो वेदस्मर्त्ताचतुर्मुखः ॥ तथैवधर्मंस्मरतिमनुः कल्पांतरेष्वपीति ॥ वेदस्वरूपमाह आपस्तंबः ॥ मंत्रब्राह्मणयोर्वेदनामधेयमिति ॥ कात्यायनोपि ॥ विधिर्विधेयस्तर्कश्चवेदइति ॥ विधिःप्रेरणा ॥ विधेयोमंत्रः ॥ तर्कोमीमांसार्थवादश्च तत्प्रभावत्वात्कल्पस्यापिप्रामाण्यम् ॥ यास्काचार्येणतुचत्वारि शृंगेतिमंत्रनिर्वचने त्रिधाबद्धस्त्रेधाबद्धोमंत्र ब्राह्मणकल्पैरिति कल्पस्यवेदतुल्यतैवोक्ताः अतश्च सिद्धम् कल्पोक्तधर्मस्यानुष्ठानेनपुरुषस्याभि मतफलसिद्धिरिति । सचकल्पोद्विविधः । श्रौतस्मार्त्तश्च ॥ श्रौतस्यच

स्मार्त्तपूर्वकत्वंतथाचयाज्ञवल्क्यः ॥ आवसथ्यमनादृत्यवैतानेयःप्रवर्त्तते ॥ सोनाहिताग्निर्भवतिपरिवेत्तासउच्यतेइति ॥
कारिकाकारोपि ॥ निषेकाद्यावसथ्यांतैःस्मार्त्तैर्यः संस्कृतोद्विजः ॥ उत्तरेष्वधिकारीसइतिहेत्वर्थताभवेदिति ॥ अनेन
स्मार्त्तकल्पस्याभ्यर्हितत्वंसूचितम् ॥ अतएवकौशिकसूत्रेसूत्रकारः । अथविधिंवक्ष्यामइत्युपक्रम्यसंप्रदायः प्रमुक्तत्वात्
ब्राह्मणानांयज्ञंव्याख्यास्यामः देवानांपितृणांचप्राङ्मुखउपांशुकरोत्येवमुपक्रम्ययश्चैवंविद्वान् इंद्रंमहेंद्रेणचरतीत्युपसंहारः।॥
गृह्येकृतः ॥ यज्ञशब्दःपाकपरः ॥ प्रत्यहंपाकस्तुस्मार्त्ताग्नौभवति ॥ तत्रपाकाभावेप्रायश्चित्तस्मरणात् ॥ तदुक्तम् ॥
ब्राह्मणभाष्ये ॥ पचनाग्नौपचेदन्नंमृतकेमृतकेपिवा ॥ अपक्त्वोपवसेद्रात्रीपुनराधानमर्हतीति ॥ शांखायनेनापि ॥ अथातः
पाकयज्ञान्व्याख्यास्यामइति ॥ यतोहिस्मार्त्तकल्पेसंस्काराविहितास्तैश्चब्राह्मण्यमवाप्यते ॥ तदुक्तंकारिकारेण ॥ चित्रकर्म
यथानेकैरागैरुन्मील्यतेशनैः ॥ ब्राह्मण्यमपितद्वत्स्यात्संस्कारैर्विधिपूर्वकैरिति ॥ तेचकेसंस्काराइत्यपेक्षायांकारिकाकारः॥
स्मार्त्ताःमांगल्यसंस्कारागर्भाधानाचत्रयः ॥ तथाद्वादशजाताद्याविवाहांतास्तुपुत्रयोः ॥ पाकसंस्थाभवंत्येताह्यष्टकापार्वण
श्चरुः ॥ श्राद्धमाश्वयुजिचैत्रीश्रावणीचा ग्रहायणी ॥ एतेसप्तात्मसंस्कारास्मार्त्तायेचहुतादयइति । तत्रसर्वेषुकर्मसुगणेश
नांदीमुखादिपूर्वकत्वादादौतेषांप्रयोगात्मुच्यंते ॥ ॥ अथ प्रयोगः ॥ महत्सुकर्मसुपूर्वेद्युन्हिअल्पेषुकर्मसुतद्दिनेचकृतनित्यो
यजमानःपितृबल्यंतंविधाय वैश्वदेवंमंगलस्नानंकुर्यात् ॥ तद्यथा ॥ देशकालौसंकीर्त्यकरिष्यमाणामुककर्मनिमित्तंसपत्नीकः
ससंस्कार्योऽहंमंगलस्नानंकरिष्ये इतिसंकल्प्य ॥ सौभाग्यवतीभिर्यथाकुलाचारंनीराजितः सर्वौषध्यादिसुगंधद्रव्यैःससुगंध
तैलैः शरीरमुद्वर्त्यस्नात्वाचम्यवस्त्राणिधारयेत् ॥ परिधत्तेतिअथर्वाबृहस्पतिश्चंद्रमास्त्रिष्टुप् वस्त्रधारणेविनियोगः ॐपरिधत्त
धत्तनोवर्चसेमंजरामृत्युंकृणुतदीर्घमायुः बृहस्पतिःप्रायच्छद्वासएतत्सोमायराज्ञेपरिधातवाउ ॥ १ ॥ पत्न्याअपिवस्त्र
परिधानं कंचुकीपरिधानंचतूष्णींकर्त्तव्यम् ॥ एवंसंस्कार्यस्यापियथासंभवं वस्त्रधारणम् ॥ प्रतिवस्त्रंसर्वेषामाचमनम् ॥
सौभाग्यकुंकुमादिनातिलककरणं ॥ ततोगोमयोपलिप्तस्थलेस्वस्तिकादिरंगैरलंकृतेशु चौदेशेसितवस्त्राच्छादिते श्रीपर्ण्यादि
प्रशस्तदारुमयेपीठेस्वयं प्राङ्मुखोपविश्य तादृशपीठयोःस्वदक्षिणतःपत्नींतद्दक्षिणतः संस्कार्यंचोपवेशयेत् ॥ ततःसर्वेषां

कर्मणामारंभेकरिष्यमाणकर्मणोनिर्विघ्नतासिध्यर्थंयथाकुलाचारंगणेशंगणेशांबिकेवापूजयेत् ॥तद्यथा॥ पवित्रपाणिर्जीवास्थ
जीव्यासंसर्वमायुर्जीव्यासं । इतिप्रथमम् । उपजीवास्थोपजीव्यासंसर्वमायुर्जीव्यासं । इतिद्वितीयम् । संजीवास्थजीव्या
संसर्वमायुर्जीव्यासं । इतितृतीयम् ॥ जीवलास्थजीव्यासंसर्वमायुर्जीव्यासमिति विधिवदाचम्य प्राणानायम्याचारात्त्यमूषु
वाजिनमितिस्वस्त्ययन सूक्तं पठताकर्मकारयित्रा सौभाग्यकुंकुमेनतिलकंकारयित्वा गणेशादिन् नमस्कुर्यात् ॥ ॐ
त्यमूष्विति अथर्वापंक्तिःस्वस्त्ययने विनियोगः ॥ ॐत्यमूषुवाजिनं देवजूतं सहोवानंतरुतारंरथानाम् ॥ अरिष्टनेमिं
पृतनाजिमाशुंस्वस्त्ययेताक्ष्यमिहाहुवेम ॥ १ ॥ त्रातारमिंद्रं मवितारमिंद्रं हवेहवेसुहवंशूरमिंद्रं ॥ हुवेनुशक्रंपुरुहूत
मिंद्रं स्वस्तिनइंद्रोमघवान्कृणोतु ॥ २ ॥ आमंद्रैरिंद्रहरिभिर्याहिमयुररोमभिः ॥ मात्वाकेचिद्वियमन्विनपाशिनोतिधन्वे
वताँइहि ॥ ३ ॥ स्वस्तितन्मेसुप्रातः सुसायंसुदिनंसुमृगंसुशकुनंमेअस्तु ॥ सुहवमग्नेस्वस्त्य१मर्त्यंगत्वापुनरायाभिनंदनम्
॥ ४ ॥ स्वस्तिनेअस्त्वभयंनोअस्तुनमोहोरात्राभ्यामस्तुस्व स्तमात्रउतपित्रेनोअस्तु स्वस्तिगोभ्योजगतेपुरुषेभ्यः ॥ विश्वंसु
भूतंसविदत्रंनोअस्तुज्योगेवदृशेमसूर्यं ॥ ५ ॥ ॐअव्यसश्चव्यचसश्चबिलंविष्यामिमायया ॥ ताभ्यामुधृत्यवेदमथकर्माणि
कृण्महे ॥ ६ ॥ ॥ श्रीमन्महागणपतये नमः ॥ अंबिकायैनमः ॥ गुरुभ्योनमः ॥ इष्टदेवतायैनमः ॥ श्रीलक्ष्मीनारायणा
भ्यांनमः ॥ कुलदेवतायैनमः ॥ मातृपितृभ्यांनमः ॥ सर्वेभ्योब्राह्मणेभ्योनमः ॥ ॐसुमुखश्चैकदंतश्चकपिलोगजकर्णकः ॥
लंबोदरश्चविकटोविघ्ननाशोगणाधिपः ॥ धूम्रकेतुर्गणाध्यक्षोभालचंद्रोगजाननः ॥ द्वादशैतानिनामनियःपठेच्छृणुयादपि ॥
विद्यारंभेविवाहेचप्रवेशेनिर्गमेतथा ॥ संग्रामेसंकटेचैवविघ्नस्तस्यनजायते ॥ शुक्लांबरधरंदेवंशशिवर्णंचतुर्भुजंप्रसन्नवदनं
ध्यायेत्सर्वविघ्नोपशांतये ॥ अभीप्सितार्थसिध्यर्थंपूजितोयःसुरासुरैः ॥ सर्वविघ्नच्छिदेतस्मैगणाधिपतयेनमः ॥ वक्रतुंड
महाकाय कोटिसूर्यसमप्रभ ॥ अविघ्नंकुरुमेदेवसर्वकार्येषुसर्वदा ॥ वागीशाद्याःसुमनसःसर्वार्थानामुपक्रमे ॥ यंनत्वाकृतकृत्या
स्युस्तन्नमामिगजाननम् ॥ गणाधिपंनमस्कृत्यनमस्कृत्यपितामहं ॥ विष्णुंरुद्रंश्रियंदेवींवंदेभक्त्यासरस्वतीम् ॥ स्थानक्षेत्रंनम-

स्कृत्वदिननाथंनिशाकरम् ॥ भरणीगर्भसंभूतंशशिपुत्रबृहस्पतिम् ॥ दैत्याचार्यनमस्कृत्यसूर्यपुत्रंजनैश्वरं ॥ राहुकेतुंनमस्कृत्य कर्मारंभेविशेषतः ॥ शक्रादिदेवताःसर्वाऋर्षींश्चैवतपोधनान् ॥ गर्गमुनिनमस्कृत्यनारदंपर्वतंतथा ॥ वसिष्ठमुनिशार्दूलं विश्वामित्रंगोभिलं ॥ व्यासंकण्वंहृषीकेशंदेलंगोतमंकृपं ॥ अगस्त्यंचपुलस्त्यंचदक्षमित्रंपराशरं ॥ भरद्वाजंचमांडव्यंयाज्ञ वल्क्यंचगालवं ॥ अन्येविप्रास्तपोयुक्तावेदशास्त्रविचक्षणाः ॥ तान्सर्वान्प्रणिपत्याहमेतत्कर्मसमारभे ॥ पीतांबरधरंविष्णुं शशिवर्णंचतुर्भुजं ॥ प्रसन्नवदनंध्यायेत्सर्वविघ्नोपशांतये ॥ अग्रतःश्रीनृसिंहश्चपृष्ठतोदेवकीसुतः ॥ उभयोःपार्श्वयोर्देवौभ्रातरौ रामलक्ष्मणौ ॥ लाभस्तेषांजयस्तेषांकुतस्तेषांपराजयः ॥ येषामिंदिवरश्यामोहृदयस्थोजनार्दनः ॥ तदेवलग्नंसुदिनंतदेवता राबलंचंद्रबलंतदेव ॥ विद्याबलंदैवबलंतदेवलक्ष्मीपतेतेंघ्रियुगंस्मरामि ॥ यत्रयोगीश्वरःकृष्णोयत्रपार्थोधनुर्धरः ॥ तत्रश्री र्विजयोभूति र्ध्रुवानीतिर्मतिर्मम ॥ सर्वेष्वारंभकार्येषुत्रयस्त्रिभुवनेश्वराः ॥ देवादिशंतुनःसिद्धिंब्रह्मेशानजनार्दनाः ॥ सर्व मंगलमांगल्येशिवेसर्वार्थसाधिके ॥ शरण्येत्र्यंबकेगौरिनारायणिनमोस्तुते ॥ इतिश्लोकान्पठित्वा संकल्पकुर्यात् ॥ तत्रादौ निर्विघ्नतासिध्यर्थंगणेशांबिकयोःपूजनमहंकरिष्यइतिएकोपक्षः । अथत्राकरिष्यमाणामुककर्मांगत्वेनमंडपदेवता प्रतिष्ठां स्वस्तिवाचनंमातृपूजनवसोर्द्धारामायुष्यजपंनांदिश्राद्धंचकरिष्यइति ॥ तत्रादौनिर्विघ्नतासि० इतिसर्वसंकल्पंकृत्वा प्रधान संकल्पंकुर्यात ॥ इतिद्वितीयःपक्षः ॥ अत्रांतिमपक्षएवशिष्टैरादतःसएवात्रगृह्यते ॥ दक्षिणहस्तेसकुशंजलमादाय ई३ इहपृथिव्यांजंबूद्वीपे भारतेवर्षे कुमारिकाक्षेत्रे र्यावर्त्तांतर्गतब्रह्मावर्त्तैकदेशेरेवाया उत्तरतीरे इत्यादिदेशमुच्चार्य ॐ३ ब्रह्मणोद्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वंतरेऽष्टाविंशति तमस्यकलियुगस्य प्रथमचरणेश्रीमद्विष्णोर्बौद्धाव- तारेऽमुकसंवत्सरे ऽमुकयोगेऽमुकऋतौ ऽमुकमासेऽमुकपक्षे ऽमुकतिथौवमुकवासरे ऽमुकनक्षत्रे ऽमुकयोगेऽमुक करणेऽमुकराशि स्थेचंद्रेऽमुकराशिस्थेसूर्ये ऽमुकराशिस्थेदेवगुरौशेषेषुग्रहेषु यथास्थानस्थितेषु सत्सुएवंग्रहादिगणविशिष्टेपुण्येकाले देशेच करिष्यमाणामुककर्मणोनिर्विघ्नतासिध्यर्थं गणेशांबिकयोःस्थापनपूजनमहंकरिष्येइतिसंकल्प्य गणेशांबिकयोःपूजनंकुर्यात् ॥ तदुक्तंस्कांदे ॥ योवैमांगल्यकर्मादौगणेशांबिकयोर्यजेत् ॥ द्रव्यभावंनकुरुतेगृहेतस्यापिमंगलमितिस्कांदवचनात्गणेशां-

बिकयोःपूजनंकार्यमितिनागरखंडोक्तपक्षोमुख्यः ॥ श्रीपर्ण्यादिप्रशस्तदारुमयेपीठेरक्तवस्त्रंप्रसार्यतदुपरिरक्ताक्षतैरष्टदलंपद्मं कृत्वातत्ररक्ताक्षतैर्गणेशांबिकेस्थापयेत् ॥ ब्रह्मजज्ञानंवेनोबृहस्पतिब्रह्मात्रिष्टुप्कर्मारंभणीयमंत्रजपेविनियोगः ॥ ॐब्रह्म जज्ञानप्रथमंपुरस्ताद्विसीमतः सुरुचोवेनआवः ॥ सुबुध्न्याउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः ॥ इतिपठित्वाहस्ते अक्षतान् गृहीत्वा गणेशांबिकेआवाहयेत् ॥ निर्लक्ष्म्यमितिद्रविणोदात्रिनायकोऽनुष्टुप्गणेशावाहनेविनियोगः ॥ ॐभूर्भुवः स्वर्जनदो ॥ ॐनिर्लक्ष्म्यंललाम्यं३निररातिंसुवामसि ॥ अथयाभद्रतानिनः प्रजायाअरातिंनयामसि श्री महागणपतयेनमः ॥ गणपतिंआवाहयामिस्थापयामि ॥ पृतनाजितमथर्वांबिकात्रिष्टुप्अंबिकावाहनेविनियोगः ॥ ॐ पृतनाजितंसहमानमग्निमुक्थैर्हवामहेपरमात्सधस्थात ॥ सनः पर्षदति दुर्गाणिविश्वाक्षामद्देवोतिदुरितात्यग्निः ॥ ॐभूर्भुवः स्वर्जनदो अंबिकांआवाहयामिस्थापयामि ॥ तदस्त्वित्यात्रेयोप्रतिरथोविश्वेदेवास्त्रिष्टुप् । प्रतिष्ठापने विनियोगः ॥ ॐतदस्तुमित्रावरुणातदग्नेशंयोरस्मभ्यमिदमस्तुशस्तम् ॥ अशीमहिगाधमुतप्रतिष्ठांनमोदिवेबृहतेसादनायेति गणेशः सुप्रतिष्ठितोवरदो भवेतिगणेशंप्रतिष्ठाप्यपुनःप्रतिष्ठामंत्र मुच्चार्यांबिकासुप्रतिष्ठिता वरदाभवत्वित्यंबिकांप्रतिष्ठापयेत ॥ अथवाप्रतिष्ठामंत्रमुच्चार्यगणेशांबिकेसुप्रतिष्ठिते भवेतामित्यक्षतैस्तंत्रेणप्रतिष्ठापयेत् ॥ ततआवाहनादिभिःषोडषोपचारैः पदार्थानुसमयेकांडानुसमयेनवापूजयेत् ॥ निर्लक्ष्म्यं मितिमंत्रमुच्चार्यसांगायसवाहनायसपरिवाराय गणेशायनमःआसनं समर्पयामीतिगणपतये आसनंदत्वा पृतनाजितेतिमंत्रमुच्चार्य सांगायै सायुधायैसपरिवारायै अंबिकायैनमःआसनंसमर्प- यामीतिआसनंदद्यात् ॥ ततआसनदानवत्प्रयोगमुच्चार्य पाद्यार्घ्याचमनीयस्नानाचमनीयवस्त्राचमनीययज्ञोपवीतगंधपुष्प धूपदीपनैवेद्याचमनीयतांबुलप्रणामप्रदक्षिणादक्षिणानीराजनांतैरुपचारैःपूजयेत् ॥ अथवागंधपुष्पधूपदीपनैवेद्याचमनीयकै रुपचारैःपंचोपचारैःपूजयेत ॥ ततोऽर्घपात्रेगंधपुष्प दुर्वाक्षतान्निक्षिप्यतत्रनालिकेरंवासंस्थाप्य । पत्रंपुष्पंफलंतोयंरत्नानि विविधानीच ॥ गृहाणार्घ्यंमयादत्तं देहिमेवांछितंफलम् ॥ फलेनफलितसर्वंत्रैलोक्यंसचराचरं ॥ फलस्यार्घप्रदानेनसफलाश्च

मनोरथाःरूपंदेहिजयंदेहिभाग्यंभगवान्देहिमे॥ पुत्रान्देहिधनंदेहिसर्वान्कामांश्चदेहिमेइतिसांगाय० नमःअर्घ्यंसमर्पयामीति गणपतयेऽर्घ्यंदत्वांबिकायैदद्यात्पत्रंपुष्पभाग्यंभगवतिदेहिमेइतिसांगायैसपरिवारायैअंबिकायैपूर्वोक्तमंत्रै रर्घ्यंसमर्पयामी त्यंबिकायैअर्घ्यंदद्यात् ॥ततोनिर्लक्ष्म्यंललाम्यंपृतनाजितमितिद्वाभ्यांमंत्राभ्यामुभयोःपुष्पांजलिंदत्वाकृतांजलि आतुनेंद्रो भृगुर्गणपतिर्गायत्रीगणपतिप्रार्थनेविनियोगः ॥ आतूनइंद्रक्षुमंतंचित्रंग्राभंसंगृभायमहाहस्तीदक्षिणेन ॥ वक्रतुंडमहाकाय कोटिसूर्यसमप्रभ ॥ निर्विघ्नंकुरुमेदेवसर्वकार्येषुसर्वदा ॥ सर्वमंगलेतिद्वाभ्यांमंत्राभ्यां तेप्रार्थ्यंउभयोःसूक्तेपठेत्॥तद्यथा॥ ॐनिर्लक्ष्म्यंललाम्यं ३ निरातिंसुवामसि ॥ अथयाभद्रतानिनःप्रजाया अरातिंनयामसि ॥ १ ॥ निररणिं सविता सा त्रिषक्तु निर्हस्तयोर्वरुणोमित्रोअर्यमा ॥ निरस्मभ्यमनुमतीरराणा प्रेमांदेवा असाविषुःसौभगाय ॥ २ ॥ यत्तआत्मनि तन्वांघोरमस्तियद्वाकेशेषुप्रतिचक्षणेवा ॥ सर्वंतद्वाचापहन्मोवयंदेवस्त्वासवितासुदयतु ॥३॥ रिश्यपदीवृषदतीगोषेधां विधमामुत ॥ विलीढ्यंललाम्यं३ताअस्मिन्नाशयामसि । ४ इति गणपति सूक्तं प्रतनाजीत् मिति अंबिकासूक्तंचपठेत् ॥ तद्यथा ॥ पृतनाजितं सहमानमग्निमुक्थैर्हवामहेपरमात्सधस्थात् ॥ सनः पर्षदतिदुर्गाणि विश्वाक्षामदेवोतिदूरिता त्यग्निः ॥१॥ इदंयत्कृष्णः शकुनिरभिनिष्पतन्नपीपतत् ॥ आपोमातस्मात्सर्वस्माद्दुरितात्पात्वंहसः ॥२॥ इदंयत्कृष्णः शकुनिरवामृक्षन्निर्ऋतेतेमुखेन ॥ अग्निर्मातस्मादेनसोगार्हपत्यःप्रमुंचतु ॥ ३ ॥ प्रतीचीनफलोहित्वमपामार्गरुरोहिथ ॥ सर्वान्मच्छपथांअधीवरी । योयावयाइतः ॥४॥ यद्दुःकृतंयच्छमलंयद्वाचेरिमपापया ॥ तयात्वद्विश्वतोमुखापामार्गापमृज्महे ॥ ५ ॥ श्यावदंताकुनखिनाबंडेनयत्सहासिम ॥ अपामार्गत्वयावयंसर्वंतदपमृज्महे ॥ ६ ॥ यदंतरिक्षेयदिवातआसय । दिवृक्षेषुयदिवोलपेषु ॥ यदस्रवन्पशवउद्यमानंतद्ब्राह्मणंपुनरस्मानुपैतु ॥ ७॥ पुनर्मैत्विंद्रियंपुनरात्माद्रविणंब्राह्मणंच॥ पुनरग्नयोधिष्ण्यायथास्थाकल्पयंतामिहैव ॥ ८ ॥ सरस्वतिव्रतेषुतेदिव्येषुदेविधामसु ॥ जुषस्वहव्यमागाहुतंप्रजांदेवि

रराास्वनः ॥ ९ ॥ इदंतेहव्यंघृतवत्सरस्वतीदंपितॄणांहविरास्यं१यत् ॥ इमानितउदिताशंतमानितेभिर्वयंमधुमंतःस्याम ॥ १० ॥ इत्यंबिकासूक्तं ॥ अत्राद्य० तिथौअमुककर्मणोनिर्विघ्नार्थंश्रीगणेशांबिकयोः स्थापनपूजनादिकृतस्यविधेः सर्वंपरिपूर्णमस्तु॥ गृहेवृद्धिशतानिभवंतु॥ उत्तरकर्मण्यविघ्नमस्तु ॥ ॐयस्मात्कोशाब्रह्मापरमात्मात्रिष्टुप् कर्मसमापनीय मंत्रजपेविनियोगः ॥ यस्मात्कोशादुदभराम वेदंतस्मिन्नंतरवदध्म ॥ एनंकृतमिष्टंब्रह्मणोवीर्येणतेनमादेवातपसावतेह ॥ इतिकृतंकर्मेश्वरार्पणंकुर्यात् ॥ ८ ॥ इतीश्रीमदथर्ववेदगृह्यसूत्र प्रयोगभानौषट्पत्नागर द्विवेदिधीरजरामात्मज रविशंकरकृते गणपतिपूजनप्रयोगरश्मिःप्रथमः ॥ ॥ अथाभ्युदयिकश्राद्धनिर्णयरश्मिः ॥ तत्रार्थर्वांगिरसकल्पे ॥ कन्यापुत्रविवाहेषु प्रवेशेनववेश्मनः ॥ शुभकर्मणिबालानांचूडाकर्मादिकेतथा ॥ सीमंतोन्नयनेचैवपुत्रादिमुखदर्शने ॥ यज्ञोद्वाहप्रतिष्ठासु मेखलाबंधमोक्षयोः ॥ पुत्रजन्मवृषोत्सर्गेवृद्धिश्राद्धंसमाचरेदित्युक्तत्वात्॥ अतएववैदिकमांगल्येषुदर्शपूर्णमासादिषुचकर्म सुकर्तव्य मित्यर्थः ॥ सूत्रकारः ॥ आभ्युदयिकेप्रदक्षिणमुपचारः ॥ अभ्युदयोवृद्धिस्तदर्थंश्राद्धंयत्तदाभ्युदयिकमिति ॥ पूर्वाह्णेपितृमंत्रवर्जजपःऋजवोदर्भायवैस्तिलार्थाः ॥ संपन्नमितितृप्तिप्रश्नः ॥ सुसंपन्नमित्यनुज्ञातोदधिबदराक्षतपिंडाः ॥ नस्वधांप्रयुंजीत ॥ नांदिमुखानपितॄनमातृपूर्वान पितॄन्प्रपूज्यततोमातामहानपि ॥ मातामहस्तथाकेचिद्युग्माभोज्या द्विजाःअपिइतिद्वादशदैवतस्य देशाचाराद्व्यवस्थानतुसर्वत्रेति ॥ ब्रह्मवेदीनांप्रपितामहाद्यारभ्य पितृपर्यंतंयजनक्रमोक्तः कौशिकसूत्रेसूत्रकारेण ॥ प्रपितामहपितामहपितासपत्निकाइत्युक्तत्वात् । अतएवतन्निमित्तान्याह ॥ संस्काराणांचसर्वे षामारंभेश्राद्धमिष्यतइति ॥ अष्टकासुतथाश्राद्धेश्राद्धाभावानततपुनः ॥ अतएवगर्भाधानादिसंस्काराणांप्रारंभेनांदीमुखं भवतीत्यर्थः ॥ एवंस्मार्त्ताधानादवपि ॥ श्रौताधानादीनामपि संस्कारेषुपरिगणितत्वेनतेष्वपि भवतीत्यर्थः ॥ अग्नि न्वांत्वपक्षांतो ॥ होमश्रौतातिदेशतः ॥ अतोगंस्यादुपचयः श्रौतानामेवसंस्कृताविति॥ संस्कारत्वेसर्वत्रप्राप्तौकचिन्निषेध माह ॥ अष्टकादौश्राद्धादौचाभ्युदयिकंनभवति ॥ अष्टकादिव्यतिरिक्तसंस्कारांतर्गतत्वात्पिंडपितृयज्ञेभवति ॥ तदुक्तं गदाधरभाष्ये ॥ पिंडपितृयज्ञेप्याभ्युदयिकंभवतीति ॥ अन्येतुपिंडपितृयज्ञस्यश्राद्धतुल्यत्वान्नभवतीत्याहुः ॥ एवं

शास्त्रार्थविचारेणापिवापिकूपतडागदेवतायतनान्नप्रदानारामेषुकाम्यवृषोत्सर्गेराज्याभिषेके आश्रमग्रहणेनूतनगृहप्रवेशे
तुलापुरुषदानांयुतलक्षकोटिहोमादिग्रहयज्ञेमहारुद्र शतचंडचादौतीर्थयात्रांप्रारंभेचाभ्युदयकंभवतीतिसिद्धं ॥ अथाधि-
कारीनिर्णयःकथ्यते ॥ ॥ तत्रकर्त्राकांक्षयाकात्यायनः ॥ स्वपितृभ्यःपितादद्यात्सुतसंस्कार कर्मसुपिंडानोद्वहनात्तेषां
तस्याभावेतुतत्क्रमादितिसुतसंस्कारेषु उद्वहनात्प्रथमविवाहमभिव्याप्यपितास्वपितृभ्यः पिंडानदद्यात् पिंडदानोपलक्षितं
वृद्धिश्राद्धंकुर्यात् ॥ इत्यर्थः ॥ द्वितीयादिविवाहेषुपुत्रः स्वयमेवकुर्यात् ॥ तदुक्तंनांदिश्राद्धंपिताकुर्यादाद्येपाणिग्रहेपुनः।
अतऊर्ध्वंसुतःकुर्यात्स्वयमेवतु नांदिकमिति ॥ तस्यपितुरभावेयः पितृव्यमातुलादिः संस्कुर्यात्सतत्क्रमात्संस्कार्यपितृक्रमा
द्यान्नतुस्वपितृभ्यइतिहेमाद्रिः ॥ तस्यपितुरभावेनेक्रमात् ॥ असंस्कृतास्तुसंस्कार्या भ्रातृभिःपूर्वसंस्कृतैरितियः
कर्तृक्रमोपितृक्रमेणज्येष्ठभ्रातादिर्दद्यादित्यन्ये पितुरभावोद्विविधः ॥ मरणेनप्रवासादिनावा ॥ समावर्त्तनस्यापिविवाहात्
प्राचीनसुतसंस्कारत्वात्तत्रापिनांदिश्राद्धंपिताकुर्यात् ॥ तदभावेज्येष्ठभ्रात्रादिः । तदभावेस्वयमेवकुर्यात् ॥ उपनयने
नाधिकारस्यजातत्वात् ॥ एवमाद्यविवाहेपि ॥ यदातुपितरिसंन्यस्तेप्रोषितेपतितेवाधमर्थितत्पुत्रादन्यःसंस्कुर्यात्तदापि
संस्कार्यपितुः पुत्रादिभ्योदद्यात् ॥ पितरोजनकस्येन्याज्यवदुव्रतसमाहितं ॥ सम हितव्रतः पश्चात्स्वान्यजेतपितामहा
नितियमोक्तेः ॥ जीवत्पितृकस्यविशेषमःहकात्यायनः ॥ वृद्धौतीर्थेचसंन्यस्तेतातेचपतितेस.त ॥ येभ्यएवपितादद्यात्ते
भ्योदद्यात्स्वयंसुतइति ॥ अत्रतातेसतिइतिवृद्धितीर्थसंन्यस्तपतितपदैःसंबध्यते ॥ तत्रापिवृद्धौतीर्थेचेत्याद्याभ्यांवैय्य
धिकरण्येन ॥ संन्यस्तपतितपदाभ्यांसामानाधिकरण्येन ॥ येभ्यएवेत्येवकारेणमृतमातृमातामहोपिपितृमातृभ्यपितृ
पितृभ्यःपितृमातामहेभ्यएवंदद्यात् ॥ नतुस्वीयमातृमातामहादिभ्यः ॥ पितामह प्रपितामहयोर्जीवनेविशेषउक्तः विष्णु
स्मृतौ ॥ पितरिजीवतियः श्राद्धंकुर्यात्सयेषांपिताकुर्यात्तेषांकुर्यात्पितरि पितामहेचयेषांपितामहःपितरिपितामहेप्रपिता
महेचनैवदद्यादिति ॥ तत्रमात्रादयोपितामहस्यैव ॥ मातरिजीव यांतत्पार्वणलोपः ॥ मातामहेजीवतितत्पार्वणलोपः ॥
जीवेच्चयदिवर्गाद्यस्तंवर्गंतुपरित्यजेदितिवचनात् ॥ अत्रेददेवतानिर्णयः ॥ अजीवत्पितृमातामहःपितास्वपित्रानुद्देश्यकं

पार्वणत्रयंकुर्यात् ॥ मातर्येवजीवंत्यांतत्पार्वणलोपः ॥ मातामहेएवजीवतितत्पार्वणलोपः ॥ तदापार्वणद्वयेनैवनांदि
श्राद्धस्यसिद्धिः ॥ मातृमातामहजीवने पितृपार्वणेनैवतत्सिद्धिः ॥ अजीवत्पितृपितामहोजीवत्पितामहः ॥ पितृप्रपितामह
तत्तदुद्दिश्यंपितृपार्वणंकुर्यात् ॥ पितुःपितृःपितामह प्रपितामहौचनांदिमुखाएवंप्रयोगः ॥ एवंप्रपितामहमातृजीवनेपि
पितृपितामहतत्पितामहानुद्दिश्यतत्कुर्यात् ॥ पितृपितामहौपितुःप्रपितामहश्चनांदिमुखाइति ॥ पितामहप्रपितामहयोरे
वजीवनेपितरंपितामहस्य पितामह प्रपितामहौचोद्दिश्यतत्कुर्यात् ॥ पितुःपितामहस्यपितामहप्रपितामहौचनांदिमुखाइति
एवमजीवन्मातृप्रपितामहिपार्वणेप्रयोगः ॥ प्रपितामहिमातृजीवनेमातृपितामह्यौपितुःप्रपितामहीचनांदिमुखाइति ॥
इदंचपितामहिप्रपितामह्योसपत्न्योर्मृतयोर्देवतात्वसंभवेनताभ्यांसहैवपार्वणंकार्यं ॥ एवंमातामहपार्वणेमुख्यमातामह्यादि
जीवतितत्सपत्नीभिःसपत्नीकत्वगुणोपपत्तिः ॥ नतुसपत्नमातृपार्वणनिर्वाहः ॥ परिशिष्टविरोधात् ॥ एवमजीवन्माता
महस्यमातुःपितामहजीवने ॥ मातामहतत्पितामहप्रपितामहौचनांदिमुखाइति ॥ ततस्तयोरुभयोर्जीवनेमातामहस्तत्पिता
महवृद्धप्रपितामहौचनांदिमुखाइतिप्रयोगः ॥ एवंपितृव्यः ॥ २ ॥ मातुप्रपितामहजीवनेमातामह मातुःपितामहस्य
प्रपितामहश्चनांदिमुखाइति ॥ मातुलादिः ॥ कन्याविवाहंकुमारस्योपनयन मुपनीतस्यप्रथमविवाहंवाकुर्यात् तदासंस्कार्य
स्याजीवत्पितृकत्वेतत्पित्रानुद्दिश्यपार्वणत्रयंकुर्यात् सोदरज्येष्ठभ्रातुः प्रयोगेन विशेषः ॥ तदपिपित्रादिना संस्कार्यं
पित्रादिभिरभेदात् ॥ सापत्न्यज्येष्ठस्तुमातृपार्वणे संस्कार्यस्यमातृपितामहीप्रपितामही इतिप्रयोगंकुर्यात् ॥ संस्कार्य-
स्यजीवत्पितृकत्वेसंस्कार्यपितुःपुत्रानुद्दिश्यपार्वणत्रयंकुर्यात् ॥ यदाचैककस्यशिशोर्जातकर्माद्यनेकसंस्काराएक काले
क्रियंतेतदानांदिश्राद्धंतंत्रेणकार्यं ॥ तथाचकात्यायन गणशः ॥ क्रियमाणेषुमातृभ्यःपूजनंसकृत् ॥ सकृदेवभवेत्श्राद्ध
मादौनपृथगादिस्विति ॥ केचित्तु ॥ अनेक संस्कार्य विषयानेकसंस्काराणां सहानुष्ठानेयत्रननिषिद्धंतदंगानांदि
श्राद्धीयदेवतानामभेदश्चत्रगणशः क्रियमाणानामेकंस्यान्मातृपूजनम् ॥ वृद्धिश्राद्धंतुतंत्रंस्याद्धोमस्तुस्यात्पृथक्पृथ-
गितिस्मृत्यर्थं सारवचनानुसारितंत्रानुष्ठानंबोद्धव्यमित्याहुः ॥ तच्छ्राद्धंद्विधा ॥ सपिंडकेनिरग्निकैर्नागरैरग्नौकरणन

कार्यम् ॥ तदुक्तंनागरखंडे । अनग्निरग्नौकरणंक्षयाहेपार्वणंतथा ॥ भस्मनाकृतमर्यादोनागरोयात्यधोगतिमितिवचनात्॥ एवंसपिंडकर्माभ्युदयिकंकुर्यात् ॥ अथवासंकल्पात्मकंनांदिमुखंकुर्यात् ॥ तच्चप्रयोगेवक्ष्यामः ॥ अथक्रमप्राप्तोमातृपूजन निर्णयः ॥ तत्रकात्यायनः ॥ सकलमंगलकर्मप्रारंभेषुसगणाधिपामातरःपूज्याः ॥ ताःकुत्रकथंपूज्याइत्यतआह ॥ सएव ॥ प्रतिमासुचशुभ्रासुलिखित्वावापटादिषु ॥ अपिवाक्षतपुंजेषुनैवेद्यैश्चपृथग्विधैरिति ॥ शुभ्रासुस्फटिकरजतादि मूर्त्तिषुवस्त्रकुड्यादिषुलिखितासुमूर्त्तिषुवायवपुंजेषुवाबहुप्रकारैर्गंध पुष्पधूपाक्षतादिभिःपूजनीयाःताःकाइत्याकांक्षायांस एवाह ॥ गौरींचकुमुदांचैवमाधवींरुद्रवल्लभां ॥ उमांचपार्वतीकालींसरस्वतींप्रपूजयेत् ॥ सावित्रींचसतींसंज्ञांमेधांतुष्टिं तथैवच ॥ पुष्टिंसंजिवीनीप्रोक्तामायुधामभयंकरीं॥ ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथा ॥ वाराहीचतथेंद्राणीचामुंडा सप्तमातरः ॥ दुर्गागणपतिश्चैवक्षेत्रपोवास्तुपस्तथा ॥ वृद्धौपूज्याविशेषेणपिप्पलाद प्रकीर्त्तिताइति ॥ अत्रआदौ विनायकः पूज्योअंतेचकुलदेवताइतिबह्वृचपरिशिष्टादौ बिनायकपूजनमुक्तं ॥ एतासांपूजनंतुनांदिश्राद्धात्पुर्वकाले कर्त्तव्यम् तदुक्तंकात्यायनेन ॥ अनिष्ट्वातुपितॄन्श्राद्धेवैदिकंनारभेत्स्मुतेः तत्रापिमातरःपूर्वंपूजनीयाप्रयत्नतइति ॥ एवं मातृपूजनोत्तरंवसोर्द्धारामायुष्यजपंचाहसएव ॥ कुड्यलग्नांवसोर्द्धारांसप्तधारांघृतेनतु ॥ कारयेत्पंचधारांवानातिनी चांनचोच्छ्रितां ॥ आयुष्याणिचशांत्यर्थंजप्त्वातत्रसमाहितः ॥ षड्भ्यःपितृभ्यस्तदनुभक्त्याश्राद्धमुपक्रमेदिति ॥ वसोर्द्धारा स्थलमप्युक्तमभियुक्तैः ॥ गृहनिर्गमयामेचवसोर्द्धाराचवेदिका ॥ कार्याविवाहेविद्वद्भिर्गृहेवैपूर्वदक्षिणे ॥ गृहेवैपश्चिम द्वारेतथाउत्तरएवच ॥ वेदिकाचवसोर्द्धारागृहनिर्गमदक्षिणइति ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौषट्पन्नागर द्विवेदिरविशंकरकृतेआभ्युदयिकनिर्णयरश्मिर्द्वितीयः ॥ २ ॥ अथप्रयोगः ॥ अथगृहीतकुशयवकुसुमपाणिर्यजमान ॐइहपृथिव्यामित्यादिदेशकालाद्युच्चार्यकरिष्यमाणकर्मांगत्वेनमातृपूजांकरिष्यइतिसंकल्पः ॥ ब्रह्मंजज्ञानं०॥ अव्ययंसश्चे तिजपः ॥ रक्तवस्त्रास्तृतेपीठेयवपुंजेषुवागौर्यादिमातरः दक्षिणोपक्रमाउदगपवर्गाः प्रत्यगुपक्रमाःप्रागपवर्गावासंस्थाप्य प्रतिष्ठाप्यपूजयेत् ॥ तद्यथा ॥ ॐकारस्यानुक्तगोत्रोब्रह्मापरमात्मादेवीगायत्रीभूर्वाबृहस्पत्योभरद्वाजोऽग्नीर्गायत्रीभुवः

कश्यपोमारीचोवायुरुष्णिक्स्वर्गौतमोराहूगणः सूर्योनुष्टुप्गणेशपूर्वकगौर्यादिस्थापनेविनियोगः ॥ ॐभूर्भुवःस्वर्जनदों गणपतिंस्थापयामि ॥ १ ॥ ॐभू० गौरींस्थापयामि ॥२॥ ॐभू०कुमुदांस्था० ॥ ३ ॥ ॐभू०माधवींस्था० ॥ ४ ॥ ॐभू०रुद्रवल्लभांस्था० ॥ ५ ॥ ॐभू०उमांआ० ॥६॥ ॐभू०पार्वतींआ० ॥ ७॥ ॐभू०कालींआ० ॥८॥ ॐभू० सरस्वतींआ० ॥९॥ ॐभू०सावित्रींआ० ॥१०॥ ॐभू०सतींआ० ॥११॥ ॐभू०संज्ञांआ० ॥१२॥ ॐभू०मेधांआ० ॥१३॥ ॐभू०तुष्टिंआ० ॥१४॥ ॐभू०पुष्टिंआ० ॥१५॥ ॐभू०संजीविनींआ०॥१६॥ ॐभू०आयुधामभयंकरींआ० ॥१७॥ ॐभू०कुलदेवींआ०॥१८॥ ॐभू०ब्राह्मींआ०॥१९॥ ॐभू०माहेश्वरींआ०॥२०॥ ॐभू०कौमारींआ०॥२१॥ ॐभू०वैष्णवींआ० ॥२२॥ ॐभू०वाराहींआ० ॥२३॥ ॐभू०इंद्राणींआ० ॥ २४॥ ॐभू०चामुंडांआ० ॥२५॥ ॐभू०दुर्गांआ० ॥२६॥ ॐभू०क्षेत्रपालंआ० ॥२७॥ ॐभू०वास्तोष्पतिंआ० ॥२८ ॥ अत्रकेचित्तुगौरीन्निमायेति स्थापनंकुर्वंतितन्निर्मूलं ॥ पूज्याश्चित्रेथवार्चायांवरदाभयपाणयः व्याहृत्यावाह्यस्ताः सर्वारितिभविष्य पुराणेस्पष्टमुक्तं ततःप्रतिष्ठा ॥ तदस्त्वित्यात्रेयस्त्रतिरथोविश्वेदेवास्त्रिष्टुप्प्रतिष्ठापनेविनियोगः ॥ ॐतदस्तुमित्रावरुणातदग्नेशंय्योरस्मभ्यं मिदमस्तुशस्तम् ॥ अशीमहिगाधमुतप्रतिष्ठांनमोदिवेबृहतेसादनाय ॥ १ ॥ इतिमंत्रेणगणेशःप्रतिष्ठितोभवतु ॥ गौरी सुप्रतिष्ठिताभवतु इतिपृथक्२प्रतिष्ठापयेत् ॥ अथवाप्रतिष्ठामंत्रंपठित्वा ॥ गौर्यादयःसुप्रतिष्ठिताभवंत्वितितंत्रेणप्रतिष्ठापये दितिततःआवाहनादिभिः पूर्वोक्तैःषोडशोपचारैःपंचभिरुपचारैर्वाकांडानुसमयेन पदार्थानुसमयेनयथाविभवंपूजयेत् ॥ तद्यथा ॥ ॐगणपतयेनमः आसनंसमर्पयामि ॥ एवमासनादिनीराजनांतंसमाप्य ॥ गौरीपूजनंकुर्यात् ॥ एवमन्यासा मपि ॥ अयंकांडानुसमयः ॥ अथवागणपतयेरावाहनंकृत्वागौर्यादीनामावाहनं ॥ गणेशायआसनंदत्वागौर्यादीना मासनं ॥ अयंपदार्थानुसमयः ॥ इदंपक्षद्वयंसमीचीनमतोयथारुच्यनुष्टेयम् ॥ द्वितीयपक्षेपिधूपदीपादिसर्वेउपचाराः पृथगर्पणीयाः ॥ पूजनेत्वयंप्रयोगः ॥ गणेशपूर्वकगौर्यादिमातृभ्योनमः आवाहनंसमर्पयामीत्यादि॥ अत्राप्युपचाराः पृथक्पृथक्सर्वेचगुग्गुलधूपोघृतदीपश्च ॥ ततोविशेषार्घः ॥ आयुरारोग्यमैश्वर्यंददध्वंमातरोमम ॥ निर्विघ्नंसर्वकार्येषु

कुरुध्वंसगणाधिपाः ॥ इतिमंत्रमुच्चार्यनालिकेरादिफलंसमर्पयेत् ॥ ॐगौरिन्मिमायसलिलानितक्षत्येकपदीद्विपदीसा चतुष्पदी ॥ अष्टापदीनवपदीवभूवुषीसहस्राक्षराभुवनस्यपंक्तिस्तस्यां समुद्राअधिविक्षरंति ॥ १ ॥ ॐभूर्भुवःस्वर्जनदों गणेशपूर्वकगौर्यादिमातृभ्योनमः मंत्रपुष्पांजलिंसमर्पयामि ॥ ततःकृतांजलिःसन्गौरिन्मिमायेतिसूक्तंपठेत् ॥ तद्यथा॥ गौरिन्मिमायसलिलानितक्षत्येकपदीद्विपदीसाचतुष्पदी ॥ अष्टापदीनवपदीबभूवुषीसहस्राक्षराभुवनस्यपंक्तिस्तस्याः समुद्राअधिविक्षरंति ॥ १ ॥ कृष्णन्नियानं हरयःसुपर्णाअपोवसानादिवमुत्पतन्ति ॥ तावव्वत्रन्त्सदनादृतस्यादिद्घृतेनं पृथिवींव्यूऽदुः ॥ २ ॥ अपादेतिप्रथमापद्वतीनांकस्तद्वांमित्रावरुणाचिकेत ॥ तांगर्भोभारंभरत्याचिदस्याहतंपिपर्त्यनृतं निपाति ॥ ३ ॥ विराडवाग्विराट्पृथिवीविराडंतरिक्षंविराट्प्रजापतिः ॥ विराण्मृत्युःसाध्यानामधिराजोबभूवतस्यंभूतं भव्यंवशेसमेभूतं भव्यंवशेकृणोतु ॥ ४ ॥ शशमयंधूममारादपश्यंविषूवतापरएनावरेण ॥ उक्षाणंपृश्निमपचतवीरा- स्तानिधर्माणिप्रथमान्यासन् ॥ ५ ॥ त्रयःकेशिनऋतुथाविचक्षतेसंवत्सरेवपतएकएषाम् ॥ विश्वमन्योअभिचष्टेशचीभि र्ध्राजिरेकस्यददृशेनरूपम् ॥ ६ ॥ चत्वारिवाक्परिमितापदानितानिविदुर्ब्राह्मणायेमनीषिणः ॥ गुहात्रीणिनिहितानें गयंतितुरीयंवाचोमनुष्याऽवदंति ॥ ७ ॥ इंद्रंमित्रंवरुणमग्निमाहुरथोदिव्यःससुपर्णोगरुत्मान् ॥ एकंसद्विप्रावहुधावदंत्य ग्नियमंमातरिश्वानमाहुः ॥ ८ ॥ इतिसूक्तंपठित्वाततः गणेशपूर्वकगौर्यादिमातृणांपूजन कर्मणोयन्यूनमतिरिक्तंवातत् सर्वमातृणांप्रसादात्परिपूर्णमस्तु ॥ गृहेवृद्धिशतानिभवंतु ॥ उत्तरेकर्मण्यविघ्नमस्तु ॥ यस्मात्क्रोशेतिमंत्रेणकर्मेश्वरार्पण मस्तु ॥ ॥ इतीश्रीमदथर्वगृह्यसूत्रप्रयोगभानौपट्पन्नागरद्विवेदिरविशंकरकृतेमातृपूजनप्रयोगरश्मिस्तृतीयः ॥ ३ ॥

॥ अथवसोर्द्धाराप्रयोगः ॥ देशकालाद्युच्चार्यकरिष्यमाणामुक कर्मांगत्वेनवसोर्द्धारांकरिष्यइतिसंकल्पः ॥ ब्रह्मजज्ञान मितिमंत्रंपठेत् ॥ अव्यसश्चेति० ॥ पूर्वद्वारेचाभ्यंतरेगृहेसतिगृहनिर्गमतोवामेकुडचेपश्चिमद्वारे उत्तरद्वारेचगृहेनिर्गमतो

दक्षिणेकुडचेघृतेनवादुग्धेनसप्तधाराः पंचधारावाप्राक्संस्थावाउदक्संस्थाव्राप्रादेशमात्राः॥ अस्मिन्वसुवसवोधारयंत्विंद्रः पूषवरुणोमित्रोअग्निः ॥ इममादित्याउतविश्वेचदेवाः उत्तरस्मिन्ज्योतिषिधारयंतुइतिमंत्रेणकुर्यात् ॥ ततोवसोर्द्धारा मंत्रेणधाराणामूर्ध्वभागेएकीकरणं॥ ॐसहस्रधारंशतधारमुत्समक्षितंव्यच्यमानंसलिलस्यपृष्ठे॥ ॐर्जंदुहानमनपस्फुरंतमु पासतेपितरःस्वधाभिः ॥ अनेनताधाराउर्ध्वभागेमिथःश्लिष्टाःकुर्यात् ॥ तदुपर्य्याचारात्कुंकुमेनबिंदून्कृत्वा तत्रदेवता आवाहयेदक्षतैः ॥ तद्यथा ॥ श्रियैनमः श्रियम् आ० ॥१॥ लक्ष्म्यैनमः लक्ष्मीम् आ० ॥२॥ धृत्यैनमः धृतिम् आ० ॥३॥ स्वधायैनमः स्वधाम् आ० ॥४॥ स्वाहायैनमः स्वाहाम् आ० ॥५॥ प्रज्ञायैनमः प्रज्ञाम् आ० ॥६॥ सरस्वत्यैनमः सरस्वतीम् आ०॥७॥ पंचधारापक्षेप्रज्ञासरस्वत्योरभावः ॥ ततोतदस्त्विवतिप्रतिष्ठाप्यश्रियादिवसोर्द्धारा देवताभ्योनमः इतिमंत्रेणवा पृथक्पृथक्पूर्ववदुपचारैःपूजयेत् ॥ पूजनांतेकृतांजलिः सन्वसोर्द्धारामितिवसोर्द्धारासूक्तंपठेत् ॥तद्यथा॥ वसोर्याधारामधुनाप्रपीनाघृतेनमिश्राअमृतस्यनाभयः सर्वास्ताअवरुंधेस्वर्गःषष्ट्यांशरत्सुनिधिपाअभिच्छात् ॥१॥ निधिं निधिपाअभ्येनमिच्छादनीश्वराअभितःसंतुयेऽन्ये ॥ अस्माभिर्दत्तोनिहितःस्वर्गस्त्रिभिःकांडैस्त्रीन्स्वर्गानरुक्षत ॥ २ ॥ अग्निरक्षस्तपतुयद्विदेवक्रव्यात्पिशाचइहमाप्रपास्त ॥ नुदामएनमपरुध्मोअस्मदादित्याएनमंगिरसःसचंताम् ॥ ३ ॥ आदित्येभ्योअंगिरोभ्योमध्विदंघृतेनमिश्रंप्रति वेदयामि ॥ शुद्धहस्तोब्राह्मणस्यानिहत्यैनंस्वर्गसुकृतावपीतम् ॥ ४ ॥ इदंप्रापमुत्तमंकांडमस्ययस्माल्लोकात्परमेष्ठीसमाप ॥ आसिंचसर्पिर्घृतवत्समंग्ध्येषभागोअंगिरसोनोअत्र ॥५॥ सत्याय चतपसेदेवताभ्योनिधिंशेवधिंपरिदद्मएतम् ॥ मानोद्यूतेवगान्मासमित्यांमास्मान्यस्माउत्सृजतापुरामत्॥६॥ अहंपचा म्यहंददामिममेदुकर्मन्करुणेधिजाया॥ कौमारोलोकोअजनिष्टपुत्रो१न्वारभेथांवयउत्तरावत्॥७॥ नकिल्बिषमत्रनाधारो अस्तिनयन्मित्रैःसममगानएति ॥ अनूनंपात्रंनिहितनएतत्पक्तारंपक्वःपुनराविशति ॥ ८ ॥ प्रियंप्रियाणां कृणवामस्तेषं

तुयतमेद्धिषंति ॥ धेनुरनड्वान्वयोवयआयदेवपौरुषेयमपमृत्युंनुदंतु ॥ ९ ॥ समग्रयोविदुरन्योअन्योओषधींस्सर्चतेयश्च
सिधुन ॥ यावंतोदेवादिव्या३तपंतिहिरंण्यंज्योतिःपचंतोबभूव ॥ १० ॥ इतिवसोर्द्धारासूक्तंपठित्वा ॥ ततःवसोर्द्धारा
देवतानांपूजनकर्मणोयन्न्यूनातिरिक्तंतत्सर्वंपरिपूर्णमस्तु ॥ गृहेवृद्धिशतानिभवंतु ॥ उत्तरकर्मण्यविघ्नमस्तु ॥ यस्मात्
कोशेति० ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौषट्पन्नागरद्विवेदिधीरजरामौरसरवीशंकरकृतेवसोर्द्धाराप्रयोगरश्मि
श्चतुर्थः ॥ ॥ अथायुष्यजपप्रयोगरश्मिरारभ्यते ॥ देशकालावुच्चार्यकरिष्यमाण.दः कर्मणोऽमंगलनाशनार्थं
ब्राह्मणद्वारा आयुष्यजपंकरिष्यइतिसंकल्पः ॥ ब्राह्मणहस्तेक्षतान्दत्वा ब्रह्मंजज्ञानं०॥ अन्यंसश्च० ॥ त्यमूष्वित्यथर्वा
पंक्तिः आयुष्यजपेविनियोगः ॥ ॐत्यमूषवाजि०सूक्तं ॥ आरभस्वेत्यष्टात्रिंशत्दगात्मकाथर्वसूक्तस्यब्रह्मायुर्देवताष्टानुष्टुप्
चतस्रोबृहत्यः सप्तपंक्तयः षट्तिस्रोजगत्यःअस्यकर्मणोऽमंगलनाशनार्थंजपेविनियोगः ॥ ॐआरंभस्वेमामृतस्यश्नुष्टि
मच्छिद्यमानाजरदष्टिरस्तुते ॥ असुंतआयुःपुनराभरामिरयस्तमोमोपगामाप्रमेष्ठाः ॥ १ ॥ जीवतांज्योतिरभ्येह्यर्वाङात्वा
हरामिशतशारदाय ॥ अवमुंचन्मृत्युपाशानशस्तींद्राघीयआयुःप्रतरंतेदधामि ॥ २ ॥ वातातेप्राणमविदंसूर्याचक्षुरहंतव॥
यत्तेमनस्त्वयितद्धारयामि संविस्वांगैर्वदंजिह्वयालपन् ॥ ३ ॥ प्राणेनत्वाद्विपदांचतुष्पदामग्निमिवजातमभिसंधमामि ॥
नमस्तेमृत्योचक्षुषेनमः प्राणायतेकरं ॥ ४ ॥ अयंजीवतुमामृतेमंसमीरयामसि ॥ कृणोम्यस्मैभेषजंमृत्योमापुरुषंवधीः
॥ ५॥ जीवलांनघारिषांजीवंतीमोषधीमहं ॥ त्रायमाणांसहमानां सहस्वतिमिहहुवेस्माअरिष्टतातये ॥ ६ ॥ अधिब्रूहि
शरभथाः सृजेमंतवैवसन्सर्वहायाइहास्तु ॥ भवाशर्वौमृडतंशर्मयच्छथमपसिध्यर्थंदुरितंधत्तमायुः ॥७॥ अस्मैमृत्योअधि-
ब्रूहिमंदयस्वोदितो३यमेतु ॥ अरिष्टःसर्वांगःसुस्कृजरसाशतहायनआत्मना भुजमश्नुतां ॥ ८ ॥ देवानांहेतिःपरित्वा
वृणक्तुपारयामित्वा रजसउत्वामृत्योरपीपरं ॥ आरादग्निंक्रव्यादं निरूहंजीवातवेतेपरिधिंदधामि ॥९ ॥ यत्तेनियानंरज

संमृत्योअनवधर्ष्यं ॥ पथइमंतस्माद्रक्षंतोब्रह्मास्मैवर्म कृण्मसि ॥ १० ॥ कृणोमितेप्राणापानौजरामृत्युंदीर्घमायुस्वस्ति
वैवस्वतेनप्रहितान्यमदूतांश्चरतोपसेधामिसर्वान् ॥ ११ ॥ आरादरातिंनिर्ऋतिंपरोग्राहिंक्रव्यादःपिशाचान् ॥ रक्षोय
त्सर्वंदुर्भूतंतत्तमइवापहन्मसि ॥१२॥ अग्नेष्टेप्राणममृता दायुष्मतोवन्वेजातवेदसः ॥ यथानरिष्याअमृतःसजूरसस्तत्ते
कृणोमितदुतेसमृध्यताम् ॥ १३ ॥ शिवेतेस्तांद्यावा पृथिवीअसंतापेअभिश्रियौ ॥ शंतेसूर्यआतपतुशंवातोवातुतेहृदे ॥
शिवाअभिरक्षंतुत्वापोदिव्याःपयस्वतीः ॥१४॥ शिवास्तेसंत्वोषधयःउत्वाहार्षमधरस्याउत्तरांपृथिवीमभि ॥ तत्रत्वादि
त्यौरक्षतांसूर्याचंद्रमसावुभा ॥ १५ ॥ यत्तेवासः परिधानंयानिविंकृणुषेत्वं ॥ शिवंतेतन्वे३तकृण्मः संस्पर्शेद्रूक्ष्णमस्तुते
॥१६॥ यत्क्षुरेणमर्चयंतासुतेजसावप्तावपसिकेशश्मश्रु ॥ शुभंमुखमानआयुःप्रमोषीः ॥ १७ ॥ शिवौतेस्तांव्रीहियवा
वबलासावदोमधौ ॥ एतौयक्ष्मंविबाधेतेएतौमुंचतोअंहसः ॥ १८ ॥ यदश्नासियत्पिबसिधान्यंकृष्याःपयः ॥ यदाद्यं१
यदनाद्यंसर्वंतेअन्नमविषंकृणोमि ॥ १९ ॥ अन्हेचत्वारात्रयेचोभाभ्यांपरिदद्मसि ॥ अरायेभ्योजिघत्सुभ्यइमंमेपरि
रक्षत ॥२०॥ शतंतेयुतंहायनान्द्वेयुगेत्रिणिचत्वारिकृण्मः ॥ इंद्राग्नीविश्वेदेवास्तेनुमन्यंतामहृणीयमानाः ॥ २१ ॥ शरदे
त्वाहेमंतायवसंतायग्रीष्मायपरिदद्मसि ॥ वर्षाणितुभ्यंस्योनानियेषुवर्द्धंतओषधीः ॥ २२ ॥ मृत्युरीशेद्विपदांमृत्युरीशे
चतुष्पदाम् ॥ तस्मात्वांमृत्योगोपतेरुद्धरामिसमाबिभेः ॥ २३ ॥ सोरिष्टनमरिष्यसिनमरिष्यसिमाबिभेः ॥ नवैतत्र
म्रियंतेनोयंत्यधमंतमः ॥ २४ ॥ सर्वोवैतत्रजिवतिगौरश्वःपुरुषःपशुः ॥ यत्रेदंब्रह्मक्रियतेपरिधिर्जीवनायकम् ॥ २५ ॥
परित्वापातुसमानेभ्योभिचारात्सबंधुभ्यः ॥ अमम्रिर्भवामृतोतिजीवोमातेहासिषुरसवःशरीरं ॥ २६ ॥ येमृत्यवएकशतं
यनाष्ट्रातितार्याः ॥ मुंचंतुतस्मात्वांदेवाअग्नेर्वैश्वानरादधिः ॥ २७ ॥ अग्नेःशरीरमसिपारयिष्णुरक्षोहासिसपत्नहा ॥

अथों अमीवचातनः पूतुदुर्नामभेपजं ॥ २८ ॥ अनेनसूक्तजपेनयजमानस्यकर्मण्यविघ्नमस्तु ॥ ॐ शांतिः शांतिः शांतिः ॥
यस्मात्कोशेतिमंत्रेणकर्मसमापनम् ॥ ॥ इतीश्रीमदथर्वगृह्यसूत्रप्रयोगभानौषट्पदागर द्विवेदिरविशंकरकृतेआयुष्य
जपप्रयोगरश्मिःपंचम ॥ ५ ॥ ॥ अथनांदिश्राद्धम् ॥ तत्रपित्र्यमपिसर्वयज्ञोपवीतीप्राङ्मुखउदङ्मुखोवान्यकृत
दक्षिणजानुमदक्षिणधर्मेणदेवतीर्थेनवैऋजुदर्भैश्चमातृपार्वणपूर्वकंपूर्वाह्णेकुर्यात् ॥ पूर्वाह्णःप्रहरःसार्धोमध्यान्हःप्रहरंतथा ॥
आतृतीयादपराह्णःसायान्हश्चततःपरिमितिगोभिलोक्तेः ॥ तच्चसपिंडकंकुर्यात् ॥ अथवासंकल्पश्राद्धंकुर्यात् ॥ अत्र
चत्वारिपार्वणानित्रीणिवा ॥ तत्रप्रथमंमातृपार्वणंद्वितीयंपितृपार्वणं तृतीयंमातामहपार्वणं चतुर्थंमातामहीपार्वणम् ॥
पार्वणद्वयपक्षेसपत्नीकामातामहाः ॥ अथप्रयोगः ॥ कृतनित्यक्रियोयजमानः श्रीपर्ण्यादिदारुमयेउपविश्यजीवास्थे
त्याचम्य ॥ ब्रह्मजज्ञानं० ॥ अव्यसश्च० ॥ सत्यवसुसंज्ञकाः विश्वेदेवाःनांदिमुखाः ॐ भूर्भुवःस्वर्जनदोइदंतःपाद्यंवः
स्वाहानमःइयंचवृद्धिः ॥ इतिसदूर्वाक्षतजलंपात्रेक्षिपेत् ॥ एवमग्रेपि ॥ प्रपितामहीपितामहीमातरःनांदिमुख्यः
ॐ भूर्भुवःस्वर्जनदोइदंवःपाद्यंस्वाहानमः इयंचवृद्धिः ॥ प्रपितामहपितामहपितरः ॐ भूर्भुवःस्वर्जनदोइदंवःपाद्यंस्वाहा
नमइयंचवृद्धिः ॥ मातुःप्रपितामहपितामहमातामहाःनांदिमुखाःसपत्नीकाः ॐ भूर्भुवःस्वर्जनदोइदंवःपाद्यंस्वाहानमइयं
चवृद्धिः ॥ द्वि० ॥ देशकालौस्मृत्वा० अमुककर्मांगतयाविहितंसंकल्पविधिनानांदिश्राद्धंकरिष्ये ॥ सत्यवसुसंज्ञका
विश्वेदेवानांदिमुखाः भूर्भुवःस्वर्जनदोइदंवःआसनगंधाद्युपचारकल्पनंस्वाहा नमइयंचवृद्धिः ॥ प्रपितामहीपितामही
मातरःनांदिमुखाः भूर्भुवःस्वर्जनदोइदंवः आसनगंधाद्युपचारकल्पनंस्वाहा नमइयंचवृद्धिः ॥ प्रपितामहपितामहपितरः
नांदिमुखा भूर्भुवःस्वर्जनदोइदंवः आसनगंधाद्युपचारकल्पनंस्वाहा नमइयंचवृद्धिः ॥ मातुःप्रपितामह मातुःपितामह
मातामहाःपत्नीसहिताःनांदिमुखाः भूर्भुवःस्वर्जनदोइदंवःआसनगंधाद्युपचारकल्पनंस्वाहा नमइयंचवृद्धिः ॥ सत्यवसु
संज्ञकाविश्वेदेवाः भूर्भुवःस्वर्जनदोइदंवःयुग्मब्राह्मणभोजनपर्याप्तमन्नंयथाशक्तिहिरण्यंवाअमृतरूपेणस्वाहासंपद्यतांवृद्धिः॥
गोत्राप्रपितामहीपितामहीमातृभ्यःनांदीमुखीभ्यः ॥ दास्यमानंब्राह्मणयुग्मभोजनपर्याप्तमन्नंयथाशक्तिहिरण्यंवाअमृत

रूपेणस्वाहा संपद्यतांवृद्धिः ॥ गोत्रेभ्यःप्रपितामहपितामहपितृभ्योनांदीमुखेभ्यः भू० दास्यमानंब्राह्मणयुग्मभोजनं
पर्याप्तमन्नंयथाशक्तिहिरण्यंवाअमृतरूपेणस्वाहासंपद्यतांवृद्धिः ॥ गोत्रेभ्यःमातुःप्रपितामह मातुःपितामहमातामहेभ्यः
पत्नीसहितेभ्यःनांदीमुखेभ्यः भू० दास्यमानंब्राह्मणयुग्मभोजनपर्याप्तमन्नं यथाशक्तिहिरण्यंवाअमृतरूपेणस्वाहासंपद्यतां
वृद्धिः ॥ ॐ स्वस्तिमात्रउतपित्रेनोअस्तु स्वस्तिगोभ्योजगतेपुरुषेभ्यः ॥ विश्वंसुभूतंसुविदत्रंनोअस्तु ज्योगेवदृशेमसूर्यं
अनेननांदीश्राद्धांगब्राह्मणभोजनेन नांदीश्राद्धांगदेवताःप्रीयंतांवृद्धिः ॥ नांदीश्राद्धंसंपन्नंसुसंपन्नंसुप्रोक्षितमस्तुशिवाः
आपःसंतु ॥ नांदिमुखाःमातरः प्रीयंताम् ॥ नांदिमुखाःपितरःप्रीयंताम् ॥ नांदिमुखा मातामहाः प्रीयंताम् ॥
ततोप्रार्थयेत् ॥ अघोराःपितरःसंतु ॥ गोत्रंनोवर्द्धताम् ॥ दातारोनोभिवर्द्धताम् ॥ वेदाश्चनोभिवर्द्धताम् ॥ श्रद्धाच
नोमाविगमत् ॥ वहुदेयंचनोस्तु ॥ अन्नंचनोबहुभवेत् ॥ अतिथीश्चलभेमहि ॥ याचिरश्चनःसंतु ॥ मायाचिष्म
कंचन ॥ एताःसत्याआशिषःसंतु ॥ प्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरिभूर्जजान ॥ यत्कामास्तेजुहुमस्तन्नो
अस्तुवयंस्यामपतयोरयीणाम् ॥ इतिमंत्रेणनमस्कारः ॥ अस्यनांदीश्राद्धस्यप्रतिष्ठासिध्यर्थं सत्यवसुसंज्ञकेभ्योविश्वेभ्यो
देवेभ्यः द्राक्षामलकमयींनिष्क्रयणीं दक्षिणांदातुमहमुत्सृजे ॥ एवंगोत्राभ्यः प्रपितामहीपितामही मातृभ्यः द्राक्षा
मलकमयींनिष्क्रयणींदक्षिणादातुमहमुत्सृजे ॥ एवंप्रपितामहादीनांमातामहानांचदक्षिणांदत्वा ॥ इलामग्नइतिवाद्यं० ॥
देशकालौस्मृत्वा० अमुककर्मांगतयाविहितं संकल्पविधिनापार्वण त्रयात्मकनांदीमुख श्राद्धस्यविधेर्यन्युनंयदति रिक्तं
तत्सर्वंपरिपूर्णमस्त्विति निवेदयेत् ॥ ततस्त्यसूषुवाजिनमितिदुर्वाग्रेण मंत्रपूर्वंविसृजेत् ॥ ततो पितॄन्मातामहांश्च ॥
ततोविश्वेदेवान ॥ ततोजलधाराम् ॥ आमावाजस्यप्रसवोजगम्यादेमेद्यावापृथिवीविश्वरूपे ॥ आमागंतांपितरामातरा
चामासोमोमृतत्वेनगम्यादितिजलधारयाप्रदक्षिणीकृत्य ॥ यत्तेपितृभ्यइतिसूक्तंपठेत् ॥ तद्यथा ॥ यत्तेपितृभ्योददतो
यज्ञेवानामजगृहुः ॥ संदेश्याउत्सर्वस्मात्पापादिमामुंचंतुतत्वौषधीः ॥ १ ॥ देवैनसात्पित्र्यांनामग्राहात्संदेश्याऽदभि

निष्कृंतात् ॥ मुंचंतुत्वावीरुधोवीर्येऽणब्रह्मणरुग्भिःपर्यसऋषीणाम् ॥ २ ॥ यथावातश्च्यावयंति भूम्यांरेणुमंतरिक्षा च्चाभ्रम् ॥ एवामत्सर्वं दुर्भूतंब्रह्मनूत्तमपायति ॥ ३ ॥ अपक्रामनानदतीविनद्धागर्दभीव ॥ कर्तृन्नक्षस्वेतोनुत्ताब्रह्मणा वीर्याऽवता ॥ ४ ॥ अयंपंथाकृत्येतित्वानयामोभिप्रहितांप्रतित्वा प्रहिण्मः ॥ तेनाभियाहिभंजत्यनस्वतीषवाहिनी विश्वरूपाकुरूटिनी ॥ ५॥ पराक्तेज्योतिरपथंतेअर्वागन्यत्रास्मदयनाकृणुष्व ॥ परेणेहिनवतिनाव्या३अतिदुर्गास्रोत्या माक्षंणिष्ठाःपरेहि ॥ ६ ॥ वातइववृक्षान्निमृणीहिपादयमागामश्वंपुरुषमुच्छिषएषाम् ॥ कर्तृन्निवृत्सेतःकृत्येमजास्त्वाय बोधय ॥ ७ ॥ यांतेबर्हिषियांश्मशानेक्षेत्रेकृत्यांवलगंवानिचख्नुः ॥ अग्नौवात्वागार्हपत्येभिचेरुःपाकंसंतंधीरतराअ नागसम् ॥ ८ ॥ उपाहृतमनुबद्धंनिखातं वैरत्सार्यन्वविदामकर्त्रीं ॥ तदेतुयतआभृतंतत्राश्वइवविवर्त्ततांहंतुकृत्याकृतः प्रजाम् ॥ ९ ॥ स्वायसाअसयःसतिनोगृहेविद्मातेकृत्येयतिधापरूंषि ॥ उत्तिष्ठैवपरेहितोज्ञातेकिमिहेच्छसि ॥ १० ॥ ॥ इतिसूक्तंपठित्वा ॥ ततःआयुर्विद्यांधनंदत्तयशःशौर्यंचपुष्कलं ॥ पुत्रानदत्तसुखंदत्तसर्वान्कामांश्चदत्तमेइतिप्रार्थ्य ॥ ॐस्वस्तीत्युक्त्वा ॥ यस्मात्कोशेतिकृतंकर्मेश्वरार्पणंकुर्यात् ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौरविशंकरकृते नांदि श्राद्धप्रयोगरश्मिः षष्ठः ॥ ६ ॥

॥ अथारणीपूजनप्रयोगरश्मिः ॥ तच्चपरिशिष्टोक्तमेवनतुसूत्रोक्तं ॥ तदुक्तंपरिशिष्टे ॥ समिधोआनयेत्समगित्युप क्रम्यधूपदीपैश्चनैवेद्यैःसमिधांपूजयेद्बुधइत्युक्तत्वात् ॥ अथप्रयोगः ॥ प्रातःस्नात्वाशुद्धेवाससीपरिधायग्रामादरण्यंगत्वा स्वयंपूर्वाभिमुखो भूत्वा औषधीगणोक्तमंत्रेण औषधींप्रच्छिद्यमौंजी विवाहमंडपमध्ये आनीय नांदिश्राद्धानंतरं पुण्याह वाचनात्प्राक् उत्तरतः२पात्रेसंस्थाप्य वाह्यदेवताश्चपूजयेत् ॥ तद्यथा ॥ जीवास्थेत्यादिविधिवदाचम्यप्राणानायम्य॥ ब्रह्मंजज्ञानं०॥ अव्ययसश्च० ॥ इतिमंत्रंजप्त्वा ॥ हस्तेजलमादायदेशकालावुच्चार्य० अमुककर्मांगत्वेनअरण्यादिदेवतानां

स्थापनपूजनेकरिष्ये इतिसंकल्पः ॥ सुगंधितैलहरिद्रादिभिःसंलेप्य ॥ उष्णोदकेनाभिषिच्य ॥ दध्यादूर्वादिभिःसंपूज्य ॥ शीतोदकेनउषतीःकव्यलेतिअभिषिंच्यनूतने हरिद्रारंजितेवस्त्रेतंदुलपुंजोपरिवाउदक्संस्थाः पृथक्पृथक्संस्थाप्य देवता आवाहयेत् ॥ ॐअग्निर्वनस्पतीनामधिपतिः समावतुअस्मिन्ब्रह्मण्यस्मिन्कर्मण्यस्यां पुरोधायामस्यांप्रतिष्ठायामस्यां चित्यामस्यामाकूत्यामस्यामाशिषस्यां देवहूत्यांस्वाहा ॥ अरण्यैनमः अरणींआवाहयामि ॥१॥ ॐऊर्जंबिभ्रद्वसुवनिः सुमेधाअघोरेणचक्षुषा ॥ मित्रियेणगृहानौमि सुमनावंदमानोरमध्वंमाबिभीतमत् ॥ ॐवन्यैनमः वनिंआवाहयामि ॥ ॥२॥ यद्राजानंशकधूमंचक्षत्राप्येनकृण्वता ॥ भद्राहमस्मैततोराष्ट्रमजायत ॥ सोम्यैनमः सौमींआवाहयामि० ॥ ३ ॥ ओषधीनामहंवृण उर्वरीरिवसाधुया ॥ नयाम्यर्वतीरिवाहेनिरैतुतेविषं ॥ ओषध्यैनमः ओषधींआवाहयामि ॥ ४ ॥ यस्यभूमिंप्रथमांतरिक्षमुतोदरं दिवं॥ यश्चक्रेमूर्द्धानंतस्मैज्येष्ठायब्रह्मणेनमः ॥ ॐभूमिवर्द्धन्यैनमः भूमिवर्द्धिनींआवाह- यामि ॥ ५ ॥ ॐजीवास्थजीव्यासंसर्वमायुजआवाहयामि ॥ ६ ॥ यज्ञस्यसंततीरसियज्ञस्यत्वासंतत्यासंतनोमि ॥ यज्ञकर्त्र्यैनमः यज्ञकर्त्रींआवाहयामि ॥ ७ ॥ ॐगौरिन्मि०क्षराभुवनस्यपंक्तिःस्तस्यासमुद्राअधिविक्षरंति ॥ गौर्य्यैनमः गौरींआवाहयामि ॥ ८ ॥ इत्यावाह्याक्षतैःस्थापयेत् ॥ ॐहिरण्यवर्णाःशुचयःपावकायासुजातःसवितायास्वग्निः ॥ याअग्निगर्भंदधिरेसुवर्णास्तानआपः संस्योनाभवंतु ॥ यासांराजावरुणोयातिमध्येसत्यानृते अवपश्यंजनानाम् ॥ याअग्निंगर्भंदधिरेसुवर्णास्ता० ॥ यासांदेवादिविकृण्वंतिभक्षंयाअंतरिक्षेबहुधाभवंति ॥ याअग्निगर्भंदधिरेसुवर्णास्ता०॥ शिवेनंमाचक्षुषापश्यतापः शिवयातन्वोपस्पृशतत्वचंमे ॥ घृतश्च्युतःशुचयोयाःपावकास्तान० ॥ गंधद्वारां० ॥ ॐदधि क्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः ॥ सुरभिनोमुखाकरत्प्रणआयुंषितारिषत् ॥ अघद्विष्टादेवजातावीरुच्छपथयो- पनी ॥ आपोमलमिवप्राणेक्षीत्सर्वान्मच्छपथांअधि ॥ इतिअरण्याधष्टदेवताःस्थापयामि इतिस्थापयेत् ॥ अथवाएभि

मैत्रैः पृथक्पृथक्स्थापयेत् ॥ तदस्त्विति ब्रह्मासोमस्त्रिष्टुप् अरण्यादिदेवताप्रतिष्ठापने विनियोगः ॥ ॐ तदस्तु ॥ अरण्याद्यावाहितदेवतासुप्रतिष्ठिताभवंत्विन्यक्षतैः प्रतिष्ठाप्य ॥ ॐ भूर्भुवःस्वर्जनदेंआसनंस० ॥ ॐ भू०पादयोःपाद्यंस० ॥ पवमर्घ्यमाचमनीयस्नानंदत्वा ॥ सुमंगलीरियंवधुरिमांसमेतपश्यत ॥ सौभाग्यमस्मैदत्वा दौर्भाग्यविपरेतनाइतिसुगंध तैलाभ्यंगस्नानंस० ॥ अथोष्णोदकेनस्नानं ॥ ॐ उपतीःकन्यलाइमाः पितृलोकात्पतियतिः ॥ अवदीक्षामसृक्षतस्वाहा इत्युष्णोदकेनसंस्नाप्य ॥ ॐ भूर्भुवःस्वर्जनदेंस्नानांते आचमनीयं ॥ ॐ भू०वस्त्रमाचमनीयं चंदनपुष्पाक्षतसौभाग्यद्रव्य धूपदीपनैवेद्याद्युपचारैःसंपूज्यविशेषार्घ्यः ॥ ॐ याःफलिनिर्या अफलाअपुष्पायाश्चपूष्पिणिः ॥ बृहस्पतिमसूतास्तानो मुंचत्वंहसः ॥ ॐ भूर्भुवः०॥ नालिकेरार्घः ॥ अग्निर्वनस्पतीनामितिमंत्रैःपुष्पांजलिः ॥ अरण्याद्यावाहितदेवताभ्योनमः नमस्कारान्समर्पयामि ॥ ततःइमंबध्नामितेइतिसूक्तंपठेत् ॥ तद्यथा ॥ इमंबध्नामितेमणिंदीर्घायुत्वायतेजसे ॥ दर्भंसपत्न दंभनंद्विषतस्तपनंहृदः ॥ १ ॥ द्विषतस्तापयन्हृदः शत्रूणांतापयन्मनः ॥ दुर्हार्दःसर्वांस्त्वंदर्भघर्मइवाभीन्संतापयन् ॥ ॥२॥ घर्मइवाभितपंदर्भद्विषतोनिपतन्मणे ॥ हृदःसपत्नानांभिंधिंद्रइवविरुजंवलं ॥३॥ भिंधिदर्भसपत्नानांहृदयंद्विषतां मणे ॥ उद्यंत्वचंभिवभूम्याःशिरएषांविपातातय ॥ ४॥ भिंधिदर्भसपत्नांमेभिंधिमेपृतनायतः भिंधिमेसर्वांदुर्हार्दोभिंधि मेद्विषतोमणे ॥ ५ ॥ छिंधिदर्भसपत्नांन्मेछिंधिमेपृतनायतः ॥ छिंधिमेसर्वांदुर्हार्दोछिंधिमेद्विषतोमणे ॥ ६ ॥ वृश्च दर्भसपत्नांन्मेवृश्चमेपृतनायतः ॥ वृश्चमेसर्वांदुर्हार्दोवृश्चमेद्विषतोमणे ॥ ७ ॥ कृंतदर्भसपत्नांन्मेकृंतमेपृतनायतः ॥ कृंतं मेसर्वांदुर्हार्दोकृंतमेद्विषतोमणे ॥८॥ पिंशदर्भसपत्नांन्मेपिंशमेपृतनायतः ॥ पिंशमेसर्वांदुर्हार्दोपिंशमेद्विषतोमणे ॥९॥ विध्यदर्भसपत्नांन्मेविध्यमेपृतनायतः ॥ विध्यमेसर्वांदुर्हार्दोविध्यमेद्विषतोमणे ॥ १०॥ ॥ निक्षदर्भसपत्नांन्मे निक्षमेपृतनायतः ॥ निक्षमेसर्वांदुर्हार्दोनिक्षमेद्विषतोमणे ॥ १॥ तृंधिदर्भसपत्नांन्मेतृंधिमेपृतनायतः ॥ तृंधिमेसर्वांदुर्हा

र्दोतृंधिमेद्विषतोमणे ॥ २ ॥ रुंधिदर्भसपत्नांन्मेरुंधिमेपृतनायतः ॥ रुंधिमेसर्वांदुर्हार्दोरुंधिमेद्विषतोमणे ॥ ३ ॥ मृण दर्भसपत्नांन्मेमृणमेपृतनायतः ॥ मृणमेसर्वांदुर्हार्दोमृणमेद्विषतोमणे ॥ ४ ॥ मंथदर्भसपत्नांन्मेमंथमेपृतनायतः ॥ मंथमेसर्वांदुर्हार्दोमंथमेद्विषतोमणे ॥ ५ ॥ पिंठिदर्भसपत्नांन्मेपिंठिमेपृतनायतः ॥ पिंठिमेसर्वांदुर्हार्दःपिंठिमेद्विषतोमणे ॥६॥ ओषदर्भसपत्नांन्मेओषमेपृतनायतः ॥ ओषमेसर्वांदुर्हार्दःओषमेद्विषतोमणे ॥ ७ ॥ दहदर्भसपत्नांन्मेदहमेपृतना यतः ॥ दहमेसर्वांदुर्हार्दोदहमेद्विषतोमणे ॥ ८ ॥ जहिदर्भसपत्नांन्मेजहिमेपृतनायतः ॥ जहिमेसर्वांदुर्हार्दोजहिमे द्विषतोमणे ॥ ९ ॥ ॥ यत्तेदर्भजरामृत्युःशतंवर्मसुवर्मते ॥ तेनेमंवर्मिणंकृत्वासपत्नांजहिवीर्यैः ॥ १ ॥ शतंतेदर्भ वर्माणिसहस्रंवीर्याणिते ॥ तमस्मैविश्वेत्वांदेवाजरसेभर्त्तवाअदुः ॥ २ ॥ त्वामाहुर्देववर्मत्वांदर्भंब्रह्मणस्पतिम् ॥ त्वामिंद्रस्याहुर्वर्मत्वंराष्ट्राणिरक्षसि ॥ ३ ॥ सपत्नक्षयणंदर्भद्विषतस्तपनंहृदः ॥ मणिंक्षत्रस्यवर्धनंतनूपानंकृणोमिते ॥४॥ यत्संमुद्रोअभ्यक्रंदत्पर्जन्योविद्युतासह ॥ ततोहिरण्ययोबिंदुःस्ततोदर्भोअजायत ॥५॥ ॥ औदुंबरेणमणिनापुष्टिकामायवेधसा ॥ पशूनांसर्वेषांस्फातिंगोष्ठेमेसवितांकरत् ॥ १॥ योनोअग्निर्गार्हपत्यःपशूनामधिपाअसत् ॥ औदुंबरो वृषामणिःसमांसृजतुपुष्ट्या ॥२॥ करीषिणींफलवतींस्वधामिराचनोगृहे ॥ औदुंबरस्यतेजसाधातापुष्टिंदधातुमे ॥३॥ यद्विपाच्चतुष्पाच्चयान्यन्नानियेरसाः ॥ गृहेऽहंत्वेषांभूमानंबिभ्रदौदुंबरंमणिं ॥ ४ ॥ पुष्टिंपशूनांपरिजग्रभाहंचतुष्पदां द्विपदांयच्चधान्यम् ॥ पयःपशूनांरसमोषधीनांबृहस्पतिः सवितामेनियंछात् ॥ ५ ॥ अहंपशूनामधिपाअसानिमयिपुष्टि पुष्टपतिर्दधातु ॥ मह्यमौदुंबरोमणिर्द्रविणानिनियच्छतु ॥ ६॥ उपमौदुंबरोमणिःप्रजयाचधनेनच ॥ इंद्रेणजिन्वितोमणि रामांगात्सहवर्चसा ॥७॥ देवोमणिःसंपत्नहाधनसाधनंसातये ॥ पशोरन्नस्यभूमानंगवांस्फातिंनियंछतु ॥८॥ यथाग्रे

त्वंवनस्पतेपुष्ट्यासहजज्ञिषे ॥ एवाधनस्यमेस्फातिमादधातुसरस्वती ॥ ९ ॥ आमेधनंसरस्वतीपयस्फातीचधान्यं ॥ सिनीवाल्युपावहादयंचौदुंबरोमणिः ॥ १० ॥ त्वंमणीनामधिपावृषासित्वयि पुष्टंपुष्टपतिर्जजानत्वयीमेवाजाद्रविणानि सर्वौदुंबरःसत्वमस्मत्सहस्वारादरातिममतिंक्षुधंच ॥ ११ ॥ ग्रामणीरसिग्रामणीरुत्थायाभिषिक्तोभिमासिंचवर्चसा ॥ तेजोसितेजोमयिधारयाधिरयिरसिरयिमेधेहि ॥ १२ ॥ पुष्टिरसिपुष्ट्यामासमंङ्धिगृहमेधिगृहपतिमाकृणु ॥ औदुंबरः सत्वमस्मासुधेहिरयिंचनः सर्ववीरंनियच्छरायस्पोषायमतिमुंचेअहंत्वां ॥ १३ ॥ अयमोदुंबरोमणिवीरोवीरायबध्यते॥ सनःसनिंमधुमतींकृणोतुरयिंचनः सर्ववीरंनियच्छात् ॥ १४ ॥ शतकांडोदुश्च्यवनःसहस्रपर्णउत्तिरः॥ दर्भोयउग्रऔषधीं स्तंते बध्नाम्यायुषे ॥ १ ॥ नास्यकेशान्प्रवपंतिनोरसिताडमाघ्नते ॥ यस्माअच्छिन्नपर्णेनदर्भेणशर्मयच्छति ॥२॥ दिवितेतूलमोषधेपृथिव्यामसिनिष्ठितः ॥ त्वयासहस्रकाण्डेनायुष्प्रवर्द्धयामहे ॥ ३ ॥ तिस्रोदिवोअत्यतृणंतिस्रइमाः पृथिवीरुत ॥ त्वयाहदुर्हार्दोजिह्वानितृणद्मिवचांसि ॥ ४ ॥ त्वमसिसहमानोहमस्मिसहस्वान् ॥ उभौसहस्वंतौभूत्वासपत्नान्सहिषीमहि ॥ ५ ॥ सहस्वनोअभिमातिंसहस्वपृतनायतः ॥ सहस्वसर्वान्दुर्हार्दःसुहार्दोमेबहुकृधि ॥ ६ ॥ दर्भेणदेवजातेनदिविष्टंभेनशश्वदित् ॥ तेनाहंछश्वतोजनांअसनंसनवानिच ॥ ७ ॥ प्रियंमादर्भकृणुब्रह्मराजन्याभ्यांशूद्रायचार्यायच ॥ यस्मैचकामयामहेसर्वस्मैचविपश्यते ॥ ८ ॥ योजायमानःपृथिवीमदृंहद्योअस्तभ्नादंतरिक्षंदिवंच ॥ यंबिभ्रतंननुपाप्माविवेदसनोयंदर्भोवरुणोदिवाकः ॥ ९ ॥ सपत्नहाशतकाण्डःसहस्वानोषधीनांप्रथमःसंबभूव ॥ सनोयंदर्भःपरिपातुविश्वतस्तेनसाक्षीयपृतनाःपृतन्यतः ॥ १० ॥ ॥ सहस्रार्घःशतकाण्डःपयस्वानपामग्निर्वीरुधांराजसूयम् ॥ सनोयंदर्भःपरिपातुविश्वतोदेवोमणिरायुषासंसृजातिनः ॥ १ ॥ घृतादुल्लुप्तोमधुमान्पयस्वान्भूमिदृंहोच्युतश्च्यावयिष्णुः॥

नुदंत्सपत्नानधरांश्चकृण्वन्दर्भारोहमहतामिंद्रियेण ॥ २ ॥ त्वंभूमिमत्येष्योजसात्वंवेद्यांसीदसिचारुरध्वरे ॥ त्वांपवित्रमृषयोभरंतस्त्वंपुनीहिदुरितान्यस्मत् ॥ ३ ॥ तीक्ष्णोराजाविषासहिरक्षोहाविश्वचर्षणीः ॥ ओजोदेवानांबलमुग्रमेतत्तंते बध्नामिजरसेस्वस्तये ॥ ४ ॥ दर्भेणत्वंकृणवद्वीर्याणिदर्भंबिभ्रदात्मनामाव्यथिष्टाः ॥ अतिष्ठायावर्चसाधान्यान्सूर्यइवाभाहिप्रदिशश्चतस्रः ॥ ५ ॥ ॥ इतिसूक्तंपठित्वा अग्रपूर्वोच्चरित० अनयापूजयाअरण्याद्यावाहितदेवताःप्रीयंतांनमम ॥ यस्मात्कोशेतिकृतंकर्मेश्वरार्पणंकुर्यात् ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौषट्पत्नागरद्विवेदिरविशंकरकृतेपरिशिष्टोक्तअरण्यादिपूजनप्रयोगरश्मिः सप्तमः ॥ ७ ॥

॥ अथ सूत्रोक्तशांतिकलशकरणप्रयोगः ॥ तत्रकृतनित्यक्रियोयजमानो संस्कारात्पुर्वेद्युःअल्पेषुकर्मसुतद्दिनेवा शांतिकलशोदकंकार्यसर्वकर्मोपयोगित्वात् ॥ तद्यथा ॥ ब्रह्मजज्ञानंअन्यसश्चेतिमंत्रौपठित्वा ॥ शांतिगणास्यब्रह्मासोमोष्णिक्संस्कृतिः सर्वाणिछंदांसिशांतिगणेनशांतिकलशानुमंत्रणेविनियोगः ॥ ॐशन्नोदेवीरभिष्टयआपोभवंतुपीतये ॥ शंयोरभिस्रवंतुनइतिमंत्रेणकलशेतीर्थोदकादिशुद्धजलमापूर्य ॥ ततःशांतिगणपाठंकुर्यात् ॥ तद्यथा ॥ ॐशन्नोदेवीरभिष्टयआपोभवंतुपीतये ॥ शंयोरभिस्रवंतुनः ॥ १ ॥ ॐतत्सवितुर्वरेण्यंभर्गोदेवस्य धीमहि ॥ धियोयोनःप्रचोदयात् ॥ २ ॥ ॐअंबयोयंत्यध्वभिर्जामयोअध्वरीयतां ॥ पृंचतीर्मधुनापयः ॥ ३ ॥ शांताद्यौःशांतापृथिवीशांतमिदमुर्व३तिरिक्षं ॥ शांताउदन्वतीरापः शांतानःसंत्वोषधीः ॥ ४ ॥ शांतानिपूर्वरूपाणिशांतन्नोअस्तुकृताकृतम् ॥ शांतंभूतंचभव्यंचसर्वमेवशमस्तुनः ॥ ५ ॥ इयंयापरमेष्ठिनीवाग्देविब्रह्मसंशिता ॥ ययैवससृजेघोरंतयैवशांतिरस्तुनः॥ ६॥ इदंयत्परमेष्ठिनंमनोवांब्रह्मसंशितम् ॥ येनैवससृजेघोरंतेनैवशांतिरस्तुनः ॥ ७ ॥ इमानियानिपंचेंद्रियाणिमनःषष्ठानिमेहृदिब्रह्मणासंशितानि ॥ यैरेवससृजेघोरंतैरेवशांतिरस्तुनः ॥ ८ ॥ शन्नोमित्रःशंवरुणःशंविष्णुः शंप्रजापतिः ॥

शन्नइंद्रोबृहस्पतिः शन्नोभवत्वर्यमा ॥ ९ ॥ शन्नोमित्रःशंवरुणःशंविवस्वान्छमंतकः ॥ उत्पाताःपार्थिवांतरिक्षाःशन्नो
दिविचराःग्रहाः ॥१० ॥ शन्नोभूमिर्वेप्यमानाःशमुल्कानिर्हतंचयत् ॥ शंगावोलोहितक्षीराःशंभूमिरवतीर्यतीः ॥११॥
नक्षत्रमुल्काभिहतंशमस्तुनःशन्नोभिचाराः शमुशंतुकृत्याः ॥ शन्नोनिखातावलगाःशमुल्कादेशोपसर्गाःशमुनोभवंतु ॥
॥१२॥ शन्नोग्रहाश्चांद्रमसाःशमादित्यःश्चराहुणा ॥ शन्नोमृत्युर्धूमकेतुःशंरुद्रास्तिग्मतेजसः ॥१३॥ शंरुद्राःशंवसवः
शमादित्याःशमग्नयः ॥ शन्नोमहर्षयोदेवाः शंदेवाःशंबृहस्पतिः ॥१४॥ ब्रह्मप्रजापतिर्धातालोकावेदाःसप्तऋषयोग्नयः॥
तैर्मेकृतंस्वस्त्ययनमिंद्रोमेशर्मयच्छतु ब्रह्मामेशर्मयच्छतु ॥ १५ ॥ विश्वेमेदेवाःशर्मयच्छंतु सर्वेमेदेवाःशर्मयच्छंतु ॥ १६ ॥
यानिकानिचिच्छांतानिलोकेसप्तऋषयोविदुः ॥ सर्वाणिशंभवंतुमेशंमेअस्त्वभयंमेअस्तु ॥ १७ ॥ पृथिवीशांतिरंतरिक्षं
शांतिद्यौःशांतिरापः शांतिरोषधय शांतिर्वनस्पतयः शांतिर्विश्वेमेदेवाः शांतिःसर्वेमेदेवाः शांतिःशांतिः शांतिभिःताभिः
शांतिभिसर्वशांतिभिशमयामोहंयदिहघोरंयदिहक्रूरं यदिहपापंतच्छांतंतच्छिवंसर्वमेवशमस्तुनः ॥१८॥ शन्नइंद्राग्नीभवता
मवोभिःशन्नइंद्रावरुणारातहव्या ॥ शमिंद्रासोमासुविताय शंयोः शन्नइंद्रापूषणावाजसातौ ॥ १ ॥ शन्नोभगःशमुनः
शंसोअस्तुनःपुरंध्रिःशमुसंतुरायः ॥ शंनःसत्यस्यसुयमस्यशंसः शन्नोअर्यमापुरुजातोअस्तु ॥ २ ॥ शंनोधाताशमु
धर्त्तानोअस्तुशंनउरूचीभवतुस्वधाभिः ॥ शंरोदसीबृहतीशंनोअद्रिःशन्नोदेवानांसुहवानिसंतु ॥३॥ शन्नोअग्निर्ज्योति
रनीकोअस्तुशन्नोमित्रावरुणावश्विनाशं ॥ शंनःसुकृतांसुकृतानिसंतुशंन इषिरोअभिवातुवातः ॥४॥ शन्नोद्यावापृथिवी
पूर्वहूतौशमंतरिक्षंदृशयेनोअस्तु ॥ शंनओषधीर्वनिनोभवंतुशंनोरजसस्पतिरस्तुजिष्णुः ॥५॥ शन्नइंद्रोवसुभिर्देवोअस्तु
शमादित्येभिर्वरुण सुशंसः ॥ शन्नोरुद्रोरुद्रेभिर्जलाषः शन्नस्त्वष्टाग्नाभिरिहशृणोतु ॥ ६ ॥ शन्नःसोमोभवतुब्रह्मशन्नः

शन्नोग्रावाणःशमुसंतुयज्ञाः ॥ शंनःस्वरूणांमितयोभवंतुशंनः प्रस्वःशम्वस्तुवेदिः ॥ ७ ॥ शंनःसूर्यउरुचक्षाउदेतुशंनो
भवंतुप्रदिशश्चतस्रः ॥ शंनःपर्वताध्रुवयोभवंतुशंनः सिंधवःशमुसंत्वापः ॥ ८ ॥ शंनोअदितिर्भवतुव्रतेभिःशन्नोभवंतु
मरुतःस्वर्काः ॥ शन्नोविष्णुःशमुपूषानोअस्तु शन्नोभवित्रंशम्वस्तुवायुः ॥ ९ ॥ शन्नोदेवःसविताप्रायमाणः शन्नो
भवंतुषसोविभातीः ॥ शन्नःपर्जन्योभवतुप्रजाभ्यःशन्नःक्षेत्रस्यपतिरस्तुशंभुः ॥ १० ॥ ॥ शन्नःसत्यस्यपतयोभवंतु
शन्नोअर्वंतःशमुसंतुगावः ॥ शंन्नऋभवः सुकृतःसुहस्ताः शन्नोभवंतुपितरोहवेषु ॥ १ ॥ शन्नोदेवाविश्वदेवाभवंतु
शंसरस्वतीसहधीभिरस्तु ॥ शमभिषाचःशमुरातिषाचः शन्नोदिव्याःपार्थिवाःशन्नोअप्याः ॥ २ ॥ शन्नोअजएकपा
देवोअस्तुशंमहिर्बुध्न्यःशंसमुद्रः ॥ शन्नोअपांनपात्पेरुरस्तु शंनःपृश्निर्भवतुदेवगोपाः ॥ ३ ॥ आदित्यारुद्रावसवो
जुषंतामिदंब्रह्मक्रियमाणंनवीयः ॥ शृण्वंतुनोदिव्याःपार्थिवासोगोजाताउतयेयज्ञियासः ॥४॥ येदेवानामृत्विजोयज्ञि
यासोमनोर्यजत्राअमृताऋतज्ञाः ॥ तेनोरासंतामुरुगायमद्ययूयंपातस्वस्तिभिःसदानः ॥५॥ तदस्तुमित्रावरुणातदग्नेशंयो
रस्मभ्यमिदमस्तुशस्तम् ॥ अशीमहिगाधमुतप्रतिष्ठांनमोदिवेबृहतेसादनाय ॥ ६ ॥ ॥ उषाअपःस्वसुस्तमःसंवर्त्तयति
वर्त्तनींसुयाततां ॥ अयावाजंदेवहितंसनेममदेमशतहिमाःसुवीराः ॥ १ ॥ इंद्रस्यबाहूस्थविरौवृषाणौचित्राइमावृषभौ
पारयिष्णू ॥ तौयोक्षेप्रथमोयोगआगतेयाभ्यांजितमसुराणांस्वर्यत् ॥ २ ॥ आशुःशिशानोवृषभोनभीमोघनाघनः
क्षोभणश्चर्षणीनाम् ॥ संक्रंदनोनिमिषएकवीरः शतंसेनाअजयत्साकमिंद्रः ॥ ३ ॥ संक्रंदनेनानिमिषेणजिष्णुनायोध्येन
दुश्च्यवनेनधृष्णुना ॥ तदिंद्रेणजयततत्सहध्वंयुधोनरइषुहस्तेनवृष्णा ॥ ४ ॥ सइषुहस्तैःसनिषंगिभिर्वशीसंस्रष्टासयुध
इंद्रोगणेन ॥ संसृष्टजित्सोमपाबाहुशर्ध्युग्रधन्वाप्रतिहिताभिरस्ता ॥ ५ ॥ बलविज्ञायःस्थविरःप्रवीरःसहस्वान्वाजी

सहमान उग्रः ॥ अभिवीरो अभिषत्वा सहोजिज्जैत्रमिंद्ररथमातिष्ठ गोविदन् ॥ ६ ॥ इमंवीरमित्येका ॥ ७॥ अभिगोत्राणि सहसांगाहमानोदाय उग्रः शतमंन्युरिंद्रः ॥ दुश्च्यवनः पृतनाषाडयोध्यो ३ स्माकं सेनाअवतुप्रयुत्सु ॥ ८ ॥ बृहस्पतेपरि दीयारथेन रक्षोहामित्रें अपबाधमानः ॥ प्रभंजेन्छत्रून्प्रमृणंनमित्रानस्माकमेध्यविता तनूनाम् ॥ ९ ॥ इंद्र एषांनेता बृहस्पति दक्षिणायज्ञः पुरएतु सोमः ॥ देवसेनानामभिभंजतीनांजयंतीनांमरुतोयंतुमध्ये ॥ १० ॥ इंद्रस्यवृष्णोवरुणस्यराज्ञआ दित्यानांमरुतांशर्धउग्रं ॥ महामनसांभुवनच्यवानांघोषोदेवानांजयतामुदस्थात् ॥ ११ ॥ अस्माकमिंद्रः समृतेषुध्वजे ष्वस्माकंयाइषवस्ताजयंतु ॥ अस्माकंवीराउत्तरेभवंत्वस्मांउदेवासोवताहवेषु ॥ १२ ॥ ॥ इदमुच्छ्रेयोवसानमागांशि वेमेद्यावापृथिवीअभूताम् ॥ असपत्नाः प्रदिशोमेभवंतुनवैत्वाद्विष्मोअभयंनोअस्तु ॥ १ ॥ यतइंद्रभयामहेततोनोअभयं कृधि ॥ मघवंछग्धितवत्वनऊतिभिर्विद्विषोविमृधोजहि ॥ २ ॥ इंद्रंवयमनूराधंहवामहेनुराध्यास्मद्विपदाचतुष्पदा ॥ मानःसेनाअररुषीरुपगुर्विषूचीरिंद्रद्रुहोविनाशय ॥ ३ ॥ इंद्रस्त्रातोतवृत्रहापरस्फानोवरेण्यः ॥ सरक्षिताचरमातः समध्यतः सपश्चात्सपुरस्तान्नोअस्तु ॥ ४ ॥ उरुंनोलोकमनुनेषिविद्वान्स्वर्यज्ज्योतिरभयंस्वस्ति ॥ उग्रातइंद्रःस्थविरस्य बाहूउपक्षयेमशरणाबृहंता ॥ ५ ॥ अभयंनःकरत्यंतरिक्षमभयंद्यावापृथिवीउभेइमे ॥ अभयंपश्चादभयंपुरस्तादुत्तरा दधरादभयन्नोअस्तु ॥ ६ ॥ अभयंमित्रादभयममित्रादभयंज्ञातादभयंपुरोयः ॥ अभयंनक्तमभयंदिवानः सर्वाआशाममभि त्रंभवंतुम् ॥ ७ ॥ ॥ शिवानः शंतमाभवसुमृडीकासरस्वति ॥ मातेयुयोमसंदृशः ॥ १ ॥ शन्नोवातोवातुशंन्नस्तपतु सूर्यः ॥ अहानिशंभवंतुनः शंरात्रीप्रतिधीयतांशमुषानोव्युछतु ॥ २ ॥ यत्किंचासौमनसायच्चवाचायज्ञैर्जुहोतिह विषायजुषा ॥ तन्ममृत्युनानिर्ऋतिः संविदानापुरासत्यदाहुतिंहत्वस्य ॥ ३ ॥ यातुधानानिर्ऋतिरादुरक्षस्ते अस्यघ्नंत्वनृतेन

सत्यम् ॥ इंद्रेषितादेवाआज्यमस्यमथ्नंतुमानसंपादियदसौजुहोति ॥ ४ ॥ अजिराधिराजौश्येनौसंपातिनाविव ॥ आज्यंपृतन्यतोहतान्योनः कश्चाभ्यगायंति ॥ ५ ॥ आपांचोतउभौबाहूअपिनह्यप्पास्यम् ॥ अग्नेर्देवस्यमन्युनातेनंते वधिषंहविः ॥ ६ ॥ अपिनह्यामितेबाहूअपिनह्याम्यास्यं ॥ अग्नेर्घोरस्यमन्युनातेनतेवधिषंहविः ॥ ७ ॥ परित्वाग्नेपुरं वयंविप्रंसहस्यधीमहि ॥ धृषद्वर्णंदिवेदिवेहंतारंभंगुरावतः ॥ ८ ॥ उत्तिष्ठतावपश्यतेंद्रस्यभागमृत्वियं ॥ यदिश्रातंजुहोतन यद्यश्रातंममत्तन ॥ ९ ॥ श्रातंहविरोष्विंद्रप्रयाहिजगामसूरेअध्वनो ॥ विमध्यं ॥ परित्वासतेनिधिभिः सखायः कुलपानराजपतिंचरंतं ॥ १० ॥ ॐतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनः प्रचोदयात् ॥ ११ ॥ शन्नोदेवी रभिष्टयआपोभवंतुपीतये ॥ शंयोरभिस्रवंतुनः ॥ १२ ॥ पृथिव्यैश्रोत्रायेतित्रिः ॥ १५ ॥ इतिशांतिगणाभिमंत्रितै रक्षतैरभिमंत्र्यतत्रवरुणमावाह्यप्रतिष्ठाप्य ॐभूर्भुवःस्वर्जनदो इतिव्याहृतिमुच्चार्य शांतिकलशायनम इत्यावाहनादिषोड शोपचारैः संपूज्यअनयापूजयाशांति कुंभदेवताःप्रीयंतांनमम इतिनत्वा ॥ ततःसपत्नीकोयजमानउत्थायतद्वंशपात्रं गृहीत्वा पत्न्यपिशांतिकुंभंगृहीत्वा ॐत्वयापूर्वमितिसूक्तंपठित्वादेव गृहंप्रविश्यकलशंसंस्थाप्य तदस्त्विति प्रष्ठाप्य तत्रदीपंप्रज्वाल्यनमस्कृत्यमंडपप्रतिष्ठांकुर्यात् पूर्ववत्संपूज्य ॥ ॥ इतीश्रीमदथर्वगृह्यसूत्रप्रयोग भानौषट्पन्नागरद्वि वेदीरविशंकरकृतेशांतिकलशकरणप्रयोगरश्मिरष्टमः ॥

॥ अथमंडपप्रतिष्ठापूजनप्रयोगरश्मिः ॥ ॥ तत्रकृतनित्यक्रियोयजमानः महत्सुकर्मसुपूर्वेद्युरल्पेषुकर्मसुतद्दिने वासंभारानसंपाद्यउक्तदिशिमंडपप्रतिष्ठांकुर्यात् ॥ सचमंडपोविवाहेचूडाकरणेउपनयनेकेशांतेसीमंतोन्नयनेचभवति ॥ तदुक्तं ॥ विवाहादिषुयाज्ञेषुमंडपेचसइष्यतेति ॥ तत्रमंडपकर्तव्यतांत्वप्रेगृहयज्ञप्रयोगेवक्ष्ये ॥ अथमंडपस्तंभरोपणार्थं स्वातदेवाउ ओ विश्वकर्मण ॥ वेद्यांवृषाद्रुं संहितात्रिकेमितात्सुरालये ॥ ईशानतोव्यस्तगत्या पृष्ठिस्तस्य भ्रमावहेति ॥ अस्यार्थः ॥

वृषमिथुनकर्कटराशिस्थेसूर्येआग्नेयांखात : ॥ सिंहकन्यातुलाराशिस्थेभास्करेईशान्यांखात : कार्य : ॥ वृश्चिकधन मकरराशिस्थेऽर्केवायव्यांखात : कार्य : ॥ कुंभमीनमेषराशिस्थेर्केनैर्ऋत्यांखात : कार्य : ॥ यतोवृषादावैशान्यांराहोर्मुखं भवति ॥ वायव्यांमध्यभाग : ॥ नैर्ऋत्यांपुच्छं ॥ आग्नेय्यांरिक्तत्वात्तत्रखननंशुभं ॥ एवंराहो । व्यक्तगत्यसिंहादि त्रिकेवायव्यांमुखं ॥ नैर्ऋत्यांमध्यभाग : ॥ आग्नेय्यांपुच्छं ॥ ऐशानीरिक्ताअत : सिंहादावैशान्यांखननंशुभं ॥ एवमन्य त्रापिज्ञेयं ॥ अथकर्तामांगलिकः सपत्निकः पूर्वाह्णेप्राङ्मुखोपविश्य शांतयेत्रह्मजज्ञानं पठित्वा देशकालावुच्चार्यकरिष्य माणामुककर्मांगत्वेनमंडपप्रतिष्ठांकरिष्यइतिसंकल्प्य विधायउक्तदिशिभूमेमातरितिभूमिरनुष्टुप्भूमिप्रार्थनेविनियोगः ॥ ॐभूमेमातर्निधेहिमाभद्रयासुप्रतिष्ठितम् ॥ संविदानादिवाकवेश्रियांमाधेहिभूत्यांइतिभूमिंप्रार्थयेत् ॥ इदंखनेत्यथर्वा त्रिष्टुप्अवटखननेविनियोगः ॥ ॐइदंखना मिभेषजंमांपश्यमभिरोरुदं ॥ परायतोनिवर्त्तनमायतः प्रतिनंदनंइत्यवट खननं ॥ आपूर्णाअस्येत्यथर्वालिंगोक्तादेवताअवटेजलसेचनेविनियोगः ॥ ॐआपूर्णोअस्यकलशः स्वाहासेक्तेवकोशं सिसिचेपिबध्यै ॥ समुप्रियाअववृत्रन्मदायप्रदक्षिणोदभिसोमासइंद्रम् ॥ इत्यवटेजलसेचनं ॥ यस्यामन्नमथर्वानुष्टुप् व्रीहिमत्तमित्यथर्वा त्रिष्टुप्अवटेयवप्रक्षेपनेविनियोगः ॥ ॐयस्यामन्नंव्रीहियवौयस्यांइमाः पंचकृष्टयः भूम्यैपर्जन्य पत्न्यैनमोस्तुवर्षमेदसे ॥ व्रीहिमंनंयवमत्तमथोमाषमथोतिलम् ॥ एषवांभागोरत्नधेयायदंतौमाहिंसिष्टंपितरंमातरंच इतियवान्प्रक्षिपेत् ॥ ततोदधिदुर्वाचंदनादिअवटेनिक्षिप्य ॥ ध्रुवेयमितिमंत्रस्याथर्वाविशट्स्तंभारोपणेविनियोगः ॥ ॐध्रुवेयंविराण्नमोअस्तस्यैशिवापुत्रेभ्यउतमह्यमस्तु ॥ सानोदेव्यदितेविश्ववारइर्यंरवगोपाअभिरक्षपकं ॥ इतिमंत्रेण शम्यादिवृक्षस्तंभंतस्मिन्नवटेआरोपयेत् ॥ समाचारात्तत्रमदनफलान्योहकंकणंचबध्वा क्षतैस्तत्रदेवतामावाह्य ॥ तद्यथा ॥ नंदिन्यैनमःनंदिनींआवाहयामि० ॥ नलिनीं० ॥ मैत्रीं० ॥ उमां ॥ पशुवर्द्धिनींआवाह्यतदस्त्विमंडपदेवतासुप्रतिष्ठिताभव

त्विन्यःतैःप्रतिष्ठापयेत् ॥ ततो मंडपदेवताभ्योनमःइतिनाममंत्रेणगंधादिभिरुपचारैर्यथाविभवंपूजयेत् ॥ अथपूर्वोच्चरितेति उत्तरसंकल्पंविधाय । यस्मात्तांशांतिनतकर्म्मरार्पणंकुर्यात् ॥ इयंमंडपदेवताप्रतिष्ठागणपतिपूजनोत्तरंनांदिश्राद्धोत्तरंवा कार्याभंडपलक्षणंनिर्णयसिंधौ ॥ मंगलेषुचसर्वेषुमंडपोग्रहमानतः ॥ कार्यःशोडषहस्तोवान्यूनहस्तोदशावधि० ॥ स्तंभैश्च तुर्भिरेवात्रवेदीमध्येप्रतिष्ठितेति ॥ हस्तोत्रसंस्कार्यस्य ॥ द्वादशाष्टाकरोवेतिग्रंथांतरे ॥ वेदीचतुरस्राचतुर्हस्तास्वमाना । द्वहिर्भागेपश्चिमेसोपानयुक्ता ॥ गृहस्यवामध्यभागेकार्या । ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौद्विजातिषट्रूप नागर(साठोदरानागर)रविशंकरकृतेमंडपदेवताप्रतिष्ठाप्रयोगरश्मिर्नवमः ॥

अथनांदिश्राद्धोत्तरंमंडपोद्वासनात्प्राक्कानिचिद्वर्ज्यान्याह ॥ निर्णयदीपेगार्ग्यः ॥ नांदिश्राद्धेकृतेपश्चाद्या वन्मातृविसर्जनं ॥ दर्शश्राद्धंक्षयाश्राद्धंस्नानंशीतोदकेनच ॥ अपसव्यंस्वधाकारंनित्यश्राद्धंतथैवचब्रह्मयज्ञंस्वाध्ययनं नदीसीमाविलंघनं ॥ उपवासंव्रतंचैवश्राद्धभोजनमेवच ॥ नैवकुर्युःसपिंडाश्चमंडपोद्वासनावधिः ॥ तथाच ॥ अभ्यंगेस्नू तकेचैवविवाहेपुत्रजन्मनिमांगल्येषुचसर्वेषुनकार्यंगोपिचंदनमिति ॥ अत्रनित्यश्राद्धनिशेषेधेनतत्कार्यविहितपितृयज्ञ निषेधसिद्धेस्वधाकारग्रहणंतत्सहचरितवैश्वदेवनिषेधार्थं ॥ आचारसंवादलाभाचेतिवहवइतिसंस्कारकौस्तुभे ॥ अथमं डपोद्वासनम् ॥ तत्रमंडपोद्वासनकालः ॥ समेचदिवसेकुर्याद्देवकोत्थापनंबुधः ॥ षष्ठंचविषमंनेष्टंमुक्त्वापंचमसप्तमौ ॥ शमेषुषष्ठनिशिद्धं ॥ विषमेषुपंचमसप्तमेविनान्यानिनिषिद्धानि ॥ विषमेषुपंचमसप्तमौदिवसौशुभावित्यर्थः ॥ अथ प्रयोगः ॥ उक्तकालेसपत्निकोयजमानोपविश्यदेशकालावुच्चार्यअमुककर्मांगत्वेनस्थापितानांमंडपदेवतानामुत्थापनं करिष्यइतिसंकल्प ॥ स्थापितदेवतानांयथाविभवंपूजांकृत्वापुष्पाक्षतानगृहीत्वा ॥ उत्तिष्ठतेतिअथर्वालिंगोक्तागायत्री रुत्थापनेविनियोगः ॥ वाविसर्जनेवि० ॥ ॐउत्तिष्ठतसंन्नह्यध्वंमित्रादेवजनायूयं ॥ संदृष्टागुप्तावःसंतुयानोमित्राण्य र्बुदे ॥ यांतुदेवगणाःसर्वेपूजामादायपार्थिवीं ॥ इष्टकामसमृध्यर्थंपुनरागमनायच ॥ इतिपठित्वादेवोपरिप्रक्षिपेत् ॥

कृतांजलिः ॥ अथपूर्वोच्चरितेत्युत्तरसंकल्पंकृत्वायस्मात्तोशेतिकृतंकर्मेश्वरार्पणंकुर्यादिति ॥ इतिश्रीमदथर्ववेदगृह्यसूत्रप्रयोगभानौपद्मनागरद्विजातिवि‍शंकरकृतेमंडपोद्वासनप्रयोगरश्मिर्दशमः ॥

अथस्वस्तिवाचनं ॥ स्वस्तिवाचनमत्रेष्टंगृह्यकर्मसुकेषुचित् ॥ अदृष्टमपिशाखेऽस्मिन्मंगलार्थमुदीरितमिति ॥ वाक्यादत्रसर्वशाखासाधारणत्वात्दानखंडोक्तपुण्याहवाचनप्रयोगेवाद्रियते ॥ तत्रादौव्यासः ॥ संपूज्यगंधमाल्याद्यैर्ब्राह्मणान्स्वस्तिवाचयेत् ॥ धर्मकर्मणिमांगल्येसंग्रामाद्भुतदर्शनेतिनिर्णयसिंधौमंडनः ॥ गर्भाधानादिसंस्कारेष्विष्टापूर्तेक्रतुष्वपि ॥ नांदिश्राद्धंपुराकार्यंकर्मादौस्वस्तिवाचनं ॥ तच्चगणेशांबिकयो ॥ पूजनोत्तरंनांदिश्राद्धोत्तरंवाकार्यम् ॥ तत्र कलशलक्षणम् ॥ हैमंवाराजतंवापिताम्रंमृन्मयजंतुवा ॥ अकालमव्रणंचैवसर्वलक्षणसंयुतम् ॥ पंचाशांगुलवैपुल्यंचत्सेधेषोडशांगुलं ॥ द्वादशांगुलकंबुलेमुखमष्टांगुलंस्मृतमिति ॥ पंचाशांगुलवैपुल्यामितिमध्यं तिर्यङ्मानेनसमंताद्वापंचदशांगुलमित्यर्थः ॥ अथपंचमृदः ॥अश्वस्थानाद्गजस्थानाद्वल्मिकात्संगमाद्ध्रदात् ॥ सप्तमृत्पक्षे॥ राजद्वाराच्चगोष्ठाच्चमृदमानीयनिक्षिपेत्इति ॥ अथसर्वौषधयः ॥ शंखपुष्पीवचाकुष्टंबालकोनागकेसरमिति ॥ अन्या । प्युक्ताग्रंथांतरे ॥ अथपंचपल्लवाः ॥ न्यग्रोधोदुंबराश्वस्थचूतजंबूस्तथै चेति ॥ अथपंचरत्नानि ॥ कनककुलिशनीलंपद्मरागंचमौक्तिकं ॥ अलाभेसर्वरत्नानांहैमंसर्वत्रयोजयेत् ॥ अथप्रयोगः ॥ सपत्निकोयजमानःप्राङ्मुखोपविश्यतद्दक्षिणतःप्राङ्मुखंसंस्कार्यंचोपवेश्यप्रतद्दक्षिणतउदङ्मुखान्युग्मान्विप्रानुपवेशयेत् ॥ अथवास्वयंपत्नीसंस्कार्यसहितप्राङ्मुखोपविश्यस्ववामभागेप्राङ्मुखान्विप्रानुपवेशयेत् ॥ ततःसुमुखश्चे०त्यादिपठित्वादेशकालावुच्चार्यअमुककर्मांगत्वेनस्वस्तिवाचनंकरिष्यइतिसंकल्पकलशस्थापनंकुर्यात् ॥ तदुक्तंशौनकेन ॥ बिभ्रत्कुंभमपांपूर्णंपिहितानन्चर्चितमित्येकएवकुंभस्थाप्यः ॥ कुंभद्वयस्थापनपक्षस्त्वाश्वालायनविषयः ॥ अतएवनर्मदोत्तरभागेशिष्टैराद्रतत्वाच्छौनकोक्तत्वादेकःकुंभःस्थापनीयः ॥ ॐकारस्यानुक्तगोत्रोब्रह्मापरमात्मादेवीगायत्रीछंदःप्रांतेम्नमादौजपेविनियोगः ॥ भूमेमातरितिब्रह्माभूमिरनुष्टुप्भूमिप्रार्थने विनियोगः ॥ ॐभूमेमातर्निधेहिमाभद्रयासुप्रतिष्ठितं ॥ संविदानादिवाकवेश्रियांमाधेहिभूत्याम् ॥ यस्यामन्नमित्यथर्वा

लिंगोक्तस्त्रिष्टुप्पृथान्यप्रकरणेविनियोगः ॥ ॐयस्यामन्नं०ऽदसे ॥ व्रीहियवंतंयव०मातरंचेति ॥ तंदुलान् ॥ सोमेनपूर्णमितित्रह्मा जगतीकलशस्थापनेविनियोगः ॥ ॐसोमेनपूर्णंकलशंबिभर्षि । त्वष्टारूपाणांजनितापशूनां ॥ शिवास्तेसंतुप्रजन्वइहयाइमान्यंऽस्मभ्यंस्वधितेयच्छयाअमूः॥ हिमवतइतिजलेनापूर्य ॥ हिमवतेतिशांतातिरापोनुष्टुप्जलपूरणेविनियोगः ॥ ॐहिमवतःप्रस्रवंतिसिंधौसमहसंगमः ॥ आपोहमह्यंतद्देवीर्ददन्हृद्योतभेषजं ॥ यस्तेगंधइत्यथर्वाविराडतिजगतीगंधप्रक्षेपणेविनियोगः ॥ ॐयस्तेगंधःपृथिवीसंबभूवयंबिभ्रत्योषधयोयमापः ॥ यंगंधर्वाअप्सरसश्चभेजिरेतेनमासुरभिंकृणुमानोद्विक्षतकश्चन ॥ इतिगंधं ॥ याओषधयइतिसर्वौषधयः ॥ याओषधयइतिभृग्वंगिरावनस्पतीरनुष्टुप्सर्वौषधीप्रक्षेपेविनियोगः ॥ ॐयाओषधयःसोमराज्ञिर्बहिःशतविचक्षणाः ॥ बृहस्पतिप्रसूतास्तानोमुंचंत्वंहसः ॥ अघद्विष्ठेत्यथर्वावनस्पतीदुर्वाभूरिगनुष्टुप्कलशेदुर्वानिक्षेपणेविनियोगः ॥ ॐअघद्विष्टादेवजाताविरुछपथयोपनी ॥ आपोमलमिवप्राणैक्षीत्सर्वामच्छपथांअधि ॥ पुमान्पुंसइत्यथर्वावनस्पतीऽनुष्टुप्पंचपल्लवप्रक्षेपेविनियोगः॥ ॐपुमान्पुंसःपरिजातोश्वत्थःखदिरादधि ॥ सहंतुशत्रून्मामकान्यानहंद्वेष्मियेचमां ॥ यस्तेगंधःपुरुषेत्यथर्वानुष्टुप्मृन्निक्षेपणेविनियोगः ॥ यस्तेगंधःपुरुषेषुस्त्रिषुपुंसुभगोरुचिः योअश्वेषुवीरेषुयोमृगेषुतुहस्तिषु ॥ कन्यायांवर्चोयद्भूमेतेनास्मांअपिसंसृजमानोद्विक्षतःकश्चन ॥ पुष्पवतीत्यथर्वौषधीरनुष्टुप्फलप्रक्षेपणेविनियोगः ॥ ॐपुष्पवतीःप्रसूमतिफलिनीरफलाउत ॥ संमातरइवदुह्राअस्माअरिष्टतातये ॥ अभित्यमित्यथर्वासवितानुष्टुप्पंचरत्नप्रक्षेपेविनियोगः ॥ ॐअभित्यंदेवंसवितारंमोण्योःकविक्रतुमर्चामिसत्यसवंरत्नधामभिप्रियंमतिम् ॥ हिरण्यगर्भकस्त्रिष्टुप्हिरण्यनिक्षेपणेविनियोगः ॥ ॐहिरण्यगर्भःसमवर्तताग्रे भूतस्यजातःपतिरेकआसीत् ॥ सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम ॥ परिधत्तेत्यथर्वाश्चंद्र

स्त्रिष्टुप्सूत्रवेष्टनेविनियोगः ॥ ॐपरिधत्तधत्तनोवर्चसेमंजरामृत्युंकृणुतदीर्घमायुः ॥ बृहस्पतिःप्रायच्छद्वासएतत्सो
मायराज्ञेपरिधातवाउ ॥ पूर्णादर्वेत्यथर्वामंत्रोक्तजगतीपूर्णपात्रपिधानेविनियोगः ॥ ॐपूर्णादर्वेपरापतसुपूर्णापुनरा
पत ॥ सर्वान्नूयज्ञासंभुंजतीषमूर्जंनआभरइतिपूर्णपात्रपिधानं ॥ पुष्पवतीप्रसुमतिरितितदुपरिस्वसन्मुखंश्रीफलंनिदध्यात् ॥
अप्सुतेतिशुनःशेपोवरुणानुष्टुप् ॥ वरुणावाहनेविनियोगः ॥ ॐअप्सुतेराजन्वरुणगृहोहिरण्ययोमिथः ॥ ततोधृत
व्रतोराजासर्वाधामानिमुंचतु ॥ ॐभूर्भुवःस्वर्जनदोंवरुणायनमःवरुणमावाहयामीत्यावाह्यसंस्थाप्यषोडशोपचारैःसंपूज्य
प्रार्थयेत् ॥ कलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः ॥ मूलेतत्रस्थितोब्रह्मामध्येमातृगणास्मृताः ॥ कुक्षौतुसागराःसप्त
सप्तद्वीपावसुंधरा ॥ ऋग्वेदोयजुर्वेदःसामवेदोह्यथर्वणः ॥ अंगैश्चसहिताःसर्वेकलशंतुसमाश्रिताः ॥ अत्रगायत्रीसावित्री
शांतिपुष्टिकरीतथा ॥ आयांतुममशांत्यर्थंदुरितक्षयकारकाः ॥ सर्वेसमुद्राःसरितस्तीर्थानिजलदाःमम ॥ आयांतुममशांत्य
र्थंदुरितक्षयकारकाइतिपठित्वा ॥ केचित्तुकलशेविष्णुमावाह्यपूजयंतितदपियुक्तंततोप्रार्थयंतिचातप्रथा ॥ देवदानवसंवा
देमथ्यमानेमहोदधौ ॥ उत्पन्नोसितदाकुंभविधृतोविष्णुनास्वयं ॥ त्वत्तोयेसर्वतीर्थानिदेवाःसर्वेत्वयिस्थिताः ॥ त्व
यितिष्ठंतिभूतानित्वयिप्राणाःप्रतिष्ठिताः ॥ शिवःस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः ॥ आदित्यावसवोरुद्राविश्वेदेवाः
सपैतृकाः ॥ त्वयितिष्ठंतिसर्वेपयतःकामफलप्रदाः ॥ त्वत्प्रसादादिमंयज्ञंकर्तुमीहेजलोद्भव ॥ सान्निध्यंकुरुमेदेवप्रसन्नो
भवसर्वदाइति ॥ ततोविप्रानगंधादिभिःसंपूज्यस्व स्तिवाचनार्थंयुष्मानहंवृणेइतितंत्रेणसर्वान्नूयुष्मान्विप्रान्वृणुयादथवाप्रत्ये
कंगोत्राद्युच्चार्यवृणुयात् ॥ अथवाऽऽवरणमात्रंकुर्यात् ॥ ततःगंधाःपांतुइत्यत्रगंधादितांबूलदक्षिणादिभिरर्चयेत् ॥ इति ॥
ततः ॥ अवनिकृतजानुमंडलःकमलमुकुलसदृशमंजलिंशिरस्याधायदक्षिणेनपाणिनास्वर्णपूर्णकलशंधारयित्वा ॥ आशिषः
प्रार्थयेत् ॥ दीर्घानागानद्योगिरयस्त्रीणिविष्णुपदानिच ॥ तेनआयुःप्रमाणेनपुण्याहंदीर्घमायुरस्तु ॥ अस्त्वितिविप्राः
ब्रूयुःशिवाआपःसंतु ॥ सौमनस्यमस्तु ॥ अक्षतंचारिष्टंचास्तुइत्यतात्तत्वाततोद्रव्यंब्राह्मणहस्तेषुसंपाद्य ॥ गंधाःपांत्वित्यादि

मंत्रैर्गंधपुष्पाक्षततांबूलदक्षिणानांदानं ॥ सुमांगल्यंचास्त्वित्यादिविप्राःप्रतिब्रूयुः ॥ गंधाःपांतुसुमंगल्यंचास्तु ॥ पुष्पाणि
पांतुसौश्रियमस्तु ॥ अक्षताःपांतुआयुष्यमस्तु ॥ तांबुलानिपांतुऐश्वर्यमस्तु ॥ दक्षिणाःपांतुबहुदेयंचास्तु ॥ इतिहेमाद्रौ
आरोग्यमस्त्विति ॥ दीर्घमायुःशांतिःपुष्टिःतुष्टिःश्रीर्यशोविद्याविनयोवित्तंबहुपुत्रंबहुधनंचायुष्यंचास्तु ॥ यंकृत्वासर्ववेददे
वयज्ञक्रियाकर्मकर्मारंभाःशुभाःशोभनाप्रवर्त्ततेप्रवर्त्ततां ॥ तमहमोंकारमादिंकृत्वाऋग्यजुःसामाथर्वाशीर्वचनंबहुऋषि
मतंसमनुज्ञातंभवद्भिरनुज्ञातःपुण्यंपुण्याहंवाचयिष्यइतियजमानः ॥ वाच्यतामितिविप्राः ॥ द्रविणोदाइत्यांगिरसः
कुत्सोद्रविणोदास्त्रिष्टुप् ॥ सवितापश्चादितिलुशोधानाकःसवितात्रिष्टुप् ॥ नवोनवइतिसावित्रीसूर्याचंद्रमात्रिष्टुप् ॥ उच्चा
दिवित्यांगिरसोदिव्योदक्षिणादावाप्राजापत्यदक्षिणातद्दातारोवात्रिष्टुप् ॥ ॐद्रविणोदाद्र०मायुः ॥ ॐसवितापश्चात्०
मायूः ॥ ॐनवोनवोभवतिजायमानो०मायुः ॥ ॐउच्चादिविदक्षिणावंतो०आयुइत्यग्वेदिनः पठेयूः ॥ ॐद्रविणोदाः
पिपी० ॥ ॐसवितात्वास ॥ ॐनतद्रक्षासि० ॥ ॐउच्चातेजातः० ॥ ॐउपास्मैगायतानर० ॥ इतियजुर्वेदः ॥ ॐ
देवो३द्रविणोदाः ॥ ॐअद्यनोदेवसवितःऔहोवा० ॥ ॐचंद्रमाउवा० ॥ ॐउच्चाता३ताइजातमंधसा० ॥ ॐउपास्मैगाय
तान० ॥ इतिसामगाः ॥ ॐधातारातिःसवितेदंजुषंतामजापतिर्निधिपतिर्नोअग्निः ॥ त्वष्टाविष्णुःप्रजयासंरराणायज
मानायद्रविणोदधातु ॥ १ ॥ ॐयेनदेवंसवितारंपरिदेवाअधारयन् ॥ तेनेदंब्रह्मणस्यतेपरिराष्ट्रायधत्तन ॥ २ ॥
ॐअहोरात्राभ्यां नक्षत्रेभ्यः सूर्याचंद्रमसाभ्यां ॥ भद्राहमस्मभ्यंराजन्छकंधूमंकृधि ॥ ३ ॥ ॐ उच्चापतंतं
मरुणंसुपर्णमध्येदिविस्तरणिंभ्राजमानम् ॥ पश्यामत्वासवितारंयमाहुरजस्रंज्योतिर्यदविंददत्त्रिः ॥ इत्यथर्ववेदिनः ॥
यजमानः ॥ ॐव्रतनियमतपस्वाध्यायक्रतुदमदानविशिष्टानांसर्वेषांब्राह्मणानांमनःसमाधीयतां ॥ विप्राः ॥ समाहित
मनसःस्मःयजमानः ॥ प्रसीदंतुभवंतः ॥ विप्राः ॥ प्रसन्नाःस्मःयजमानः ॥ शांतिरस्तु ॥ १ ॥ तुष्टिरस्तु ॥ २ ॥ पुष्टि
रस्तु ॥ ३ ॥ वृद्धिरस्तु ॥ ४ ॥ अविघ्नमस्तु ॥ ५ ॥ आयुष्यमस्तु ॥ ६ ॥ आरोग्यमस्तु ॥ ७ ॥ शिवंकर्मास्तु ॥ ८ ॥

कर्मसमृद्धिरस्तु ॥ ९ ॥ पुत्रसमृद्धिरस्तु ॥ १० ॥ वेदसमृद्धिरस्तु ॥ ११ ॥ शास्त्रसमृद्धि ॥ १२ ॥ धनधान्यसमृद्धिरस्तु ॥ १३ ॥ इष्टसंपदस्तु ॥ १४ ॥ अनिष्टनिरसनमस्तु ॥ १५ ॥ यत्पापंतत्प्रतिहतमस्तु ॥ १६ ॥ यच्छ्रेयस्तदस्तु ॥ १७ ॥उत्तरेकर्मण्यविघ्नमस्तु ॥ १८ ॥ उत्तरोत्तरमहरहरभिवृद्धिरस्तु ॥ १९॥ उत्तरोत्तराःक्रियाःशुभाःशोभनाः संपद्यंता ॥ २० ॥ तिथिकर्णमुहूर्त्तनक्षत्रग्रहलग्नसंपदस्तु ॥ २१ ॥ तिथिकर्णमुहूर्त्तनक्षत्रग्रहलग्नाधिदेवताःपीयंतां ॥ २२ ॥ तिथिकर्णेसमूहूर्त्तेसनक्षत्रेसग्रहेसलग्नेसदैवतेप्रीयेतां ॥ २३ ॥ दुर्गापांचाल्यौप्रीयेतां ॥ २४ ॥ अग्निपुरोगाविश्वेदेवाः प्रियंताम् ॥ २५ ॥ इंद्रपुरोगामरुद्गणाप्रियंतां ॥ २६ ॥ वशिष्टपुरोगाऋसिगणाः प्रीयंताम् ॥ २७ ॥ माहेश्वरीपुरोगाउमामातरः प्रीयंताम् ॥ २८ ॥ अरुंधतिपुरोगाएकपत्न्यःप्रीयंताम् ॥ २९ ॥ विष्णुपुरोगासर्वेदेवाःप्रियंताम् ॥ ३० ॥ ब्रह्मपुरोगासर्वेवेदाःप्रीयंताम् ॥ ३१ ॥ ब्रह्मचब्राह्मणाःप्रीयंताम् ॥ ३२ ॥ श्रीसरस्वत्यौप्रीयेतां ॥ ३३ ॥ श्रद्धामेधेप्रीयेताम् ॥ ३४ ॥ भगवतिकात्यायनीप्रीयताम् ॥ ३५ ॥ भगवतिमाहेश्वरीप्रीयताम् ॥ ३६ ॥ भगवतिऋद्धिकरीप्रीयताम् ॥ ३७ ॥ भगवतिवृद्धिकरीप्र यताम् ॥ ३८ ॥ भगवतिपुष्टिकरीप्रीयताम् ॥ ३९ ॥ भगवतितुष्टिकरीप्रीयंताम् ॥ ४० ॥ भगवंतौविघ्नविनायकौप्रीयेताम् ॥ ४१ ॥ सर्वाःकुलदेवताःप्रीयंताम् ॥ ४२ ॥ सर्वाःग्रामदेवताःप्रीयंताम् ॥ ४३ ॥ सर्वाइष्टदेवताःप्रीयंताम् ॥ ४४ ॥ हताश्चब्रह्मद्विषः ॥ ४५ ॥ हताश्चपरिपंथिनः ॥ ४६ ॥ हताश्चविघ्नकर्तारः ॥ ४७ ॥ शत्रवःपराभवंयांतु ॥ ४८ ॥ शाम्यंतुघोराणि ॥४९ ॥ शांम्यंतुपापानि ॥५०॥ शाम्यंत्वितयः ॥ ५१ ॥ शुभानिवर्द्धंतां ॥ ५२ ॥ शिवाआपःसंतु ॥ ५३ ॥ शिवाऋतवःसंतु ॥ ५४ ॥ शिवाअग्नयःसंतु ॥ ५५ ॥ शिवाआहुतयःसंतु ॥ ५६ ॥ शिवाओषधयःसंतु ॥ ५७ ॥ शिवावनस्पतयःसंतु ॥ ५८ ॥ शिवाअतिथयःसंतु ॥५९ ॥ अहोरात्रेशिवेस्याताम् ॥ ६० ॥ शंवइतिमैत्रावरुणिःत्रिशिष्टोविश्वेदेवाजगती ॥ ॐशंवःकनिक्रदद्देव०ष्पद इत्यृग्वेदिनःपठेयुः ॥ निकामेनिकामेइतियजुर्वेदिनः ॥ त्वष्टानादैव्यं०इतिसामगाः ॥ गणांस्त्वोपगायंतुमारुता पर्जन्यघोषिणःपृथक् ॥ सर्गावर्षस्यवर्षतोवर्षंतुपृथिवीमनुइत्यथर्ववेदिनः ॥ यजमानः॥ शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतु

सोमसहिताआदित्यपुरोगाःसर्वेग्रहाःप्रीयंतां ॥ भगवान्नारायणःप्रीयतां ॥ भगवान्पर्जन्यःप्रीयतां ॥ भगवान्स्वामिमहासेनःप्रीयताम् ॥ पुरोनुवाक्यायायत्पुण्यंतदस्तु ॥ याज्ययापुण्यंतदस्तु॥ एतत्कल्याण्यंयैपुण्यंपुण्याहंवाचयिष्यइति यजमानः ॥ वाच्यतामितिविप्राः ॥ यजमानः ॥ ब्राह्मंपुण्यंमहर्यश्चसृष्ट्युत्पादनकारकं ॥ वेदवृक्षोभवेन्नित्यंतत्पुण्याहंब्रुवतुनः॥ भोब्राह्मणाममसहकुटुंबस्यसपरिवारस्यगृहेकर्मणःपुण्याहंभवंतोब्रुवंत्वितिक्रमेणमंद्रमध्योश्चस्वरेणत्रिःब्रुयात् ॥ पुण्याहमितितथैवत्रिर्विप्राः ॥ उद्गातेवेतिद्विगोत्रोगृत्समदःशकुंतकोतिशकर्यष्टिर्वा ॥ उद्गातेवशकुने०वेदेत्यृग्वेदिनः पठेयुः ॥ पुनंतुमादेवजनाइतियजुर्वेदिनः ॥ पुनानसोमा३धारा२३४याइतिसामगाः ॥ पुनंतुमादेवजनाःपुनंतुमनवोधिया ॥पुनंतुविश्वांभूतानिपवमानःपुनातुमां ॥ पत्यथर्ववेदिनः ॥ यजमानः ॥ पृथिव्यामुधृतायांतुयत्कल्याणंपुराकृतं ॥ ऋषिभिःसिद्धगंधर्वैस्तत्कल्याणंब्रुवंतुनः भोब्राह्मणाममसकुंबस्य सपरिवारस्यग्रहेकर्मणःकल्याणंब्रुवंत्वितिकमेणमंद्रम० कल्याणमितितथैवत्रिर्विप्राः॥ अपाइतिगाथिनोविश्वामित्रःइंद्रस्त्रिष्टुप्॥ ॐअपाःसोममस्तमि०इत्यृग्वेदिनः॥ ॐयथेमांवाचंकल्याणीमितियजुर्वेदिनः ॥ कयानश्चा३इत्रा३आभुवातूदितिसामगाः ॥ विश्वंजित्कल्याण्यैमापरिधेहि ॥ कल्याणिद्विपाच्चसर्वंन्नोरक्षचतुष्पाद्यचनःस्वमित्यथर्ववेदिनः ॥ सागरस्यतुयाऋद्धिर्महालक्ष्म्यादिभिःकृता ॥ संपूर्णसुप्रभावाद्यातामृद्धिप्रब्रुवंतुनःममसहकुटुंबस्य०कर्मणःऋद्धिंभवोतोब्रुवंत्वितिक्रमेणमं०यात् ॥ ऋध्यतामितिर्त्रिर्विप्राः ॥ ऋध्यामेतिभूतांशःकाश्यपोश्विनौत्रिष्टुप् ॥ ॐऋध्यामस्तोमसनु०ममाइत्यृग्वेदिनःपठेयुः ॥ सत्रस्पऋद्धिरस्येतियजुर्वेदिनः ॥ औहोवाऔहोवाअगन्मज्योे०इतिसामगाः ॥ ॐऋधङ्मंत्रोयोनिंयआबभूवामृतासुवर्द्धमानःसुजन्मा ॥ अदब्धासुभ्राजमानोहे वत्रितोधर्तादाधारत्रीणिंइत्यथर्ववेदिनः॥ स्वस्तिर्यायाविनासाक्षात्पुण्यकल्याणवृद्धिदाः॥ विनायकप्रियानित्यंतांस्वस्तिंब्रुवंतुनः ॥ स्वस्तिऋद्धीतिगयःप्रातःपथ्यास्वस्तिस्त्रिष्टुप् ॥ ॐस्वस्तिऋद्धिं० ॥ गोपाइत्यृग्वेदिनःपठेयुः ॥ स्वस्तिनइंद्रइतियजुर्वेदिन० ॥ त्रातारमितिसामगाः ॥ स्वस्तिमात्रउतपित्रेणोअस्तुस्वस्तिगोभ्योजगतेपुरुषेभ्यः ॥ विश्वं

सुभूतंसुविदत्रंन्नो अस्तुज्योगेवदृशेमसूर्यमित्यथर्ववेदिनःपठेयुः ॥ मृकंडसूनोरायुष्यंध्रुवलोमशयोस्तथा ॥ आयुपातेन
संयुक्तंजीवेमशरदःशतमितियजमानः ॥ जीवंतुभवंतुइतिब्राह्मणाः ॥ शतंजीवेतिप्राजापत्योयक्ष्मनाशनइंद्रस्त्रिष्टुप् ॥
ॐशतंजीवशरदो० । दुरित्यृग्वेदिनः ॥ शतमिन्नुशरदो०इतियजुर्वेदिनः ॥ आयुर्विश्वायुर्विश्वमायुरितिसामगाः ॥ आयु
रस्मैधे हिजातवेदःप्रजांत्वंष्टारधिनिधेह्यस्मैरायस्पोषंसवितरासुवास्मिशतंजीवातिशरदस्तवायं ॥ इत्यथर्ववेदिनः ॥ शिव
गौरिविवाहेयायास्मिन्रामेनृपात्मजे ॥ धनदस्यगृहेयास्मिरस्माकंसास्तुसंपदमितियजमानः ॥ अस्तुश्रीरितिविप्राः श्रीय
इतिकण्वोघोरःपवमानसोमस्त्रिष्टुप् ॥ ॐश्रियेजातश्रियो०द्रावित्यृग्वेदिनः॥ मनसःकाममाकूतिमितियजुर्वेदिनः॥ श्रायंत
इवसूरायामितिसामगाः ॥ एहयातुवरुणःसोमोअग्निबृहस्पतिर्वसुभिरेहयांतु० ॥ प्रजापतिर्लोकपालोधाताब्रह्माचदेवराट्
। भगवान्छाश्वतोनित्यंनोरक्षंतुचसर्वतः ॥ भगवान्प्रजापतिप्रीयताम् ॥ प्रजापत्येइतिहिरण्यगर्भःप्रजापत्यःकस्त्रिष्टुप् ॥
ॐप्रजापतेनत्वदेतामित्यृग्वेदिनः ॥ प्रजापतेनत्वदितियजुर्वेदिनः ॥ हाउहाउहाउइमाः३प्रजा३इतिसामगाः ॥ प्रजापते
रावृंतोब्रह्मणांवर्मणाहंकस्यपस्यज्योतिषावर्चसाचजरदष्टिःकृतवीर्योविहायाःसहस्रायुःसुकृतश्चरेयुमित्यथर्ववेदिनः ॥ आ
युष्मतेस्वस्तिमतेयजमानायदाशुषेश्रियेरत्नापिषसंतुऋत्विग्भिर्वेदपारगैः ॥ आयुष्मतेस्वस्तिस्वस्तयइतिगाथिनोविश्वा
मित्रइंद्रस्त्रिष्टुप् ॥ स्वस्तयेवाजिभिश्चइत्यृग्वेदिनः ॥ अपिपंथामपग्रहीतियजुर्वेदिनः ॥ ॐत्वमूषुवाजिनां२३४५मिति
सामगाः ॥ वेदःस्वस्तिर्द्रुघणस्वस्तिःपरशुर्वेदिपरशुनःस्वस्ति ॥ हविष्कृतोयज्ञियायज्ञकामास्तेदेवासोयज्ञमिमंजुषंतामित्य
थर्ववेदिनः ॥ स्वस्तिवाचनकर्मसमृद्धिरस्तुइतियजमानः ॥ अस्त्वितिविप्राः ॥ ततोयजमानस्यवामभागेपत्नीउपवेश
येत् ॥ अभिशेकंवक्ष्यमाणरीत्याकुर्यादितिस्वस्तिवाचनम् ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौषट्पन्नागरद्विवेदी
रविशंकरकृतेदानखंडोक्तस्वस्तिवाचनप्रयोगरश्मिरेकादशः ११

अथस्वशाखोक्तस्वस्तिवाचनप्रयोगः ॥ पूर्ववत्कलशंसंस्थाप्यविष्णुंवरुणंचावाह्यप्रतिष्ठापूजनांतंकृत्वाब्राह्मणान्
वृत्वास्वस्तिवाचनंकुर्यात् ॥ तद्यथा ॥ ॐअवनिकृतजानुमंडलःकमलमुकुलसदृशमंजलिंशिरस्याधायदक्षिणेनपाणिना
स्वर्णपूर्णकलशंधारयित्वाआषिशःप्रार्थयंतेप्रार्थनामाह ॥ एताःसत्याःआषिषःसंतु ॥ दीर्घानागानद्योगिरयस्त्रिणिविष्णु
पदानिचतेनआयुःप्रमाणेनपुण्याहंदीर्घमायुरस्तुइतित्रिःकर्त्ता ॥ शिवाआपःसंत्वितिब्राह्मणाःसंतुशिवापः ॥ सौमन
स्यमस्तु ॥ अक्षतंचारिष्टंचास्तु ॥ गंधाःपांतुमांगल्यंचास्त्वितिभवंतोब्रुवंतुगंधापांतुमांगल्यंचास्तु ॥ अक्षताःपांत्वायुष्य
मस्त्वितिभवंतोब्रुवंतु ॥ अक्षताःपांतुआयुष्यमस्तु ॥ पुष्पाणिपांतुसौश्रियमस्त्वितिभवंतोब्रुवंतुपुष्पाणिपांतुसौश्रियमस्तु॥
तांबुलानिपांतुऐश्वर्यमस्त्वितिभवंतोब्रुवंतुतांबुलानिपांतुऐश्वर्यमस्तु ॥ दक्षिणापांतुबहुदेयंचास्त्वितिभवंतोब्रुवंतुदक्षिणा
पांतुबहुदेयंचास्तु दीर्घमायुःश्रेयःशांतिपुष्टिस्तुष्टिश्चास्त्वितिभवंतोब्रुवंतु ॥ दीर्घमायुःश्रेयःशांतिपुष्टिस्तुष्टिश्चास्तु ॥ श्री
र्यशोविद्याविनयोवित्तंबहुपुत्रंबहुधनंचायुष्यंचास्तु ॥ सर्वत्रब्राह्मणैरस्त्वितिप्रत्युत्तरंदेयम् ॥ यंकृत्वासर्ववेदद्देत्रयज्ञक्रिया
कर्णकर्मारंभाःशुभाःशोभनाःप्रवर्त्तंते । तमहमोंकारमाद्यंकृत्वाऋग्यजुःसामाथर्वाशिर्वचनंबहुऋषिमतंसंविज्ञातंभवद्भिरनु
ज्ञातःपुण्यंपुण्याहंवाचयिष्येविप्राः ॥ वाच्यतामितिवदेयुः ॥ एवमुत्तरत्रापियथायोग्यंप्रत्युत्तरंदेयं ॥ ततोयजमानः ॥
ॐभद्रंकर्णेभिःशृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः॥ स्थिरैरंगैस्तुष्टुवांसस्तनुभिर्व्यशेमदेवहितंयदायुः ॥ १ ॥ ॐसवितापश्चातात्सवितापुरस्तात्सवितोत्तरातात्सविताधरातात्सवितानःसुवतुसर्वतातिंसवितानोरासतांदीर्घमायुः ॥ २ । ॐनवोन
वोभवतिजायमानोन्हांकेतुरुषसामेत्यग्रंभागंदेवेभ्योविदधात्यायनप्रचंद्रमास्तिरतेदीर्घमायुः ॥ ३ ॥ ॐइममग्रआयुषेवर्च
सेनयप्रियंरेतोवरुणमित्रराजन् ॥ मातेवास्माअदितेशर्मयच्छविश्वेदेवाजरदष्टिर्यथासत् ॥ ४ ॥ ॐपार्थिवस्यरसेदेवाभ
गस्यतन्वोबले ॥ आयुष्यमस्माअग्निःसूर्योवर्चआधाद्बृहस्पतिः ॥ ५ ॥ ॐआयुरस्मैधेहिजातवेदप्रजांत्वष्टरधिनिधेह्यस्मै
॥ रायस्पोषंसवितरासुवास्मैशतंजीवातिशरदस्तवायं ॥ ६ ॥ ॐअभयंनःकरत्यंतरिक्षमभयंद्यावापृथिवीउभेइमे ॥ अभ

यंपश्चादभंयंपुरस्तांदुत्तरादधरादभंयंन्नोअस्तु ॥ ॐअभंयंमित्रादभंयममित्रादभंयंज्ञातादभंयंपुरोयः ॥ अभंयंनक्तमभंयंदिवानःसर्वाआशाममंमित्रंभवंतु॥ॐदेवाःशरणकृतशरणामेभवंतु॥प्राच्यादिशोग्निनाराज्ञाध्यक्षेणएषाभूयासंयशसंमाकृणोतु चरमंन्नादंपराद्धिपंतंश्रृणीतः ॥ ॐआयुरिंद्रोदधातुमेआयुर्देवोबृहस्पतिः ॥ आयुर्मेविश्वेदेवाअहोरात्रेशतक्रतुः ॥ ॐआयुरायुष्पामत्रतांप्राणंप्राणोदधातुमे ॥ देवायंचक्षुर्देवेभ्यःस्वर्यंतोयथायति ॥ व्रतनियमतपस्वाध्यायक्रतुदमदानविशिष्ठानांब्राह्मणानांमनःसमाधीयतां ॥ विप्राःसमाहितमनसःस्म ॥ यजमानःप्रसीदंतुभवंतः ॥ विप्राःप्रसन्नास्मः ॥ यजमानः ॥ ॐ शांतिरस्तु ॥ १ ॥ पुष्टिरस्तु ॥ २ ॥ तुष्टिरस्तु ॥ ३ ॥ वृद्धिरस्तु ॥ ४ ॥ अविघ्नमस्तु ॥ ५ ॥ आयुष्यमस्तु ॥ ६ ॥ आरोग्यमस्तु ॥ ७ ॥ शिवंकर्मास्तु ॥ ८ ॥ कर्मसमृद्धिरस्तु ॥ ९ ॥ धर्मसमृद्धिरस्तु ॥ १० ॥ वेदसमृद्धिरस्तु ॥ ११ ॥ शास्त्रसमृद्धिरस्तु ॥ १२ ॥ पुत्रसमृद्धिरस्तु ॥ १३ ॥ धनधान्यसमृद्धिरस्तु ॥ १४ ॥ इष्टसंपदस्तु ॥ १५ ॥ बहिर्देशे अरिष्टनिरसनमस्तु ॥ १६ ॥ यत्पापंतत्प्रतिहतमस्तु ॥ १७ ॥ सत्रेयच्छेयस्तदस्तु ॥ १८ ॥ उत्तरेकर्मण्यविघ्नमस्तु ॥ १९ ॥ उत्तरोत्तरमहरहरभिवृद्धिरस्तु ॥ २० ॥ उत्तरोत्तराःक्रियाशुभाःशोभनाःसंपद्यंताम् ॥ २१ ॥ तिथिकर्णमुहूर्त्तनक्षत्र संपदस्तु ॥ २२ ॥ तिथिकर्णमूहूर्त्तनक्षत्रग्रहलग्नाधिदेवताःप्रीयंताम् ॥ २३ ॥ तिथिकर्णमूहूर्त्तनक्षत्रेसलग्नेसदेवतेप्रीयेतां ॥ २४ ॥ दुर्गापांचाल्यौप्रीयेतां ॥ २५ ॥ अग्निपुरोगाविश्वेदेवाःप्रीयंतां ॥ २६ ॥ इंद्रपुरोगामरुद्गणाःप्रीयंतां ॥ २७ ॥ ब्रह्मपुरोगासर्वेवेदाःप्रीयंतां ॥ २८ ॥ विष्णुपुरोगासर्वेदेवाःप्रीयंतां ॥ २९ ॥ माहेश्वरीपुरोगाउमामातरःप्रीयंतां ॥ ३० ॥ वशिष्ठपुरोगाऋषिगणाःप्रीयंतां ॥ ३१ ॥ अरुंधतिपुरोगाएकपत्न्यःप्रीयंतां ॥ ३२ ॥ ऋषयछंदांस्याचार्या वेदादेवायज्ञाश्चप्रीयंतां ॥ ३३ ॥ ब्रह्मचब्राह्मणाश्चप्रीयंतां ॥ ३४ ॥ श्रीसरस्वत्यौप्रीयेताम् ॥ ३५ ॥ श्रद्धामेधेप्रीयेतां ॥ ३६ ॥ भगवतीकात्यायनीप्रीयतां ॥ ३७ ॥ भगवतिमाहेश्वरीप्रीयतां ॥ ३८ ॥ भगवतिपुष्टिकरीप्रीयतां ॥ ३९ ॥ भगवतितुष्टिकरीप्रीयतां ॥ ४० ॥ भगवतिऋद्धिकरीप्रीयतां ॥ ४१ ॥ भगवतिवृद्धिकरीप्रीयतां ॥ ४२ ॥ भगवंतौ विघ्नविनायकौप्रीयेतां ॥ ४३ ॥ भगवान्स्वामिमहासेनःप्रीयतां ॥ ४४ ॥ भगवान्स्वामिमहासेनःसगणःससैन्यः

सवाहनःसानुचरःसुवर्णवर्णरूपयश्चमातृगणैर्नित्यंसदापरिवृतोपुमांसंदेवंप्रपद्येवरदंप्रपद्येचकुमाररूपोभगवान्सर्वस्थानंगतः प्रीयतां ॥ ४४ ॥ हरिहरहिरण्यगर्भाःप्रीयंतां ॥ ४५ ॥ सर्वाःग्रामदेवताःप्रीयंतां ॥ ४६ ॥ सर्वाकुलदेवताःप्रीयंतां ॥ ४७ ॥ बहिरपहताःब्रह्मद्विषः ॥ हताःपरिपंथिनः ॥ हता अस्यकर्मणोविघ्नकर्त्तारः ॥ शत्रवःपराभवंयांतु ॥ शाम्यंतु घोराणि॥शाम्यंतुपापानीशाम्यंत्वितयः॥ शुभानिवर्द्धंतां॥ शिवाआपःसंतु॥ शिवाऋतवःसंतु ॥शिवावनस्पतयःसंतु॥शिवा अग्नयःसंतु। शिवाअतिथयःसंतु ॥ अहोरात्रेशिवेस्यातां ॥ निकामेनिकामेनःपर्जन्योवर्षतुफलवत्योन ओषधयःपृच्यंतांयोग क्षेमोनःकल्पंतां॥ योगक्षेमोशुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिताआदित्यपुरोगासर्वेग्रहाःप्रीयंतां॥ भगवान् नारायणःप्रीयतां ॥ भगवान्पर्जन्यःप्रीयतां ॥ भगवान्स्वामीमहासेनःप्रीयतां॥ अथपुण्याहकालान्वाचयिष्येवाच्यतांइति विप्राः ॥ ॐशकंधूमंनक्षत्राणियद्राजानमकुर्वत ॥ भद्राहमस्मैप्रायंछन्निदंराष्ट्रमसादिति ॥ १ ॥ भद्राहन्नोमध्यंदिने भद्राहंसायमस्तुनः ॥ भद्राहंनोअन्हांप्रातारात्रीभद्राहमस्तुनः ॥ अहोरात्राभ्यांनक्षत्रेभ्यःसूर्याचंद्रमसाभ्यां ॥ भद्राह मस्मभ्यंराजंछकंधूमत्वंकृधि ॥ योनोभद्राहमकरःसायंनक्तमथोदिवा ॥ तस्मैतेनक्षत्रराजन्छकंधूमसदानमः ॥ योवा अहोरात्रयोःपुण्याहंवेदपुण्याहीभवतिपुण्याहंएवकुरुतेब्राह्मणोवैअहोरात्रयोः पुण्याहंतंपृछेत्केनाजितेतिसचेत्ब्रूयात्कर्त्तव्य मितितथाकुर्यात्पुण्याहिभवतिपुण्याहमस्मैभवतिपुण्याहएवकुरुते ॥ मह्यंसहकुटुंबिनेमहाजनानांनमस्कुर्वाणायआशीर्व चनमपेक्षमाणायअस्यअमुककर्मणःपुण्याहंभवंतोब्रुवंतु ॥ इतित्रिर्वदेत् ॥ ॐपुण्याहमितिविप्राः ॥ ॐत्यमुषुवाजिनंदेवजू तंसहोवानंतरुतारंरथानाम् ॥ अरिष्टनेमिंपृतनाजिमाशुंस्वस्तयेतार्क्ष्यमिहाहुवेम ॥ १ ॥ त्रातारमिंद्रमवितारमिंद्रंहुवेहुवे सुहवंशूरमिंद्र ॥ हुवेनुशक्रंपुरुहूतमिंद्रस्वस्तिनइंद्रोमघवान्कृणोतु ॥ २ ॥ आमंद्रैरिंद्रहरिभिर्याहिमयूररोमभिःमात्वा केचिद्वियमन्विनपाशिनोतिधन्वेवतांइहि ॥ ३ ॥ स्वस्तिंतन्मेसुप्रातःसुसायंसुदिनंसुमृगंसकुनंमेअस्तु ॥ सुहवमग्निस्व

स्त्यांमर्त्यंगत्वापुनरायामिनंदन् ॥ ४ ॥ स्वस्तिनोअस्त्वभयंवोअस्तुनमोहोरात्राभ्यांअस्तु ॥ स्वस्तिमात्रउतपित्रेनोअस्तु
स्वस्तिगोभ्योजगतेपुरुषेभ्यः ॥ ५ ॥ विश्वंसुभूतंसुविदत्रंनोअस्तुज्योगेवदृशेमसूर्यं म् ॥ ६ ॥ यूयंपातस्वस्तिभिःसदानः ॥
स्वस्तिमतिरूपसमृधावेतद्वैयज्ञस्य समृद्धंयद्रूपसमृध्यं यत्कर्मक्रियमाणःमृग्वजेवाभिर्वदति स्वस्तिनस्ययज्ञस्यपारमश्नुतेय
एवंवेद ॥ महांसकुटुंबिनेमहाजनानांनमस्कुर्वाणायआशीर्वचनमपेक्षमाणायकरिष्यमाण अमुककर्मणःस्वस्तिभवंतोब्रुवंतु ॥
इतित्रिर्वदेत् ॥ आयुष्मतेस्वस्तिइतिप्रतिवचनंत्रिः ॥ ॐऋधङ्मंत्रोयोनिंयआबभूवामृतासुवर्द्धमानःसुजन्मा ॥ अदब्धासु
भ्राजमानोहेवत्रितोधर्तादाधारत्रीणि ॥ १ ॥ तदिदासभुवनेषुज्येष्ठंयतोजज्ञउग्रस्त्वेषनृम्णः ॥ सद्योजज्ञानोनिरिणा
तिशत्रूननुयदेनंमदंतिविश्वऊमाः ॥ २ ॥ सवितादेवेभ्यःप्रासुवतेनान्मधुर्वत्साविता प्रसूताएवस्तुवंत्यृध्यंतेह्यांअस्यस्ता
मायज्ञऋध्यतेयजमानऋध्यतेप्रजायाऋध्यतेपशुभ्यऋध्यतेब्राह्मणेयस्यैवंविद्वान्ब्रह्माभवति ॥ महांसकुटुंबिनेमहाजानां
नमस्कुर्वाणायआशीर्वचनमपेक्षमाणायकरिष्यमाणः अमुककर्मणःऋद्धिंभवंतोब्रुवंतुइतित्रिः ॥ कर्मऋध्यतां ॥ शाम्यंत्व
स्यततोरोगाग्रहा विघ्ननाशकाविघ्नविनायकाः स्वस्त्यततुनृपतय स्वस्तिगोभ्योब्राह्मणायचश्रीयंधातुर्मेधेहिश्रियामाअधि
पतिंकृणुईशामीशानोभगवान्निंद्रोमायशसंकृणु श्रीर्वाअति ादस्तमकर्चशंतत्ये कस्तावैश्रीस्तांवैविरेभंशंसंतिवरेभैःश्रियंपुरु
षेतीतितामर्द्धर्चशःशंसंतिप्रतिष्ठित्याएव ॥ महांसहकुटुंबिनेमहाजनानांनमस्कुर्वाणायआशीर्वचनमपेक्षमाणायकरिष्यमाण
अमुककर्मणःश्रीरस्त्वितिभवंतोब्रुवंतु ॥ अस्तुश्रीःइतिब्राह्मणाः ॥ मंगलानिभवंतुवर्षशतंपूर्णमस्तु ॥ गोत्राभिवृद्धिरस्तु
प्रजापतिप्रीयंतां ॥ ॐप्रजापतेनत्वदेतान्यन्योविश्वारूपा णपरिताबूजजान ॥ यत्कामास्तेजुहुमस्तन्नोअस्तुवयंस्याम
पतयोरयीणां ॥ ततः कलशोदकंमेमंत्रैः कस्मिन्पात्रेकृत्वा सकुटुंबयजमानं विप्रारभिषिंचेयुरे२ हेतदेभिरमृतेवसाना
हिरण्यवर्णाअवघ्नरूपाआपः समुद्रोवरुणश्च राजासंपातभागान् हविषोजुषंतांइंद्र प्रशिष्टावरुणप्रसूताआपः समुद्रादिव

मुद्रहंतुइंद्रप्रशिष्टावरुणप्रसूतादिवस्पृथिव्याःश्रियमावहंतु ॥ ततःकर्तुर्वामतःपत्नीमुपवेशयीत्वाग्रपातितजलेनाप्लाव्यदुर्वा
दिभिरुदङ्मुखविप्राअभिषिंचेयुस्तिष्ठंनततःमंत्राःतेनैवस्नापयेत्येवमादिभिः ॥ ॐपवित्रंशतधारंमृषिभिःपावमानंकृतं
तेनत्वामभिषिंचामि पावमानिःपुनंतुमात्वा ॥ १ ॥ येनदेवाःपवित्रेणात्मानं पुनतेसदातेनत्वामभिषिंचाभिपावमानिपुनं
तुत्वा ॥ २ ॥ यातेलक्ष्मीर्यःप्राप्माहृदयेयाश्रमादरे ॥ ऊर्वोरुपस्थेपायौचनाभितोनाशयाम्यहं ॥ ४ ॥ प्राचींदिशम
वेधारंयेंद्रंदेवतमैंद्रींपरिषदंयाः कन्यायेसिध्राः इंद्रेणदत्ताप्रोषधयआपोवरुणसंमिताः ॥ ताभिष्ट्वामभिशिंचामिपावमानीः
पुनंतुत्वा ॥ ५ ॥ दक्षिणांदिशमवंपाययमंदेवतंयमीपरषदंयाः कन्यायसिध्राः यमेनदत्ताऔषधयः आपोवरुणसंमिताः
ताभिष्ट्वामभिषिंचामिपावमानीः पुनातुत्वां ॥ ६ ॥ प्रतीचींदिशमवधायवरुणंदैवतवारुणोंपरिषदंयाःकन्यायेषिध्राः
वरुणेनदत्ताओषधयः आपोवरुणसंमितातामिष्ट्वामभिषिंचामिपावमानोः पुनातुत्वा ॥ ७ ॥ उदीचींदिशमवधायसोमं
देवतंसौमींपरिषदंयाःकन्यायेषिध्राःसोमेनदत्ताः ओषधयआपोवरुणसंमितातामिष्ट्वामभिषिंचामिपावमानिःपुनंतुत्वा ॥
॥ ८ ॥ ध्रुवावोदिशमवधाय विष्णुंदैवतंवैष्णवीं परिषदंयाःकन्यायेसिध्राः विष्णुनादत्ताऔषधयआपोवरुणसंमिताता
भिष्ट्वामभिषिंचामिपावमानीःपुनंतुत्वा ॥ ९ ॥ व्याध्वीयांदिशमवधाय वायुदैवतंवायवीपरिषदंयाः कन्यायेसिध्राः
वायुनादत्ताओषधयः आपोवरुणसंमितातामिष्ट्वामभिषिंचामिपावमानीः पुनातुत्वा ॥ १० ॥ उर्ध्वायांदिशमवधाय
बृहस्पतिदैवतंबार्हस्पत्यांपरिषदंयाः कन्यायेसिध्राः बृहस्पतिनादत्ताओषधय आपोवरुणसंमितातामिष्ट्वामभिषिंचामिपा
वमानीः पुनातुत्वा ॥ ११ ॥ सर्वादिश्यसर्वानंतर्देशानवधायब्रह्माणंदैवतंब्राह्मींपरिषदंयाः कन्यायेसिध्राः ब्रह्मणा
दत्ताओषधयआपोवरुणसंमितातांभिष्ट्वामभिषिंचामिपावमानीःपुनंतुत्वा ॥ १२ ॥ प्रपतेतः पापीलक्ष्मीनश्येतः प्रामुतः
पतअयस्मयेनांकेनंद्विषतेत्वासजाम ॥ १३ ॥ पामालक्ष्मीः पतायालुरजुष्टा ॥ मितचस्कंदवंदनेवव्रक्षं ॥ ॥ अन्यत्रा
स्मत्सवितस्ताभितोधाहिरण्यहस्तोवसुनोरराणः ॥ १४ ॥ एकशतंलक्ष्म्योउष्टमलास्यसाकंतन्वाजनुषोधिजातास्तासां

पापिष्ठानीरितः प्रहिण्मः ॥ शिवाअस्मभ्यंजातवेदोनियच्छ ॥ १५ ॥ एताएनाव्यकरंखिलेगाइवष्ठिताइवरमंतांपुण्या लक्ष्मीर्यापापीस्त्वाअनिशनम् ॥ १६ ॥ हिरण्यवर्णाइतिशंतातिश्चंद्रमाआपस्त्रिष्टुप्अभिशेकेविनियोगः ॥ हिरण्यवर्णाः शुचयः पावकायासुजातः संवितायास्वग्निः ॥ याअग्निगर्भंदधिरेसुवर्णास्तानआपः शंस्योनाभवंतु ॥ १ ॥ यासांराजा वरुणोयातिमध्येसत्यानृते । अवपश्यंजनानाम् ॥ याअग्निगर्भंदधिरेसुवर्णास्तानआपः शंस्योनाभवंतु ॥ २ ॥ यासां देवादिविकृण्वंतिभक्ष्यंयाअंतरिक्षेबहुधाभवंति ॥ याअग्निगर्भंदधिरेसुवर्णास्तानआपः संस्योनाभवंतु ॥ ३ ॥ भुतोभू तेषुपयआदधातिसभूतानामधिपतिर्बभूवतस्यमृत्यु श्चरतिराजसूयंसराजाराज्यमनुमन्यतामिदं ॥ १ ॥ अभिप्रेहिमापवेनु उग्रश्चेत्तासपत्नहा ॥ आतिष्ठमितवर्द्धनतुभ्यंदेवाअधिब्रुवन् ॥ २ ॥ अतिष्ठंतं परिविस्वे अभूषंश्रियंवसानश्चरतिस्व रोचिः महत्तद्वृष्यो असुरस्यनामाविश्वरूपोअमृतानितस्थौ ॥ ३ ॥ व्याघ्रोअधिवैय्याघ्रे विक्रमस्वदिशोमहिः विशस्त्वा सर्वावांछांत्वापोदिव्याः पयस्वति ॥ ४ ॥ याआपोदिव्याः पयसामदत्यंतरिक्षउतवा पृथिव्याम् । तासांत्वासर्वासाम पामभिषिचामिवर्चसाअभित्वासर्व्यसासिर्न्वन्नापोदिव्याःपयस्वतिः ॥ यथासोमित्रवर्धनस्तथात्वासविताकरत् ॥ ६ ॥ एनाव्याघ्रंपरिष्यसाजानाः सिंहांहि त्वंतिमहतेसौभगासमुद्रंनसुभवस्तस्थिवांसमर्मृज्यंतेद्विपीनमस्व१तः ॥ ७ ॥ उत देवाअवहितंदेवाउन्नयथापुनः ॥ उतागश्चक्रुशंदेवादेवाजीवयथापुनः ॥ १ ॥ द्वाविमौव्याप्तावातआसिंधोरापरावतः दक्षंते अन्यआवातुव्य ॥ १ ॥ मन्योवातुयद्रपः ॥ २ ॥ आवातवाहिभेषजंविवातवहियद्रपःत्वंहिविश्वभेषजदेवानांदूत ईयते ॥ ३ ॥ त्रायंतामिमंदेवास्त्रायंतांमरुतांगणाःस्त्रायंतामविश्वाभूतानियथायमस्थाअसत् ॥ ४ ॥ आत्वागमंशं तातिभिरथोअरिष्टतातिभिः दक्षताउग्रमाभारिषांपरायक्ष्मंसुवामिते ॥ ५ ॥ अयंमेहस्तोभगवानयंमेभगवत्तरः ॥ अयं

मेविश्वभेषजोयंशिवाभिमर्षनः ॥६॥ हस्ताभ्यांदशशाखाभ्यांजिह्वावाचः पुरोगवि अनामयिभ्यांहस्ताभ्यांत्वाभ्यांत्वाभिः मृशामसि ॥ ७ ॥ सुरास्त्वामभिषिंचंतुब्रह्माविष्णुमहेश्वराः ॥ वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः ॥ १ ॥ प्रद्युम्न श्चानिरुधश्चभवंतुविजयायते ॥ आखंडलोग्निर्भगवान्यमोवैनिर्ऋतिस्तथा ॥ २ ॥ वरुणोपवनश्चैवधनाध्यक्षस्तथाशिवः ॥ ब्रह्मणासहिताः सर्वेदेव्यायेपांतुसर्वदा ॥ ३ ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिश्रद्धाक्रियामतिः ॥ बुद्धिर्लज्जावपुः शांतिः कांतिस्तुष्टिश्चमातरः ॥ ४ ॥ एतास्त्वामभिषिंचंतुदेवपत्न्यः समागताः ॥ आदित्यश्चंद्रमाभौमोबुधजीवसितार्कजाः ॥ ५ ॥ ग्रहास्त्वामभिषिंचंतुराहुकेतुश्चतर्पिताः ॥ देवदानवगंधर्वायक्षराक्षसपंन्नगाः ॥ ६ ॥ ऋषयोमुनयोगावोदेवमातर एवच ॥ देवपत्न्योद्रुमानागादैत्याश्चाप्सरसांगणाः ॥७॥ अस्त्राणिसर्वशस्त्राणिराजानोवाहनानिच ॥ औषधानिचरत्ना निकालस्यावयवाश्चये ॥ ॐशांतिः शांतिः शांतिः ॥ ततआचाराद्ब्रह्मवस्त्रादिदानंतत्परिधानंच ॥ पुण्याहवाचनकमृद्धि रस्त्वितिभवंतोब्रुवंतु ॥ पुष्पाहवाचनकालमृधिरस्त्वितिभवंतोब्रुवंतु ॥ पुण्याहवाचनकालसमृधिरस्तु ॥ ॥ इतिश्री मदथर्वगृह्यसूत्रप्रयोगभानौषट्पन्नागरद्विजातिरविशंकरकृते अथर्वशाखोक्तस्वस्तिवाचनप्रयोगरश्मिर्द्वादशः ॥ १२ ॥

अथपुण्याहवाचनदेवतानिर्णयरश्मिः ॥ तत्रकौशिकसूत्रम् ॥ स्वस्त्ययनेषुशकंधूमकिमद्याहमितिप्रछति२भद्रंसु मंगलमितिप्रतिपाद्यंतेत्युपक्रम्यांतेथातः पुण्याहदेवताव्याख्यास्यामइति ॥ विवाहस्याग्निःशूर्याप्रजापतयः ॥ स्थाली पाकस्याग्नि ॥ गर्भाधानस्यब्रह्मा ॥ पुंसवनस्यप्रजापतिः ॥ सीमंतस्याधता ॥ विष्णुबलेः सूर्यः ॥ जातकर्मणोमृत्यु ॥ नामकर्मणःसविता ॥ चौलस्यकेशिनः॥ उपनयनस्येंद्रः ॥ श्रद्धामेधेअंतेविसर्गेसुश्रुवाः पुनरुपनयनस्याग्निरथयदिब्रह्म चर्यव्रतमाचरेत्तस्मिन्नपायहोमसमावर्त्तनस्यश्रीरिंद्रोवा ॥ शुलगवस्येशानः ॥ प्रत्यवरोहणस्यसवितोपकर्मणीव्रतेषुच सविता ॥ वास्तुहोमस्यवास्तोष्पतिरंतेप्रजापतिराहूतहोमस्येंद्रोऽत्तेप्रजापतिः ॥ आयुष्यहोमस्याग्निः आयुष्मान्नक्षत्रहोम स्यनक्षत्रपूक्तमष्टमपिदोषस्येशानः आग्रयणस्याग्रयणदेवता ॥ सर्पबलेः सर्पः । एकोद्दिष्टस्यांतेप्रजापतिः ॥ तडागानां वरुणो॥यक्षबलेर्यक्षः ॥ ग्रहशांतिहोमस्यादित्यादिनवग्रहाः ॥ नागारिहोमेब्रह्मादयः॥ कूपतडागांतेप्रधानोदकांतेप्रजा

पतिः ॥ कूष्मांडहोमस्याग्न्यादयः श्चांद्रायणस्याग्न्यादयोअग्निष्टोमस्येंद्रएवमन्येषुकर्मसुप्रजापतिरिति ॥ तेषुतेषुकर्म सुअनेनपुण्याह अमुकदेवताः प्रीयंतामित्यूहः सर्वत्र ॥ ॥ इतिश्रीमदथर्ववेदगृह्यसूत्रप्रयोगभानोषट्पन्नागरद्विवेदिरविशंकर कृतेपुण्याहवाचनदेवतानिर्णयरश्मिस्त्रयोदशः ॥ १३ ॥

अथकारिकाकारोक्तरक्षाकर्मप्रयोगः ॥ चूडाकर्मादिसंस्कारेषुकर्मदिनात्पूर्वेद्युरात्रौचतस्रसुवासिन्यः संस्कार्य स्यशरीरेसतैलहरिद्राचूर्णलेपनेनरक्षांकुर्युः ॥ तत्रकेचिद्रक्षाबंधनमपिकुर्वंति ॥तद्यथा॥ व्रीहितंदुलपूर्णंसतांबूलंसभूतिकं नववस्त्रयुतंकांस्यपात्रंसंस्थाप्य ॥ पुजासामग्रींसंपाद्यप्राङ्मुखोपविश्यस्वदक्षिणतः संस्कार्यंचोपविश्याअमुककर्मांगत्वेन रक्षाकर्माहंकरिष्यइतिसंकल्पंविधाय ॥ तत्कर्मनिर्विघ्नतासिध्यैगणेशांबिकयोः पूजनंकृत्वावेदविद्भिः पुण्याहंवाचयित्वा पंचगुणीकृतंकुंकुमादिनारक्तंसूत्रंसकुशजलेनप्रोक्षयेत्मंत्रैः ॥ तद्यथा ॥ तत्सवितुरितिगाथिनोविश्वामित्रः सविता गायत्री सूत्रप्रोक्षणेविनियोगः ॥ ॐतत्सवितुरिति० ॥ अग्निमीलेनवमधुच्छंदाअग्निर्गायत्रीसूत्रप्र० ॥ ॐअग्निमीलेतिरुक् ॥ इषेत्वोर्जेत्वा० ॥ १ ॥ अग्नआयाहिइतिरुक् ॥ ॐशन्नोदेवीत्यथर्वानुष्टुप्सू० ॥ ॐशन्नोदेवीतिरुक् ॥ १ ॥ विश्वे देवावसवोरक्षतेममुतादित्याजागृतयूयमस्मिन् ॥ मेमंसनाभिरुतवान्यनाभिर्मेमंप्रापत्पौरुषेयोवधोयः ॥ येवोदेवापित रोयेचपुत्राः सचेतसोमेश्रृणुतेदमुक्तं ॥ सर्वेभ्योवः परिददाम्येतंस्वस्त्येनंजरसेवहाथ ॥ येदेवादिविष्ठयेपृथिव्यांयेंत रिक्षओषधीषुपशुष्वप्स्वंतः ॥ तेकृणुतजरसमायुरस्मैशतमन्यान्परिवृणक्तुमृत्यून् ॥ येषांप्रयाजाउतवानुयाजाहुतभागा अहुतादश्चदेवाः ॥ येषांवःपंचप्रदिशोविभक्तास्तान्वोअस्मैसत्रसदः कृणोमीतित्रिरभिमंत्र्य ॥ ततस्त्र्यंबकमंत्रेणतत्सूत्रंभस्म नात्रिरुन्मृज्यकुंकुमेनानुलिप्ययदाबध्नमितिमंत्रेणपुंसोदक्षिणहस्तेबध्नियात् ॥ यदाबध्नमितिलिंगोक्ताथर्वानुष्टुप्सूत्रबंधने विनियोगः ॥ ॐयदाबध्नन्दाक्षायणाहिरण्यंशतानिकायसुमनस्यमानाः ॥ तन्नआबध्नाम्यायुषेवर्चसेबलायदीर्घायुत्वायशत

शारदायेतिबध्नीयात् ॥ कन्यायाश्चवामकरेएषातेराजन्निति मंत्रेणबध्नीयात् ॥ एषातेत्यथर्वालिंगोक्तानुष्टुप् ॥ सूत्र बंधनेविनियोगः॥ ॐएषातेराजन्कन्यावधूर्निधूयतांयमा॥ सामातुर्बध्यतांगृहेथोभ्रातुरथोपितुरितिबध्नीयात् ॥ ततः सौभाग्यवत्यः संस्कार्यस्यशरीरेसतैलहरिद्रादिभिसर्वौषधिचूर्णलेपनंकुर्युः॥ संस्कार्योपिताभ्यगुडपूगहरिद्रादिकंदद्यात् ॥ एवमाचारप्राप्तंसर्वंकृत्वाआशिषोवाचयेत ॥ आचार्यायदक्षिणांदत्वा अन्येभ्योभूयसींदत्वाकृतंकर्मेश्वरार्पणंकुर्यात्यस्मा केशेति ॥ ॥इतिश्रीमदथर्ववेदगृह्यसूत्रप्रयोगभानोषट्पन्नागरद्विवेदिरविशंकरकृतेरक्षाकर्मप्रयोगरश्मिश्चतुर्दशः ॥ १४ ॥

अथांकुरार्पणमन्नप्राशनादिविवाहांतेषुसंस्कारेषुभवति ॥ अन्येष्वपिनवागारप्रवेशनादिशुभकर्मसुभवति ॥ कर्मदिनात्प्राङ्नवमेसप्तमेपंचमेतृतीयेवाबीजावपननक्षत्रयुक्ते गीतवादित्रादिसहित ऐशान्यांगत्वाशुद्धांमृदमानीयरात्रौकु र्यात् ॥ अगतौसद्यःकुर्यात् ॥ अथप्रयोगः ॥ रात्रौकर्ताप्राङ्मुखउपविश्यदेशकालावुच्चार्यअमुककर्मसाफल्यनिरंतर शुभत्वसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंअंकुरार्पणंकरिष्यइतिसंकल्प ॥ गोमयेपलिप्तायांभुविदुर्वांकुरैः सन्नद्धानिशुक्लसूत्रे णवेष्टितानिपंचनूतनशरावाणिसुधयाधवलितानिकुंकुमादिनाकृतबिंदूनिचतुर्दिक्षुमध्येचसंस्थाप्यब्राह्मणानभ्यर्च्यपुण्याहवा चयित्वास्थापितेषुशरावेषुआनीतांमृदंनिक्षिप्यतत्रजलंनिषिंचेत् ॥ ततस्तिलमाषादिवर्जयवादि धान्यमादायव्रीहिमते तिसूक्तेनाभिमंत्रयेत् ॥ यस्यामन्नमित्यथर्वानुष्टुप् ॥ व्रीहिमत्तमित्यथर्वाब्रह्मणस्पतीत्रिष्टुप् ॥ ओषध्यभिमंत्रणेविनि योग ः ॥ यस्यामन्नंव्रीहियवौयस्याइमाः पंचकृष्टयः ॥ भूम्यैपर्जन्यपत्न्यैनमोस्तुवर्षमेदसे ॥ व्रीहिमत्तंयवमत्तमथो माषमथोतिलम् ॥ एषवांभागोनिहितोरत्नधेयायदंतौमाहिंसिष्टंपितरंमातरंच ॥ याओषधयइतिभृग्वंगिरावनस्पतीर नुष्टुप् ॥ ओषध्यभिमंत्रणेविनियोगः ॥ याओषधयः सोमराज्ञीर्बह्वीः शतविचक्षणाः ॥ बृहस्पतिप्रसूतास्तानोमुंचंत्वं हस इत्यभिमंत्रितंधान्यंमध्यपात्रेपूर्वादिदिक्पात्रेषुचक्रमेणतत्तन्मंत्रैर्वापयेत् ॥ ब्रह्मजज्ञानंवेनोबृहस्पतिब्रह्मात्रिष्टुप्धान्य वापनेविनियोगः ॥ ॐब्रह्मजज्ञानं०विवइतिमध्यपात्रे ॥ आमंद्रैरिंद्रेत्यथर्वेंद्रःत्रिष्टुप् ॥ धान्यवा० ॥ आमंद्रैरिंद्रह

रिंभिर्याहिमयूररोमभिः मात्वाकेचिद्वियमन्विनपाशिनोतिधन्वेवतांइहि ॥ इतिपूर्वे ॥ कुमारोयमायमोनुष्टुप्प्रान्य० ॥ ॐयमायसोमः पवतेयमायंक्रियतेहविः ॥ यमंहयज्ञोगच्छत्यग्निदूतोअरं कृतरितिदक्षिणे ॥ येपश्चाज्जुह्वतेति अथर्वावरुणो जगतीधान्य० ॥ येपश्चाज्जुह्वतिजातवेदः प्रतीच्यांदिशोअभिदासंत्यस्मान् ॥ वरुणमृतत्वातिपरांचोव्यथंतांप्रत्यगंनान्प्र तिसरेणंहन्मिइतिपश्चात् ॥सोमंराजेत्यथर्वालिंगोक्तानुष्टुप्प्रधान्य०॥ॐसोमंराजानमवसेग्निंगीर्भिर्हवामहे॥आदित्यंविष्णुं सूर्यंब्रह्माणंचबृहस्पतिं इत्युत्तरे ॥ ततःतदस्त्विति प्रतिष्ठा॥ब्रह्मेंद्रयमवरुणसोमान्प्रत्येकमंत्रमुच्चार्यसर्वेषांप्रतिष्ठापनंकुर्यात् ॥ वाब्रह्मादीन् ॥ ततः पदार्थानुसमयेनवाकांडानुसमयेनषोडशोपचारैः पूजनं ॥ ततोपस्थानम् ॥ दिशांप्रतीन्नमस्यामि सर्वकामफलप्रदान् ॥ कुर्वंतुसफलंकर्मकुर्वंतुसततंशुभं ॥ ततः पुष्पांजलिः सन्इंद्रोमामरुत्वान्प्राच्यादिशइतिसूक्तंपठेत् ॥ तद्यथा ॥ इंद्रोमामरुत्वान्प्राच्यादिशः पातुबाहुच्युतांपृथिवीद्यामिवोपरि ॥ लोककृतः पथिकृतोयजामहेयेदेवानांहु तभागाइहस्थ ॥ १ ॥ धातामानिर्ऋत्यादक्षिणायादिशः पांतुबाहुच्युतापृथिवीद्यामिवोपरि ॥ लोककृतः पथिकृतो यजामहेयेदेवानांहुतभागाइहस्थ ॥ २ ॥ अदितिर्मादित्यैः प्रतीच्यांदिशः पांतुबाहुच्युतापृथिवीद्यामिवोपरि ॥ लोककृतः पथिकृतोयजामहेयेदेवानांहुतभागाइहस्थ ॥ ३ ॥ सोमोमाविश्वैर्देवैरुदीच्यादिशः पांतुबाहुच्युतांपृथिवी द्यामिवोपरि ॥ लोककृतः पथिकृतोयजामहेयेदेवानांहुतभागाइहस्थ ॥ ४ ॥ धर्त्ताहित्वाधरुणोधारयाताऊर्ध्वंभानुं सविताद्यामिवोपरि ॥ लोककृतः पथिकृतोयजामहेयेदेवानांहुतभागाइहस्थ ॥ ५ ॥ प्राच्यांत्वादिशिपुरासंवृतः स्वधा यामादधामिबाहुच्युतांपृथिवीद्यामिवोपरि ॥ लोककृतः पथिकृतोयजामहेयेदेवानांहुतभागाइहस्थ ॥ ६ ॥ इतिसूक्तं पठित्वाअद्येत्युत्तरसंकल्पंकृत्वाता निशरावाणिगुप्तदेशेसंस्थाप्यप्रत्यहंसेचनपूजनेकुर्यात् ॥ प्रधानकर्मकरणसमयेस्वप्रति

दिशंक्रमेणस्थापयेदिति ॥ ॥ इतीश्रीमदथर्वगृह्यसूत्रप्रयोगभानौपट्पन्नागरद्विवेदिरविशंकरकृतेअंकुरार्पणप्रयोगरश्मिः पंचदशः ॥ १५ ॥

अथसर्वसंस्कारेषुविप्रभोजननिर्णयः ॥ तत्रशंखस्मृतिः ॥ आद्यन्तेभोजयेद्विप्रान्शतंवादशमेवच ॥ ब्राह्मणान् मधुरान्नेनशतंपुंसवनेतथा ॥ सीमंतेजननेनाम्नीप्रतिकर्मशतंशतम् ॥ दशनिष्क्रमणेचान्नप्राशनेचौलकर्मणि ॥ व्रतबंधेच विप्राणांद्विशतेशतंचवा ॥ दशवाभोजयेदष्टौगोदानेस्नानकर्मणि ॥ विवाहेषुयथाशक्तिपाकयज्ञेषुपंचसु ॥ एवमेवद्विजान् श्रेष्टानभोजयेद्दक्षिणान्वितान् ॥ विप्राणांद्विशतेभोज्येअग्न्याधानेद्विजातयः ॥ उपवर्षादिभिः प्रोक्तमाधानेशतभोजनं ॥ पंचवादशवात्रिंशत्केचिदिच्छंतिसूरयः ॥ सहस्रंभोजयेत्सोमेब्राह्मणास्तुशतंपशौ ॥ चातुर्मास्यासुसर्वासुशतंपर्वणिपर्वणि ॥ इतीश्रीमदथर्वगृह्यसूत्रप्रयोगभानौपट्पन्नागरद्विवेदिरविशंकरकृतेब्राह्मणभोजनसंख्यानिर्णयरश्मिः षोडशः ॥

अग्रेकरिष्यमाणकर्मसुहोमविधावग्निनामान्युच्यंते ॥ प्रयोगपारिजाते ॥ पावकोलौकिकोह्यग्निः प्रथमः परि कीर्तितः ॥ अग्निस्तुमारुतोनामगर्भाधानेविधीयते ॥ ततः पुंसवनेज्ञेयः पवमानस्तथैवच ॥ पुंसवनेचंद्रमसः शुंगाकर्मणि शोभनः॥ चतुर्थ्यांतुशिखीनामधृतिर्होमेग्निनामकइतिवा॥ सीमंतेमंगलोनामप्रगल्भोजातकर्मणि ॥ नाम्निवैपार्थिवोह्यग्निः प्राशनेतुशुचिस्मृतः ॥ सभ्योनामातुचौलेतुव्रतादेशेसमुद्भवः ॥ गोदानेसूर्यनामातुकेशांतेह्यग्निरुच्यते ॥ वैश्वानरोविसर्गेतु विवाहेयोजकोत्तमः ॥ आवसथ्येद्विजोज्ञेयोवैश्वदेवेतुपावकः ॥ प्रायश्चित्तेविधीश्चैवपाकयज्ञेषुपंचकः ॥ देवानांहव्य वाहश्चपितॄणांकव्यवाहनः ॥ शांतिकेवरदः प्रोक्तः पौष्टिकेबलवर्द्धनः ॥ पूर्णाहुत्यामिलोनामक्रोधोग्निश्चाभिचारके ॥ वश्यर्थेकामदोनामवनदाहेचदुःखकः ॥ कुक्षौतुजाठरोज्ञेयः क्रव्यादोमृतदाहने ॥ वन्हिनामालक्षहोमेकोटिहोमेहुताशनः ॥ समुद्रेवाडवोह्यग्निः क्षयेसंवर्त्तकस्तथा ॥ ब्रह्मावैगार्हपत्यश्चइश्वरोदक्षिणस्तथा ॥ विष्णुराहवनीयस्यादग्निहोत्रेत्रयोग्नयः ॥ ज्ञात्वैवमग्निनामानिहोमकर्मसमारभेत् ॥ ॥ इतीश्रीमदथर्वगृह्यसूत्रप्रयोगभानौपट्पन्नागरद्विवेदिरविशंकरकृतेअग्निनाम निर्णयरश्मिः सप्तदश ॥ १७ ॥

अथस्थालीपाकः ॥ तत्रादौआचम्यप्राणानायम्यजीवास्थेति ॥ ब्रह्मजज्ञानमितिपठित्वा ॥ अत्राद्य० अमुकमासे ऽमुकपक्षेः मुकतिथावमुकवासरेतिथौममात्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यये वायजमानानुज्ञयासग्रहमखउपनयनादि अमुककर्मांगत्वेनस्थालिपाकाख्यंकर्माहंकरिष्ये ॥ अथसंकल्पानंतरं ॥ त्यमूषु० ॥ त्रातारं० ॥ आमंद्रैः० ॥ स्वस्त्ययनं जपित्वा ॥ अव्यसश्चव्यचसश्चबिलंविष्यामिमायया ॥ ताभ्यांमुधृत्यवेदमथकर्माणिंकृण्महेइतिमंत्रंजपित्वां ॥ ॐप्रयच्छ पर्शुंत्वरयाहरौषमहिंसतओषधिर्दातुपर्वन् ॥ यासांसोमः परिराज्यंविभूवामन्युनानोवीरुधी भवंतु ॥ इतिदात्रंगृह्णाति ॥ औषधीर्दातुपर्यनीति उपरिपूर्वमूलंल्लुनातिछेदयतीत्यर्थः ग्रीष्मस्तेभूमइति व्रीहिशमीमिश्रोदकेनवेदिस्थानेनमस्कारः ॥ विमिमिष्वपयस्वतीसमिधंगृहीत्वाषट् शमीप्रागायतांचतुः शमीश्रोण्णींत्रीन्मध्ये अर्द्धचतुर्थानग्रइतिवेदींकरोति॥ तत्रतूष्टमीं वालुकयारेखाकुर्यात्सर्वत्र ॥ बृहस्पतेपरिग्रहाणवेदींसुगावोदेवासदनानिसंतु ॥ यस्यांबर्हिप्रथतांसाध्यंतरहिस्त्राण पृथिवीदेवीदेव्यतिप्रतिगृह्णाति ॥ ततोयत्तेभूयइतिवेदीमध्येविखनतियतः ऊनमितिसंवपतिखनतिसमंकरोतीत्यर्थः ॥ ततः त्वमस्यावपनीजनानामितिपांशुंपूरयतीवार३तूष्णीं४तत्रत्रयाणापुरस्तादुत्तरवेदींविदध्यात् ॥ द्विः शमीप्राङ्यता गृन्नीसध्यर्थशमींश्रोण्यांत्रीन्मध्येअर्द्धत्चतुर्थानग्रतः अयमर्थः ॥ पूर्वोक्तकृतवेदीमध्येआदितः समित्कंचनत्यत्क्वाश्रोष्यो समिदर्द्धमर्द्धपरित्यज्यपूर्वकृतवेदिमध्येतिर्यक्समीत्रयअग्रतः सार्द्धत्रितयंसमिधश्च यथाभवतिथातत्रस्थंदिलंआलिख्य ॥ पूर्वोक्तबृहस्पतेपरिगृहाणेतिवेदिमध्येस्थंडिलमध्येदर्भसलाकयासंमार्जनं ॥ तन्मध्येसमिधमुक्त्वा ॥ उंप्यमानांपरिगृह्णाति ॐउंप्यवार३तूष्टमी४ ॥ असंबाधंमध्यतोमानवानामितिमृत्तिकांप्रथयति ॥ यस्याश्चतस्रः प्रदिशः पृथिव्याइतिचतुरस्रां करोति ॥ देवस्यत्वासवितुः प्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामाददेइतिसमिधंगृहीत्वा ॥ इंद्रः सीतानिगृह्णातुतांपूषा भिरक्षतु ॥ सानः पयस्वतिदुहामुत्तरामुत्तरासमांइतिदक्षिणतरारंभ्योत्तरतआलिखतिप्राचीमावृत्यदक्षिणतः प्राचीमपरा स्तिस्रोमध्येतस्यांत्रीहियत्रौत्रोप्यवर्षेणभूमिः पृथिवीवृतावृतासानोदधातुभद्रया ॥ प्रियेधामंनिधानीत्यद्भिः संप्रोक्ष्य ॥

यस्यामन्नं व्रिहियवमितिनमस्कृत्य ॥ ततराचारात्सुवासिन्यानीतं लौकिकाग्निं स्मार्ताग्निं वातैजसेनपिहितंत्वा मग्ने भृगवोन यंतामांगिरसः सदनंश्रेयएहि ॥ विश्वकर्मा पूरणेतुप्रजानन् धिष्णंपंथामनुतेनि शामश्रेयः पंथामनुतेति शामः ॥ स्वस्त्यंपंथामनु० भद्रंपंथामनु० भद्रोभवश्रेयो भवस्वस्त्योभव ॥ विश्वंभरावंसुधानिं प्रतिष्टाहिरण्यवक्षा जगंतो निवेशनी ॥ वैश्वानरं बिभ्रतीभूमिरग्नि मिंद्रऋषभा द्रविणंनोदधातु ॥ इत्यग्निस्छंडिलेप्रतिष्ठाप्य ॥ ममाग्ने वर्चोविहवेष्वंस्तुवयंत्वंधानास्तन्वंपूषेम ॥ मह्यंनमतांप्रदिशश्चतस्त्रत्वयाध्यंक्षेणप्रतंनाजयेम ॥ इतिसमित्रयहोमः ॥ अमुककर्मप्रारंभ निमित्तंव्रतग्रहणं करिष्ये ॥ स्वाहाकार वर्जंइधनार्थत्वादित्यर्थः ॥ कर्मणेवां प्रक्षालयामिवेखायवां प्रक्षालयामि सुकृतायवांप्रक्षालयामि ॥ इतिहस्तौ प्रक्षाल्यत्रिः अपरेणाग्ने दर्भानास्तीर्य ॥ तदुत्तरमानडुहंरोहितं चर्मप्राग्ग्रीवमुत्तर लोममास्तीर्य पवित्रेकुरुते ॥ दर्भावप्रछिन्न प्रांतौत्रिः प्रक्षाल्यअनुलोम मनुमाष्टीत त्रिर्विष्णोर्मनसा पूतेस्थइतिपवित्रीकरणं ॥ छेदनमित्यर्थः ॥ त्वंभूमिमत्येष्योजंसात्वंवेद्यांसीदसिचारुरध्वरे ॥ त्वांपवित्रमृषयोभरं तत्वंपुनिहिदुरितान्यस्मत् इतिपवित्रेअभिमंत्र्यांतर्धायचरुस्थाल्यांहविर्निर्वपति देवस्यत्वास० भ्यामितिअमुक देवताभ्यो जुष्टंनिर्वपामीतित्रिः चतुर्थंतूष्णीं: अनेनैवमंत्रेणजुष्टंप्रोक्षामीतित्रिः ॥ ततः स्रुग्मध्येअरातयोरितिदर्भेणसंमार्जनम् ॥ ततउलूखलंमुशलंशूर्पंचप्रक्षाल्ययथा दैवतंचर्मोपरिस्थापनं ॥ प्रधानदैवतमंत्रेणाभि मंत्र्यव्रीहीन्नुलूखलेउप्यावघ्नंस्त्रिः हविष्कृदाइवेहिति ॥ ततोवाचंविसृजेत् ॥ अनेनस्रुग्मध्येतंदुलनिर्वपणं ॥ अनेनत्रिः कंडनंअपहत्यत्रिः सुफलीकृतान् कृत्वात्रिः प्रक्षाल्ययज्ञियत्वाध्यरुक्षदित्यग्नौचरुमधिदधाति ॥ शुद्धाः पूतास्थेतिउदकमासिंचति ॥ ॐशुद्धाः पूतायोषि तोयज्ञियाइमाआपश्चरुमवसर्पंतुशुभ्राः ॥ अदुः प्रजांबहुलान्पशूनः पक्तौदनस्यसुकृतामेतुलोकम् ॥ १ ॥ ब्राह्मणाः शुद्धाइतितंदुलान ॥ ॐब्रह्मणाशुद्धाउतपूताघृतेनसोमस्यांशवः स्तंदुलायज्ञियाइमे ॥ अपः प्रविशतप्रति गृह्णातुवश्चरुरि

मंपत्त्वासुकृतामेतल्लोकम् ॥२॥ ॐपरि त्वाग्नेपुरं वयंविप्रंसहस्यधीमहि ॥ धृषद्वर्णंदिवेदि वेहंतारं भंगुरावतइतित्रिः पर्य्य ग्निकरोति ॥ मेक्षणेनत्रिः प्रदक्षिणमुदायौतिः अतऊर्ध्वंयथाकामंउत्तरतोग्नेरुपसादयतीध्ममुत्तरंवर्हिः ॥ अग्नयेत्वाजुष्ट प्रोक्षामीतिध्मंवार ॥ ३ च० ४ ॥ पृथिव्यैत्वाजुष्टंप्रोक्षामितित्रिः ॥ ३ तू० ४ ॥ बर्हिप्रोक्षणं ॥ बर्हिर्मध्यात् अर्द्ध दर्भमुष्टिमभ्युक्ष्यपश्चादग्ने प्रागग्रंनिदधातिपवित्रेवा ॥ उर्णम्रदंप्रथस्वस्वासस्थंदेवेभ्य इतिदर्भाणामर्द्ध मादायतानवाम हस्तेगृहीत्वा तन्मध्यादेक शाखांगृहीत्वा ऋषीणांप्रस्तरोसी तिदक्षिणतोग्नेर्ब्रह्मासनंनिदधाति ॥ यजमानस्यामुक कर्मार्थेहंयक्षे ॥ ॐयजतत्रत्वंभूयत इतिब्रह्मवरणं ॥ द्यावापृथिव्यौ समीक्षतेतिब्रह्मासनं ॥ इदमत्रब्रह्मणेन मइहिपूजाप्रतिष्ठा ॥ ब्रह्मासर्नाशवंसौम्यं स्थापयेद्दक्षिणेपरं ॥ आत्मासनं सदाब्रह्मा इदंदक्षतुसर्वतः ॥ ततस्तरणं ॥ अर्द्धस्तणंगृहीत्वा ॥ ॐस्तृणामिबर्हिःपरिस्तृहि० ॥ ॐस्तुणीहि० ॥ ॐदेवस्यत्वासवितु० हस्ताभ्यांप्रसूतः प्रशिषापरिस्तृणामि अनेनमंत्रेणस्तरणं ॥ ॐपरिस्तृणीहि परि धेहिवेदिमाजामिमोंषिरमुयांशयानां ॥ होतृषद नंहरि तंहिरण्ययंनिष्काएतेयजमानस्यलोके ॥ १ ॥ एवंदर्भमुष्टीत्यादिसर्वेउत्तरतः एवंस्तरणसंख्या१०एवमुत्तरतःकुर्वन अन्यत्रसमागच्छतिएवंदक्षिणोत्तरंकरोतीत्यर्थः ॥ समाप्तिश्चपश्चिमायांस्तीर्णंप्रोक्षतीहविषांत्वाजुष्टंप्रोक्षामीतित्रिः चतूं० नानभ्युक्षितंसंस्तीर्णंउपयोगंलभतेनैधोभ्याधानंनानुत्पूतंहविर्नाप्रोक्षितंयज्ञांगंतस्मिन्प्रक्षालितोपवातानिनिदधाति ॥ स्रव माज्यधानींचयतःवीलिनपूतमाज्यंगृहीत्वाअधिश्रोत्यपर्यग्निकृत्यपरित्वाग्नेतिमंत्रेणपूर्ववत्॥ उदगुद्वास्यपश्चादग्नेरुपसाद्य ॥ उदगग्राभ्यांपवित्राभ्यां उत्पवनं त्रिर्विष्णोर्मनसापूतमसिदेवस्त्वासवितोत्पुनात्वच्छिद्रेणत्वा पवित्रेणशतधारेणसहस्रधारेण सुपोत्पुनामीतितूष्णींचतुर्थं ॥ श्रृतंहविरभिघारयती ॥ ॐमध्वासमंजन् घृतवचकाराथइत्यभिधार्यंउदंचउद्वासयतीत्यर्थः ॥ उद्वासिताग्नेःश्रुतमकर्महव्यमासोदपृछम मृतस्यधामइतिअग्नेः पश्चिमायांदिशिचरुतस्थालीस्थापनीयापश्चादाज्यस्थालि निधायालंकृत्यसमानेनोत्पुनातु पूर्ववदुत्पवनंअदारस्त

इतिसूक्तेनउत्तिष्टेतकिमिछंतिदमगाअहंत्वेडेअभिभूः स्वादृगृहात् ॥ शुन्यैषिनिहतेयाजगंधोतिष्टारातेप्रमतमेह रंस्थाः इतिऐंद्रंअवेक्षते ॥ नहविरितिशिष्टाचारः अग्निर्भूम्यामोषंधिष्वग्निमापोंबिभ्रत्यग्निरश्मिषु ॥ अग्निरंतः पुरुषेषु गोष्वश्वेष्वग्नयः स्वाहा ॥ १ ॥ अग्निर्दिवआतपत्यग्नौदेवस्योर्वे१तरिक्षंअग्निमर्त्तासइंधतेहव्मवाहंधृतमियंस्वाहा ॥ २ ॥ अग्निंवसाः प्रथिव्यंसितनूस्त्विषि मंतंशंसिंतंमाकृणोतु ॥ भूम्यांदेवेभ्योददतियज्ञंहव्यमरं कृतंस्वाहा ॥ ३ ॥

युनज्मित्वाब्रह्मणादैव्येनहव्यायास्मैवोठवेजातवेदः इंधानास्त्वासुप्रजसः सुवीराज्योग्जीवेमबलीहतोवयंत स्वाहा ॥ ५ ॥ एभिर्मंत्रैरिध्मवंचकहोमः ॥ दक्षिणतोदपात्रमुपसद्याभिमंत्रयते ॥ यथाग्नेः ब्रह्मणस्पतिसत्यधर्मा अदीधर ॥ देवस्यसवितुः सुवइत्यभिमंत्र्य ॥ अथोदकमासिंचति ॥ इहेतदेवीरमृतंवसानाहिरण्यवर्णाः अनवद्यरुपाः ॥ आपः सुमुद्रोवरुणश्चराजासंपातभागान्हविषाजुषंतां ॥ इंद्रः प्रसीष्टावरुणप्रसूताः आपःसमुद्राःदिवमुद्वहंतु॥ इंद्रःप्रसौष्टाः वरुणप्रसूताः दिवस्पृथिव्याश्रियमावहंतु ॥ इत्युदकपूरणं ॥ इतिकौशिकोक्तेः ॥ ऋत्यंत्वासत्येनापरिभिचिंचामिजात वेदइतिसहहविर्भिः सर्वंसंप्रोक्ष्य ॥ जीवास्थजीव्यासंसर्बमायुर्जीव्यासं१उपजीवास्थोपंजीव्यासंसर्व०२संजीवास्थसं जीव्यसंसर्व०इतित्रिराचम्य ॥ अमुककर्मणिअमुकनामानमग्निं प्रतिष्ठापयामीतिप्रतिष्ठाप्यसंपूज्य ॥ अथाग्नेरुपस्थानं ॥ ॐप्रपद्येः ॐभूः ॐप्रपद्येॐभुवः प्रपद्येॐस्वः प्रपद्येॐजनः प्रपद्येइतिप्रपद्य ॥ पश्चात्तीर्णस्यदर्भानास्तीर्य ॥ उदैधिषव्यो दत्ततिष्टान्यस्यसदनेसीदयोस्मात्पाकतरेत्यात्मासनांनिरस्तःपराग्वसुः सहपाप्मानिरस्तः ॥ सास्तुयोस्मानद्वेष्टियंचव यंद्विष्मः ॥ इतिपार्श्वयोस्तरणंतदन्वालभ्य ॥ इदमहमर्वाक्वसोः सदनेसीदाम्यमृतस्यसननेसीदामि ॥ सत्यस्यसदने सीदामिइष्टस्यसदनेसीदामि॥ पूर्त्तस्यसदनेसीदामि ॥ माम्रषदेवबर्हिस्वसंस्थंत्वध्यासदेयमूर्णम्रदमनभिशोकंततोविमृग्व रींपृथिवीमावदामिक्षमांभूमिंब्रह्मणावाद्वधानां ॥ उर्जंपिष्ठंबिभ्रतीमन्नभागंघृतंत्वाभिर्निषिदेवभूमेइत्युपविशति ॥ इंद्रजीव सूर्यजीवदेव्यजोवाजं.वासमहम् ॥ बृहस्पतिर्ब्रह्माब्रह्मसदनेऽ आशिष्पतेबृहस्पतेयज्ञंगोपायद्युदुद्धत्तउन्नमतः शकेय

मितिहृदालभ्यजपेत् ॥ त्रिभिर्दर्भैः स्रुवंनिमृज्यनिष्टप्तमितिस्रुवंप्रतप्यपुनः संमार्ज्यस्थापयेत् ॥ एवंस्रुङ्मेक्षणयोः ॥ विष्णोहस्तोसीतिस्रुवग्रहणं ॥ विष्णोर्हस्तोसिदक्षिणापूष्णादत्तोबृहस्पतेः ॥ तंत्वाहंस्रुवमाददेदेवानांहव्यवाहनं ॥ अयंस्रुवोविदधातिहोमानृशताक्षरः छंदसाजगतेन ॥ सर्वयज्ञस्यसमनक्तिविष्टावार्हस्पत्येष्टिः शर्मणादैव्येनति ॥ तेन स्रुवेणचतुर्गृहणंस्रुचि ॥ भूः संभूत्यैत्वागृह्णे भूतये ॥ भुवः शंपुष्ट्यैत्वागृह्णयेपुष्णे ॥ २ ॥ ॐस्वः शंत्वागृहेसहस्रपोषाय ॥ ३ ॥ ॐजनस्थंत्वागृह्णेपरिमितपोषाय ॥ ४ ॥ इतिआज्यस्थालीव्यतिरिक्तहवनपात्रेगृहण्यं ॥ आभिचारिकेष्वमुष्यंत्वा प्राणायगृह्णेपानायव्यानायसमानायोदानायेति पंचममितिगृहणं ॥ ॐअग्नावग्निहृदापूतंपुरस्ताद्युक्तोयज्ञस्यचक्षुरिति जुहोतिः ॐअग्नावग्निहृदापूतंपुरस्ताद्युक्तोयज्ञस्यचक्षु

क्षतिपुरस्ताद्धोमः ॥ उदपात्रेसंपातः ॥ आज्यभागः ॥ संस्थितहोमः ॥ समृद्धिशांतानामित्येतावाज्यभागौ ॥ ॐवृष्णेबृहतेस्वर्विदेग्नेयेशुक्रंहरामीत्विषीमते ॥ सनः स्थिदान्वलवतः कृणोतुज्योकूचनोजीवातवेदधातिअग्नेयेस्वा हेत्युत्तरपूर्वार्द्धेआज्यभागंजुहुयात् ॥ तथैवदक्षिपूर्वार्द्धे ॥ ॐसोमायत्वांसोमदिव्योनृचक्षाः सुगांअस्मभ्यंपथोअनुरुयः॥ अभिनोगोत्रंविदुषः इवनेषोत्थ नोवाचमुषतींजिगाससीसोमायस्वाहा ॥ अत्रयेयेकर्मांगदेवारुतेषांस्थापनं ॥ तत पौर्णमासांतंतंत्रंकृत्वाप्रधानहोमः शुक्लप्रतिपदारभ्यपौर्णमासीयावत्पौर्णमासहोमः पूर्वोत्तरतंत्रयोः कृष्णप्रतिपदारभ्य अमांतंयावत्अमाहोमः कार्यः ॥ तद्यथा ॥ ॐपूर्णापश्चादुतपूर्णापुरस्तादुन्मंध्यतः पौर्णमासीजिगाय ॥ तस्यांदेवैः संवसंतोमहित्वानाकस्यपृष्ठेसमिषामदेमस्वाहा ॥ इदंपौर्णमासायेतिसर्वत्रसंपातः ॥ वृषभंवाजिनंवयंपौर्णमासंयजामहे ॥ सनोददात्वक्षितांरयिमनुपदस्वतींस्वाहा ॥ २ ॥ प्रजापतेनत्वदेतांन्यन्योविश्वारूपाणिपरिभूर्जजान ॥ यत्का० ॥ ३ ॥ पौर्णमासीप्रथमायज्ञियासीदन्हांरात्रिणामतिशर्वरेषु ॥ येत्वांयज्ञैर्यज्ञयेअर्द्धयंत्यमितेनकेसुकृतः प्रविष्टाः स्वाहा ॥ इतिपौर्णमासहोमः ॥ अस्यसंस्थितीहोमइतिसंज्ञा ॥ अथामाहोमः ॥ यत्तेदेवाअकृण्वन्भागधेयममावास्येसंवसंतोमहि

त्वा ॥ तेनोनोयज्ञंपिपृहिविश्ववारेरयिंनोधेहिसुभगेसुवीरं स्वाहाअमायैइदंनमम ॥ अंतरिक्षधेनुस्तस्यांवायुर्वत्सः सामे वायुनांवत्सेनेषमूर्जंकामंदुहां ॥ आयुः प्रथमंप्रजांपोषंरयिंस्वाहा ॥ २ ॥ दिव्यांदित्यायसमनमंत्सआर्ध्नोत् ॥ यथां दिव्यांदित्यायसमनंमन्नेवामह्यंसंनमः सन्नमतुआयु० ॥ ३ ॥ द्यौर्धेनुस्तस्यांआदित्योवत्सः सामंआदित्येनंवत्सेनेष मूर्जंकामंदुहाम् ॥ आयु० ॥ ४ ॥ दिक्षुचंद्रायसमनमंसआर्ध्नोत् ॥ यथांदिक्षिचंद्रायसमनमन्नेवामह्यंसन्नमः सन्नंमंतु आयु० ॥ ५॥ दिशोधेनवस्तासांचंद्रोवत्सः तामे चंद्रेणंवत्सेनेषमूर्जंकामंदुहांआयुःप्रथमंप्रजांपोषंरयिंस्वाहा ॥ इत्यमासं स्थितिहोमः एताघृतेनैवहोतव्याः पाकतंत्रेअभ्यात्तानहोमोभवतिअद्भुतादिषुनभवंति ॥ अथाभ्यात्तानहोमः ॥ अयंहोम संस्थितिहोमात्प्रथमः कार्यः ॥ तद्यथा ॥ सविताप्रसवानामिति० ॥ सप्तदशार्थर्वाब्रह्मादिजगत्यशेषाशकर्यअभ्यात्तान होमेविनियोगः ॥ सविताप्रसवानामधिपतिः समावतु ॥ अस्मिन्ब्रह्मंण्यस्मिन्कर्मण्यस्यांपुरोधायांमस्यांप्रतिष्ठायामस्यां चित्यांमस्यामाकूत्यामस्या माशिष्यस्यांदेवहूत्यांस्वाहा ॥ सवित्रेप्रसवानामधिपतय इदंनममसर्वत्रउदपात्रेसंपातः ॥ अग्निर्वनस्पतिनामधिपतिः समावतु ॥ अस्मिन्० ॥ अग्नयेवनस्पतीनामधिपतये० ॥ २ ॥ ॐद्यावापृथिवीदातॄणा मधिपत्नीतेमावतां ॥ अस्मिन्० ॥ द्यावापृथिवीभ्यांदातॄणामधिपत्नीभ्यां ॥ ३ ॥ वरुणोपामधिपतिः समावतु ॥ अस्मिन्० ॥ वरुणोपामधि० ॥ ४ ॥ मित्रावरुणौवृष्ट्याधिपतीतौमावतां ॥ अस्मि० ॥ मित्रवरुणाभ्णां० ॥ ५ ॥ मरुतः पर्वतानामधिपतयस्तेमावंतु ॥ अस्मिन्० ॥ मरुद्भ्यः पर्व० ॥ ६ ॥ सोमोवीरुधामधिपतिःसमावतु ॥ अस्मिन ॥ सोमायवीरुधा० ॥ ७ ॥ वायुरंतरिक्षाधिपतिः समावतु ॥ अस्मिन० ॥ ८ ॥ सूर्यश्चक्षुषामधिपतिः समावतु ॥ अस्मिन्० ॥ ९ ॥ चंद्रमानक्षत्राणामधिपतिः समावतु ॥ अस्मिन्० ॥ १० ॥ इंद्रोदिवोधिपतिः समा

वतु ॥ अस्मिन्० ॥ ११ ॥ मरुतांपितापशूनामधिपतिः समावतु ॥ अस्मिन्० ॥ १२ ॥ मरुतांपित्रेपशूनामधिपतिः समावतु ।' मृत्युः प्रजानामधिपतिः समावतु ॥ अस्मिन्० ।। मृत्यवेप्रजानामधि० ॥ १३ ॥ यमः पितृणामधिपतिः समावतु ॥ अस्मिन्० ॥ १४ ॥ पितरः परेतेमावंतु ॥ अस्मिन्० ॥ पितृभ्यःपरेतेभ्यः ॥ १५ ॥ तताअवरेंतेमावंतु अस्मिन्० ॥ ततोभ्योवरेभ्यः ॥ १६ ॥ ततंस्ततामहास्तेमावंतु ॥ अ० ॥ तताययततामहेभ्यः इदंनममेसर्वत्रउदपात्रे संपातः ॥ अत्रप्रधानहोमः ॥ ततोउत्तरतंत्रः ॥ अकूत्यैत्वास्वाहा ॥ ॐकामायत्वास्वाहा ॥ समृद्धयेत्वास्वाहा ॥ आकूत्यैत्वाकामायत्वासमृद्धेत्वास्वाहा ॥ ॐस्तुवास्तोमंसमर्द्धयगायत्रेणरथंतरं ॥ बृहत्कायप्रवर्त्तनीस्वाहा ॥ उदपात्रे संपातः ॐपृथिव्यामग्नयेसमनमंत्सआंध्नोंत् ॥ यथांपृथिव्यामग्नये समनमंन्नेवामह्यंसंन्नमंतुस्वाहा ॥ १ ॥ पृथिवीधेनु स्तस्यांअग्निर्वत्सः सामेग्निनावत्सेनेषमूर्जंकामंदुहां ॥ आयुः प्रथमांप्रजांपोषंरयिंस्वाहां ॥ २ ॥ अंतरिंक्षेवायवेसमंन मंन्सआंध्नोंत् ॥ यथांतरिंक्षेवायवेंसमनमंनेवामह्यंसंन्नमः संन्नमंतुआयु० ॥ ३ ॥ अतरिक्षंधेनु० ॥ ४ ॥ दिव्यांदित्या समन्नमं० ॥ ५ ॥ द्यौर्धेनुस्तस्यां० ॥ ६ ॥ दिक्षुचंद्राय० ॥ ७ ॥ दिशोंधेनवस्तासांचंद्रो० ॥ ८ ॥ इतिसन्नतिहोमः ॐप्रजापतेतिआज्यमुपस्तीर्यप्रजापतिहोमः ॥ ॐप्रजांपतेनत्वदेतां० परिभूर्जजान यत्का०प्रजापतयेस्वाहा ॥ इदंप्रजा पतयेनमम ॥ ततोप्रधानहोमवच्चरुशेषेणचतुगृहीतंकृत्वा एकमवदानंईशानदेशेॐआदेवानामपिपंथामगमयछन्कवांमत दंनुप्रवोंढुं ॥ अग्निर्विद्वांत्सयजासइद्धोतासोंध्वरान्सर्ऋतूनकंल्पयातिअग्नयेस्विष्टकृतेस्वाहा ॥ इतिप्रथमस्रुच ॥ १ ॥ मध्येऽवदानं१अंतेस्रुवएवंचतुगृहीतंकौशिकोक्तं ॥ सकृत्२दवदायद्विरभिधारयतीतिअंगुष्टपर्वमात्रंअवदानेमितिकात्या यनःइतिस्विष्टकृतंहुत्वा ॥ उदकंसंस्पर्श्य ॥ सर्वप्रायश्चित्तीयुान्जुहोति ॥ ॐस्वाहेष्टाभ्यःस्वाहा ॥ १ ॥ ॐवषण्निष्टेभ्यः स्वाहा ॥ २ ॥ भेषजंनिष्ट्यैस्वाहा ॥ ३ ॥ निष्कृत्यैदुरिष्टयैस्वाहा ॥ ४ ॥ दैवीभ्यस्तनूभ्यस्वाहा ॥ ५ ॥ ॐअया

श्चाग्नेस्यनभिषस्तिश्चसत्यमित्वमयाअसिअयासामनसाकृतोयासंहव्यमुहिषे ॥ आनोधेहिभेषजंस्वाहा ॐस्वाहाइद मग्नय० ॥ ॐभूःस्वाहा ॥ ॐभुवःस्वाहा ॥ ॐस्वःस्वाहा ॐभूर्भुवःस्वःस्वाहा ॥ ॐयन्मेस्कंन्नंमनसोजातवेदोयद्वास्कंद द्धविषोयत्रयत्र ॥ उत्प्रुषोविप्रुषः संजुहोमिसत्यासंतुयजमानस्यकामाःस्वाहा ॥ इतिचतुर्गृहीतेन ॥ ॐपुनर्मैत्विंद्रियंपु नंरात्माद्रविणंब्राह्मणंच॥ पुनंरग्नयोधिष्ट्यांयथास्थामकंल्पयंतामिहैवस्वाहा ॥ (ॐयन्नोस्कन्नं) यदस्मृतिचकृमकिंचीं दग्नउपारिमचरंणेजातवेदः ततः पाहितानः प्रचेतः शुभेसखिंभ्योअमृतत्वमस्तुनः स्वाहा ॥ स्कंन्नस्मृतिहोमः ॥ ॐ यदद्यत्वांप्रयतीयज्ञेअस्मिन्होताचिकित्वंनवृणीमहीह ॥ ध्रुवमंयोध्रुवमुताशविष्टप्रवद्वान्यज्ञमुपयाहिसोमंस्वाहा ॥ इति संततहोमः॥ उदपात्रेसंपातः स्रुचिस्रुवचतुष्टयंकृत्वामनंसस्यतइमंन्नोदिविदेवेषुयज्ञं ॥ स्वाहादिविस्वाहांपृथिव्यांस्वाहां तरिक्षेस्वाहावातेधास्वाहा ॥ इतिचतुगृहीतहोमः बर्हिराज्यशेषेणक्तिपृथिवित्वानज्मिमूलेअंतरिक्षायत्वानज्मिमध्येदिवे त्वानज्मिमूलेएवंवार३स्रुवंघृतपूर्णकृत्वातदुपरिसर्वाणिबर्हिर्होमः ॥ संबर्हिरक्तंहविषांघृतेनसमिंद्रेणवसुनासंमरुद्भिः ॥ संदेवैर्विश्वेदेवेभिरक्तमिंद्रंगछतुहविस्वाहा ॥ इतिबर्हिर्होमः ॥ यथादैवतंस्रुवमग्नौधारयनयदाज्यधान्यांतत्संस्रावयति ॥ संस्रावभागास्तवि शाष्टहंतः प्रस्तरेष्टाबर्हिषदश्चदेवा : ॥ इमंयज्ञमभिविश्वेगृणंतः स्वाहा ॥ देवाअमृतमादयंत ॥ इति संस्रावहोमः ॥ ततोस्रुचिपूर्णमुदकंप्राचिनिनयति॥ ॐवनस्पतिभ्योवानस्पत्येभ्योओषधीभ्योवीरुद्भ्योसर्वेभ्योदेवेभ्यो देवजनेभ्यः पुण्यजनेभ्यः इदंनमम॥ प्राचोनांतिदक्षितः ॥ स्वधामपितामहेभ्यः स्वधापितामहेभ्यःस्वधापितृभ्यः ॥ पितृभ्यइदंनमम ॥ पश्चिमे ॥ तार्क्ष्यांयारिष्टनेमयेमृतंमह्यंस्वाहा ॥ इदंतार्क्ष्यायनमम ॥ अथोत्तरतोनिनयनं ॥ सोमाय सप्तर्षिभ्यः स्वाहा ॥ सप्तर्षिभ्यइदंनमम ॥ स्रुवोसिघृतादनिषितः सपत्नक्षयणोदिविषिदअंतरिक्षे ॥ सीदपृथिव्यांसी दोत्तरोहंभूयासमधरेमत्सपत्ना ॥ इतिस्रुवंप्राक्दंडंनिदधाति ॥ अग्नेरुत्तरतः ॥ विमुंचामिब्रह्मणाजातवेदसमग्निहोतारमज

रंरथस्मृतं ॥ सर्वादेवानांजनिमानिविद्वान्यथाभागंवहतुहव्यमग्निंअग्नयेस्वाहाइत्येकांसमिधंहुत्वा ॥ एधोस्येधिषीय
स्वाहा ॥ इतिद्वितीयां ॥ समीदसिसमेधिषीयस्वाहा ॥ इतितृतीयां ॥ तेजोसितेजोमयिधेहि ॥ इतिमुखंमार्जयति ॥
अग्नेः पूजनं अभ्यर्चतसुष्टुतिंगव्यमाजिमस्मासुभद्राद्रविणानिधत्त ॥ इमंयज्ञंनयतदेवतानोघृतस्यधारामधुमत्पवंतां
इतिसूक्तेनवाऋचाअग्न्युपस्थानम् ॥ प्रजापतेत्यथर्वाप्रजापतिस्त्रिष्टुप्प्रजापत्युपस्थानेविनियोगः ॥ ॐप्रजापते० इत्यू
पस्थानं ॥ ॐत्र्यायुषमथर्वाग्निस्त्रिष्टुप् ॥ भस्मधारणेविनियोगः ॥ ॐत्र्यायुषंजमदग्नेकश्यपस्यत्र्यायुषम् ॥ त्रेधामृतं
स्यचक्षणंत्रीण्यायूंषितेकरं ॥ इतिकंठेललाटेहृदिभस्मधारणंकृत्वा ॥ दक्षिणाग्नेःत्रीन्विष्णुक्रमान्क्रमते ॥ ॐविष्णो
क्रमोसिसपत्नहापृथिवीशंशितइतिप्रथमंक्रमंक्रामयित्वाश्रावपात्रात्व्रीहियवशमीमिश्रोदकंनिनयति ॥ एवंसपत्नहांतरिक्ष
संशितः इतिद्वितीयं ॥ एवंसपत्नहाद्यौः संशितः॥ इतितृतीयं॥ एवमपसव्येन्त्रीन्॥ सव्यम्॥ सूर्यस्यावृतंपंचब्रह्मालिंगो
क्तानुष्टुप्द्धेगायत्र्युष्मिक्दक्षिणाभ्यावर्त्तनेविनियोगः ॥ सूर्यस्यामृतंमन्वावर्त्तेदक्षिणामन्वावृतंसामेद्रविणंयच्छतुसामां
ब्राह्मणवर्चसम् ॥ १ ॥ दिशोज्योतिष्मतीरभ्यावर्तेतामेद्रविणमूयच्छन्तु तामेंब्राह्मणवर्चसं ॥ २ ॥ सप्तऋषीनभ्या
वर्त्तेतेमेद्रवि०तेमेब्राह्मणवर्चसं ॥ ३ ॥ ब्रह्माभ्यावर्तेतन्मेद्रवि० तन्मेब्राह्मणवर्चसं ॥४॥ ब्राह्मणाअभ्यावर्त्तेतेमेद्रवि०मेते
ब्राह्म० ॥ ५ ॥ इतिऋग्भिअभिदक्षिणमावर्त्तयतिजपन्नावर्त्तयतीत्यर्थः ॥ अगन्मस्वः इत्यादित्यमीक्षते ॥ अथाग्नेः प्रदक्षिणां
करोति ॥ समास्त्वेतिपंचानांशौनकोग्निर्नानः छंदांसिप्रदक्षिणेविनेयोगः ॥ समास्त्वाग्नऋतवोवर्द्धयंतुॐसंवत्सराऋषयो
यानिसत्या ॥ संदि०येनदिदिहिरोचनेनॐविश्वाआभाहिप्रदिशश्चतस्रः ॥ ॐसंचेध्यस्वाग्नेप्रचप्रचवर्द्धयेमं ॥ ॐउच्च
तिष्ठमहतेसौभगाय ॥ ॐमातेरिषन्नुपसत्ताशे अग्ने ॥ ॐब्रह्मणस्तेयशसःसंतुमान्ये॥अथाग्निंनमस्करोति॥ नमःस्तेतिभृग्वं
गिराग्निरनुष्टुप्नमस्करणेविनियोगः ॥ ॐनमस्तस्मैनमोदात्रेशालापतयेचकृण्मः ॥ नमोग्नयेप्रचरतेपुरुषायचतेनमः ॥ इति

नमस्कारपूर्वकंधूमभक्षणं ॥ ततोक्षतैः ॥ इंद्रस्यवचसावयंमित्रस्यवरुणस्यच ॥ ब्रह्मणास्थापितंपात्रंपुनरुत्थापयामसि ॥
इत्यपरेणाग्निमुदपात्रंपरिक्ष्योत्तरेणाग्निंपूर्वस्थापितमुदपात्रमुत्थाप्याग्निंपश्चिमतः परिहृत्यअग्नेरुत्तरतः स्थापयतीत्यर्थ ॥
ततआपोहिष्ठामयोभुवस्तानऊर्ज्जेदधातनः ॥ महेरणायचक्षसे ॥ योवः शिवतमोरसस्तस्यभाजयतेहनः ॥ उषतीरिव
मातरः ॥ तस्माअरंगमामवो यस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ इतिमार्जनंसपवित्राद्भिः ॥ पवित्रउपगृहश्वां
पत्यंजलीकृत्वा ॥ ॐसमुद्रंवः प्रहिणोमि० ॥ ॐइदंजनासो० ॥ इतिद्वाभ्यांउदपात्रंनिनयति ॥ वीरपुरुषोहंभूयासमिति
मुखंविमार्ष्टि ॥ ॐव्रतानीव्रतपतयउपाकरोम्यग्नये समेद्युम्नंबृहद्यशोदीर्घमायुः कृणोतुमेस्वाहा ॥ इत्येकांसमिधंव्रतविस
र्जनोयेजुहोति ॥ सत्यंतत्वेनपरिषिंचामिजातवेदइत्युदकेनाग्निंत्रिः पर्युक्ष्यच०तूष्णीं ॥ अमुककर्मणः समृध्यर्थंन्यूनाति
रिक्तपरिपूरणार्थंदास्यमानंपूर्णपात्रंसहिण्यंब्रह्मणेतुभ्यमहंसंददे ॥ कर्मापवर्गेब्राह्मणभोजनसंकल्पः ॥ ॐयस्मात्कोशादिति
ब्रह्मापरमात्मात्रिष्टुप्कर्मसमापनीयमंत्रजपेविनियोगः ॥ ॐयस्मात्कोशादुद्भरामवेदंतस्मिन्नंतरवध्मएनम् ॥ कृतमिष्टं
ब्रह्मणोवीर्येणतेनमादेवातपसावतेह ॥ ॐपुनर्मैत्विंतिब्रह्मापरमात्माबृहतीआत्मानमंत्रणेविनियोगः ॥ ॐपुनर्मैत्विद्रियं
पुनरात्माद्रविणंब्राह्मणंच ॥ पुनरग्नयोधिष्ण्यायथास्थामकल्पयंतामिहैव ॥ ॐचमेस्वरश्चमेयज्ञोपचतेनमश्च ॥ यत्तेन्यूनंत
स्मैतउपयतेतिरिक्तंतस्मैनमः ॥ अग्नयेनमः ॥ स्वस्तिश्रद्धांमेधांयशः प्रज्ञांविद्यांबुद्धींश्रियंबलंआयुष्यंतेजआरोग्यंदेहिमे
हव्यवाहन ॥ इतिनमस्कारः ॥ अत्राद्य० अमुककर्मणिस्थालिपाकाख्यंकर्मकृतस्यविधेः सर्वंपरिपूर्णमस्तु ॥ शांतिसूक्तं
जपित्वा ॥ कृतंकर्मेश्वरार्पणंकुर्यात् ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौषट्पन्नागरद्विवेदिरविशंकरकृतेस्थाली
पाकप्रयोगरश्मिरष्टादशोयम् ॥

नारायणायनः॰ श्रीगणेशायनमः॥ प्रणम्यादौगुरून्भक्त्यानत्वाश्यामांविशेषतः ॥ हितायशौनकीयानांकरोमि
गृहपद्धतिम् ॥ १ ॥ तत्रादौगृहयज्ञस्त्रिधा ॥ सनित्योनैमित्तकःकाम्यश्च ॥ मकरकर्कटादिसंक्रांतिव्यतिपातादिषुक्रीय
माणोनित्यः ॥ विवाहाद्युत्सवेषुक्रीयमाणोनैमित्तिकः ॥ लक्ष्म्यादिकामनयाक्रीयमाणः ॥ काम्यः ॥ काम्येकुंडमंडपा
दिनित्यं ॥ नित्यनैमित्तिकयोस्त्वनित्यम् ॥ नित्यनैमित्तिकंहित्वासर्वमन्यत्समंडपमितिमात्स्योक्तेः ॥ कुंडमेवंविधंनस्या
त्स्थंडिलंवासमाश्रयेदितिप्रपंचसाराच्च ॥ नित्यनैमित्तिकयोप्रतिपदोक्तवस्त्वलाभेतत्प्रतिनिधिरूपंवस्त्वतरंग्राह्यं ॥ काम्येतु
प्रतिनिध्यभावात्प्रतिपदोक्तवस्तून्ये वग्राह्याणिअत्रयद्यपि ग्रहयज्ञास्त्रिधाप्रोक्तपुराणश्रुतिकोविदैः ॥ प्रथमोयुतहोमःस्या
ल्लक्षहोमस्ततःपरः॥ तृतीयःकोटिहोमस्तुसर्वकामफलप्रदः॥ इत्यनेनायुतहोमादीनांप्राधान्यमुक्तं॥ तथापि॥ सूर्यसोमस्तथा
भौमोबुधोजीवःसितोर्कजः ॥ राहुः केतुरमीप्रोक्ताग्रहालोकहितावहाः॥ वित्तशक्तिगृहेनास्तिगृहपोडासमागता॥ श्रद्धया
स्वल्पवित्तेनतमेकंपूजयेद्ग्रहमित्येकस्यपोडाकरग्रहस्य पूजनेनापिइष्टसिद्धिस्मरणाद्ग्रहपूजाहोमयोरपिप्राधान्यं प्रतीयते
किंच॥ उपक्रांतस्यत्रिविधस्यापि ग्रहमखस्यहोमतंत्र देवतानुपदेशादप्याचार्येणशौनकेनैतयोः प्राधान्यंसूचितं ॥ नह्यत्ररो
पिप्रधानमंतरेणागान्येवब्रवक्ति ॥ कथंत्रिकालदर्शनमाचार्यस्यैवसंभवति ॥ अतः पूजाहोमयोः प्राधान्यं ॥ अयुतहोमादी
नांतुग्रहयज्ञविशेषत्वं ॥ अतएवयाज्ञवल्क्येनाप्ययुतहोमादिविधिमंतरेणैवकेवलग्रहपूजाहोमविधिः प्रदर्शितः ॥ प्रपंचि
तंचेदंशांतिमयुखेमयूखकारैः॥ अत्रकुंडमंडपादिकरणप्रकारस्यविवाहादिनैमित्तिकेष्वनावश्यकत्वंतथापिकाम्यकर्मप्रयोगा
दावावश्यकत्वादत्रकुडमंडपादिप्रकारः कथ्यते ॥ तत्रादौभूमिशोधनपूर्वकमंडपकरणंक्रीयते ॥ तत्रभूमानमादित्यपुराणे
जालांतरगतेभानौयत्सूक्ष्मंदृश्यतेरजः ॥ प्रथमंतत्प्रमाणानांत्रसरेणुंप्रचक्षते ॥ त्रसरेणुस्तुविज्ञेयोह्यष्टौयेपरमाणवः ॥
त्रसरेणवस्तुतेह्यष्टौरथरेणुस्तुसंस्मृतः ॥ रथरेणवस्तुतेह्यष्टौवालाग्रंतत्स्मृतंबुधैः ॥ वालाग्राष्टकंलिक्षास्तुयूकालिक्ष ष्टकं
तथा ॥ अष्टौयूकायवंप्राहुरंगुलंतुयवाष्टकं ॥ अन्यत्रापियूकाष्टकंयवंप्राहुर्यवानामुदरैस्तथा ॥ अष्टभिश्चांगुलंतिर्यक्त्वत्रा
नामुत्तमंमतं ॥ सप्तभिर्मध्यमंप्रोक्तंषडभिः स्याद्धमांगुलमिति ॥ द्वादशांगुलमात्रोवैवितस्तिपरिकीर्त्तितम् ॥ अंगुष्ठस्यप्रदे

शिन्याव्यासः प्रादेशउच्यते ॥ तालस्मृतोमध्यमयागोकर्णश्चाप्यनामया ॥ कनिष्ठयावितस्तिस्तुद्वादशांगुलमानकः ॥
रत्निस्त्वंगुलपर्वाणिविज्ञेयस्त्वेकविंशतिः ॥ चत्वारिविंशतिश्चैवहस्तस्यादंगुलानितु ॥ किष्कुः स्मृतोद्विरत्निस्तुद्विचत्वारिं
शदंगुलः ॥ षण्णवत्यंगुलिश्चैवधनुर्दंडः प्रकीर्त्तितः ॥ धनुर्दंडयुगंनालिर्ज्ञेयाह्येतेयवांगुलैः ॥ धनुषांत्रिशतंनल्वंआहुः
संख्याविदोजनाः ॥ धनुः सहस्त्रेद्वेचापिगव्यूतिरुपदिश्यते ॥ अष्टौधनुः सहस्त्राणियोजनंपरिकीर्तितम् । विष्णुधर्मो
त्तरे ॥ यदुत्पन्नमथाश्नातिनरः संवत्सरंद्विजः ॥ एकंगोचर्ममात्रंतुभुवः प्रोक्तंविचक्षणैः ॥ बृहस्पतिः ॥ दशहस्तेन
दंडेनत्रिंशदंडानिवर्त्तनं ॥ दशतान्येवगोचर्मब्राह्मणेभ्योददातियः ॥ इतिभूमानम् ॥ मार्जनखननाद्यन्यतमप्रकारेणयथो
चितंभूमिः संशोध्य ॥ तत्रमंडपस्थलंसिद्धांतशेखरे ॥ स्थालादर्कांगुलोछ्रायंमंडपस्थलमीरितमिति ॥ मडपंप्रकृत्यकपि
लपंचरात्रे ॥ उछ्रायोहस्तमानंस्यात्सुसमेचसुशोभनमिति ॥ ततोडंडत्रयनिर्मितदीर्घसूत्रत्रिकोणाकारयंत्रेदंडाग्राभ्यांभुवि
न्यस्तेयंत्रमुलात्तिर्यग्दंडोपरिलंबितमधोभारवद्भूमिमप्राप्तंसूत्रंयथातिर्यग्दंडमध्यमूत्रेंचिन्हेयतेत्तथानिम्नाभूः पूर्वोच्चावाखन
नीयेत्यादिशिल्पशास्त्ररीत्यातांसमी कृत्यचमंडपा द्युपयुक्तांप्राचींसाधये देवंसमायांभुविद्वादशांगुलाधिकव्यासर्द्धमेकं
तन्मध्येचापरंनवांगुलव्यासार्द्धमितिवृत्तद्वयंकृत्वा तन्मध्येद्वादशांगुलं ॥ पृथुमूलंसूक्ष्माग्रंरुज्जूशंकुंनिधायनवांगुलवृत्त
रेखायांचतस्त्रोदिशः प्रकल्प्यतासुचतस्त्रोरुज्व्यः पंचदशांगुलाःशलाकाः शंकग्रस्पृष्टाग्राः स्थाप्याः ॥ शंकुसमतार्थंताष्टश
शंकग्रछायाचमहद्वृत्तरेखांपूर्वाह्णे यत्रस्पृशतिसाप्राक् ॥ यत्रापराह्णेसाप्राक् ॥ सूक्ष्मप्राचीज्ञानार्थंतुपरदिनेपितस्मिन्नेववृत्ते
शंकुछायानिर्गमप्रवेशयोश्चिन्हंकृत्वापूर्वापर देनछाया निर्गमन चिन्हयोरंतरालमिष्टैस्त्रिचतुरार्द्यैर्भागैर्विभज्यापूर्वदिनछाया
प्रवेशनिर्गमांतरालंघटीः पादछायाघटियंत्रादिनाज्ञातव्याताभिर्घटिकाभिः कल्पितानभागान् गणयेत्षष्टिभिश्चहरेत् ॥
ततोलब्धांशेनप्राच्यामेव पूर्वदिनकृतापग्रमचिन्हादुत्तरायण उत्तरस्मिनदक्षिणायने दक्षिणस्मिन्नंकयेतूतदुपरिपूर्वछाया
प्रवेशचिन्हेपरिचधृतेसूत्रेसूक्ष्माप्राचीभवति ॥ दिक्ज्ञोपायांतरंचशुल्वे ॥ कृत्तिकाश्रवणपुष्येश्चित्रास्वात्योर्यदंतरम् ॥
एतत्प्राच्यादिशोरूपंयुगमात्रोदितेसतीतिअत्रायंगुरूपदेशः ॥ रज्वोंसूक्ष्मरंध्रांनलिकांकाष्टादौबध्वातद्रंध्रेणयुगमात्रमुपरि

गतंकृत्तिकादिनक्षत्रंदृष्ट्वा॥ नलिकाताभ्यांप्राक्प्रत्यग्देशयोः सूक्ष्मपाशागद्वयमवलंबद्वयंवाभूमौ प्रक्षिप्यतच्चिन्हयोः प्राचि सूत्रंदेयमिति ॥ एवमेवध्रुवंदृष्ट्वोदीचीसाध्याचित्रास्वात्यंतराल ज्ञानार्थंतुनलिकांद्वयेनैकेनचदंडांतरेणत्र्यस्राकारयंत्रंकृत्वा दंडंचमध्येंकयेत् ॥ नलिकाद्वयांतौतुतथातत्क्षणादिनापरस्परंयोजनीयंयथैकेनैवप्रयत्नेनयुगपन्नक्षत्रद्वयमपिदृश्यते ॥ एवंदृष्ट्वामिलितान्नलिकाद्वयांताद्दंडमध्यांकाच्चपाषाणावचलंबौप्रक्षेप्तव्याविति ॥ अथमंडपादिलक्षणम् ॥ तत्रपंचरात्रे ॥ कनीयान्दशहस्तः स्यान्मध्यमोद्वादशोन्मितः ॥ तथाषोडशभिर्हस्तैर्मंडपः स्यादिहोत्तमः ॥ प्रतिष्ठासारसंग्रहे ॥ मंडपः कलाहस्तोवासर्वलक्षणसंयुतः ॥ दशद्वादशहस्तोवाद्विद्विवृध्याततः क्रमात् ॥ लिंगपुराणे ॥ तुलापुरुषदानप्रकरणे ॥ त्रिंशद्धस्तप्रमाणेनमंडपंकूटमेववा ॥ अथाष्टादशहस्तेनकलाहस्तेनवापुनरितित्रिंशतिहस्तोप्युक्तः ॥ मध्यस्तंभवलिकोपरि गतैश्चतुर्भिरष्टभिर्वामृदंगाकारकलशप्रांतैः काष्ठैर्मध्येशिखराकारयतः कूटं ॥ कूटोस्त्रीशिखरंशृंगमित्यभिधानानुसारात् ॥ मध्यस्तंभोपरिसमतयाछादितोमंडपइतिहेमाद्रिः ॥संप्रतीतूकुटएवादृशेलोकानाम् ॥ तत्रैवचमंडपभ्रमः॥ दशहस्तमंडपस्तु एकमेखलपक्षेएकाग्निविधानपक्षेचोपयुक्तोभवतीइतिमदनरत्ने ॥ पंचरात्रे ॥ कुर्याद्वैष्णवयागेषुचतुर्द्वारांश्चमंडपान् ॥ सारदारुमयान्स्तंभानवेदसंख्यांश्चूडासमन्वितान् ॥ व.लिकाभूर्ध्वतस्तेषांस्तंभद्वादशकंपुनः बाह्यपीठप्रमाणेनतत्रसूत्रविधा नतः ॥कल्पयेद्विकरंद्वारंचतुरंगुलवृद्धितः ॥ मध्यमोद्भमयोर्वेदीमंडपस्थत्रिभागतः ॥ चतुर्थांशोछ्रितिस्तस्याख्रिसप्तपंचतो पिवा ॥ नवैकांदशहानंवाइष्टकाभिः प्रकल्पयेदिति ॥ चूडाशिखावलिलामितितेषांचक्षुस्तंभानांशिखाभिः प्रोतछिद्रण्यु भयतश्छिद्रद्वयोपेतानिवलिकाख्यानितियक्वाष्टानिविधेयानीत्यर्थः बाह्यइत्यादि ॥ आदीमध्यस्तंभचतुष्टयंविन्यस्यत द्वाह्यपरिधौमंडपक्षेत्रविस्तारपर्यायपीठप.रिमितमेवंशोडषस्तंभतासंपद्यते ॥ तेषुचत्वारोमंडपायामार्द्धमिताछ्रायाअष्ठहस्ता नवहस्तावाभवंति ॥ अधममध्यमोत्तमरूपेष्वष्टहस्ताएतचत्वारः ॥ शारदातिलके ॥ उक्तत्वादितितत्रापिमध्यस्तंभेषु चुडास्वेवतिर्यक्काष्टनिवेशनम् ॥ बाह्येषुतचूडास्तुस्तंभकरणेषुत्रेत्यनियमः सर्वेच ॥ पंचमांशंन्यसेद्भूमौसर्वसाधारणो विधिरित्युक्तत्वात् सूत्रपंचमांषेननिधेयाः ॥ सर्वेपिदशांगुलसूत्रवेष्टनयोगस्थौल्यादि विधेयाःकल्प्येदित्यादि ॥ कनिष्ठ

मंडपेद्वारचतुष्टयंद्विहस्तविस्तारं ॥ तथामध्यमेचतुरंगुलाधिकद्विहस्तविस्तारम् ॥ एवमुत्तमेष्टांगुलाधिकद्विहस्तविस्तारं ॥ मध्यमोत्तमयोर्वेदोत्यादि ॥ मंडपमध्येत्रिभागमानावेदिः स्त्र्यायामतृतीयचर्थ पंचमसप्तमनवमैकादशान्यतमेनोच्चा ॥ तुला पुरुषेतुमात्स्ये॥ सप्तहस्ताभवेद्वेदीमध्येपंचकरावथवेतिसिद्धांतशेखरे ॥ चतुरस्राचतुः कोणावेदीसर्वफलप्रदा ॥ तडागादि प्रतिष्ठायांपद्मिनीपद्मसन्निभा ॥ राज्ञांस्यात्सर्वतोभद्राचतुर्भद्राभिषेचने॥ विवाहेश्रीधरीवेदीविंशत्यस्रसमन्वितेति ॥ द्वारंदे हल्याबहिर्हस्तमात्रेद्वारशाखानिखायाइतिनिबंधांतरे॥ व्रतखंडेतुहस्तद्वयंबहिस्त्यक्त्वातोरणानिनिवेशयेदित्युक्तंमात्स्ये ॥ द्वारेषुकार्याणिचतोरणानिचत्वार्यपिक्षीरवनस्पतीनामिति॥ अयमर्थः॥पूर्वद्वारेअश्वत्थस्यशाखेदक्षिणेउदुंबरशाखेपश्चिमेप्लक्ष शाखेउत्तरतोवटशाखे ॥ शाखाश्चाधममध्यमोत्तममंडपेषुक्रमात्पंचषट्सप्तहस्तोच्चास्तासामुपरिकृतचूडासुतियक्फलमुभ यतः ॥ सछिद्रंचूडान्यस्तछिद्रंनिदध्यात् ॥ तद्विहस्तमध्यममंडपेअंगुलषट्काधिकंद्विहस्तंमध्ये ॥ सार्द्धहस्तद्वयमुत्तमे ॥ नियक्फलकोपरिमध्येमंडपेषुक्रमात्चतुरंगुलाः सार्द्धचतुरंगुलाः पंचांगुलाश्चकीलाः निवेश्याः तियक्फलकंकीलाश्चतत्त त्काष्टचाएव ॥ यद्वारतुशास्त्रे ॥ मस्तकेद्वादशांशेनशंखचक्रगदांबुजं ॥ प्रागादिक्रमयोगेनन्यसेत्तेषांस्वदारुजं ॥ द्वादशां शोत्रफलकस्यचतुरंगुलादिरेवोक्तः ॥ शंखचक्रगदांबुजाकारकरणंवैष्णवयागविषयं ॥ शैवयागेतुतेकीलास्त्रिशूलाः स्युस्त्रि शूलाकारत्वंचैवं ॥ मध्यकीलास्त्रिशूलाकारत्वंचैवं ॥ मध्यकीलोनवांगुलोवृत्तःसपाद्व्यंगुलविस्तारःतमुभतोन्यौकिंचिद्वक्रौ॥ दैर्ध्यमध्येश्चलस्यमूलांगुलद्वयंविलेप्रविशति ॥ इत्यधममंडपे ॥ मध्यत्वेएकादशांगुलउछ्रायः पादोनत्र्यंगुलविस्तारः ॥ त्र्यंगुलोबिलप्रवेशः ॥ उत्तमेत्रयोदशांगुलउछ्रायः सपादत्र्यंगुलोविस्तारश्चतुरंगुलोबिलप्रवेशः ॥ इदंचपिंगलामते ॥ शूलेनचिन्हिताकार्याद्वारशाखास्तुमस्तके ॥ शूलेनवांगुलैर्दैर्ध्यंतुरीयांशेनविस्तृतिः ॥ ऋजुर्वैमध्यशृंगस्यात्किंचिद्वक्रंच पक्षयोः ॥ प्रथमंतत्समाख्यातंद्व्यंगुलंरोपयेत्तथेत्यादिनोक्तं एषामलाभेएकवृक्षजानितोरणानितस्याप्यभावेशमीद्रुमजानि एतन्निवेशमंत्राश्चाग्निमीलइषेत्वाअग्नआयाहिशन्नोदेवीत्यनुसंधेयाः ॥ मध्यस्तंभचतुष्टयोपरिचमुरजाकृतिकाष्टेदिग्विदि गांतरधाष्टकपोताग्रकाष्टाष्टकेनोन्नतताकार्याकटैः सद्भिस्तुसंच्छाद्याविजयाद्यास्तुमंडपाइत्युक्तत्वात् ॥ द्वारवर्जंसर्वतमंडप

आछाद्यः ॥ जयविजयभद्रविश्वरूपसुरूपध्रुवधनदधन्वकसुप्रसन्नाः ॥ एतेष्टहस्तादयोद्विहस्तवृद्धितोज्ञातव्याः ॥ यदामंडप
द्वयंक्रियतेतदातत्रप्रथममंडपपरिमितरमंतरमुत्सृज्यद्वितीयोमंडपः कर्त्तव्यइतिवास्तुशास्त्रेएवंयदाधामाग्रेमंडपः क्रियतेतदा
तत्रप्रथममंडपपरिमाणमंतरमुत्सृज्यपरतोमंडपोविधेयइति ॥ मात्स्ये ॥ मंडपेपताकाउक्ताः ॥ लोकेशवर्णाः परितःपताका
मध्येध्वजः किंकिणिकायुतःस्यात् ॥ इतिसंग्रहेपि॥सप्तहस्तापताकास्युः सप्तमांशेनविस्तृता ॥ लोकपालानुवर्णेननवमीतु
ह्रिनप्रभा ॥ पीतरक्तादिवर्णाश्चपंचहस्ताध्वजास्मृताः ॥ द्विपंचहस्तैर्दंडैश्चवंशजैः संयुतास्तथेतिलोकपालवर्णाः ॥ इंद्रः
पीतोयमः श्यामोवरुणस्फटिकप्रभः ॥ कुवेरस्तुसुवर्णाभोग्निश्चापिसुवर्णभः ॥ तथैवनिर्ऋतिश्यामोवायुधूम्रः प्रशस्यते ॥
इशानस्तुभवेद्रक्तएवंध्यायेत्क्रमादिमानिति ॥ गारुडेतुपताकानांप्रकारांतरमुक्तं ॥ पंचहस्तध्वजाः कार्यावैपुल्येनद्वि
हस्तकाः ॥ सप्तहस्तापताकास्युर्विंशत्यंगुलविस्तृताः दशहस्तापताकानांदंडाः पंचांशश्रेशिताः सिंदुराः कर्बुराधूम्राः धूस
रामेघसन्निभाः ॥ हरिताः पांडुवर्णाश्चशुद्धाः पूर्वादितः क्रमात् ॥ एवंवर्णाः शुभाः कार्याः पताकाः पाकशासनेति ॥
अत्रसमचतुरस्रमंडपसाधनं मंडपादिव्यासप्रमाणां ऋज्जूंद्विगुणीकृत्यतामेवोभयतः पाशाभ्यांसहाष्टधा विभज्यपंचमां
शांतेकर्शणायषष्टां शांतेशंकर्थंचचिन्हद्वयंकृत्वामंडपादेःप्राचीसूत्रप्रांतद्वयेशंकुद्वयंनिखायऋज्चंतपाशोतयोः शर्कोरासज्य
वर्षणचिन्हंदक्षिणत आकृष्यशंकुचिन्हेशंकुंनिखायतः कर्षचिन्हमुत्तरतः आकृष्यशंकुंनिखायव्यत्यासंकृत्वाशकोः पाशां
तावासज्यपूर्ववद्दक्षिणोत्तरयोः क्रमेणकर्षणचिन्हमाकृष्यशकुद्वयंनिहन्यात् ॥ ततइशानाग्नेयादिशंकुषुप्रादक्षिण्येन रज्जु
वेष्टनान्मंडपादिचतुरस्रक्षेत्रंसिद्धंभवति॥ अत्रवृषभायसिद्धिश्चशिल्पिमतानुसारित्वात्यत्नेनसाध्या॥ मध्येवेदीसाधनम् ॥
मंडपसूत्रंप्रागायतंदक्षिणोत्तरायतंचत्रेधाभज्यतेननवभागोमंडपः संपद्यते ॥ मध्यमेनवमेंशेनतन्मानावेदिकायजमानहस्तो
छ्रायाचविधेया ॥ मात्स्ये ॥ द्वारेषुकुंभद्वयमत्रकार्यंस्रगांधधूपांबररक्तमिति ॥ मदनरत्ने ॥ गंधपुष्पाक्षतोपेतान
कुंभांस्तेषुनिवेशयेत् ॥ ध्रुवंधरांनाकपतिंचविघ्नेशंतेषुपूजयेत् ॥ मंडपस्यतुकोणेषुकलशेषुक्रमादमी ॥ अमृतोदुर्जयश्चैव
सिद्धार्थोमंगलस्तथा ॥ पूज्याश्चद्वारस्थकुंभेषुशक्राद्यास्तुप्रनूत्तमैः ॥ मनुर्मंत्रः ॥ इतिमंडपनिरूपणंदानमयूखोक्तं ॥ अथ

प्राचीनग्रंथोक्तकुंडादिकरणानांमतिस्थौल्यतरत्वात्तत्तद्ग्रथाशयमालोड्यक्षिप्रक्षेत्रफलादिसिद्धयेनवीनंकुंडोदाहरणमाह ॥
तत्रभविष्यपुराणे ॥ वेदीपादांतरंत्यक्त्वाकुंडानिनवपंचवा ॥ वेदास्रण्येवतानिस्युर्वर्तुलान्यथवाक्वचित् ॥ आम्नाय
रहस्ये ॥ कुंडानिचतुरस्राणिवृत्तनानाकृतीनिवा ॥ नवपंचाथवैकंवाकर्त्तव्यलक्षणान्वितम् ॥ नवकुंडविधानेतुदिक्षुकुंडाष्ट
केस्थिते ॥ नवमंकारयेत्कुंडंपूर्वेशनदिगंतरे ॥ विधानेपंचकुंडानामीशानेपंचमंभवेत् ॥ अत्रचतुः कुंडीपक्षेखातंनास्ती
त्युक्तंहेमाद्रौ ॥ नारदीये ॥ यत्रोपदिश्यतेकुंडचतुष्कंतत्रकर्मणि ॥ वेदास्रमर्द्धचंद्रंचवृत्तंपद्ममिभंतथा ॥ पीठवर्द्धर्त्तयेकुंडं
सुप्रमाणेष्वगर्त्तकम् ॥ कुर्यात्कुंडानिचत्वारिप्राच्यादिषुविचणः ॥ कुंडवेद्यंतरंचैवसपादकरसंमितं ॥ विंशांगुलंप्रकर्त्तव्यंअं
तरंकुंडपीठयोः ॥ स्मृत्यंतरे ॥ वेदिभितिंपरित्यज्यत्रयोदशभिरंगुलैः ॥ हस्तमात्राणिकुंडानिचतुरस्राणिसर्वतइतिसर्वतो
दीक्षुकाम्येतु॥ऐंद्रयास्तंभेचतुष्कोणंअग्नौभागेभगाकृतिं॥चंद्रार्द्धंमारणेयाम्येत्रिकोणंद्वेषनिर्ऋतौ॥ वारुण्याशांतिकेवृत्तंषड
स्त्र्युच्चाटनेनिले ॥ उदीच्यांपौष्टिकेपद्मंरौद्र्यामष्टास्रिमुक्तिदं ॥ शारदातिलके ॥ विप्राणांचतुरस्रंस्याद्राज्ञांवर्त्तुलमिष्यते ॥
वैश्यानामर्द्धचंद्राभंशूद्राणांत्र्यस्रमोरितं॥ चतुरस्रंचसर्वेषांकेचिदिछंतितांत्रिकाः॥ चतुरस्रसाधनंतुमंडपसाधनावसरउक्तम्॥
अथचतुरस्रकुंडस्यक्षेत्रफलसिद्धिः ॥ तद्यथा ॥ तत्रादौचतुरस्रस्यक्षेत्रंअंगुलानि२४चतुरस्रव्यासः २४अस्यवर्गः ५७६
उपरिआयसिध्यर्थोलिक्षैकाधिकेकृतेसतिजातंक्षेत्रफलं ५७६।०।०।१॥ अथयोनिकुंडस्यकर्त्तव्यतामाह ॥ जिनां
शंक्षेत्रंअगुलानि२४तस्यपंचमांशः क्रियतेपंचभक्तेलब्धंअंगुल ४शेषंअं ०४ अस्यकरणार्थमष्टघ्नं ३२ इदंपंचभक्तंतदलब्ध
यवा ५शेषं २इदंयूकाकरणार्थमष्टघ्नं १६पंचभक्तेलब्धायूका ३शेषा१ अस्यलिक्षाकरणार्थमष्टघ्नजातं ८पंचभक्तंलब्धं
१एवंकृतेजातः पंचमांशः ४।६।३।१॥ अस्यद्वात्रिंशांशः क्रियते ॥ द्वात्रिंशभक्तेलब्धंअंगुल०।० शेषं४ इदंयवार्थ
मष्टघ्नं ३२अधः फलं५योजितंसज्जातं ३८ इदंद्वात्रिंशद्भक्तंसज्जातंयव १ शेष १९ अष्टघ्नं १५२। अधः फलं १ योजितं
जातं १५३ इदंद्वात्रिंशद्भक्तंलब्धंलिक्षाचतुष्टयं ४ अयंपंचमांशस्यद्वदांशः १।०१।१४ अयंपंचमाशे ४।६।३।१
योजितेसतिजातं ४।७।४।५। अयंपंचमांशः पुरः संवर्ध्यकर्णांध्रिमानेनेंदुखंडद्वयंविलिख्यतदारभ्यपंचमांशाग्रपर्यंतं

सूत्रद्वयपातेकृतेसतियोन्याकारकुंडंभवतीतिकर्त्तव्यता ॥ अथक्षेत्रफलानयनं ॥ अत्रक्षेत्रत्रयंतत्रप्रथममहत्रिकोणस्यलंबः १७।०।२। भुज २४।४। अत्रमुखाभावात्भूम्यर्द्धमेवलंबेनगुणितंकार्यं । भुजएवभूस्तस्यार्द्ध १२ अयेननिघ्नंसज्जातं २०४।३। इतिमहत्रिकोणस्पक्षेत्रफलं ॥ अथापरंक्षेत्रंमध्यत्रिकोणंपूर्वापरलंबः १२ भुज २४ अस्यार्द्ध १२ अनेननि घ्नंसज्जातंफलं १४४ । इतिद्वितीयत्रिकोणस्यफलं ॥ अथवृत्तार्द्धयोरेकंवृत्तात्मकंक्षेत्रंतस्यव्यासः १७।०।४। अस्य वर्गः क्रियते । तत्रेयंरीतिः ॥ प्रथमंगोमूत्रिकारीत्यापरस्परगुणितंसज्जाफलं २९१ इदंभनवाग्निनिघ्नंसज्जातंफलं ११४२७५७ इर्दंपंचसहस्र ५००० भक्तंसज्जातंफलं २२८ इतिवृत्तस्यक्षेत्रफलं ॥ ततः फलत्रयाणामैक्येक्वतेजातं फलं ५७६।१३ यवत्रयंशेषंध्यजायसिध्यर्थमितिभगाभक्षेत्रंफलम् ॥ अथार्द्धचंद्राकारकुंडकर्त्तव्यतामाह ॥ तत्रक्षेत्र २४ अस्यपंचमांशः ४ । ६ । ३ । १ ।५ । षंचमांशस्यशतांशः ० । ० । १ । ३ । ५ अयेनयुतः पंचमांशः ४।६।५।५।२ अनेवउनाक्षेत्रभूमिः १८ । १ । १ । ६ अनेनक्षेत्रमध्यचिन्हामूवृत्तार्द्धकार्यंचंद्राकृतिः स्यादितिकर्त्तव्यता ॥ अथक्षेत्रफला नयनं ॥ वृत्तमेवएकंक्षेत्रंकल्पनीयं तस्यव्यासः ३८।२।३।३ व्यासस्यवर्गे गोमुत्रिकारोस्या कृतेसतिलब्धंफलं १४४७।०।०।४ इदंभनवाग्नि ३८२७ निघ्नंसज्जातंफलं ५७६०८०८ इदंपंचसहस्र ५००० भक्तंसज्जातं ११५२ अस्यार्द्धेकृते ५७६।०।०।४ लिक्षाचतुष्टयमायसिध्यर्थं ॥ अत्रापिध्वजायसिद्धिरित्यर्द्धचंद्राकृतिकुंडस्य क्षेत्रफल कर्त्तव्यतासिद्धिः ॥ अथत्रिकोणकुंडस्यकर्त्तव्यतांक्षेत्रफलंचाह ॥ आदौचतुरस्रेक्षेत्रप्राच्यांजिनांशक्षेत्रस्यतृतीयोविभागः अंगुलानि ८ पुरः संवर्ध्यतत्रचिन्हंकृत्वाततः उभयश्रोण्योश्चतुर्थांशंअंगुल ६ निधायदक्षिणोत्तरतःदत्वा ततस्त्रिषुचिन्हेषु सूत्रदानात्कष्टरहितंत्र्यस्रिकुंडंस्यादितिकर्त्तव्यता ॥ अथक्षेत्रफलानयनं ॥ अत्रत्रिकोणात्मकमेकंक्षेत्रंतत्रलंबः ३२ भूः३५ अस्यार्द्धं १८ अत्रमुखाभावात्भूम्यर्द्धंग्राह्यं ॥ ततः लंबेननिघ्नंकुमुखैकखंडमित्यनेन सूत्राशयेनगुणितेसतिलब्धं ५७६ उपरिआयसिध्यर्थं यूकाधिकंकार्यंकृतेधिकेजातं ५७६।०।१।१ अनेनध्वजायसिद्धिरितिक्षेत्रफलम् ॥ अथवृतकुंडकरण माह ॥ तत्रादौजिनांशंक्षेत्रं २४ तन्मध्यात्त्रयोदशांगुलाग्राह्याः तस्यचातुर्विंशांशः।१०।४।२।५।२ अनेनयुतात्रयोदश१३

जातंव्यासार्द्धमेतन्मितं । १३ । ४।२।५।२ एतत्मितेनव्यासार्द्धेनसूत्रेणकर्कटेनवामध्यचिन्हायत्त्तंकार्यंतन्मंडलसंज्ञोरम्यः कुंडोभवतीतिकर्त्तव्यता ॥ अथक्षेत्रफलानयनम् ॥ तत्रवृत्तव्यासः २७।०।६।२।४ ॥ तस्यवर्गेकृते ७३४ इदंभनवाग्नि निघ्नंसज्जातंफलं २८८०२४१८ इदंपंचसहस्रभक्तंसज्जातंफलं ५७६।०।२ इतिवृत्तकुंडस्येक्षेत्रफलम् ॥ अत्रापिध्वजाय सिद्धिः ॥ अथषट्कोणकुंडकर्त्तव्यतामाह ॥ चतुरस्रंजीनांशं २४ क्षेत्रस्याष्टादशांगुलाः १८ ग्राह्याः तेषांद्विसप्तत्यंशः ७२ अष्टादशांगुलमध्येयुतः कार्यः ॥ तद्यथा ॥ अष्टादशस्यद्विसप्तत्यंशः अंगुल० । यव २ सअष्टादशांगुलमध्येयुतः १८ । २ ॥ अयमेवव्यासार्द्धः एतावदंगुलपरिमितकर्काटकेनचतुरस्रक्षेत्रमध्यचिन्हात्वृत्तंकृत्वाततउत्तरदिक्तः कृतवृत्त । मितकर्कोटकभ्रामणेनषट्चिन्हानिकुर्याम् ॥ ततएकमेकंचिन्हंत्यक्त्वाषट्चिन्हे षुषड्सूत्राणिदेयानि तदाषडस्रारव्यंकुंडं स्यात् ॥ ततः संधौयेंगदोषास्तेषांनाशेचषट्भुजास्तेषानाशेवृत्ती कृतमंडलस्यापिनाशेषडस्रिकुंडं स्यादितिकर्त्तव्यता ॥ अथक्षेत्रफलानयनम् ॥ तत्रउतराग्रमेकंत्रिकोणंग्राह्यंतस्यलंबः २७।४ भूः ३१ । ४ । ७ । ० । अस्यार्द्धं १५।५।१। इदंलंबेननिघ्नमित्यनेनगोमूत्रिकयागुणितेजातंफलं ४३३ ।५।४। ततः त्रिणिकनिष्ठानित्रिकोणानितन्मध्ये एक त्रिकोणस्यफलंसाध्यतेलंबः ९ भुजएवभूः १० । ४ । अस्यार्द्धम् ५ । २ अनेनलंबोगुणितश्चेत्तदा ४७ । २ इदंत्रिगुणि तंसज्जातंफलं १४४ । इदंपूर्वानीतेफलेयोजितसज्जातंफलं ५७७ यूकादिकानांव्यत्ययेकृतेन्यूनाधिकंभवति ॥ अथवा किंप्रयासेन षट्सूक्ष्माणित्रिकोणानि । तन्मध्येएकस्य क्षेत्रफलंकृत्वातत्द्वादशेनगुणितंसक्षेत्रफलंजायते ॥ तद्यथा ॥ उत्तराग्रत्रिकोणस्यलंबः ९ भूः १० ।४ अस्यार्द्धम् ॥५ । २ अनेगुणितोलंबः ४८। ।१। इदंद्वादशघ्नंसज्जातं फलं ५७६ । ० । १ । इतिषट्कोणकुंडस्यक्षेत्रफलम् ॥ ध्वजायसिद्धिश्च ॥ अथपद्माकारकुंडकर्त्तव्यतामाह ॥ आदौ जिनांशंक्षेत्रं २४ तस्याष्टमांशः ३ तेनवर्द्धितकर्कटकेनपंचवृत्तानिकार्याणि ॥ तद्यथा । प्रथमं ३ द्वितीयं ६ तृतीयं ९ चतुर्थ १२ पंचमंयद्वृत्तंतत्स्वस्याष्टत्रिंशांशोनंकार्यं । तद्यथा ॥ अंगुल १४ । ४ । ६ । ६ । एतत्परिमितंपंचमंकार्यंतदु परिक्षुविदिक्षुतदंतरालेचषोडशचिन्हानिकृत्वाततः पंचचिन्हांतरेकर्कटकभ्रामणेनाष्टपत्रणिका र्याणितदनंतरंक्षेत्रंअं०

२४ अस्यार्द्धं १२ तत्परिमितकर्काटकेनवृत्तंकार्यंसर्वंचिन्हादि कलोपेअष्टदलान्येवजायंते तत्परिमितखननेपद्मकुंडो भवति ॥ अथक्षेत्रफलानयनं ॥ अत्रक्षेत्रद्वयंवर्तुलाकृतीतत्रप्रथमंवृत्तंअंगुल० २४ द्वितीयंक्षेत्रंअंगुल० २९। ६। ५। ७। तत्रप्रथमंस्पचतुर्विंशत्यंगुलस्यवर्गः कार्यः ॥ कृतेवर्गेफलं ५७५। इदंभनवाग्नि ३९। २७ निघ्नंसञ्जातं २१६१९५२ इदंपंचसहस्र ५००० भक्तंसञ्जातंफलं ४५२३। १। अथांतिमवृत्तव्यासः। २९। ६। ५। ७ अस्यवर्गेकुते ८९०। ४। २ इदंभनवाग्निनिघ्नंकर्त्तव्यंततः पंचसहस्र ५००० भक्तंसञ्जाफलं ६८९। ४। ५ अन योरंतरार्द्धं १२। ३। ६ इदंपूर्वक्षेत्रफलेयोजितंसत्पूर्णं ५७५। ०। १ इतिपद्मकुंडस्यक्षेत्रफलं ॥ ध्वजायसि द्धिश्च ॥ अथाष्टास्रीकुंडकरणमाह ॥ प्रथमंक्षेत्रंअं ०२४ तस्मादष्टादशांगुलानि १८ तेषाष्टाविंशतिमोभागः। अंगुल० यव ५। युका १। लीक्षा १। अयंअष्टादेशेयोक्तव्यः ॥ १८। ५। १। १ एतन्मितेनकर्काटकेनक्षेत्रमध्येचि न्हात्वृत्तं कार्यंतस्मिन्वृत्तं पूर्वाधष्टदिक्षु चिन्हानिकृत्वाद्वे चिन्हेत्यक्त्वा तृतीयेतृतीये चिन्हेऽष्टसूत्राणि देयानि तदाष्टास्रिस्यात् ॥ अथक्षेत्रफलानयनं ॥ अदौवृत्तस्यक्षेत्रफलमानीयततः अष्टधनुषांमध्येएकस्यधनुषः क्षेत्रफलंकत्वा तदष्टघ्नंकृत्वायत्क्षेत्रफलंसंपद्यतेतद्वृत्तक्षेत्रफलाद्धीनंकार्यंएवंकृतेपूर्णस्यात् ॥ ५७६। ०। १। ० इत्यष्टास्रीकुंडस्यक्षेत्र फलं ॥ ध्वजायसिद्धिश्च ॥ अथकुंडोपरियोनिकरणंक्षेत्रफलानयनंचाह ॥ लंबः १२। विस्तरः अं० १० एतादृशंक्षेत्रंतस्य विभागौद्वौकार्यौ २ तन्मध्येपश्चिमविभामः अं० ५ तथाचपूर्वविभागः अं० ७ तन्मध्येपश्चिमविभागेदुखंडद्वयंलिखित्वा पूर्वविभागेसूत्रद्वयेनचिन्हितेसतियोनिर्भवतिइतिकर्त्तव्यता ॥ अथक्षेत्रफलायनं ॥ अत्रेक्षेत्रत्रयंपूर्वापरत्रिकोणेवृत्तार्द्धं द्वयमिति ॥ प्रथमक्षेत्रलंबः ७ भूः १० अस्यार्द्धं ५ लंबेननिघ्नतदाजातं ३५ द्वितीयक्षेत्रलंबः अं० ५ भुजार्द्धं ५ लंबेन निघ्नंजातं २५ अथवृत्तव्यासः ६। ५ व्यासस्यवर्गः ४७। ७ भनवाग्नि ३९२७ निघ्नं १६९२०४ पंचसहस्रभक्ते जातं ३३ त्रयाणामैक्याज्जातं ९३ यत्रयूकादिकंगृहीत्वातितीक्ष्णतयाक्रियतेतदपूर्णं ९६ स्वरल्पांतदत्वाददोषइति योनिफलम् ॥ अकंठमानमाह ॥ कंठोजिनांशमानेनेति। अंगुल १ ॥ मेखलाप्रमाणमाह ॥ प्रथमाचतुरंगुलोछ्राया

चतुरंगुलविस्तारा। तथाद्वितीया ३ तथातृतीया २ कुडाद्वहिः कुंडाकारापद्मस्यपद्माकारायोन्यायोनिचदिति ॥ अथ हवनानुसारीकुंडप्रमाणमाह ॥ दिग्भिर्वैभस्तुकोटौनृपकरम परेषट्करंपंक्तिलक्षेलक्षेस्या द्वेदहस्तंसदयुतहवनेहस्तयुग्मं सहस्रे ॥ हस्तश्चारत्निकुंडंशतमितहवनेरत्नि कुंडंशतार्द्धेलक्षाद्धस्तैकवृध्यादशकर मुदितंपंक्तिलक्षांतमन्यैः ॥ इत्याहुत्यानु सारिकुंडमानं ॥ अथविवाहादौक्रीयमाणोग्रहयज्ञो विवाहाद्याव्यवहितपूर्वकालेकार्यः ॥ असंभवेतुव्यवहितपूर्वकाले पिकार्यः ॥ तत्रापिसप्तदिनाधिकव्यवधानंकार्यमित्याश्वलायनगृह्यपरिशिष्टेः ॥ विवाहादौनांदीश्राद्धावधिरुक्तः स्मृतौ ॥ एकत्रिंशत्यहर्यज्ञेविवाहेदशवासराः त्रिषट्चौलोपनयनेनांदीश्राद्धंविधीयतइति ॥ तच्चसतिसंभवेविवाहाद्यर्थंग्रहमखार्थं चतंत्रेणअसंभवेपृथक्। स्थंदिलप्रमाणंतुहस्तमात्रंतुहोमानुसारेणतदधिकंवा ॥ स्थंदिलादीशानेग्रहपीठंस्थूलमानेनचतु स्त्रिंशांगुलपरिमितचतुरस्रं। द्वादशांगुलोचंमेखलाद्वययुतंचकुर्यात् ॥ तत्राद्यमेखलाद्व्यंगुलविस्ताराद्व्यंगुलोच्चा ॥ द्विती याद्व्यंगुलविस्तारात्र्यंगुलोच्चा ॥ तद्गोमययेनानुलिप्येतदुपर्यहतं शुक्लवस्त्रंप्रसार्यतदुपरिगंधैरष्टदलंकुर्यात् ॥ तच्चैवं। चतुस्त्रिंशदगुलपरिमितं शुक्लंवस्त्रंसमचतुरस्रं निधायपूर्वपश्चिमप्रांत मेलनेनदक्षिणोत्तरप्रांत मेलनेनाग्नेयवायव्यकोण मेलनेनेशानकोणमेलनेनदिक्षुविदिक्षुचतत्रचिन्हानिसंपद्यंते। प्रतिमेलनमध्येअनुसंताडयेत् ॥ ततोष्टांगुलापरिमितेन सूत्रेणकर्काटकेनवाव्यासार्द्धमध्येवृत्तंरचयेत् ॥ वृत्तव्यासः षोडशांगुलः ततास्तस्मिन्वृत्तेदिक्चिन्हेभ्यउभयपार्श्वेषुकिंचि न्यूनार्द्धयवाधिकांगुलत्रयेऽष्टौचिन्हानिकुर्यात् ॥ ततोद्वाभ्यांद्वाभ्यां चिन्हाभ्यांदिक्षु विदिक्षुचाष्टौदलानिरचयेत् ॥ तैर्दलैः प्रतिदिशंपंचपंचांगुलाभूमिर्व्याप्यते ॥ अवशिष्यतेचप्रतिदिशंचतुश्चतुरंगुलपरिमिताभूमिः सातुदिक्पालनक्षत्र देवतानांस्थापनायभवति ॥ इदंचैकदेशीयमतं ॥ वस्तुतस्तुशौनकोक्तप्रकारएवसाधुः ॥ तद्यथाकुर्यादष्टदलंपद्मंवेधां शुक्लपटेऽहतइत्यादिं ॥ तद्व्याख्याच ॥ प्रथमतश्चतुस्त्रिंशांगुल परिमितायामविस्तारयुक्ते शुक्लेअहतपटेचतुर्दिक्षुप्रतिदिशं सार्द्धत्रयांगुलपरिमितंवस्त्रमैशानकोण दितआग्नेयाद्यंतंदिक्पालादीनांस्थापनार्थं त्यक्त्वापूर्वदिश्यैशानमारभ्याग्नेयंयावत्स प्तविंशांगुलपरिमितांरेखांसमाकृष्यएवंदक्षिणा पश्चिमोत्तरदिक्षुतत्तत्कोणादारभ्यतत्तत्कोणपर्यंतंरेखांकर्षयेत् तेनसमचतुर

स्रंस्यात् तस्मिन्चतुरस्रेनवनवांगुलांतरालेप्राक् पश्चिमायतेद्वेरेखेकृत्वातथैवदक्षिणोत्तरायतेद्वेरेखेकुर्यात् ॥ एवंकृते सतिप्रतिदिशमेकैकंग्रहंमध्येचैक मितिसममावानिनवग्रहाण्युत्पद्यंते ॥ तत्रैकैकस्यगृहस्यनवांगुलपरिमितोबाहुस्तावताकश्च स्यात् ॥ क्षेत्रफलतः प्रतिग्रहस्यभूमिरेकाशित्यंगुल परिमिताभवति ॥ ततः सर्वेषुगृहेषुकरणरुज्जुभ्यांमध्यंसाधयित्वा ग्रहमध्यदिंगमध्ययोः कर्काटकसंरक्षणेनसमत्वविधायकर्काटकेनहस्तादिनासंताद्यगृहमध्यंकुर्यादित्यादि ॥ तस्मिन्मध्येऽष्टसुदलेषुचद्वादशद्विगुणंचैवत्रिचतुः पादनत्रयं ॥ सूर्यादीनांक्रमात्यंच विंशत्यर्द्धमंगुलमित्या युक्तप्रमाणातिनद्रहवर्ण चंदनैर्मंडलानिविलिखेत् ॥ एतदेवनवग्रहहाणांक्षेत्रनिर्माणक्षेत्रफलोद्घाटनप्रकरणंसव्याख्यंपंचश्लोक्यासविस्तरमाह ॥ तद्यथा ॥ पीठयुग्मकरंमिमायविलिखेत्पद्मंदलैश्चाष्टभिर्युक्तंमध्यमकर्णिकांतकुहरेसौरंसुवृत्तंगृहं ॥ चंद्रश्चार्त्तुमितांगुलादिभिमिहव्यासार्द्धयुत्याहितं वेदाश्वाश्वमितेस्तथाग्निकदलेसौम्यं चतुष्कोटिकम् ॥ १ ॥ व्याख्या ॥ पीठमिति ॥ तत्रहस्तद्वयपरिमितंसमचतुरस्रग्रहपोठंमित्वातदु परितंदुलैरष्टदलंपद्मंविलिखेत् ॥ तस्यमध्यकर्णिकायांसूर्यग्रहंवृत्तंएकांगुलसप्तयवषट्यूकापरिमितव्यासार्द्धेनकर्काटकेनसूत्रेणवामंडलंकुर्यात् ॥ तस्यमध्यसूत्रत्रीण्यंगुलानि ३ सप्तयवाः ७ चतस्रोयूकाः ४ एतत्परिमितंस्यात् ॥ तत्रव्यासस्यवर्गेभनवाग्निनीघ्नेसूक्ष्मंफलं पंचसहस्र भक्तइत्यनेनद्वादशांगुलंक्षेत्र फलंमंडलस्यभवति ॥ तथाग्नेयकोणदलेचतुरंगुलंसप्त यवयूकाद्वयपरिमितचतुर स्रंचंद्रमंडलभवति ॥ इदंतुगोमूत्र्यागणनेनचतुर्विंशत्यंगुलक्षेत्रफलकंभवति ॥ १ ॥ मूल० ॥ भौमंयाम्यदलेक्षिबाणमितविष्कंभांत रंभूतलेवह्न्यभ्राब्धिभिरंगुलादिरचितंतावन्मितेखद्वयं ॥ एवंत्र्यस्रिगृहंमिमायभवदिश्यब्धं शविष्कंभयुङ्मुलादंगुल मध्यसूत्रमुपरित्र्यंशंचतिर्यकूद्वयं ॥ २ ॥ अथव्याख्या ॥ भौममिती ॥ तयोर्याम्यदले त्रिकोणंद्व्यंगुलंपंचयवाधिकपरिमितमध्यसूत्रंत्र्यंगुलपूर्णयवचतुर्यूकाधिकपरिमितभुवंशून्यवदनंभूसं मितेरेषाद्वययुतं शकटाकारंमंगलस्य गृहंकार्यं ॥ तत्रभूवदनसार्द्धेलंबेन संगणयेदित्यनेनत्रिकोणगणनंतच्चतुरंगलंक्षेत्रफलंस्यादिति ॥ २ ॥ मूल० ॥ मध्यस्थैकभुवंत्रिकोणयुगलंपूर्वापराग्रंलिखेत्मूलेवृत्तयुतंशराकृतिगृहंचंद्रात्मजस्योत्तमं ॥ सौम्येपद्मदलेगुरोस्तु दहनैरायाममूत्रंभवेद्विस्तारेंगुलयुग्ममत्रकथितं

दीर्घचतुः स्रक्तिकम् ॥ ३ ॥ व्याख्या ॥ ततइशानदिशिचतुरंगुलमध्यसूत्रंततोमूलादेकां गुलेतिर्यगूरेखामंडलद्वयमितां कुर्यात्तदुपरित्र्यंगुलमध्यसूत्रमेवं त्रिकोणद्वयंमध्यस्थैकभुवं पूर्वापराग्रंसाधयेत् ॥ तन्मूलेयथाकथंचिछराकृतिवद्वृत्तंएवं चंद्रमसः सुतस्यग्रहंनिष्पादनीयं ॥ तत्रिकोणद्वयंलबेननिघ्नंकुमुखैकखंडमित्यनेनचतुरंगुलक्षेत्रवद्भवति ॥ ततउत्तरदलपद्मस्यबृहस्पतेर्गृहंत्र्यंगुलमध्यसूत्रंद्व्यंगुलविस्तारंदीर्घचतुरस्रंसाध्यं॥ इदंचभुजकोटिघातमित्यनेनषडंगुलक्षेत्रफलसहितं संपद्यते ॥ ३ ॥ ऐंद्र्यांभार्गवपंजरंसुविपुलंत्र्यंशैश्चपार्श्वद्वयेभित्तिद्व्यंगुलउच्छ्रूतेतदुपरिप्राच्यांत्रिकोणंभवेत् ॥ वेदांशांतर सूत्रमत्ररचितंपंचास्रमत्युत्तमंवारुण्यांधनुषंशनैः कुमुनिषड्व्यासार्द्धवृत्तार्द्धकम् ॥ ४ ॥ व्याख्या ॥ ततः पूर्वदलेशुक्रस्य ग्रहंचतुरंगुलमध्यसूत्रंमूलेत्र्यंगुलविपुलंदक्षिणोतरपार्श्वेद्व्यंगुल परिमितंभित्तिद्वययुतं परिद्व्यंगुलमध्यसूत्रत्रिकोणंत्र्यंगुलभुवमेकंपंचकोणं॥ तत्रभुजकोटिघातमित्यनेनअधस्तिर्यग्दीर्घचतुरस्रस्यफलंषडंगुलानिउपरित्रिकोणेभूवदनसमासेतिगुणितेत्र्यंगुलफलंमिलित्वानवांगुलपरिमितंक्षेत्रफलंस्यात् ॥ ततएकांगुलक्षेत्रफलंस्यात् ॥ ४ ॥ मू० ॥ स्वर्भानोः शरनेत्र रामयमयुक्शुर्पास्यमक्षैर्लवैविष्कंभंयुगदृग्गुणाक्षिभिरधः साध्यासुरेभूः समा ॥ केतूनांध्वजमूलभूर्गुणयुगत्र्वेच्छंशमानानिलेपंचाशैर्मितामध्यमूत्रमुदितंमूलेषुदंडांकितम् ॥ ५ ॥ व्याख्या ॥ नैर्ऋत्यांदिशिराहोर्गृहंसूर्पाकारंवचांगुलयवद्वय यूकात्रयलिक्षाद्वयपरिमितविपुलंमूलेचतुरंगुलयवद्वययूकात्रयलिक्षायुगुल विपुलंमध्यसूत्रेपंचांगुल मेवंचतुर्विंशत्यंगुलक्षेत्र फलंवदनादिनागणितंजिनांगुलक्षेत्रफलंभवति ॥ ततोवायव्यांदिशिकेतूनांगृहंपंचांगुलमध्यसूत्रंत्र्यंगुलचतुर्यवषट्यूकाचतुर्लिक्षापरिमितंमूले॥ मुखेशून्यंदलेसहितंलंबाहतंभूम्यर्द्धमितिगुणितंनवांगुल क्षेत्रफलंभवति॥ द्वादशांगुलिखेदर्कंसोमंतद्विगुणंलिखेत् ॥ चतुर्भिरंगुलैर्भौमंसौम्यंचतुर्भिरेवच ॥ षडंगुलंदेवगुरुंभ्रगुंचैचनवांगलं ॥ शनिंषडंगुलंप्रोक्तंचतुर्विंशतिरंगुलम् ॥ कुर्याद्राहुगृहंकेतोर्नवांगुलमितंक्रमात् ग्रहाणिरविपूर्वाणांग्रहाणांपंकजेलिखेदिति ॥ अथग्रहपतिमाधातवः ॥ ताम्रकात्स्फटिकाद्रक्तचंदनात्स्वर्णकादुभौ ॥ रजतादयसः सीसात्कांस्याक्तार्याक्रमादिमे ॥ ताम्रादीनांप्रमाणंशक्त्यनुसारेणकल्पम् ॥ अथवाग्रहवर्णैर्गंधैर्वस्त्रैकृतमंडलेषुमूर्त्तयोलेख्याः ॥ तत्रग्रहवर्णः ॥ आदीत्यांगारकौरक्तौशुक्लौशुक्र

निशाकरौ ॥ पीतोबुधोगुरुश्चैवशेषाः कृष्णागृहाः स्मृताः तथा ॥ शुक्रार्कौप्राङ्मुखौज्ञेयौगुरुसौम्याउदङ्मुखौ ॥ प्रत्यङ्मुखौशनिसोमौशेषादक्षिणतोमुखाः ॥ अथवा ॥ मंडलोपरिसंस्थाप्याः सर्वेप्रत्यङ्मुखाअपि ॥ ग्रहाणांभिन्नदिङ्मुखत्वेपिदेवाधिदेवादथउक्तस्थानेएवस्थाप्या ः ॥ शनिरीशानकोणेतुकेतुभ्यश्चाग्निकोणके ॥ आदित्याद्वायुभागेतु निर्लक्ष्म्यंगणनायकमितिज्ञापकात्॥ तेनबुधस्योदङ्मुखत्वे उत्तरदिशंप्राचीत्वेनपरिकल्प्य वुधसंमुखेविष्णुर्नस्थाप्यः ॥ किंतुप्राकृतप्राच्यामेवस्थाप्यः ॥ आदित्यादीनामन्यदिङ्मुखत्वे पिकर्त्तुरनायासार्थंप्रयोगे विकल्पोक्तंप्रत्यङ्मुखत्वमेव स्वीकृतमितिबोध्यम् ॥ एकैककस्यगृहस्यस्मृतिष्यनेकैः पर्यायशब्दैः रूपस्थितिदर्शनान्नत्यागादावेकस्यनियमः ॥ विनिगमकाभावात् ॥ यथासूर्यः सोमस्तस्थाभौमइतिप्रथमवाक्यंशौनक्यां ॥ द्वितीयंशुक्रार्कौप्राङ्मुखौज्ञेयाविति ॥ तृतीयमादित्यादिग्रहाः सर्वेपीठेयत्रव्यवस्थिताइति ॥ चतुर्थंभास्करंविद्यादितिमात्रबणिकीतुमवितादेवता ॥ अत्रनैकस्यचित्विनिगमकंकिंचिद्दृश्यते ॥ अतोयथेछंप्रयोगः ॥ अयमेवाशयोमयूख कारणां ॥ गृहाणांस्थापने । बैदिका मंत्राप्रयोज्याः ॥ विषासहीतिमंत्रेणमध्येसंस्थापयेद्रविमिति ॥ वचनात् ॥ केचिदावहनपूर्वकंस्थापनंकुर्वंतितदस्माकमयुक्तम् ॥ एवंग्रहान्सनक्षत्रान्संस्थाप्येशानकोणगान् ॥ आवाहनंचततः कुर्यात्सूर्यादीनांक्रमेणवैइतिवचनात् ॥ स्थापनावाहयोर्भेदान्मंत्रैः स्थापनंव्याहृत्यावाहन मितिमदनरत्नग्रंथाच्च ॥ केचिन्नक्षत्रदेवता नामेवस्थापनंकुर्वंतिन नक्षत्रणांतदप्ययुक्तम् ॥भानिदेवानरास्थाप्या इतिशौनकवचनात् ॥ प्रदक्षिणक्रमेणैभप्रभृतिर्नवा ॥ इशानकोणादारभ्य चतुर्दिक्षुचविन्यसेत् ॥ सप्तसप्तचऋक्षाणिस्थापयेन्मंत्रपूर्वकं ॥ क्रमेणकृत्तिकादीनांमंत्राज्ञेयाविजानतेतिनारायणभाष्यकोशेधृतलघुशौनकीवचनाच्च अतएवपरिशिष्टेंगिराः ॥ चित्राणिसाकंसूक्तेनकृत्तिकादिनिस्थापयेत् ॥ एतेनैवचसूक्तेनऋक्षदेवांस्तथैवच ॥ अष्टाविंशेतिमंत्रेणयोगोन्वैक्रमतोयजेत् ॥ होमेऽप्युतेभदेवानांयोगानांचतथैवच ॥ स्थापनंस्वल्पहोमेतु वस्त्राद्यंतंचपूजयेदिति ॥ प्रतिष्ठापनंतुशौनक्यां ॥ भानिदेवागरास्थाप्याइतिप्रतिष्ठाप्यविचक्षणैरित्यावाहनात्पूर्वमुक्तम् ॥ लघुशौनक्यांतुआवाहनोत्तरमुक्तमतोविकल्पः ॥ जन्मभूगोत्रमग्निश्चवर्णस्थानमुखानिच ॥ अज्ञात्वाकूरुतेशांतिंगृहास्ते

नापमानिताइतिउक्तेः ॥ प्रयोगेग्रहाणांजन्मभूमिगोत्रादीज्ञानमपेक्षितम् ॥ तत्ज्ञानंयद्यपिस्मरणात्मकंतथापिशिष्टाः प्रतिमंत्रमृष्यादिस्मरणशब्दोच्चारणपूर्वंकुर्वंति ॥ तद्वदत्रापिंदोच्चार१पूर्वंकर्त्तव्यम् ॥ तत्कुत्रेत्याशांकायांशौनक्याआवाहनवाक्येएषांचित्यदानांदर्शनात बौद्धायनीकेतत्रैवबहूनांपदानांदर्शनादावाहनवाक्ये एवस्मरणार्थंसर्वेषांसंग्रहः कृतोबोद्धव्यः ॥ यद्यपिबौद्धायनेनग्रहाणांसूर्यमंगलशुक्रचंद्रवुधगुरुशनिराहुकेतवइतिक्रमउक्तः तथाचारसंवादाच्छौनकोक्तक्रम एवसंग्रहीतइतिबोध्यम् पूजायांप्रयोगपारिजातादौहोमात्पूर्वंग्रहाणां पुष्पांतंपूजनंविधायहोमोत्तरं धूपदीपादिभिस्तान् पूजयेदित्युक्तं ॥ अतोहोमात्पूर्वोत्तरकालयोर्व्यवस्थया पूजाकार्या ॥ स्थापनंचग्रहादीनां पूजासंक्षेपतस्ततइतिसंस्थाप्यायमेवार्थउक्तः होमेसमिदाज्यचरूणांचहोमस्तिलयवैः क्रमादितिमयुखकारेणापि ॥ सूर्यादीनांसूक्तैरपिहोमोउक्तः ॥ तानिसूक्तान्यग्रेवक्ष्यामः ॥ अत्रैवतुमंत्रैर्होमःपैठीनसीमतमंगीकृत्यप्रयोगएवादृतः ॥ ॥ इतीश्रीमदथर्वब्रह्मसूत्रप्रयोग भानौषट्पन्नागरद्विवेदिरविशंकर कृतेसर्वकर्मप्रयोगिग्रह शांतिनिर्णयरश्मिरेकोनत्रिंश ॥ १९ ॥

अथसर्वकर्मोपियोगित्वात्सर्वेषां सुखबोधायसमंत्रकोयंग्रदशांतिप्रयोगरश्मिः प्रारभ्यते ॥ ॥ सपत्निकोयजमानः प्रातर्नित्यकृत्यंविधायोक्त विधिनागणेशांबिके पूजयित्वावैश्वदेवं विधायमातृपूजन पूर्वकमाभ्युदयिकंस्वस्तिवाचनंशांतिकलश करणंचकृत्वागृहयज्ञोपकरणानिसंपाद्यशुचौदेशेप्राङ्मुखो पविश्यजीवास्थेत्याचम्य प्राणानायम्यत्य सुषुवाजिनमिति मांगल्यतिलककरण पूर्वकंस्वस्त्ययनंविधाय ॥ ब्रह्मजज्ञानं० ॥ अव्यंसश्चस ॥ ततः सुमुखश्चेत्यादि पठित्वा ॥ संकल्पंकुर्यात् ॥ तद्यथा ॥ देशकालौस्मृत्वाममजन्मलग्नेवर्षलग्नेदुष्टस्थानस्थित सूर्यादिग्रहजनितसर्वपीडोपचय शांतिपूर्वकंशुभस्थानस्थफलप्राप्तये गृहानुकुल्यसिद्धयेश्रीपरमेश्वरप्रीत्यर्थं ग्रहयज्ञंकरिष्यइति ॥ विवाहादिनिमित्तेषुअदः कर्मकुर्तुमादौग्रहयज्ञंकरिष्ये ॥ कामनायांतुममामुक कामनासिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थंग्रहयज्ञं करिष्य इति ॥ तदंगत्वेनाचार्यादीनामर्घ्यदान पूर्वकंपादप्रक्षालनमर्चनवरणं करिष्ये ॥ तत्रैकआचार्यः ऋत्विजोऽष्टौचत्वारो

द्वौवासर्वेप्याचरितपादकुछ्रप्रायश्चित्ताः कृतायुगतायत्रीजपावाविद्वांसः कर्मणिकुशलावाविवक्षताः ततोदधिदुर्वाशमी
पत्रकुसुमाक्षतचंदनगौरशर्षपयुक्तमुदपात्रंकृत्वा कृतांजलिः ॥ स्वागतंभोद्विजश्रेष्टामदनुग्रहकारकाः ॥ इदमर्घ्यमिदं
पाद्यंभवद्भिः प्रतिगृह्यतामित्युक्त्वातैः प्रतिगृह्णामीत्युक्तेअस्मिन्ग्रहमखकर्मण्येतत्तेर्घ्यमितिविप्रपादयोः स्वल्पमर्घ्यंदत्वाऽ
स्मिनग्रहमखकर्मण्येत्तत्तेपाद्यमितिसम्यक्पादप्रक्षालनंकृत्वातज्जलमभिवंदयेत् ॥ एवंसर्वेषांकृत्वास्वपादप्रक्षालनंकृत्वाद्वि
राचमनंकुर्यात् ॥ विप्राअपिप्रक्षलनानंतरंद्विद्विराचमनंकुर्युः ॥ ततोग्नेः स्थानात्पश्चिमतोयथाज्येष्टाचार्यानृत्विजः ॥
प्राङ्मुखानुपवेश्यसाक्षात्परंपरयाचान्वारब्धस्याचार्यस्प दक्षिणंजान्वालभ्य ऋत्विग्वरणनिमित्तमर्चयिष्यइत्युक्त्वातैरर्च
येत्युक्तश्चंदनाक्षतपुष्पमालादिभिस्तानर्चयेत् ॥ तेपिआचारप्राप्तानर्चनमंत्रान्पठेयुः ॥ अर्चामिबामितिसूक्तम् ॥तद्यथा ॥
ॐअर्चामिवांबर्द्धायापोघृतस्नूधावाभूमिशृणुतंरोदसीमे ॥ अहायद्देवाअसुनीतिमायन्मध्वानोअत्रपितरांशीशीताम् ॥१॥
स्वावृग्देवस्यामृतंयदीगोरतोजातासेधारयंतउर्वा ॥ विश्वेदेवाअनुतत्तेअजुर्गूर्दुहेयदेनि दिव्यंघृतंवाः॥२॥ किंस्विनोराजा
जगृहेकदस्पतोव्रतंचमाकोविवेद ॥ मित्रश्चिद्धिष्मांजुहुराणोदेवान्छ्लोकोनयातानपिवाजोअस्ति ॥ ३ ॥ दुर्मंत्रत्वा
मृतंस्यनामसलक्ष्मायद्विषुरूपाभवाति ॥ यमस्ययोमनवंतेसुमंत्वग्नेतमृष्वपाह्यप्रयुछन ॥ ४ ॥ यस्मिंदेवाविदथेमादयं
तेविवस्वतः सदनेधारयंते ॥ सूर्येज्योतिरदधुर्मास्यक्तून्परिद्योतनिंचरतोअजस्रा ॥ ५ ॥ यस्मिन्देवामन्मनिसंचरं
त्यपीच्येनवयमस्यविद्म ॥ मित्रोनोअत्रादितिरनागान्सवितादेवोवरुणायवोचत् ॥ ६ ॥ सखायआशिषामहेब्रह्मेंद्राय
वज्रिणे ॥ स्तुपेऊषुनृतमायधृष्णवे ॥ ७ ॥ शवसाह्यसिश्रितोवृत्रहत्येनवृत्रहा ॥ मघैर्मघोनोअति शूरदाशसि ॥ ८ ॥
स्तेगोनक्षामत्येषिपृथिवींमहीनोवातांद्रहवांतुभूमौ ॥ मित्रोनो अत्रवरुणोयुज्यमांमानोअग्निर्वरुणे नव्यसृष्टशोकं ॥ ९ ॥
स्तुहिश्रुतंगर्तसदंजनानांराजानंभीममुपहत्नुमुग्रम् ॥ मृडाजरित्रेरुद्रस्तवानोअन्यमस्मत्तेनिवपंतुसेन्यम् ॥ १० ॥ एवम

र्चयित्वऽर्चनविधेः परिपूर्णतास्त्वितिवदेत् ॥ तेप्यस्त्वितिब्रूयुः ॥ ततआचारात्साक्षतहस्तेनाचार्यस्यदक्षिणंजान्वालभ्या
दित्यादिग्रहयज्ञमहंकुर्वे ॥ अत्रकर्मण्यदोगोत्रमदः प्रवरब्रह्मवेदाध्यायिनमदोदः शर्माणमाचार्यत्वामहंवृणे ॥ इतिआ
चार्यस्तुयथास्वर्गेशक्रादीनांबृहस्पतिः ॥ तथात्वंममयज्ञेस्मिन्नाचार्योभवसुव्रतेतिब्रुयात् ॥ आचार्योपिवृतोस्मीत्युक्त्वा
चारात् । त्वमग्नेव्रतपाअसिदेवआमर्त्येष्वा ॥ त्वंयज्ञेष्वीड्यः ॥ इतिमंत्रंपठेत् ॥ थवासर्वेषांगोत्रादीनप्रथक्पृथगुच्चार्य
ऋत्विजोयुष्मानहंवृणेतियुगपत्सर्वान्वृणुयात् ॥ ततस्तान्वस्त्रादिभिर्दक्षिणादानेनचतोषयेत् ॥ देयानिलिंगपुराणे ॥
वस्त्रंयुग्मंतथाप्पूरंकेयूरंकर्णभूषणं ॥ अंगुलीभूषणंचैवमणिवंधस्यभूषणे ॥ कंठाभरणयुक्तानिप्रारंभेधर्मकर्मणः ॥ पुरो
हितायदत्वाथऋत्विग्भ्यश्चापिदापयेत् ॥ प्पूरंजलपात्रं ॥ इमानिवस्त्राभरणादीनिसदक्षिणा निआचार्यायतुभ्यमहं संप्रदे
इत्याचार्यायदत्वाऋत्विग्भ्योदापयेत् ॥ अत्रमंगलसूत्रवंधनं ॥ अक्षतैर्विप्राअपिआशिषोदद्यात् ॥ ततोयजमानः कृतांजलिः
सूनप्रार्थयेत् ॥ अस्ययागस्यनिष्पत्तौभवंतोभ्यर्थितामया ॥ सुप्रसादंप्रकर्त्तव्यंशांतिकंविधिपूर्वकं इतितान्प्रार्थयेत् ॥
केचित्फलनिवेदनपूर्वकंप्रार्थयेदितिवदंति ॥ इतिवरणप्रयोग ॥ अत्रकेचित्सप्तव्याधेति पद्यपाठंकुर्वंतिकचित्कर्मव्यत्या
संचकुर्वंतितन्निर्मूलं ॥ ततआचार्यएकस्मिन्पात्रेपंच गव्यंकृत्वागायत्र्यागोमूत्रं ॥ यस्तेगंधः पुरुषेपुस्त्रीषुपुंसुभगोरुचिः
योअश्वेषुवीयेर्मृगेषूतहस्तिषु ॥ कन्यायांबर्चोयद्भमेतेनास्मा अपिसंसृजमानोंद्विक्षतकश्चनेतिगोमयम् ॥ पयस्वतीरो
षधयः पयस्वान्मामकंवचः ॥ अथोपयस्वतीनामाभरेहंसहस्रशः ॥ इतिक्षीरं ॥ दधिक्राव्णेतिदधिः ॥ देवस्यत्वेतिकु
शोदकम् ॥ एवंपंचगव्यंसंपाद्य ॥ हिरण्यवर्णाः शुचयः पावकायासुजातः सवितायास्वग्निः ॥ याअग्निगर्भंदधिरे
सुवर्णास्तानआपः संस्योनाभवंतु ॥ यासांराजावरुणोयातिमध्येसत्यानृतेअवपश्यंजनानां ॥ याअग्निगर्भंदधिरेसु० ॥
यासांदेवादिविकृण्वंतिभक्षंयाअंतरिक्षेवहुधाभवंति ॥ याअग्नि० ॥ शिवेनमाचक्षुषापश्यतापः शिवयातन्वोपपृशतत्व

चंमे ॥ घृतश्च्युतः शुचंयोयाः पावकाः स्तानआपः संश्योनाभवंतुइतिमूक्तेनकर्मभूमिसंप्रोक्ष्य ॥ ततआचार्योऽग्निपश्चिम तोपविश्यकुंडेस्थंडिलेवाग्निस्थापनादिहविर्गृहणांतंकर्मकृत्वा ॥ हविर्गृहणेविशेषः ॥ आदित्यायसोमायभौमायबुधाय बृहस्पतयेशुक्रायशनैश्चराय राहवेकेतुभ्योजुष्टंगृह्णामीतित्रिः चतुर्थंऽतूष्णीं ॥ आदित्या० जुष्टमासादयामीतित्रिः ॥ ॐआदित्या० ॥ जुष्टंप्रोक्षामीतिप्रोक्ष्याधिश्रयेत् ॥ संस्थितहोमाघारावाज्यभागांतंकृत्वा ॥ दर्शश्चेद्दर्शांतंपौर्णमासीचे त्पौर्णमासांतंकृत्वा ॥ ततोग्रहस्थापनंकुर्याद् ॥ ततोगृहवेदीपश्चिमभागेउपविश्याचम्य ॥ आचम्यप्राणानायम्यदेश कालौसंकीर्त्यकरिष्यमाणादः कर्मनिमित्तंग्रहयज्ञांगभूतंसर्वतोभद्रमं डलदेवतानांस्थापनप्रतिष्ठापूजनानिकरिष्ये । इति संकल्प ॥ ततोवेद्यांसर्वतोभद्रमादौविरच्य ॥ तदुक्तंहेमाद्रौस्कांदे ॥ प्रागुदीच्याकृतारेखाकुर्यादेकोनविंशतिः ॥ खंडेदुत्रिपदाकोणेशृंखलापंचभिःपदैः ॥ चतुर्विंशत्पदावापिपरिधिर्विंशकैः पदैः मध्येषोडशभिः कोणेपद्ममष्टदलंस्मृतं ॥ श्वेतेंदुः शृंखलाकृष्णावल्लीनीलेनपूरयेत् ॥ भद्रारुणासितावापिपरिधिः पीतवर्णकैः ॥ बाह्यंतरंदलश्वेताकर्णिकापीत वर्णकैः ॥ दलानिश्वेतवर्णानियद्वाचित्राणिकारयेत् ॥ रजांसीपंचवर्णानिमंडलार्थेहिकारयेत ॥ शालितंदुलचूर्णेनशुक्ल वायत्रसंभवः ॥ रक्तंकुसुंभसिंदुरगैरिकादिसमुद्भवं ॥ हरितालोद्भवंपीतंरजनीसंभवंक्वचित् ॥ कृष्णंदग्धयवैः कार्यंहरि तंरजनीरजं ॥ परिधीवेष्टितंपद्मंवाह्येसत्वरजस्तमः ॥ तन्मध्येस्थापयेद्देवान् ब्रह्माद्यांश्चसुरानिति ॥ एवंक्रमेणमंडल मालिख्यतत्रदेवानावाहयेत् ॥ तद्यथा ॥ ब्रह्मापरिमित्यथर्वा ब्रह्माजगतीब्रह्मन्नावाहनेविनियोगः ॥ ॐब्रह्मापरंयुज्यतां ब्रह्मपूर्वंब्रह्मांततोमध्यतोब्रह्मंसर्वतः ॥ अनाव्याधांदेवपुरांप्रपद्यशिवास्योनापतिलोकेविरांज ॥ ॐब्रह्मणेनमः ब्रह्माणं आवाहयामीत्येवंसर्वत्रप्रयोगमुच्चार्यावाहयेत् ततोत्तरतआरभ्यवायव्यांतंअष्टौलोकपालन् ॥ सोमंराजानमित्यथर्वाकुबेर स्त्रिष्टुप्सोमावाहनेविनियोगः ॥ ॐसोमंराजांनमवसेग्निंगीभिर्हवामहे ॥ आदित्यंविष्णुंसूर्यंब्रह्माणंचबृहस्पतीम् ॥ उत्तरेसोमंआ० ॥ इशानामितिपिप्पलादइशोनुष्टुप् ॥ इशानावाहनेविनियोगः ॥ इशानांत्वाभेषजानामुज्जेषआरं

भामहे ॥ चक्रेसहस्त्रवीर्यंसर्वस्माओषधेत्वा ॥ इशानंआ० ॥ त्रातारमिंद्रगर्गइंद्रस्त्रिष्टुप् ॥ इंद्रआवाहनेवि० ॥ ॐत्रातार मिंद्रऋक्१ इंद्रंआ० ॥ अग्नेबन्वेत्यथर्वाग्निर्जगतीअग्न्यावावानेवि० ॥ ॐअग्नेर्मन्वप्रथमस्यप्रचेतसः । पांचजन्यस्यबहुधा यमिंधते ॥ विशोविशः प्रविशिवांसमीमहेसनेमुंचत्वंहसः ॥ अग्निंआ० ॥ येदक्षिणतोगिरायमोनुष्टुप्यमावाहने विनि० ॥ ॐयेदक्षिणतोजुह्वतिजातवेदोदक्षिणायादिशोअभिदासंत्यस्मान् ॥ यममृत्वातेपरांचोव्यथंतांप्रत्यगेनाप्रतिस रेणहन्मि ॥ यमंआ० ॥ अभित्यमित्यथर्वानिर्ऋतिरनुष्टुप्निहत्यावाहनेविनि० ॥ ॐअभितंनिर्ऋतिधत्तामश्वमिवाश्वा भिधान्यां ॥ मल्वोयोमह्यंक्रुध्यंतिसउपाशांनमुच्यते निर्ऋतिमावाहयामि० ॥ येपश्चादित्यथर्वावरुणोऽनुष्टुप् ॥ वरुणा वाहनेवि० ॥ ॐयेपश्चाज्जुह्वतिजातवेदप्रतीच्यांदिशोअभिदासंत्यस्मान् ॥ वरुणमृतत्वातिपरांचोव्यथंतांप्रत्यगेनान्प्र तिसरेणहन्मि ॥ वरुणमावा० ॥ वायोसवितुरित्यथर्वावायुस्त्रिष्टुप्वायुरावाहनेवि० ॥ ॐवायोः सवितुर्विदथानि मन्महेयावात्मन्वद्विपथोयौचरक्षथः ॥ यौविश्वस्यपरिभूवथुस्तौनोमुंचंत्वंहसः ॥ वायुंआ० ॥ वायूसोममध्येष्टौवसून् ॥ अस्मिवस्वित्यथर्वावसवः पंक्तिः वसून्नावाहनेवि० ॥ ॐअस्मिनवसुवसवोधारयंत्विंद्रः पूषावरुणोमित्रोअग्निः ॥ इममादित्याउतविश्वेचदेवाउत्तरस्मिनज्योतिषिधारयंतु ॥ ध्रुवंआ० अध्वरंआ० ॥ आपआ० ॥ अनिलं० ॥ अनलंआ० ॥ प्रत्यूषंआ० ॥ प्रभासंआ० ॥ सोमंआ० ॥ सोमेशानयोर्मध्येएकादशरुद्रान् ॥ ॐरुद्रंजलाषब्रह्मारुद्रास्त्रिष्टुप्रुद्रान्नावाहने विनियोगः ॥ ॐरुद्रंजलाषभेषजंनीलशिखंडकर्मकृत् ॥ प्राशंप्रतिप्राशोजह्यरषानक्रण्वोषधे ॥ अजैकपदंआ० ॥ अहि र्बुध्न्यंथा० ॥ पिनाकिनंआ० ॥ विशांपतिंआ० ॥ भुवनाधीश्वरंआ० ॥ कपालिनंआ० ॥ अपराजितंआ० ॥ स्थाणुं आ० ॥ भर्गंआ० ॥ भगवंतंआ ॥ रुद्रंआ० ॥ इशानेंद्रयोर्मध्येद्वादशादित्यान्स्थापयेत् ॥ येनः सपत्नांगिरसो

आदित्यानिचृज्जगतीआदित्यावाहनेविनियोगः ॥ ॐयेनंः सपत्नाअपतेभंवंत्विंद्राग्नीभ्यामवंबाधामहएतान् ॥ आदि
त्यारुद्राउपरिस्पृशोंनउग्रंचेतारंमधिराजमंक्रन् ॥ अदित्यारुद्राउपरिस्पृशोंनउग्रंचेतारंमधिराछमंक्रन ॥ आदित्यंआ० ॥
दिवाकरंआ० ॥ भास्करंआ० ॥ प्रभाकरंआ० ॥ सहस्रांशुआ० ॥ त्रिलोचनंआ० ॥ हरिदश्वंआ० ॥
रविआ० ॥ दिनकरंआं० ॥ द्वादशात्मकंआ० ॥ त्रिमूर्त्तिआ० ॥ सूर्यमूआ० ॥ इंद्राग्निमध्ये ॥
अश्विनाब्रह्मणेति अश्विनाथर्वा जगती अश्विनीकुमारा वाहने विनियोगः ॥ ॐअश्विंना ब्रह्म
णायांतमर्द्वांचैांवषट्कारेणंधज्ञंवर्द्धयंतौ ॥ बृहंस्पतेब्रह्मणायांह्यर्वाङ्यज्ञोअयंस्वंरिदंयजमानायस्वाहा ॥ अश्विनौआ०॥
यमाग्निमध्येविश्वेदेवान् ॥ विश्वेदेवाथर्वाविश्वेदेवाजगतीविश्वेदेवाहनेविनियोगः ॥ ॐविश्वेंदेवाबसंवोरक्षंतेमगुतादिं
त्यजागृतयूयमस्मिन् ॥ मेमंसनांभिरुतवान्यवांभिमेमंप्रापत्यौरुंषेयोवधेयः ॥ क्रतुदक्षौ० सत्यवसू० ॥ तत्रैवपितृन्० ॥
येवोदेवोत्यथर्वापितृन्जगतीपितृनावाहनेविनियोगः॥ ॐयेवोंदेवाःपितरोयेचंपुत्रासचेंतसोमेशुणुतेदमुक्तं॥ सर्वेंभ्योबः
परिंददाम्येतंस्वस्त्येंनजरसेंवहाथ ॥ कव्यवालं० ॥ अनलं०॥ सोमं० ॥ अर्यमणं० ॥ अग्निष्वात्तान्० ॥ बर्हिषदं० ॥
आज्यपं० य सोमपं० ॥ यमनैर्ऋतिमध्येसप्तयक्षान ॥ आवाहयेत् ॥ वामदेवः सप्तयक्षामकृतिसप्तयक्षानावाहनेवि० ॥
ॐअभित्यंदेवंसंवितारमोण्योंः कविक्रंतुं ॥ अर्चांमिसत्यसवंरत्नधाममभिप्रियंमतिम् ॥ सप्तयक्षानआ० ॥ निर्ऋतिवरुण
मध्येभूतनागान् ॥ सार्पराज्ञीसर्पागायत्रीसपानावादनेवि० ॥ ॐआयंगौः पृश्नि० ॥ अनंतं० ॥ वासुकीं० ॥ तक्षकं० ॥
कर्कोटकं० ॥ पूलकं० ॥ महापद्मं० ॥ अश्वतरं० ॥ कंबलं० ॥ वरुणवायुमध्येगधर्वाप्सरसः ॥ अप्सरसत्यमित्यथर्वा
गंधर्वाप्सरोत्नुष्टुप् ॥ गंधर्बाप्सरसावाहनेविनियोगः ॥ ॐअप्सरसंः सधमादंमदंतिहविर्धानंमंतरासूर्यंच ॥ तास्तेंज
नित्रमभितापरे हिनमंस्तेगंधर्वर्तुनांकृणोमि ॥ बिश्वावसुं० ॥ हाहाहुहू० ॥अप्सरसः ॥ ब्रह्मसोगमध्येस्कंदादीन् ॥

अग्निरिवमन्योब्रह्मास्कंदस्त्रिष्टुप्स्कंदादीनावाहनेविनि० ॥ अग्निरिंवमन्योत्विषीतः । संहस्वसेनानीनंः सुहुरेहूतएंधि ॥
हत्वायशत्रून्विभंजस्ववेदउजोमिमांनोविमृधोंनुदस्व ॥ स्कंदं० ॥ नंदीश्वरं० ॥ शुलं० ॥ महाकालं० ॥ तत्रैवऋषभं० ॥
ॐअश्वंस्याश्वतरस्याजस्यपेत्वंस्यच ॥ अथऋषभस्ययेवाजास्तानस्मिन्धे हितनूवशीन् ॥ ऋषभयोगिनंआ० ॥ ब्रह्मेशा
नयोर्मध्येदक्षादीन ॥ नैनमित्यथर्वादक्षोजगतीदक्षादीनावाहनेविनियोगः ॥ ॐनैनंरक्षांसिनपिंशाचासंहंतेदेवानामोजंः
प्रथमजंह्येतत् ॥ योबिभर्त्तिदाक्षायणंहिरंण्यंसजीवेषुकृणुतेदीर्घमायुः ॥ दक्षं० ॥ मरीचिनं० ॥ आंगिरसं० ॥ ब्रह्मेंद्र
मध्ये ॥ सौभरीदुर्गास्त्रिष्टुप् ॥ ॐअहंरुद्रेभिर्वसुभिश्चराम्यहमांदित्यैरुतविश्वदेंवैः ॥ अहंमित्रावरुंणोभाबि,भर्म्यहमिं
द्राग्निअहमश्विनोभादुर्गांआ० ॥ कण्वोमेधातिथिविष्णुगायत्रीविष्वावाहने० ॥ ॐइदंविष्णुर्विचंक्रमेत्रेधानिदंधेपदं ॥
समूंढमस्यपांशुरे ॥ विष्णुंआवाहयामि ॥ ब्रह्माग्निमध्येस्वधां ॥ स्वधाकारेणेत्यथर्वानुष्टुप् ॥ स्वधावाहने० ॥ ॐस्व
धाकारेणंपितृभ्योंयज्ञेनंदेवताभ्यः ॥ दाने नराजन्योंवशायांमातुर्हेडंनगंछति ॥ स्वधांआ० ॥ ब्रह्मयममध्ये ॥ अंत
कोसीत्यथर्वामृत्युरोगःश्रीमृत्युरोगाबाहनेवि० ॥ ॐअंतकोसिमृत्युरंसि ॥ मृत्युरोगान्आ०॥ ब्रह्मनैर्ऋतिमध्येगणपतिं०॥
ॐनिर्लक्ष्म्यमितिद्रविणोदाविनायकोनुष्टुप्गणेशावानेवि० ॥ ॐनिर्लक्ष्म्यंललाम्यं३निररांतिंसुवामसि ॥ अथयाभद्रता
निंनः प्रजायाअरांतिंनयामसि ॥ गणेशंआ० ॥ ब्रह्मवरुणमध्ये ॥ सिंधुद्विपापोगायत्रीआपआ० ॥ ॐशन्नोदेवीरभिष्टंय
आपोंभवंमुपीतये ॥ शंय्योरभिश्रंवंतुनः ॥ आपआ० ॥ ब्रह्मवायुमध्ये ॥ मरुतामन्वेत्यंगिरामरुतोजगतीमरुतआवाहने०
ॐमरुतांमन्वेअधिंमेब्रुवंतुप्रेमंबाजंबाजंसातेअवंतु ॥ आशुनिंवसुयमांनह्वऊतयेतेनोंमुंचंत्वंहंसः ॥ प्रवहं० ॥ उद्वहं० ॥
संवहं० विवहं० ॥ परावहं० ॥ परिवहं० ॥ अनलं० ॥ ब्रह्मणः पादमूलेकर्णिकाधः ॥ भूमेर्मांतरिक्षब्रह्माभुमिरनुष्टुप्

भूम्यावाहनेविनि० ॥ ॐभूमेमातर्निधेहिमाभद्रयासुप्रतिष्ठितं ॥ संविदानादिवाकवेश्रियांमाधेहिभूत्यांम् ॥ पृथ्वींआ०॥
तत्रैवनद्यः ॥ सिंधुपत्नीत्यंगिरानद्योनुष्टुप्नद्यआ० ॥ ॐसिंधुपत्नीः सिंधुराज्ञीः सर्वायानद्यः ॥ इत्थनंदत्तनस्तस्यंभेष
षजंतेनांदोशुनजामहै ॥ गंगां० ॥ यमुनां० ॥ सरस्वतीं० ॥ नर्मदां० ॥ पापनाशां० ॥ तत्रैवसागरान् ॥ धाम्नो
धाम्नोराजंनितोवरुणनोमुंचनः ॥ यदापोंअघ्न्याइतिवरुणेतियदूचीमततोंवरुणमुंचनः ॥ सप्तसागरेभ्योनमः सप्तसाग
रान्० ॥ ब्रह्मणःउपरि ॥ मेरुंहिमवतं० मंदरं० विंध्यं० माल्यवंतं० मलयं० पारिजातं० ॥ गंधमादनं० कैलासं०
वैकुंठं० ॥ मंडपाद्बहिरुत्तरतः ॥ गदां० ॥ त्रिशुलं ॥ वज्रं० ॥ शक्ति० ॥ दंडं० ॥ खड्गं० ॥ पाशं० ॥ अंकुशं० ॥
तद्बाह्येतेनैवक्रमेण ॥ गौतमं० ॥ भरद्वाजं० ॥ विश्वामित्रं० ॥ कश्यपं० ॥ जमदग्निं० ॥ वशिष्ठं० ॥ अत्रीं० ॥ अरुं
धतीं० ॥ तद्बाह्येपूर्वादिक्रमेण ॥ ऐंद्रीं० ॥ कौमारीं० ॥ ब्राह्मीं० ॥ वाराहीं० ॥ चामुंडां० ॥ वैष्णवीं० ॥ माहे
श्वरीं० ॥ कालिकां० ॥ तद्बाह्येपूर्वादिक्रमेणमध्येसूर्यं ॥ एवंसोमादीन् ॥ एवमावाह्यव्याहृत्यासंस्थाप्य ॥ तदस्त्वि
त्यात्रयप्रतिरथोविश्वेदेवास्त्रिष्टुप्ब्रह्मादीनांप्रतिष्ठापनेविनियोगः ॥ ॐतदस्तु० ॥ प्रतिष्ठाप्य ॥ ब्रह्माद्यावाहितदेवता
भ्योनमइतिसर्वोपचारैः संपूज्य ॥ अग्नेत्युत्तरसंकल्पंविधाय ॥ प्रणवादिनमोंतैर्नामभिः पायसादिंबलिंदत्वातदुपरिव
स्त्रमाछाद्यतत्रग्रहांश्चावाहयेत् ॥ केचित्तुसर्वतोभद्रमंडलदेवतानांस्थापनंबिनैवग्रहाणांस्थापनंकुर्वंतितदसत् ॥ तदुक्तंब
शिष्ठेन ॥ अग्निप्रणयनंकृत्वावेद्यामावाहयेत्सुरान ॥ ब्रह्मादिकांस्तुसंस्थाप्यमंडलेभद्रसंज्ञिके ॥ तस्यामावाहयेद्वेद्यांखे
चरान्साधिदैवतान् ॥ इति ॥ अथग्रहस्थापन ॥ अहतवस्त्रेउक्तप्रकारेणाष्टदलंविधायतत्रोक्तप्रमाणानिग्रहमंडलानिविर
चयतङ्गोमयोपलिप्तगृहवेद्युपरिप्रासार्यमंडलेषुतत्तद्ग्रहचदन कृतवर्णानक्षातान्मंडलाकारेण संस्थाप्यतेषुसूर्यादिप्रतिमा
अग्न्युत्तारणपूर्वकंयथास्थानंन्यसेत् ॥ मूर्त्तिलेखनपक्षेतत्तच्चंदनैस्ताः पटेविलिख्यस्थापयेत् ॥ तद्भावेतत्तद्वर्णपुंजंतत्त
त्स्थानेन्यस्यतत्रदेवताः स्थापयेत् तत्रप्रतिमापक्षेऽग्न्युत्तारणं ॥ इमंमेअग्नेत्यग्न्युत्तारणसूक्तस्यांगिराग्निस्त्रिष्टुषादिछंदां

सिमूर्तिनामग्न्युत्तारणेविनियोगः ॥ ॐइमंमेअग्नेपुरुषंमुमुग्ध्ययंयोबद्धः सुयंतोलालंपीति ॥ अतोधीतेकृणवद्भागधे
यंयदानुंन्मुदितोसंति ॥ १ ॥ अग्निष्टेनिशंमयतुयदितेमनउद्युतं ॥ कृणोमिविद्वान्भेषजंयथानुंन्मुदितोसंसि ॥ २ ॥
दैवेनसादुन्मंतिदितमुन्मंतंरक्षंसस्परि ॥ कृणोमिविद्वान्भेषजंयदानुंन्मुदितोसंति ॥ ३ ॥ पुनंस्त्वारदुप्सरसः पुन
रिंद्रः पुनर्भगः ॥ पुनंस्त्वादुविश्वेदेवायथानुंन्मदितोसंसि ॥ ४ ॥ माज्येष्ठंवधादयमग्नएषांमूलवर्हणात्परिपाह्येनं ॥ सम्रा
ह्यान्पाशानविचृतप्रजाननतुभ्यंदेयाअनुजानंतुविश्वे ॥ ५ ॥ उन्मुंचपाशांस्त्वमग्नएषांत्रयंस्त्रिभिरुत्सिंतायेभिरासान् ॥
सम्राह्यान्पाशानविचृतप्रजाननपितापुत्रंमातरंमुंचसर्वान् ॥ ६ ॥ येभिःपाशैः परिस्वितोविबंधोमेअंगआर्पितउत्सितश्च ॥
वितेमुच्यतांविमुचोहिसतिभ्रूणघ्निपूषनदुरितानिमृक्ष्व ॥ ७ ॥ नृतेदेवाअमृजतैतदेनस्त्रितएनंमनुष्येषुममृजे ॥ ततोयदि
त्वाग्राहिरानशेतांतेदेवाब्रह्मणानाशयंतु ॥ ८ ॥ मरीचीर्धुन्मान्प्रविजानुपाप्मन्नुदारानगंछोतवानिहाशन् ॥ नदी
नांफेनाअनुतानविनश्यनभ्रूणघ्निपूषनदुरितानिमृक्ष्व ॥ ९ ॥ द्वादशधानिहितंतृतस्यापमृष्टंमनुष्यैनसानि ॥ ततो
यदि त्वाग्राहिरानशेतांतेदेवाब्रह्मणानाशयंतु ॥ १० ॥ इत्यंतंदुग्धेनजलेनवाप्रतिमानांस्नपनं ॥ द्वादशवारंमृदस्नानं ॥
सुवर्णशलाकयावाकुशेनचित्रंदेवोत्यर्द्धमंत्रेणमुखोद्घाटनं ॥ ॐआंह्रींक्रौंहंसः सोहंआसांप्राणइहप्राणाः जीवइहस्थितः०
सर्वेंद्रियाणिइहागत्यसुखेनचिरंतिष्ठंतुस्वाहेतिप्राणप्रतिष्ठा ॥ ततः हस्तेअक्षतानगृहीत्वा ॥ विषासहीत्यथर्वादित्यो
जगतीआदित्यस्थापनेविनियो० ॐविषासहिंसहमानंसासहानंसहीयांसम् ॥ सहमानंसहोजितंस्वर्जितंगोजितंसंधना
जितं ॥ ॐभूर्भुवः स्वर्जनदोमध्यमेमंडलेवर्त्तुलेसूर्यंस्थापयामीति सूर्यंशुक्लतंदुलैः स्थापयेत् ॥ अनयारीत्यासोमादीनां
स्थापनं ॥ शकधूममथर्वासोमोनुष्टुप्सोमस्थापनेविनियोगः ॥ ॐशकधूमंनक्षत्राणियद्राजानमकुर्वत ॥ भद्राहमन्यस्मै

प्रायेच्छन्निदंराष्ट्रमसादिति ॥ ॐभूर्भुवः स्वर्जनदोंआग्नेयांसमचतुरस्रेसोमंस्थापयामि ॥ २ ॥ त्वयामन्योब्रह्माभौम
त्रिष्टुप्भौमस्थापनेवि० ॥ ॐत्वयामान्योसरथंमारुजंतोहर्षमाणाहसितासोमरुत्वन् ॥ तिग्मेशंवआयुधासंशिशाना
उपप्रयंतुनरोअग्निरूपाः ॥ ॐभू०दक्षिणेत्रिकोणेभौमंस्थापयामि ॥ ३ ॥ यद्राजानोविभजंतविष्णुबुधःपंक्तीबुधस्थापने० ॥
ॐयद्राजानविभजंतद्रष्टापूर्त्तस्यंशोडषंयमस्यामिसंदंभासदः ॥ अविस्तस्मात्प्रमुंचतिदत्तः शितिवात्स्वधा ॥ ॐभू०इशेबा
णाकारेबुधंस्थापयामि० ॥ ४ ॥ बृहस्पतिनोब्रह्मागुरुस्त्रिष्टुप्गुरुस्था० ॥ ॐवृहस्पतिर्नः परिपातुपश्चादुतोत्तरस्माद
धरादघायोः ॥ इंद्रःपुरस्तादुतमध्यतोनः सखासखीभ्योवरीयः कृणोतुः ॥ ॐभू०उत्तरेदीर्घचतुरस्रेगुरुंस्थाययामि ॥
५ ॥ शुक्रोस्यथर्वाशुक्रोनुष्टुप्शुक्रस्थापनेविनियोगः ॥ ॐशुक्रोसिभ्राजोसिस्वंसिज्योतिरसि ॥ आन्पुंहिश्रेयांसमति
समंक्राम ॥ ॐभू०पूर्वेपंचकोणेशुक्रंस्थापयामि ॥ ६ ॥ सहस्रबाहुर्नारायणः शनिस्त्रिष्टुप्शनिस्थापनेविनियोगः ॥
ॐसहस्रबाहुः पुरुषः सहस्राक्षः सहस्रपात् ॥ सभूमिं विश्वतोवृत्वात्यतिष्ठद्दशांगुलं ॥ ॐभू०पश्चिमेधनुकारेशनिंस्थाप
यामि ॥ ७ ॥ दिव्यंचित्रंकौशिकोराहुस्त्रिष्टुप्राहुस्थापनेविनियोगः ॥ ॐदिव्यंचित्रंमृतुनाकल्पयंतुमृतूनामुग्रंभ्रमयतु
देतु ॥ तदादित्यमचरंनेतुसर्वांतआपइमांलोका अनुसंचरंति ॥ ॐभू०नैर्ऋत्येशुर्पाकारेराहुंस्थापयामि ॥ ८ ॥ यस्ते
पृथुरथर्वाकेतवस्त्रिष्टुप् ॥ केतुस्थापनेविनियोगः ॥ ॐयस्ते पृतुस्तनयिन्नुर्यारूष्वोदैवः केतुविश्वंसमाभूषंतीदं ॥
मानोवाधिविद्युप्तादेवसस्पंमोतवंधिरश्मिभिः सूर्यस्या ॐभू०वायव्येध्वजाकारेकेतूंस्थापयामि० ॥ इतिग्रहाः ॥
अथाधिदेवाः ॥ मानोविदनब्रह्माइश्वरोनुष्टुप्ईश्वरस्थापने० ॥ ॥ ॐमानोविव्याधिनोमोअभिव्याधिनोविदन् ॥
आराच्छरव्यांअस्मद्विषू चिरिंद्रपातय ॥ ॐभू०सूर्यादुत्तरेशंभुंस्थापयामि ॥ १ ॥ आपोहिष्टासिंधुद्वीपउमागायत्रीउमा

स्थापने० ॥ ॐआपोहिष्टामयोभुवस्तानऊर्ज्जेदधातनः ॥ महेरणायचक्षसे ॥ ॐभू०सोमाद्दक्षिणेउमांस्थापयामि ॥
२ ॥ अग्निरिवमन्योब्रह्मस्कंदस्त्रिष्टुप्स्कंदस्थापनेवि० ॥ ॐअग्निरिवमन्योत्विषितः सहस्वसेनानीर्नः सुहूरेहूतएधि ॥
हत्वायशत्रून्विभंजस्ववेदओजोमिमानोविमृधोनुदस्व ॥ ॐभू०भौमाद्दक्षिणेस्कंदंस्थापयामि ॥ ३ ॥ प्रतद्विष्णुरथर्वा
विष्णुर्गायत्रीविष्णुस्थाप० ॥ ॐप्रतद्विष्णुंस्तवतेवीर्याणिमृगोनभीमः कुचरोगिरिष्टाः ॥ परावतआजगम्यात्परस्याः ॥
ॐभू०बुधात्पश्चिमेविष्णुंस्थापयामि ॥ ४ ॥ ब्रह्मजज्ञानमथर्वाब्रह्मात्रिष्टुप्ब्रह्मास्थापनेवि० ॥ ॐब्रह्मजज्ञानंप्रथमं० ॥
ॐभू०गुरोः पूर्वेब्रह्माणंस्थापय.मि० ॥ ५ ॥ त्रातारमिंद्रंगर्गस्त्रिष्टुप्इंद्रस्था० ॥ ॐत्रातारमिंद्र० ॥ ॐभू०शुक्रात्पूर्वे
इंद्रंस्थापयामि ॥ ६ ॥ यः प्रथमोब्रह्मायमस्त्रिष्टुप्यमस्थापेने० ॥ ॐयः प्रथमः प्रवतंमाससादंबहुभ्यः पंथामनुपश्प-
शानः ॥ यो३स्ये शेद्विपदोयश्चतुंस्पदस्तस्मै यमायनमोअस्तुमृत्यवे ॥ ॐभू०शनिराग्नेयेयमंस्था० ॥ ७ ॥ रोहितः
कालोथर्वाकालोनुष्टुप् ॥ कालस्थापनेविनियोगः ॥ ॐरोहितः कालोअभवद्रोहितोग्रेप्रजापतिः रोहितोयज्ञानां
मुखंरोहितः स्व१राभरत् ॥ ॐभू०राहोरैशान्यांकालंस्था० ॥ ८ ॥ सखासाब्रह्माचित्रगुप्तस्त्रिष्टुप्चित्रगुप्तस्थापनेवि० ॥
ॐसखासावस्मभ्यमस्तुरातिः सखेंद्रोभगः ॥सवितचित्रराधाः ॥ केतूनांनैहृतेचित्रगुप्तंस्थापयामि० ॥ इतिदेवाः ॥
अथप्रत्यधिदेवाः ॥ समास्त्वाग्नेब्रह्माग्निस्त्रिष्टुप्अग्निस्थापनेविनियोगः ॥ ॐसमास्त्वाग्नऋतवोवर्द्धयंतुसंवत्सराऋषयो
यानिसत्या ॥ संदिव्येनदिदिहिरोचनेनविश्वाआभासिप्रदिशश्चतस्रः ॥ ॐभू०सूर्याद्दक्षिणेअग्निंस्था० ॥ १ ॥ शन्नो
देवीब्रह्मआपोगायत्रीआपस्थापनेविनि० ॥ ॐशंन्नोदेवीरभीष्टय० ॥ ॐभू०सोमादुत्तरेआपः स्था० ॥ २ ॥ भूमेर्मात
ब्रह्माभूमिरनुष्टुप्भूमिस्थापनेवि० ॥ ॐभूमेर्मातर्निधेहिमाभद्रयासुप्रतिष्ठितं ॥ संविदानादिवाकवेश्रियामाधेहिभूत्यां ॥

ॐभू०भौमात्पश्चिमेपृथ्वीस्था० ॥ इदंविष्णुवि० ॥ ॐभू०वुधात्प्राच्यांविष्णुंस्था० ॥ ४ ॥ इममिंद्रब्रह्माथर्वाइंद्रस्त्रि
ष्टुप् ॥ इंद्रस्थापनेवि० ॥ ॐइममिंद्रवर्द्धयक्षत्रियंमइमंविषामेंकहृपंकृणुत्वं ॥ निरमित्रांनक्ष्णुह्यस्यसर्वांस्तान्रंधयास्मा
अहमुत्तरेषु ॥ ॐभू०गुरोः पश्चादिंद्रंस्था० ॥ ५ ॥ प्रेतंपादावथर्वैन्द्राण्यनुष्टुप्इंद्राणीस्थापनेविनियोगः ॥ ॐपेतंपादौ
प्रस्फुरंतंवहंतमृणताग्रृहान् ॥ इंद्राण्येंतुप्रथमाजितामुंषितापुरः ॥ ॐभू०शुक्रात्पाश्चिमेइंद्राणींस्थाप० ॥ ६ ॥ प्रजापतेत्य
थर्वाब्रह्माप्रापतिस्त्रिष्टुप्प्रजपतिस्थापनेविनियोगः ॥ ॐप्रजापतेराव्रतो० ॥ ॐभू०शनिनैर्ऋतेप्रजापतिंस्था० ॥ ७ ॥
सर्पानुसर्पाथर्वासर्पापंक्तिः सर्पस्थापनेविनियोगः ॥ ॐसर्पानुंसर्पपुनंवोयंतुयातवः पुनर्हेतिः किंमिदितिः यस्यस्थत्त
मत्तयोवः ॥ प्राहैत्तमत्तमांसान्यंत्त ॥ ॐभू०राहोर्नैर्ऋतेसर्प्पान्स्था० ॥ ८ ॥ 'योदिशामथर्वाब्रह्मास्त्रिष्टुप्ब्रह्मास्थापने
विनियोगः ॥ ॐयेदिशामंतर्देशेभ्योजुह्वतिजातवेदः सर्वाभ्योदिग्भ्योंअभिदासंत्यस्मान् ॥ ब्रह्मत्वार्तेपरांचोव्यथंतां
प्रत्यगेंनान्प्रतिसरेणंहन्मि ॥ ॐभू०केतूनामाग्नेयेब्रह्माणंस्था० ॥ ९ ॥ इत्यधिदेवाः ॥ अथविनायकादिपंच ॥ निर्ल
क्ष्म्यद्रविणोदाविनायकोनुष्टुप् गणेशस्थापनेवि० ॥ ॐनिर्लक्ष्म्यंललाम्यं० ॥ ॐभू०आदित्याद्वायुभागेगणेशंस्थाप
यामि० ॥ १ ॥ प्रतनाजितमथर्वादुर्गास्त्रिष्टुप्दुर्गास्थापने० ॥ ॐपृतनाजितं० ॥ ॐभू०गणेशादुत्तरेदुर्गांस्था० ॥
२ ॥ अंतरिक्षेवायवेब्रह्मावायुरनुष्टुप्वायुस्थापनेविनियोगः॥ ॐयेअंतरिंक्षेवायवेसमंनमन्सआंर्ध्रोत् ॥ यथांतरिंक्षेवाय
वेसमनेंमन्नेवामह्यंसंन्नमन्संन्नमंतु ॥ ऊर्जंकामंदुहांआयुः प्रथमंप्रजांपोषंरयिंस्वाहा ॥ ॐभू०गणेशात्पूर्वेवायुंस्था० ॥
॥३॥ शाम्यंतोथर्वाकाशस्त्रिष्टुप्आकाशस्थापनेवि० ॥ शाम्यंत्यस्यततोरोगाग्रहाविघ्नविनायकाः ॥ स्वस्त्वस्तुनृपराष्टा
यस्वस्तिगोब्राह्मणायच ॥ ॐभू०दुर्गायाउत्तरेआकाशंस्था० ॥ ४ ॥ संज्ञानंनांगिरांश्विनावर्ष्णिकूअश्विनोस्थापनेवि० ॥

ॐसंज्ञानंनः खेभिः संज्ञानगरंणेभिः ॥ संज्ञानमश्विनायुवमिहास्मासुनियंछतं ॥ ॐभू०दुर्गायाः पश्चिमेऽश्विनीकुमारौ
स्था० ॥ ५ ॥ अथवास्तूर्यादुत्तरभाकसंस्थास्छापयेत् ॥ अथतत्रैवक्षेत्रपालंवास्तोष्पतिंस्थापयेत् ॥ अंजतेव्यंजतेत्यथर्वा
ब्रह्माक्षेत्रपतिस्त्रिष्टुप्क्षेत्रपतिस्थापनेविनि० ॥ ॐअंजतेव्यंजतेसमंजतेक्रतुंरिहंतिमधुनाभ्यंजतेछवार्सिंधोरुद्रासेपतयंत
मुक्षणंहरिण्यपावाः पशुमाशुगृह्नते ॥ ॐभू०क्षेत्रपालंस्था० ॥ पुनरेहीत्यथर्वांगिरावास्तोष्पतिस्त्रिष्टुप् ॥ वास्तोष्पति
स्थपने० ॥ ॐपुनरेहिंवाचस्पतेदेवेनमनंसासह ॥ वसोंष्पतेनिरंमयमय्येवास्तुमयिश्रुतं ॥ ॐ भू०वास्तोष्पतीं
स्था० ॥ अथदिक्पालाः ॥ त्रातारमिंद्रगर्गेइंद्रस्थापने० ॥ ॐत्रातारमिंद्र० ॥ ॐभू०पूर्वेइंद्रंस्थापयामि ॥ अग्नेमन्वे
ब्रह्माग्निस्त्रिष्टुप्अग्निस्था० ॥ ॐअग्नेमन्वप्रथमस्यप्रवेतसः पांचजन्यस्यबहुधायमिंधते ॥ विशोविशः प्रविशिवांसं
मीमदेसनोंमुंचत्वहंसः ॥ ॐभू०अग्निकोणेऽग्निंस्थापयामि ॥ येदक्षिणतोंगिरास्त्रिष्टुप्यमस्थापनेवि० ॥ ॐयेदक्षिणतो
जुह्वतिजातवेदोदक्षिंणायादिशोअभिदासंत्यस्मान् ॥ यममृतत्व।तेपरांचोव्यथंतांप्रत्यगेंनान्प्रतिसरेणंहन्मि ॥ ॐभू०
दक्षिणेयमंस्था० ॥ अभितनिर्हतिरनुष्टुप्निहतिस्थापने० ॥ ॐअभितंनिर्हतिधत्तामश्वंमिवाश्वाभिधान्यां ॥ मत्वोयो
मह्यंक्रुध्यंतिसउपाशान्नमुंच्यते ॥ ॐभू० नैहृत्येनिर्हतिंस्थाप० ॥ येपश्चाज्जुह्वत्यथर्वावरुणस्त्रिष्टुप्वरुणस्यापनेवि० ॥
ॐयेपश्चाज्जुंह्वतिजावेदः प्रतिच्यांदिशोंअभिदासंत्यस्मान् ॥ वरुणमृतत्वातिपरांजोव्यथंतांप्रत्यगेंनान्प्रतिसरेणंहन्मि ॥
ॐभू०वारुण्यांवरुणंस्था० ॥ वायोः सवितुरथर्वावायुस्त्रिष्टुप्वायुस्यापने० ॥ ॐवायोः संवितुर्विदथांनिमन्महेया
वांयाबात्मद्विषथोयौचरक्षंथः ॥ यौविश्वंस्यपरिवंभूवंथुस्तौनोंमुंचतमंहसः ॥ ॐभू०वायुकाणेवायुंस्था० ॥ यउत्तरतो
ब्रह्मासोमस्त्रिष्टुप् ॥ कुबेरस्थापनेवि० ॥ ॐयउंत्तरतोजुह्वतिजातवेदः उदीच्यादिशोऽभिदासंत्यस्मान् ॥ सोमंमृत्वाते

परांचोऽव्यथतांप्रत्यगेनान्प्रतिसरेणहन्मि ॥ ॐभू०उत्तरेकुबेरंस्थापयामि० ॥ धातादद्दात्वंगिराइशानोगायत्रीइशान स्थापनेवि० ॥ ॐधातादधातुनोरमिमीशानोजगंतस्पतिः ॥ सनंः पूर्णेनंयच्छतु ॥ ॐभू०इशानकोणेईन्शानंस्थापया०॥ भूमेर्मातरिब्रह्माभूमिरनुष्टुप्भूमिस्थापनेवि० ॥ ॐभूमेर्मात० ॥ ॐभू०प्रतीचीवायव्योर्मध्येपृथ्वींस्था० ॥ ब्रह्मापरम थर्वाब्रह्मास्त्रिष्टुप्ब्रह्मास्थापनेवि० ॥ ॐब्रह्मापरंयुज्यतांब्रह्मपूर्वंब्रह्मांततोमंध्यतोब्रह्मसर्वतः ॥ अनाब्याधांदेवपुरांप्रपद्य शिवास्योनापतिलोकेविराज ॥ ॐभू० पूर्वैशानयोर्मध्ये ब्रह्माणंस्थापयामि ॥ इतिदिक्पालान् क्रमेणस्थापयेत् ॥ अथवस्वादीनांस्थापनंयथावकाशं ॥ येनः सपत्नांगिरसोवसवोनिचृज्जगतीवसवस्थापनेविनियोगः ॥ ॐयेनः सपत्ना०क्रन् ॥ ॐभू०वसूनस्थापयामि ॥ आदित्याब्रह्मादित्यास्त्रिष्टुप्आदित्यास्थापनेवि० ॥ ॐआदित्यारुद्रा अश्विनोभादेवाः पांतुयजमानंनिऋष्यान् ॥ येनंः सपत्नाअपतेभवंत्विंद्राग्निभ्यामवबाधामहएनाम् ॥ ॐभू०आदित्या न्स्था० ॥ रुद्रंजलाषब्रह्मारुद्रास्त्रिष्टुप्रुद्रास्थापनेवि० ॥ ॐरुद्रंजलाषभेषजंनीलशिखंउकर्मकृत् ॥ प्राशंप्रतिंप्राशंजह्वर षानकृण्वोषधे ॥ ॐभू०रुद्रान्स्था० ॥ मरुतामन्वेत्यथर्वामरुतस्त्रिष्टुप्मरुतस्थापनेविनियागः ॥ ॐमरुतांमन्वेअधिमेंब्रु वंतुप्रेमंवाजंवाजसातेअवंतु ॥ आशूनिवसुयमांनहऊतयेतेनोमुंचत्वंहसः ॥ ॐभू०मरुतः स्था ॥ इमाब्रह्मब्राह्माब्रह्मा स्त्रिष्टुप्ब्रह्मास्थापनेवि० ॥ ॐइमाब्रह्मंबृहद्दिवः कृणवदिंद्रायशूषमग्रिः ॥ यः स्वर्षाः महोगोत्रस्यंक्षयतिस्वराजातुरश्चि द्विश्वमर्णवत्तपस्वान् ॥ ॐभू०ब्रह्माणंस्था० ॥ तद्विष्णोब्रह्माविणुर्गायत्रीविष्णुस्थापनेविनियोगः ॥ ॐतद्विष्णोः परमंपदंसदापश्यंतिसूरयः ॥ दिवीवचक्षुराततम् ॥ ॐभू०विष्णुंस्था० ॥ रुद्रंजलाषब्रह्मेशस्त्रिष्टुप्इशस्थापने० ॥ ॐरुद्रंजलाश० ॥ ॐभू०इशंस्था० ॥ योविश्विब्रह्मार्कस्त्रिष्टुप्अर्कस्थापनेवि० ॥ ॐयोविश्वचर्षणीरुतविश्वतोमुखोयो

विश्वतस्पाणिरुतविश्वतस्पृथः ॥ संबाहुभ्यांभरतिसंपत्रैर्द्यावापृथिवीजनयंदेवएकः ॥ ॐभू०द्वादशादित्यानस्था० ॥ इयंवीरुनित्यथर्वांगिरावनस्पतिरनुष्टुप्वनस्पतिस्थापनेवि० ॥ ॐइयंवीरुन्मधुंजायांतामधुंनात्वाखनामसि ॥ मधोरधि प्रजातासिसानोमधुमतस्कृधि ॥ ॐभू०वनस्पतिस्था० ॥ अथनक्षत्राणीतिनक्षत्रसूक्तेनाष्टाविंशतिइशकोणादारभ्येश कोणपर्यंतंप्रतिदिशंसप्तसप्तकृत्तिकादिनिस्थाप्यानि॥ त्रित्राणिसाकमितिनक्षत्रसूक्तस्यांगिरानक्षत्राणित्रिष्टुवनुष्टुप्कृत्तिका दिनक्षत्रस्थापनेविनियोगः ॥ ॐचित्राणि साकंदिविरोचनानिसरीसृपाणिभुवनेजवानि ॥ तुर्मिशंसुमतिमिछमानोअहा निगीर्भिसंपर्यामिनाकं ॥ सुहवमग्नेकृत्तिकारोहिणीचास्तुभद्रंमृगशिरः शमार्द्रा ॥ पुनर्वसूसुनृताचारुपुष्योभानुरांश्लेषा अंयनमधामे ॥ पूण्यंपूर्वाफाल्गुन्यौचात्रहस्तश्चित्राशिवास्वातिसुघोमेअस्तु ॥ राधेविशाखेसुहवानुराधाज्येष्टासुनक्षत्र मरिष्टमूलं ॥ अन्नंपूर्वारासतामेआषाढाऊर्जदेव्युत्तराआवहंतु ॥ अभिजिन्मेरासतांपुण्यमेवः श्रवणः श्रविष्ठाः कुर्वतां सुपुष्टिं ॥ आमेमहछतभिषग्वरीयआमेद्वयाप्रोष्टपदासुशर्म ॥ आरेवतीचाश्वयुजौभगंमआमेरयिंभरण्यआवहंतु॥ यानिनक्षत्राणिदिव्यंऽतरिक्षे अप्सुभूमौयानिनगेषुदिक्षु ॥ प्रकल्पयंश्चंद्रमायोन्येतिसर्वाणि ममैतानिशिवानिसंतु ॥ ॐभूर्भुवः स्वर्जनदोंकृत्तिकांस्थापयामिरोहिणी० ॥ मृगशिरं० ॥ आर्द्रां० ॥ पुनर्वसुं० ॥ पुष्यं० ॥ अश्लेषां० ॥ मघां० ॥ पूर्वाफाल्गुनीं०॥ उतराफाल्गुनीं० ॥ हस्तं० ॥ चित्रां० ॥ स्वातिं० ॥ विशाखां०॥ अनुराधां० ॥ ज्येष्ठां०॥ मूलं० ॥ पूर्वाषाढां० ॥ उत्तराषाढां० ॥ अभिजितं० ॥ श्रवणं० ॥ धनीष्ठां० ॥ शतभिषजं० ॥ पूर्वाप्रोष्ठपदां० ॥ उत्तरप्रोष्ठपदां० ॥ रेवतीं० ॥ अश्विनीं० ॥ भरणीं० ॥ इतिनक्षत्राणि ॥ तद्वाह्येतेनैवक्रमेणविष्कंभादियोगान् ॥ अष्टाविंशानीत्यथर्वायोगानित्रिष्टुप्योगानिस्थापनेविनियागः ॥ ॐअष्टाविंशानिशिवानिशग्मानिसहयोगंभुंजंतुमे ॥ योगंप्रपद्येक्षेमंचक्षेमंप्रपद्येयोगंचनमोहोरात्राभ्यांमस्तु ॥ ॐभूर्भुवः स्वर्जनदोंविष्कुंभंस्थापयामि० ॥ प्रीतिं० ॥ आयु

ष्मंतं० ॥ सौभाग्यं० ॥ शोभनं० ॥ अतिगंजं० ॥सुकर्माणं० ॥ धृतिं० ॥ शुलं० ॥ गजं० ॥ वृद्धिं० ॥ घ्रुवं० ॥
व्याघातं० ॥ हर्षणं० ॥ वज्रं० ॥ सिद्धिं० ॥ व्यतिपातं० ॥ वर्याणं० ॥ परिघं० ॥ शिवं० ॥ सिद्धिं० ॥ साध्यं० ॥
शुभं० ॥ शुक्रं० ॥ ब्रह्माणं० ॥ ऐंद्रं० ॥ वैधृतं० ॥ इतियोगान् ।. तद्वाह्येनक्षत्रदेवताः नक्षत्रस्थापनमंत्रेणतत्क्रमेणैव
स्थापनं ॥ नपृथङ्मंत्रैः ॥ तदुक्तं ॥ चित्राणिसाकंसूक्तेनभानिदेवांश्चस्थापयेदित्यंगिरावचनं ॥ अग्निं० ॥ प्रजापतिं० ॥
सोमं० ॥ रुद्रं० ॥ अदितिं० ॥ बृहस्पतिं० ॥ सर्पान्० ॥ ७ ॥ पितृन्० ॥ भगं० ॥ अर्यमणं० ॥ सवितारं० ॥
त्वष्टारं० ॥ वायुं० ॥ इंद्राग्नीं० ॥ ७ ॥ मित्रं० ॥ इंद्रं० ॥ निर्हृतिं० आपः० ॥ विश्वेदेवान्० ॥ ब्रह्माणं० ॥ विष्णुं० ॥
७ ॥ वसून्० ॥ वरुणं० ॥ अजैकपदं० ॥ अहिबुध्न्यं० ॥ पूषणं० ॥ अश्वनौ० ॥ यमं० ॥ ७ ॥ एवंक्रमेणशुक्लंतं
दुलैः स्थापयेत् ॥ ततइशकोणेस्वस्तिवाचनोक्तप्रकारेण कलशंस्थापयित्वा ॥ तत्ररुद्रंजलाषभेषभेषजमितिमंत्रेणरुद्रं
स्थापयित्वा ॥ एवंसप्तत्रिंशाधिकशतंदेवताभवंति ॥ तदस्त्विवतिप्रतिष्टाप्य ॥ ॐतदस्तु० ॥ सूर्यादयः स्थापितदेवताः
सुप्रतिष्ठिताभवंत्वित्यक्षतैः प्रतिष्टापयेत ॥ एवंअयुतहोमेनक्षत्रयोगनक्षत्रदेवतानांस्थापनं ॥ स्वल्पहोमेवस्वादिदेवतानां
स्थापनंमयूखकारैर्व्यारुयातं ॥ ततआचार्येवान्योऋत्विग्रुद्रकलशमालभ्य तैत्तरीयशाखोक्तंरुद्र जपंजपेत् ॥ तदुक्तं
मेरुतंत्रे ॥ रुद्रोनयस्यशाशायांपरिशिष्टान्वितंसतु ॥ पठेद्रुद्रंतैतरीयंलुप्तशाखंतमेवहिइत्युक्तत्वात ॥ ग्रहवेदिपश्चिमेडप
विश्य ॥ देशकालौसंकीर्त्य० स्थापितानामादित्यादिदेवानांआवाहनपूर्वकंपूजनमहंकरिष्ये ॥ ततोव्याहृत्यासर्वेषामा
वाहनम् ॥ ॐभूर्भुवःस्वर्जनदेंप्रौढवयसंकलिंग देशोद्भवंविशाखया।युक्तसप्तम्यामुत्पन्नंकपीलाख्याग्निक्षत्रियवर्णपद्मासन
स्थंपद्मधारिणंसप्ताश्वंद्विभुजं विश्वामित्रार्षत्रिष्टुप्छंदस्कंरक्ता बरधरंरक्ताभरणभूषितंरक्त माल्यानुलेपनंरक्त ध्वजछत्र
पताकोपशोभितमारुह्यरथंमेरुं प्रदक्षिणीकुर्वाणंगृहमंडल मध्येमध्यमेमंडलेवर्त्तुलेप्रविष्टं श्रीसूर्यमावाहयामी तिरक्ताक्षतैः
सूर्यमावाहयेत् ॥ १ ॥ ॐभूर्भुवः स्वर्जनदेंसूर्याद्धिनवयस्कंकृत्ति कानक्षत्रयुतायां कृष्णपक्षचतुर्दश्यामुत्पन्नंपिंगाला
ख्याग्निवैश्यवर्णकिरीटिन मात्रेयार्षमनुष्टुप्छंदस्कं यमुनादेशसंभूतंगदाधरंदशाश्वद्विभुजं श्वेताभरणभूषितंश्वेतमाल्यानु

लेपनंश्वेतध्वज श्वेतछत्रपताकोपशोभितंमुकुटकेयूरमणि शोभितंदिव्यंरथमारुह्यमेरुं प्रदक्षिणंकुर्वाणंआग्नेयेचतुरस्रेमंडले
प्रविष्टंसोममावाहयामीति शुक्लतंदुलैरावाहयेत् ॥ २ ॥ ॐभूव० स्वर्जनदेंबालवयस्कं पूर्वाषाढानक्षत्रयुतायांदशम्या
मुत्पन्नंधूम्राख्याग्निक्षत्रिय वर्णकिरीटिनंजामदग्न्यार्षजगती छंदस्कंअवंत्यदेशोद्भवंमेषमारूढं भारद्वाजंचतुर्भुजंशक्ति
शुलगदाधारिणंरक्तां बरधरंरक्ता भरणभूषितंरक्त माल्यानुलेपनंरक्त छत्रध्वजपताकोपशोभितं मुकुटकेयूरमणिशोभितं
दिव्यंरथमारुस्वमेरुं प्रदक्षीणीकुर्वाणं दक्षिणेग्रहमंडले त्रिकोणेप्रविष्टंभौममावाहयामी तिरक्ताक्षतैरावाहयेत् ॥ ३ ॥
ॐभूर्भुवः स्वर्जनदेंभोमात्किंचिदधिकवयस्कंधनिष्ठानक्षत्रयुतायांद्वादश्या मुत्पन्नंकेत्वाख्याग्निवैश्यवर्णकिरीटिनंकर्णि
कारसमद्युतिंभारद्वाजार्षबृहतिछंदस्कंमागधदेशोद्भवंसिंहारूढं चतुर्भुजंगदाखेटधनुर्धरंप्रत्यङ्मुखंपीताबरधरंपीताभरण
भूषितंपीतमाल्यानुलेपनं पीतछत्रपताकोपशोभितंमुकुटकेयूरमणिशोभितं दिव्यंरथमारुह्यमेरुं प्रदक्षिणंकुर्वाणंइशाने
बाणाकारेमंडलेप्रविष्टं बुधंआवाहयामीतिपीताक्षतैरावाहयेत् ॥ ४ ॥ ॐभूर्भुवः स्वर्जनदेंमध्यवयसमुत्तराफाल्गुनी
नक्षत्रयुतायामेकादश्यामुत्पन्नंजठराग्निं द्विजवर्णकिरीटिनंवसिष्टार्षअनुष्टुप्छंदस्कंसिंधुदेशोद्भवंदयारूढंचतुर्भुजैः पुस्तक
दंडाक्षकमंडलुधारिणंकिरीटिनंपीतमानाल्यानुलेपनं पीतांबरधरंपीताभरणभूषितंपीतध्वज छत्रपताकोपशोभितं मुकुटके
यूरमणिशोभितंदिव्यंरथमा रुह्यमेरुंप्रदक्षिणंप्रत्यङ्मुखस्वतुत्तरेदीर्घ चतुरस्रेग्रहमंडलेप्रविष्टं गुरुमावाहयामीतिपीताक्षतैरा
वाहयेत् ॥ ५ ॥ ॐभूर्भुवः स्वर्जनदेंतरुणवयसंपुष्य नक्षत्रयुतायांनवम्यामुत्पन्नं शिख्याग्निब्राह्मणवर्णशौनकार्षपंक्ति
छंदस्कंभोजकटदेशोद्भवंहयारूढंचतुर्भुजैः कमंडलुअक्षसूत्रादिधारिणं श्वेतांबरधरंश्वेताभरण भूषितंश्वेतमाल्यानुलेपनं
श्वेतछत्रध्वजपताको पशोभितंमुकुटकेयूरमणि शोभितंदिव्यंरथमारुह्यमेरुंप्रदक्षिणी कुर्वाणंप्रत्यङ्मुखंपूर्वस्मिन्पंचकोणे
मंडलेप्रविष्टंशुक्रंआवाहयामीतिश्वेताक्षतैरावाहयेत् ॥ ६ ॥ ॐभूर्भुवः स्वर्जनदेंवृद्धवयसंरोहिणी नक्षत्रयुतायामष्टम्या
मुत्पन्नंहाटकाख्याग्निशुद्रवर्णकिरीटिनं इंद्रनीलसमद्युतिंभृग्वार्षगायत्रीछंदस्कंगृध्रेरूढंचतुर्भुजैः शुलबाणधनुर्धरंसौराष्ट्
देशोद्भवंकाश्यपंकृष्णांबरधरंकृष्णा भरणभूषितंकृष्णमाल्यातुलेपनं कृष्णध्यजछत्रपताकोपशोभितं मुकुटकेयूरमणिशो

भितंदिव्यंरथमारुह्यमेरुं प्रदक्षिणंकुर्वाणंधनुष्केप्रत्यङ्मुखं पश्चिमेमंडलेप्रविष्टं शनैश्चरमावाहयामीति कृष्णाक्षतैरा
वाहयेत् ॥ ७ ॥ ॐभूर्भुवः स्वर्जयदेशोद्भवयसंभरणीनक्षत्र युतायांपूर्णिमायांउत्पन्नं महातेजाख्याग्निशूद्रवर्णंकिरीटिन
मांगिरसार्ष अनुष्टुप्छंदस्कंबर्बर देशोद्भवंपैठिन संसिंहारूढंखड्गशूलचर्मधरं कृष्णांबरधरंकृष्णाभरणभूषितंकृष्ण
माल्यानुलेपनं कृष्णध्वजछत्रपताकोपशोभितं मुकुटकेयूरमणिशोभितं दिव्यंरथमारुह्यमेरुंप्रदणिणी कुर्वाणंगृहमध्ये
नैर्ऋत्येशूर्पाकारेमंडलेप्रविष्टंराहुं अवाहहयामीतिकृष्णाक्षतैरावाहयेत् ॥ ८ ॥ ॐभूर्भुवः स्वर्जनदेशोद्भवयसमश्लेषा
युक्तामावाश्वायायामुत्पन्नंहुताशवाख्याग्निन्शूद्रवर्णान् पाशधरानविक्रताननान् किरीटिनोगौतमार्षान्धुम्रानचित्रांबर
धरान्चित्राभरणभूषितान् चित्रमाल्यानुलेपनान्चित्रध्वजछत्रपताकोपशोभितान् मुकुटकेयूरमणि शोभितान्दिव्यंर
थमारुह्यमेरुंप्रदक्षिणीकुर्वाणान् वायव्येध्वजाभेमंडलेप्रत्यङ्मुखप्रविष्टान्केतूनावाहयामीतिकृष्णाक्षतैरावाहयेत् ॥ ९ ॥
एवंॐकारपूर्विकाव्याहृतिमुच्चार्यअधिदेवतां प्रत्यधिदेवतांगणेशादिदेवतां दिक्पालवस्वादिनक्षत्र योगनक्षत्रदेवताः
प्रयक्पृथबाह्यपूजये ॥ एतादिक्यावाह्याः सर्वादेवताः श्वेतपुष्पश्वेताक्षतैरावाह्यपदार्थानुसमये नवाकांडानुसमयेनैवप्रण
वादिनमोंतैः श्चतुर्थ्यंतनाममंत्रैरासनादिपुष्पांतानुपचारान् स्यापवक्रमेणदद्यात् ॥ तद्यथा ॥ ॐसूयार्यनमः आसनं
समर्पयामीत्येवंसोमादिदेवतां श्चएवंपाद्याद्यर्घ्याचमनीयादिनि ॥ अथवस्त्राणि ॥ रक्तंसूर्याय० ॥ श्वेतंसोमाय० ॥ रक्तं
भौमाय० ॥ पीतंबुधाय० ॥ पीतंगुरवे० ॥ श्वेतंशुक्राय० ॥ कृष्णंशनैश्चराय० ॥ कृष्णंराहुकेतुभ्यां० ॥ ततआच
मनीयं ॥ यज्ञोपवीतं ॥ सूर्यभौमाभ्यांरक्तचंदनं ॥ सोमशुक्रभ्यांश्वेतं ॥ काश्मीरयुतचंदनंबुधजीवाभ्यां ॥ शनैश्चराय
कस्तूरिचंदनंएतदेबराहवेकेतवेअगरुसहितंचंदनं ॥ ततश्चंदनरचितवर्णानक्षतान् ॥ सूर्यायरक्तकरवीरपुष्पं ॥ सोमाय
श्वेतकरवीरपुष्पं ॥ भौमायकौसुंभं ॥ बुधायचंपकं ॥ गुरवेशतावरीपुष्पं ॥ शुक्रायजातिपुष्पं ॥ शनिश्चरायशमी
पत्राणि ॥ राहवेऽगत्यपुष्पं ॥ केतवेविचित्रपुष्पं ॥ उक्ताभावेसर्वेषांश्वेतवस्त्रादिदेयं ॥ अधिदेवप्रत्यधिदेवयोरवित
तद्ग्रहचंदनादितदभावेश्वेतैरुपचारैर्वा ॥ दिक्पालादीनांतुश्वेतैरेव ॥ एवंकरणाशक्तेनआदित्यादिस्थापितदेवताभ्यो

नमः आसनंसमर्पयामोतिवाक्य मुच्चार्यपुष्पादिरुपचारार्पणांतंपूजनंविधेयं ॥ ततः कृतांजलिः सूर्यादिस्थापितदेवतानां
पुष्पांतंपूजनंपरिपूर्णमस्तु ॥ ततोवेद्युपरिवितानबंधनं ॥ इदंवितानं बृहस्पतिदैवतंसूर्यादिभ्योनमम इतित्यजेत् ततोग्नेः
पश्चादुपविश्यआघारावाज्यभागांतंकर्मकृत्वा ॥ अथर्वशाखीनांअन्वाधानाभावात् शौनकेनाप्यनुक्तत्वाच्च ॥ प्रतिदैवतं
त्यागः कार्यः ॥ सचबहुकर्तृकहोमेप्रतिदैवतंत्यागाशाक्यत्वात्तंत्रेणैवत्यागः कार्यः ॥ इदंसंपादितंतिलाज्याद्युपकल्पितं
द्रव्यंयायायक्ष्यमाणदेवतास्ताभ्यस्ताभ्यः मयात्यक्तमस्तुनममेतित्यजेत् ॥ ततोप्रधानहोमः ॥ तत्रमयुखकारैः ॥ समि
दाज्यचरूणांचतिलहोमक्रमेणतुद्रत्युक्तंतथा चशिष्टाच ॥ एकैकंगृहंप्रतिअष्टोत्तरसहस्राष्टोत्तर शतंवाअष्टाविंशतिरष्टौवाए
तेषांमध्येएकपक्षंगृहीत्वा सूर्यादीनांहोमःकार्यः ॥ तत्रसमिधः ॥ अर्कः पलाशमधुकवटोंरदुंबएवच ॥ पिप्पलौद्वौततः
प्रोक्तोराद्रोश्चारण्यगोमयं ॥ दर्भांतासमिधश्चैवसूर्यादीनांक्रमात्स्मृताः ॥ अर्कः ॥ खाखरोः ॥ महुडोः ॥ वडः ॥ उमेडोः ॥
पीपलोः ॥ पारसपीपलोः ॥ अडायां ॥ दर्भः ॥ ततोऋत्विगाचार्यादयः प्राङ्मुखोदुङ्मुखाः स्थापनमंत्रैश्चजुहुयुः ॥ अथवा
सूर्यादीनांसूक्तैःसकृत्सकृदवदानैर्जुयुःअत्रउदपात्रेसंपातः ॥ तेषासूक्तान्यग्रेस्पष्टानि ॥ होमांतेलक्ष्मीसूक्तेनहोमः ॥ तद्यथा ॥
अद्येत्यादि० ममग्रहेनंतलक्ष्मीप्राप्तयेलक्ष्मीहोमंकरिष्य इतिसंकल्पंविधाय ॥ तृष्टिकेतिलक्ष्मीसूक्तस्याथर्वाब्रह्मात्रिष्टु
पादिछंदांसिहोमेविनियोगः ॥ ॐतृष्टिकेतृष्टिवंदनउदमुछिंधितृष्टिके ॥ अथाकृतद्विष्टासोममुष्मैशेय्यावते ॥ १ ॥
तृष्टासितृष्टिकाविषाविषातक्यसि ॥ परिवृक्तायथासस्पृषभस्यवशेवं ॥ २ ॥ आतेददेवक्षणाभ्यआतेहंहृदयाददे ॥
आतेमुखस्यसंकाशात्सर्वंतेवर्चआददे ॥ ३ ॥ प्रेतोयंतुव्याध्यः प्रानुध्याः प्रोअशंस्तयः ॥ अग्निरक्षस्वीनींहंतुसोमो
हंतुदुरस्पतीः ॥ ४ ॥ प्रपतेतः पापिलक्ष्मीनश्येतः प्रामुतः पत ॥ अयस्मयेनांकेनद्विषतेत्वासृजामसि ॥ ५ ॥
यामांलक्ष्मीपतयालुरजुष्टाभिचस्कंदवंदनेववृक्षं ॥ अन्यत्रास्मत्संवितस्तामितोधाहिरण्यहस्तोवसुनोरराणः ॥ ६ ॥ एकं
शतंलक्ष्मी मर्त्याश्स्यसाकंतन्वांजनुषोधिजाताः ॥ तासांपापिष्टानिरितः प्रहिण्मः शिवाअस्मभ्यंजातवेदोनियंछ ॥७॥

एताएनाव्याकरं खिलेगाविष्ठिताइव ॥ रमंतांपुण्यालक्ष्मीर्याः पापीस्ताअनीनशं ॥ ८ ॥ नमोरूद्रायच्यवनायचोदनाय
धृष्णवे ॥ नमः शीतायपूर्वकामकृत्वने ॥ ९ ॥ योअन्येद्युरुभयद्युरभ्येतीमंमंडूकमभ्यंत्वव्रतः ॥ १० ॥ आमंद्रैरिंद्रहरि
भिर्याहिमयूररोमभिः ॥ मात्वाकेचिद्वियमन्विनपाशिनोतिधन्वेवतांइहि ॥ ११ ॥ मर्माणितेवर्मणाच्छादयामिसोमस्त्वा
राजामृतेनानुवस्तां ॥ उरोर्वरीयोवरुणस्तेकृणोतुजयंतंत्वानुदेवामदंतु ॥ १२ ॥ एभिः स्वाहाकारांतैर्होमः ॥ सर्वत्र
महालक्ष्म्यैइदंनममेतित्यागः ॥ ततोयजमानेनधूपादिसर्वैरुपचारैः पूजनंकार्यं ॥ ततउक्तनैवेद्यानि ॥ तदभावेपाय
संहविष्यंवा ॥ तंत्रेणसमर्पयेत् ततआचमनीयंताबूलंफलानिदक्षणांशक्तौसत्यांछत्रचामरादिदत्वाप्रणम्यपुष्पांजलिंदत्वा ॥
ततएकस्मिन्पात्रेचंदनाक्षतपुष्पदूर्वानालिकेरंकृत्वा ॥ आदित्यादिग्रहाः सर्वेपीठेयेत्रसमागताः ॥ तेगृह्णतुमयादत्तमिम
मर्घ्यंनमोनमः ॥ आदित्यादिनवग्रहेभ्यः सांगेभ्यः विशेषार्घ्यंसमर्पयामि ॥ ततःकृतांजलिः आयुर्विद्यामितिपठित्वा ॥
आदित्यादिदेवतानांपूजनविधेः परिपूर्णमस्तु ॥ ततोअग्नयेनमइतिअग्निपूजनंकृत्वा ॥ अग्नेः परितोदध्यक्तंमाषभक्तंदश
दिक्षुतथाचग्रहाग्रभागेपात्रेषुमुक्त्वा तत्समीपेएकैकंदीपंचसंस्थाप्य ॥ त्रातारमिंद्रगर्गेंद्रस्त्रिष्टुप् इंद्रप्रीत्यर्थंबलिदानेविनि
योगः ॐत्रातारमिंद्र० ॥ इंद्रायसांगायसपरिवारायसायुधायस शक्तिकायेमंसदीपंमाषभक्तबलिंसमर्पयामी तिप्राच्यां
जलमुत्सृज्यभोइंद्रेमंमाषभक्तबलिंभक्षदिशंरक्षममसकुटुंबस्यायुः कर्त्ताक्षेमकर्त्ताशुभकर्त्ता पुष्टिकर्त्तावरदोभवेतिप्रार्थयेत् ॥
एवंसर्वत्रप्रयोगः ॥ एवमग्नये० ॥ यमाय० ॥ नैऋतये० ॥ वरुणाय० ॥ वायवे० ॥ कुवेराय० ॥ ईशानाय० ॥
ब्रह्मणेपृथिव्यै० ॥ तत्रपृथिव्यांविशेषः ॥ पृथिव्यैसांगायै० भोपृथिवीत्वत्रायुः कर्त्रीक्षेमकर्त्रीतिवदेत् ॥ एवंसूर्यादिनव
ग्रहेभ्यश्च ॥ तत्रायंविशेषः ॥ सूर्यायसांगायईश्वराग्निदेवताप्रत्यधिदेवतासहितायेमं०इति ॥ सोमायउमांबपाधिः स्कंद
भूमिरूपाधि ॥ विष्णुनारायणरूपाधि० ब्रह्मेंद्ररूपाधि० इंद्रेंद्राणिरूपाधि० यमप्रजापतिरूपाधि० कालसर्परूपाधि०
चित्रगुप्तब्रह्मरूपाधि० ॥ एवंगणपतये ॥ क्षेत्रपालायोक्तमंत्रेणबलिंदत्वा ॥ पूर्णाहुतिंजुहुयात् ॥ तद्यथा ॥ स्रुचिस्रुवे

णत्रिर्घृतमादायचतुर्थेनस्रुवेनोपायेन तामापूर्यसप्तनागवल्लीदलनालिके रवस्त्रगंधपुष्पादिनालंकृत्यतिष्ठन्मंत्रैः पूर्णाहुतिं
कुर्यात् ॥ तत्रमंत्राः ॥ वसोर्याधारामितिसूक्तस्याग्निर्गौतमस्त्रिष्टुप्पूर्णाहुतिहोमेविनियोगः ॥ ॐवसोर्याधारामधुनाप्र
पीनाघृतेनमिश्राअमृतस्यनाभयः सर्वास्ताअवरुंधेस्वर्गः षष्ट्यांशरत्सुनिधिपाअभीछात् ॥ १ ॥ निधिंनिधिपाअभ्येन
मिच्छादनीश्वराअभितः संतुयेऽन्ये ॥ अस्माभिर्दत्तोनिहितः स्वर्गस्त्रिभिः कांडैस्त्रीन्स्वर्गानरुक्षत् ॥ २ ॥ अग्निरक्ष
स्तपतुयद्विदेवंक्रव्यात्पिशाचइहमाप्रपास्त ॥ नुदामएनमपरुध्मोअस्मदादित्याएनमंगिरसः सचंताम् ॥ ३ ॥ आदि
त्येभ्योअंगिरोभ्योमध्विदंघृतेनमिश्रंप्रतिवेदयामि ॥ शुद्धहस्तौब्राह्मणस्यानिहत्यैतंस्वर्गंसुकृतावपीतम् ॥ ४ ॥ इदं
प्रापमुत्तमंकांडमस्ययस्माल्लोकात्परमेष्ठिसमाप ॥ आसिंचसर्पिर्घृतवत्समंड्ध्येषभागोअंगिरसोनोअत्र ॥ ५ ॥ सत्या
यचतपसेदेवताभ्योनिधिंशेवधिपरिदद्मएतं मानोद्यूतेवगान्मासमित्यामास्मान्यस्माउत्सृजतापुरामत ॥ ८ ॥ अहं
पचाम्यहंददामिममेदुकर्मनकरुणेधिजाया ॥ कौमारोलोकोअजनिष्टपुत्रोऽन्वारभेथांवयउत्तरावत् ॥ ७ ॥ नकिल्बि
षमत्रनाधारोअस्तिनयन्मित्रैः सममममानएति ॥ अनूनंपात्रंनिहितंनएतत्पक्तारंपक्वः पुनराविशाति ॥ ८ ॥ प्रियंप्रिया
णांकृणवामतमस्तेयंतुयतमेद्विषंति ॥ धेनुरनड्वान्वयोवयआयदेवपौरुषेयमपमृत्युंनुदंतु ॥ १ ॥ समग्नयोविदुरन्योअ
न्यंओषधीसचंतेयश्चसिंधून ॥ यावंतोदेवादिव्यातपंतिहिरण्यंज्योतिः पचंतोबभूवस्वाहा ॥ १० ॥ इदमग्नयइदंनम
मेतियजमानस्त्यजेत् ॥ ततआचार्योस्विष्टकृदादिउत्तरतंत्रंसमापयेत् ॥ ततोयजमानोदक्षिणांदद्यात् ॥ अत्रकेचिच्छ्रेयः
संपादनंकुर्वंतितन्निर्मूलमितिभट्टाः ॥ अग्नेः पश्चात्प्राङ्मुखमाचार्यमुपवेश्यगंधादिनासंपूज्य ॥ अस्यग्रहमखाख्यकर्मणः
समृध्यर्थमिमांधेनूंश्रीसूर्यप्रीतयेतुभ्यमाचार्यायाहंसंप्रददे ॥ कपिलेसर्वदेवानां पूजनीजासिरोहिणी ॥ सर्वदेवमयीय
स्मदतः शांतिंप्रयच्छमे ॥ इत्याचार्यायदत्वाऋत्विग्भ्योदद्यात् ॥ आचार्यादयः प्रणवेनप्रतिगृह्णीयुः ॥ अस्य० ॥ इमं

शंखंसोमप्रीतयेऋजिजेतुभ्यं० ॥ पुण्यस्त्वंशंखदेवानांममलानांचमंगलं ॥ विष्णुनाभिधृतोनित्यमतःशांतिंप्रयच्छमे ॥ २ ॥ इममनड्वाहंभौमप्रीतये० ॥ धर्मस्त्वंवृषरूपेणजगदानंदकारकः ॥ अष्टमूर्त्तेरधिष्टानमतः शांतिंप्रयच्छमे ॥ ३ ॥ इदंहेमंबुधप्रीतये० ॥ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः अनंतपुण्यफलदमतः यांतिंप्रयच्छये ॥४ ॥ इदंपीतवस्त्रद्वयंबृहस्पतीप्रीतये० ॥ पीतवस्त्रयुगंयस्माद्वासुदेवस्यवल्लभं ॥ प्रधानंतस्यतद्विष्णोरतः शांतिंप्रयच्छमे ॥ ५ ॥ इममश्वंशुक्रप्रीतये० कपिलोअश्वरूपेणयस्मादमृतसंभवः ॥ चंद्रार्कवाहनोनित्यमतः शांतिंप्रयच्छमे ॥ ६ ॥ इमांकृष्णांगांशनिप्रतये० ॥ यस्मात्वंपृथिवीसर्वाधेनुकेकृष्णसंभवा ॥ सर्वपापहरानित्यमत्तः शांतिंप्रयच्छमे ॥ ७ ॥ इमंलोहंराहुप्रीतये० ॥ यस्मादायसकर्माणितवाधीनानिसर्वदा ॥ लांगुलांदीन्यायुधानित्यतः शांतिंप्रयच्छमे ॥ ८ ॥ इमंच्छागंकेतुप्रीतये० ॥ यस्मात्वंछागयज्ञानामंगत्वेनव्यवस्थितः ॥ योनिर्विभावसोनित्यमतः शांतिंप्रयच्छमे ॥ ९ ॥ एषामर्थानांविषममूल्यत्वेपिसुवर्णेनसाम्यंसंपादनीयं ॥ उक्तदक्षिणाभावेसर्वेषांसुवर्णंदद्यात् ॥ अस्य०यथोत्साहांभूयसींदक्षिणांविप्रेभ्योदातुमहमुत्सृजे ॥ ततोगृहवेदीपूर्वेसस्त्रीकंसपरिवारंयजमान मुपवेश्यरुद्रकलशजलंगृहीत्वाआचार्यादयः वेदोक्तैः पौराणैर्वामंत्रैश्चाभिशेकंकुर्युः॥ हिरण्यवणासूक्तं ॥ आपोहिष्टासूक्तम् ॥ आदित्यश्चंद्रमाभौमोबुधोजीवसितोर्कजः॥ ग्रहास्त्वामभिषिंचंतुराहुकेतुश्चपूजिताः ॥ सर्वेसमुद्राःसरितः सरांसिसजलानिच ॥ आयांतुयजमानस्यदुरितक्षयकारकाःसंवत्सरायनामासातिथिवारश्चनाडिकाः ॥ मूहूर्त्तान्यभिषिंचंतुनक्षत्राणिदिवानिशं ॥ अमृताभिशेकोस्तु ॥ ततोयजमानोन्यत्वस्त्रपरिधायसाज्येकांस्यपात्रेरूपंरूपमितिसपरिवारः स्वप्रतिरूपंप्रेक्ष्य ॥ आज्यंतेजसमुदिष्टमा ज्यंपापहरंपरं ॥ आज्यंसुराणामाहारः आज्येलोकाप्रतिष्टिताः ॥ दिव्यभूम्यंतरिक्षस्थंयन्मेकिल्बिषमागतंतत्सर्वमाज्यसंस्पर्शात्प्रणाशमुपगच्छतु ॥ सौर्यंकांस्यपात्रंसाज्यदक्षिणंअदोगोत्राय० देतिदत्वा ॥ यथाशक्तिब्राह्मणभोजनसंकल्पः ॥ ततः स्थापितान्देवान्गंधादिनासंपूज्य ॥ तेभ्यः पुष्पांजलिंसमर्प्य ॥ सुतासोमध्वीत्यथर्वांगिराब्रह्मात्रिष्टुप्विसर्जनेविनियोग ः ॥ ॐसुतासोमधुमत्तमासोमाइंद्रायमंदिनः ॥ पवित्रवंतोअक्षतरंदेवान्गछंतुवोमदाः ॥ यांतुदेवगणाः सर्वेपूजामादायपार्थिवीम् ॥ इष्ट

कामसमृध्यर्थंपुनरागमनायचेतिपुष्पाक्षतैस्तान्विसर्जयेत् ॥ ततोयजमानः प्रतिमादिसर्वद्रव्यमाचार्यायदत्वाविप्रेभ्योमंत्राक्षतान्गृहीत्वातान्प्रणम्य ॥ ततः शांताद्यौरितिशांतिसूक्तंपठित्वा यस्मात्क्षोशेतिमंत्रेणकृतंकर्मेश्वरार्पणंकुयात् ॥ श्रीयज्ञनारायणायनमः ॥ शुभंभवतु ॥ उत्तरकर्मण्यविघ्नमस्तु ॥ ॥ श्री ॥इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौषट्पन्नागरद्विवेदिश्रोरजरामौरसरविशंकरकृतेसनिर्णयगृहयज्ञप्रयोरश्मिर्विंशः ॥ २० ॥

श्रीकृष्णार्पणमस्तु ॥ अथसर्वविघ्ननिवृत्तिकामोयजमानो विनायकप्रीतयेशौनकोक्तप्रकारेणतच्छांतिंकुर्यात् ॥ तत्रादौतत्कर्मोपयोगिनिर्णयमाह ॥ ॥ अथवैनायकीशांतिः ॥ विघ्नप्रत्यूहबालार्कोबालार्कसदृशछविः ॥ शिवेतराणांतनुतांतनुतागणनायकः ॥ याज्ञवल्क्यः ॥ एवंविनायकंपूज्यग्रहांश्चैवविशेषतः ॥ कर्मणांफलमाप्नोतिश्रियंचाप्यत्तनुत्तमितिबृहत्पराशरः ॥ चतुर्थ्यांशुक्लपक्षेतुश्रवणेचोत्तरेतथा ॥ पुण्यार्थंसर्वसिध्यर्थंकुर्याच्छांतिंविनायकिमिति ॥ नक्षत्राणिविष्णुधर्मोत्तरे ॥ इमांशांतिंप्रकुत्यहस्तपुष्याश्वयुक्सौम्येवैष्णवान्यतमेसुभे ॥ नक्षत्रेचमूहूर्त्तेचमैत्रेवाब्राह्मदैवतइति ॥ शुक्लपक्षेचतुर्थ्यांचवासरे धिष्येणस्यचतिचबोरनक्षत्रतस्यैवपुरतोनृपेति ॥ एतच्छ्रिकामस्यविनायकस्नपनविविषयमित्यपरार्कः ॥ उपसृष्टस्यतुपुण्याहेएवविधानम् ॥ उपसृष्टस्यविलंबायोगात् ॥ अत्रोपकल्पनश्लोकामहार्णवे ॥ अथोच्यंतेऽत्रसंभारारोचनापंचमृत्तिकाः ॥ अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात् ॥ चंदनागरुकस्तूरिकर्पूराद्यासुगंधयः ॥ गौरसर्षपकल्कस्तूगव्यांज्येनविमिश्रितः ॥ गुग्गुलुश्चापिसंशुद्धः सर्वौषधिगणस्तथा ॥ चत्वारः कलशाएकवर्णाश्चास्फुटिताव्रणाः ॥ ह्रदोदकयुताश्चापिनिम्नगासंगमोदकाः ॥ सग्रीवायुद्धमारक्तंचर्मचानडुहंतथा ॥ श्रीपर्णीकाष्ठपीठंचसहकारस्यपल्लवाः ॥ अश्वत्थपल्लवावास्युसुगंधिसुमनांस्यपि ॥ स्रजः शोभनगंधाश्चविचित्रकुसुमानिच ॥ कलशावेष्टनार्थंचनववस्त्रचतुष्टयम् ॥ पीठस्याच्छादनार्थंतु शुभ्रवस्त्रमथापरं ॥ गणेशांबिकयोरर्थे वस्त्रयुग्मंसुशोभनं ॥ आचार्यदक्षिणार्थंतुमहार्हवसनद्वयं ॥ पंचवर्णानिपिष्टानि स्वस्तिकस्यविनिर्मितैः ॥ तैलंचसार्षपंतद्वदुदुंबरविनिर्मितः ॥ स्रुवः कुशाश्चरुस्थालिपाकार्थंतंदुलाःशुभाः ॥ किंचिद्धृतिक्रियाकूलृप्तास्तंदुलाश्चापरेतथा ॥

तिलपिष्टेनसंयुक्तओदनः पूर्वमेवच ॥ पक्वाश्चमत्स्याश्चापक्वामोसंपक्वमकककमू ॥ गौडीपैष्टीचमाध्वीचेत्येवंवैत्रिवधाः
सुराः ॥ मत्स्यादिकंसुरांतंचनिषिद्धंयच्चयस्यतत् ॥ नग्राह्यंतुविशेषेणद्विजैस्त्याज्याः सुरास्तथा ॥ यजमान
स्तुशूद्रश्चेत्तद्विजैस्तानियोजयेत् ॥ मत्यक्षमुलकंवास्यादुतभक्षस्तदाकृतिः ॥ अपूपापूरिकाश्चैवतथैवोंडेरकस्त्रजः
दध्यन्नंपायसंचैवपिष्टंचगुडमिश्रि।म् ॥ लड्डुकाश्चतथादुर्वासर्षपागौरसंज्ञिताः ॥ गणेशप्रतिमाचैवगौर्याश्चप्रतिमांतथा ॥
एवंसंभृतसंभारः शांतिंकुर्याच्छुभेदिनइति ॥ ॥ अथप्रयोगः ॥ सपत्नीकोयजमानः प्रातर्नित्यकृत्यं विधाउक्त
विधि नागणेशांबिकेपूजयित्वावैश्वदेवंविधाय मातृयजनपूर्वकमाभ्यु दयिकंस्वस्तिवाचनं शांत्युदकंचकृत्वाउपकरणा
निसंपाद्यशुचौदेशेप्राङ्मुख उपविश्यजीवास्थेतिमंत्रेण विधिवदाचम्य ब्रह्मजज्ञान मितिपठित्वाअव्वसश्चेति
चत्यमुसुवाजिनमितिमांगल्यतिलक करणपूर्वकंस्वस्त्ययनंविधायसु मुखश्चेत्कादिपठित्वासंकल्पादिकुयात् ॥ तद्यथा ॥
देशकालौस्मृत्वादः कर्मणोविर्विघ्नसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थविनायकशांतिंकरिष्यइति ॥ उपसृष्टेतुउपसर्गनिवृत्ति
द्वाराश्रीपरमेश्वरप्रीतयेशांतिंकरिष्यइतिवदेत् ॥ तदंगभूतमाचार्यांश्चृत्विजामर्धदानपूर्वक पादप्रक्षालनमर्चनंवरणंचाहं
करिष्यइतिसंकल्प्याचार्यस्य चतुर्णामृत्विजांचपादप्रक्षालनादिवरणांतं ग्रहमखोक्तप्रकारेणकृत्वाऽस्ययागस्येतिप्रार्थनां
तेउक्तप्रकारेणपंचगव्यंसंपाद्यकर्मभूमिमुक्तमंत्रैः प्रोक्षेत् ॥ अत्रऋत्विजोनसंतीतिकेचित् तत्पक्षेआचार्यएववक्ष्यमाणसूक्त
जपादिकंकुर्यात् ॥ ततआचार्यः प्रतिमयोरग्न्युत्तारणंकुर्यात् ॥ तद्यथाग्रहस्थापनोक्त प्रकारेणाग्न्युत्तारणं विधायान्यदेशे
प्रतिमांस्थाप्यततोमध्यदेशेशुचौसुलिप्तेस्थंडिलेपंचवर्णैः पिष्टैः सुधयावास्वस्तिकंविधायतस्मिन्प्राचीन ग्रीवमुत्तरलोमा
नुडुहंरक्तमरक्तमपिचर्मास्तीर्यतत्रश्रीपर्णीपीठंविधायतद्वस्त्रेणाच्छादयेत् ॥ तद्भद्रासनं ॥ भद्रंमनोरमन्मासनमित्यर्थः ॥
तस्मात्पूर्वादिक्रमेणचतसृषुदिक्षुस्वस्तिकानिकुर्यात् ॥ ततस्तत्प्राग्देशेकुंडंस्थंडिलंवा विधायतत्रभूसंस्कारादिप्रणिताप्रणय
नांतंकुर्यात् ॥ ततः पात्रासादनं ॥ तत्रस्थालीपाकवत्सर्व मासाद्यमहार्णवोक्तान्वैशेषिकान वक्ष्यमाणान्पदार्थानासा
दयेत्ततोदक्षिणंजान्वाच्यपरिस्तीर्यततोहविर्ग्रहणं ॥ मितायसंमितायशालायकटंकटायकूष्मां डायराजपुत्रायजुष्टंगृह्णा

मीति ॥ अप्रथग्देवताइतिमिताक्षरायां ॥ अपरार्कमतेशालकटंकटायकूष्णांडराजपुत्रायेतिसमासांगीकारेणचतस्रइति ॥
तथापरार्कमतेगणेशांबिकयोः स्थापनानंतरंव्योमकेशादिपंचदशदेवतानांस्थापनम् ॥ तासांहोमोऽपिभवतीकेचित् ॥
नेत्यपरे ॥ होमपक्षेराजपुत्रायेत्यनंतरंव्योमकेशायेत्यादि वक्ष्यमाणपंचदशदेवतानामाचर्थ्यतानुच्चार्य जुष्टंगृह्णाणीत्ती
गृह्णीयात् ॥ ततोहविरासादनाद्यधिश्रयणांतंकर्म ॥ ततोभद्रासनस्योपरितः कृतेषुचतुर्षुस्वस्तिकेषु पूर्वादिक्रमेणचतसृषु
दिक्षुचतुरः कलशान्स्वस्तिवाचनोक्तरीत्यापदार्थानुसमयेन कांडानुसमयेनवास्थापयेदाचार्यः ॥ ऋत्विजोवैकैकंतत्ररो
चनांगुग्गुलंवैशेषिकंप्रक्षिपेत् ॥ ततऋत्विजस्सूक्तपाठंकुर्युः तत्रग्रहशांतिप्रकरणोक्तंतुष्टिकेतुष्टिवंदनमितिलक्ष्मीसूक्तंपूर्वकल
शेपठेत् ॥ ततोदक्षिणकलशेवरुणसूक्तमाह ॥ अंबयोयंतीत्याद्यपांसूक्तगणमंत्राणां सिंधुद्वीपोथर्वाशांतातिभृगुःशुनःशेफा
ऋषयः सोमापश्चंद्रमावरुणसिंधवोनानामंत्रोक्तादेवताःगायत्र्युनुष्टुप् बृहतीपंक्तीत्रिष्टुब्जगतीबृहत्यःछंदांसिमंत्रसूक्तजपे
विनियोगः ॥ ॐअंबयोयंत्यध्वभिर्जामयोअध्वरीयतां ॥ पृंचतीर्मधुनापयः ॥ १ ॥ अमूर्याउपसूर्येयाभिर्वासूर्यः सह ॥
तानोहिन्वंत्वध्वरम् ॥ २ ॥ अपोदेवीरुपह्वयेयत्रगावः पिबंतिनः ॥ सिंधुभ्यः कर्त्वंहविः ॥ ३॥ अप्स्वंऽतरमृतमप्सु
भेषजं ॥ अपामुतप्रशस्तिभिरश्वाभवथवाजिनोगावोभवथवाजिनीः ॥ ४ ॥ आपोहिष्ठामयोभुवस्तानऊर्जेदधातनः ॥
महेरणायचक्षसे ॥ १ ॥ योवः शिवतमोरसस्तस्यभाजयतेहनः ॥ उषतीरिवमातरः ॥ २ ॥ तस्माअरंगमामवोयस्यक्ष
यायजिन्वथ ॥ आपोजनयथाचनः ॥ ३ ॥ ईशानावार्याणांक्षयंतीश्चर्षणीनाम् ॥ अपोयाचामिभेषजं ॥ ४ ॥
शन्नोदेवीरभिष्टयआपोभवंतुपीतये ॥ शंयोरभिस्रवंतुनः ॥ ५ ॥ अप्सुमेसोमोअब्रवीदंतर्विश्वानिभेषजा ॥ अग्निं
चविश्वशंभुवं ॥ ६ ॥ आपपृणीतभेषजंवरूथतन्वे३मम ॥ ज्योक्चसूर्यंदृशे ॥ ७ ॥ शन्नआपोधन्वन्याः३शमुसंत्वनूप्याः ॥
शंनः खनित्रिमाआपः शमुयाः कुंभआभृताः शिवानः संतुवार्षिकीः ॥ ८ ॥ ॥ हिरण्यवर्णाः शुचयः पावकाया

सुजातसवितायास्वग्निः ॥ याअग्निंगर्भंदधिरेसुवर्णास्तानआपः शंस्योनाभवंतु ॥ १ ॥ यासांराजावरुणोयातिमध्ये सत्यानृतेअवपश्यंजनानां ॥ याअग्निंगर्भंदधिरेसुवर्णास्तानआपः शंस्योनाभवंतु ॥ २ ॥ यासांदेवादिविकृण्वंतिभक्षं याअंतरिक्षेबहुधाभवंति ॥ याअग्निंगर्भंदधिरेसुवर्णास्तानआपः शंस्योनाभवंतु ॥ ३ ॥ शिवेनमाचक्षुषापश्यतापः शिवयातन्वोपस्पृशतत्वचंमे ॥ घृतश्चुतः शुचयोयाः पावकास्तानआपः संश्योनाभवंतु ॥ ४ ॥ यददः संप्रयतीरहावनदताहते ॥ तस्मादानद्यो३नामस्थतावोनामानिसिंधवः ॥ १ ॥ यत्प्रेषितावरुणेनच्छीभंसमवलात्त ॥ तथाप्नोदिंद्रोवोयतीस्तस्मादापोअनुष्ठन ॥ २ ॥ अपकामंस्यंदमानाअवीवरतवोहिकं ॥ इंद्रोवःशक्तिभिर्देवीस्तस्माद्वार्नामवोहितम् ॥ एकोवादेवोप्यतिष्ठत्स्यंदमानायथावशं ॥ उदानिषुर्महीरितिस्तस्मादुदकमुच्यते ॥ ४ ॥ आपोभद्राघृतमिदापआसन्नग्नीषोमौबिभ्रत्यापइत्ताः ॥ तीव्रोरसोमधुपृचामरंगमआमाप्राणेनसहवर्चसागमेत् ॥ ५ ॥ आदित्पश्याम्युतवाशृणोम्यामद्योषोगच्छतिवाङ्मासां ॥ मन्येभेजानोअमृतस्यतर्हिहिरण्यवर्णाअतृपंयदावः ॥ ६ ॥ इदंवआपोहृदयमयंवत्सऋतावरीः ॥ इहेत्थमेतशक्वरीर्यत्रेदंवेशयामिवः ॥ ७ ॥ पुनंतुमादेजनाः पुनंतुमनवोधिया ॥ पुनंतुविश्वाभूतानिपवमानः पुनातुमाम् ॥ ८ ॥ पवमानः पुनातुमाक्रत्वेदक्षायजीवसे ॥ अथोअरिष्टतातये ॥ २ ॥ उभाभ्यांदेवसवितः पवित्रेणसवेनच ॥ अस्मान्पुनीहेचक्षसे ॥ ३ ॥ वायोः पूतः पवित्रेणप्रत्यङ्सोमोअतिद्रुतः ॥ इंद्रस्ययुज्यः सखा ॥ ४ ॥ आपोअस्मान्मातरः सूदयंतुघृतेननोघृतप्वः पुनंतु ॥ विश्वंहिरिप्रंप्रवहंतिदेवीरुदिदाभ्यः शुचिरापूतएमि ॥ २ ॥ यत्किंचेदंवरुणदैव्येजनेभिद्रोहंमनुष्या३श्चरंती ॥ अचित्त्याचेत्तवधर्मायुयोपिममानस्तस्मादेनसोदेवरीरिषः ॥ ३ ॥ वैश्वानरोरश्मिभिर्नः पुनातुवातः प्राणेनेषिरोनभोभिः ॥ द्यावापृथिवीपयसापयस्वतीऋतावरियज्ञियेनः पुनीताम् ॥ १ ॥

वैश्वानरींसूनृतामारभध्वंयस्याआशास्तन्वोवीतपृष्ठाः ॥ तयागृणंतः सधमादेषुवयंस्यामपतयोरयीणाम् ॥ २ ॥ वैश्वानरींवर्चसआरभध्वंशुद्धाभवंतः शुचयः पावकाः ॥ इहेडयासधमादंमदंतोज्योक्पश्येमसूर्यमुच्चरंतम् ॥ ३ ॥ अप्सुतेराजन्वरुणगृहोहिरण्ययोमिथः ॥ ततोधृतव्रतोराजासर्वाधामानिमुंचतु ॥ १ ॥ धाम्नोधाम्नोराजन्नितोवरुणमुंचनः ॥ यदापोअघ्न्याइतिवरुणेतियदूचिमततोवरुणमुंचनः ॥ उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमंश्रथाय ॥ अथावयमादित्यव्रतेतवानागसोअदितयेस्याम ॥ ३ ॥ प्रास्मत्पाशान्वरुणमुंचसर्वान्यउत्तमाअधमावारुणाये ॥ दुष्वप्न्यंदुरितंनिश्वास्मदथगच्छेमसुकृतस्यलोकम् ॥ ४ ॥ इतिवरुणसूक्तम् ॥ ततोपश्चिमेसूर्यसूक्तं.पठेत् ॥ तद्यथा ॥ ॐउदस्यकेतवोदिविशुक्राभ्राजंतईरते ॥ आदित्यस्यनृचक्षसोमहीव्रतस्यमीढुषः ॥ १ ॥ दिशांप्रज्ञानंस्वरयंतमर्चिषासुपक्षमशुंपतयंतमर्णवे ॥ स्तवामसूर्यंभुवनस्यगोपांयोरश्मिभिर्दिशआभातिसर्वाः ॥ २ ॥ यत्प्राङ्प्रत्यङ्स्वधयायासिशीभंनानारूपेअहनिकर्षिमायया ॥ तदादित्यमहितत्तमहिश्रवोयदेकोविश्वंभूरिभूमजायसे ॥ ३ ॥ विपश्चितंतरणिंभ्राजमानंवहंतियंहरितः सप्तबह्वीः ॥ स्रुताद्यमत्रिर्दिवमुन्निनायतंत्वापश्यंतिपरियांतमाजिं ॥ ४ ॥ मात्वादभन्परियांतमाजिंस्वस्तिदुर्गाअतियाहिशिभं ॥ दिवंचसूर्यपृथिवींचदेवीमहोरात्रेविमिमानोयदेषि ॥ ५ ॥ स्वस्तितेसूर्यचरशेरथाययेनाभावंतौपरियासिसव्यः ॥ यंतेवहंतिहरितोवहिष्ठाः शतमश्वायदिवासप्तबह्वीः ॥ ६ ॥ सुखंसूर्यरथमंशुमंतंस्योनंसुवन्हिमधितिष्ठवाजिनं ॥ यंतेवहंतिहरितोवहिष्ठाशतमश्वायदिवासप्तबह्वीः ॥ ७ ॥ सप्तसूर्योहरितोयातवेरथेहिरण्यत्वचसोबृहतीरयुक्त ॥ अमोचिशुक्रोरजसः परस्ताद्विधूयदेवस्तमोदिवमारुहत् ॥ ८ ॥ उत्केतुनाबृहतादेवआगन्नपावृक्तमोभीज्योतिरश्रैत ॥ दिव्यः सुपर्णः सुवीरोव्यख्यददितेः पुत्रोभुवनानिविश्वा ॥ ९ ॥ उद्यन्रश्मीनातनुषेविश्वारूपाणिपुष्यसि ॥ उभासमुद्रौक्रतुना

विभासिसर्वांल्लोकान्परिभूर्भ्राजंजानः ॥ १० ॥ इतिसूर्यसूक्तम् ॥ ततः उत्तरकलशेकयानश्चित्रेतिवामदेवीसूक्तमापठे
युराचार्याः ॥ तद्यथा ॥ ॐकयांनश्चित्रआभुवदूतीसदावृधः सखा ॥ कयाशचिष्ठयावृता ॥ १ ॥ कस्त्वासत्योमदानां
मंहिष्ठोमत्सदंधसः ॥ दृल्हाचिदारुजेवसु ॥ २ ॥ अभीषुणः सखीनामविताजरित्रेणाम् ॥ शतंभवास्यूतिभिः ॥ ३ ॥
इमानुकंभुवनासीषधामहत्वायदेवाअसुरान्यदायन्निति द्विपदासूक्तौ ॥ तौतुषातुरोणे ॥ ४ ॥ इतिवामदेवीसूक्तम् ॥
ततस्त्यमूषुवाजिनमितिस्वस्त्ययनसूक्तंपठेयुः ॥ ततआचार्योहोमार्थस्थंदिलादीशान्यां वेद्यांपोठेवाप्रतिमाद्वयेविनायकां
बिकेवक्ष्यमाणमंत्राभ्यांसंस्थाप्य तदस्त्वितिप्रतिष्ठापयेत्ततो यजमानआवाहनादिनैवेद्यांतैरुपचारैः संपूजयेत् ॥ तत्र
मंत्रौ ॥ ॐतत्पुरुषायविद्महेवक्रतुंडायधीमहि ॥ तन्नोदंतीप्रचोदयात् ॥ १ ॥ ॐसुभगायैविद्महेकाममाल्यैधिमहि ॥
तन्नोगौरीप्रचोदयात् ॥ २ ॥ अपरार्कहेमाद्रिमतेप्रतिमयोरुत्तरतोनाममंत्रैरन्याःपंचदशदेवताः संस्थाप्यप्रतिष्ठापयेत् ॥
चतुर्थ्यंतंनामोच्चार्यव्योमकेशंस्थापयामीत्यादिद्वितीयांतेनावाह्यचतुर्थ्यंतेनपूजयेत् ॥ तत्रमंत्राः ॥ व्योमकेशायनमः ॥
१ ॥ पार्वत्यैनमः ॥ २ ॥ भीमजाय० ॥ ३ ॥ कृष्णस्यपित्रे० ॥ ४ ॥ अर्काय० ॥ ५ ॥ आराय० ॥ ६ ॥ मिताय० ॥
७ ॥ धिषणाय० ॥ ८ ॥ क्लेदपुत्राय० ॥ ९ ॥ कोणाय० ॥ १० ॥ लक्ष्मीवते० ॥ ११ विधुंतुदाय० ॥ १२ ॥
केतवे० ॥ १३ ॥ बाहुलेयाय ॥ १४ ॥ नंदकस्यधारिणे० ॥ १५ ॥ ततः श्रुताभिधारणाद्याज्यभागांतंकुर्यात् ॥
तत्रयथादैवतंयजमानस्यत्यागः ॥ ततोगव्याज्यलोलोकृतेनसिद्धार्थपिष्टेनोद्वर्तितांगस्य सर्वौषधिभिः सर्वगंधैश्चविलिप्त
शिरसोयजमानस्यमंगलवेदघोषेण सहवस्त्राच्छादितभद्रासनोपर्याचार्येणोपवेशनंकार्यमितिमिताक्षरादौ ॥ मदनरत्नेतूपवे
शनोत्तरमुद्वर्तनादिकार्यमित्युक्तं ॥ सर्वौषधानिप्रियंगुनागकेसरादीनिइतिमिताक्षरायाम् ॥ कर्मप्रदीपेतुकुष्ठंमांसीहरिद्रे
द्वेमुराशैलेयचंदनं ॥ बचाचंपकमुस्तेचसर्वौषध्योदशस्मृताइति ॥ अपरार्केवृद्धवसिष्ठः ॥ बालाचशंखपुष्पीचकुष्ठंचैवबचा
तथा ॥ नागकेसरचूर्णंतुसर्वौषधिगणोभवेदिति ॥ सर्वगंधामदनरत्ने ॥ कर्पूरागरुकंदर्पः कुंकुमंचंदनंनतथा ॥ जाति

फलमितिप्रोक्तासर्वगंधासदाबुधैरिति ॥ हेमाद्रौगारुडे ॥ कर्पूरंचंदनः दर्पः कुंकुमंचसमासकं ॥ सर्वगंधमितिप्रोक्तंस
मस्तसुरवल्लभमिति ॥ तत्रोभद्रासनोपविष्टोयजमानः

पूर्वोक्तप्रकारेणऋत्विग्भिः सहस्वस्तिवाचनंकुर्यात् ॥ ततआचार्योयजमानंदक्षिणतउदङ्मुखस्तिष्ठ नृत्विक्कुंदत्त
पूर्वादिकलशत्रयेणैकैकमंत्रेणस्नपयेत् ॥ सहस्राक्षंशतधारमृषिभिः पावनंकृतं ॥ तेनेत्वामभिषिंचामिपावमान्यः पुनंतुते ॥
भगंतेवरुणोराजाभगंसूर्योबृहस्पतिः ॥ भगमिंद्रश्चवायुश्चभगंसप्तर्षयोददुः ॥ यत्तेकेशेषुदौर्भाग्यंसीमंतेयश्चमूर्द्धनि ॥ ललाटे
कर्णयोरक्ष्णोरापस्तत्त्रतुसर्वदा ॥ उत्तरकलशेमंत्रत्रयमुच्चार्यइतिहेमाद्रिमहार्णवमिताक्षरायाम् ॥ अपरार्केतुप्रतिकलशंमंत्र
त्रयावृत्तिरिति ॥ ततश्चतुर्मिलितैः कलशैरृत्विग्धृतैबृहत्पराशरोक्तैर्मंत्रैरभिशेकंकारयेत् ॥ मंत्रान्स्त्वयंपठेदाचार्यः ॥
एतद्वैपावनंस्नानंसहस्राक्षमितिस्मृतं ॥ तेनत्वाशतधारेणपावमान्यः पुनंत्विमाः ॥ शक्रादिदशदिक्पालाः ब्रह्मेशाके
शवादयः ॥ आपस्तेघ्नंतुदौर्भाग्यंशांतियच्छंतुसर्वदा ॥ सुमित्रियानआनआपओषधयः संतुदुर्मित्रियास्तस्मैसंतुयोस्मा
न्द्वेष्टियंचवयंद्विष्मः ॥ समुद्रागिरयोनद्योमुनयश्चपतिव्रताः ॥ दौर्भाग्यंघ्नंतुतेसर्वेशांतियच्छंतुसर्वदा ॥ पादगुल्फोरुजं
घादौनितंबोदरनाभिषु ॥ स्तनोरोबाहुहस्ताग्रग्रीवाअंसांगसंधिषु ॥ नासाललाटकर्णभ्रूकेशांतेषुचयत्स्थितं ॥ त्वदी
यंघ्नंतुदौर्भाग्यंशांतियच्छंतुसर्वदेति ॥ ततआचार्यउपविश्यसव्यपाणिगृहीत कुशत्रयांतर्हितेयजमानमूर्द्धन्यौदुंबरेणश्रुवेण
सार्षपंतैलंजुहुयात् । पश्चिमतस्तिष्ठन्जुहुयादितिमयूखे ॥ उपविश्यजुहुयादित्यन्ये ॥ ॐमितायस्वाहा० ॥ ॐसंमिताय
स्वाहा० ॥ ॐशालाय० ॥ ॐकटंकटाय० ॥ ॐकूष्मांडाय० ॥ ॐराजपुत्राय० ॥ यथामंत्रलिंगंयजमानस्त्यागान्
कुर्यात् ॥ अपरार्कमतेआहुतेश्चतुष्टयंपूर्वोक्तप्रकारेण ॥ ततएभिरेवमंत्रैरवदानधर्मेणचरुहोमः ॥ व्योमकेशादीनांहोम
पक्षेव्योमकेशायस्वाहेत्येवंपंचदशाहुतयउदपात्रेऽत्रसंपातश्च ॥ यजमानोपियथामंत्रलिंगंत्यजेत् ॥ ततोयजमानः सुस्नातः
शुक्लानुलेपनमाल्यांबरधरआचार्यसहितः स्थापितदेवतानांयथाविभवंपूजांकृत्वास्तीर्ण कुशेनूतनवंशशूर्पेनिहितमुपहारं
विनायकगायत्र्याविनायकायैनमुपहारंनिवेदयामीत्यंतयाविनायकायनिवेदयेत् ॥ उपहारायथासकृद्व्रहतास्तंदुला ॥

१ ॥ तिलपिष्टओदनः अपक्वमांसमिश्रओदनइतिमयूखे ॥ मत्स्यापक्कास्त्वपक्वाश्चमांसविकारास्तदाकारावा ॥ ३ ॥ पक्व
मपक्वमांसंमाषविकारंवा ॥ ४ ॥ पुष्पंचित्रंरक्तपीतादिनानावर्णं ॥ ५ ॥ चंदनादिसुगंधिद्रव्यं ॥ ६ ॥ त्रिविधासुरागौडी
माध्वीपैष्टीच ॥ गुडमधुपिष्टमिश्राणिससैंधवानिपात्र त्रयस्थितानिक्षीराणिवा ॥ ७ ॥ मूलकंकंदाकारोभक्ष्यविशेष
इतिमिताक्षरायाम् ॥ स्वरूपतएवग्राह्यमितिशांतितिमयूखे ॥ ८ ॥ पूरिकाअपूपास्नेहपक्वोगोधूमविकारः ॥ १० ॥
उंडेरकस्रजः उंडेरकाः पिष्टादिमथस्ताः प्रोतास्रजः ॥ ११ ॥ दध्योदनः ॥ १२ ॥ पायसं ॥ १३ ॥ गुडमिश्रंशाल्या
दिपिष्टम् ॥ १४ ॥ लड्डुकाः ॥ १५ ॥ इत्युपहाराः ॥ ॥ दशमेवोपहारमंबिकागायत्र्यांबिकायैएनमुपहारंनिवेदया
मीत्यंतयांबिकायैनिवेदयेत् ततआचमनफलतांबूलदक्षिणानीराजन पुष्पांजलिभिरभ्यर्च्यशिरसाभूमिं गत्वोक्तगायत्री
भ्यांविनायकमंबिकांचनमस्कुर्यात् ॥ गंधपुष्पदुर्वासर्षपयुतेन कुसुममात्रयुतेनवोदकेनांजलिमापूर्यपूर्वोक्त गायत्रीभ्या
मर्घौदत्वापुनर्दुर्वासर्षपपुष्पपूर्णांजलिभ्यांदत्वाविनायकमुपतिष्ठेत ॥ रूपंदेहिजयंदेहिभाग्यंभगवान्देहिमे ॥ पुत्रान्देहि
धनंदेहिसर्वान्कामांश्चदेहिमेइति ॥ ततोऽनेनैवमंत्रेणंबिकायाउपस्थानम् ॥ तत्रभगवानुशब्दस्थानेभगवतीतिवाच्यं ॥
यथापाठमात्रेणांबिकायाउपस्थानमितिमहार्णवं ॥ अंबिकायाउपस्थानेमंत्रांतरमाह ॥ बृहत्पराशरः ॥ सौभाग्यमंबिके
देहिरूपंभाग्यंयशोपिच ॥ स्त्रियंपुत्रांश्चकामांश्चतथाशौर्यंचदेहिमे ॥ गणेशमातरंबालेयत्किंचित्सदभीप्सितं ॥ एकनाम्नै
वतद्देहिहृदिगौरिवरान्ममेति ॥ ततआस्तीर्णकुशेशूर्पेसर्वमकारमुपहारशेषंनिधाय चतुष्पथमुत्रमुपलिप्यकुशानास्तीर्यतत्र
गुरुः शूर्पंप्राङ्मुखंनिदध्यात यजमानः प्रक्षालितपाणिपादआचांतो मंत्रोक्तदेवताभ्योवलिंदद्यात् ॥ मंत्रःबलिंगृह्णंत्विमे
देवाआदित्यावसवस्तथा ॥ मरुतोथाश्विनौरुद्राः सुपर्णपन्नगाग्रहाः ॥ असुरायातुधानाश्चपिशाचामातरोरगाः शाकिन्यो
यक्षवेतालायोगिन्यः पूतनाः शिवाः ॥ जृंभकासिद्धगंधर्वानागविद्याधरानराः ॥ दिक्पालालोकपालाश्चयेचविघ्न
बिनायकाः ॥ जगतांशांतिकर्त्तारोब्रह्माद्याश्चमहर्षयः ॥ माविघ्नंमाचमेपापंमासांतुपरिपंथिनः ॥ सौम्याभवंतुतृप्ताश्चभूत
प्रेताः सुखावहाइतिदत्वा ॥ इदंदेवादित्यवसुमरुदश्विरुद्रसुपर्ण पंन्नगग्रहासुरयातुधानपिशाच मातृगणशाकिनी यक्ष

वेतालायोगिन्यपूतनाशिबाःजृंभकासिद्ध गंधर्वानागविद्याधरानराःदिक्पाललोकपालश्चयेच विघ्नविनायकाःजगतांछांति
कर्तारोब्रह्माद्याश्चमहर्षयः॥ माविघ्नंमाचमेपापंमासांतुपरिपंथिनः सौम्याभवंतुतृप्ताश्चभूतप्रेताः सुखावहाइतिदत्वा ॥ इदं
देवादित्यवसुमरुदश्वि रुद्रसुपर्णपन्नगग्रहासुरयातु धानपिशाचमातृगणशाकिनी यक्षवेतालयोगीनीपूतना शिवजृंभक
सिद्धगंधर्बनागविद्याधर नगदिक्पाललोक पालविघ्नविनायकजगछांतिकर्त् ब्रह्मादिमहर्षिभूतप्रेतेभ्योनममेतित्यजेत् ॥
ततोयजमानः साचार्योगृहमागत्यप्रक्षालित पाणिपादआचांतउपविशेत् ॥ आचार्योवन्हिपूजांविधायसदीपदध्यक्तमाष
भक्तबलिनग्नेः परितोदिक्पालेभ्योदद्यात् ॥ ततग्रदशांतिप्रकरणोक्तसूक्तेनपूर्णाहुतिंहुत्वा स्विष्टकृदादिवर्हिर्होमांतमुत्तर
तंत्रंकुर्यात् ॥ मिताक्षरायां ॥ चरुशेषेणाभिशेकशालायां दिक्षुविदिक्षुचादिक्पतिभ्योवलिदानमुक्तं ॥ तत्पक्षेपूर्वंस्विष्ट
कृत्ततोबलिदानम् ॥ ततोयजमानः आचार्यंसंपूज्यसदक्षिणंबस्त्रयुग्मंतस्मैदद्यात ॥ ऋत्विग्भ्योपि यथाशक्तिहेमदक्षिणां
दत्वाऽन्येभ्योभूयसींदद्यात्॥ तत्रदशावरब्राह्मणभोजनसंकल्पंकुर्यात् ततआपोहिष्ठेत्यादिभिरव्दैवतैर्वारुणैर्मंत्रैश्चाभिशेकं
कुर्यात् ॥ ततः स्थापितदेवतानांपूजनपूर्वकं विसर्जनंविधायगछगछेत्यग्निंविसृजेत् ॥ यजमानः सोपस्करप्रतिमे
आचार्यायसमर्प्यविप्राशिषो गृहीत्वायस्मात्कोशेतिकृतं कर्मेश्वरार्पणंकुर्यात् ॥ ततः शांताद्योरिति शांतिसूक्तंपठेत् ॥
इतिवैनायकीशांतिः ॥ अपरार्कमतेतुकलशेषुपूजांतेव्योमकेशादिपूजनम् ॥ ततउद्वर्त्तनादिसंस्कृत स्योपवेशनं ॥ ततः
सहस्राक्षमितिमंत्रत्रया वृत्याचतुर्भिर्मंत्रैश्चतुष्पथेवलिदानम् ॥ ततोर्घदानोपस्थाने ॥ ततः शुक्लवस्त्रादिधारणं ॥ ब्राह्मण
भोजनसंकल्पः ॥ गुरवेवस्त्रयुग्मदानादि ॥इत्यपरार्कमतविशेषः ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोग भानौषट्पन्नागर
द्विवेदिरविशंकरकृतेकेवलवैनायकीशांतिप्रयोगरश्मिरेकविंशः ॥ २१ ॥

अथसग्रहविनायकशांतिः ॥ ततः ग्रहाणांपूर्वमनुष्ठानम् ॥ ततोगणेशांबिकयोरित्येकः पक्षः ॥ विपर्यासेच
द्वितीयः ॥सत्यपिपक्षद्वयेअतिप्रामाणिकैर्भट्टप्रभृतिभिः प्रथमपक्षस्यस्वीकृतत्वात्सएवलिख्यते ॥ नांदिश्राद्धंतंत्रेण ॥
संकल्पेसग्रहविनायकशांतिकरिष्यइति ॥ ग्रहणेआदौग्रहचरुः ॥ ततोवैनायकः स्थापनेप्राच्यांग्रहाणांस्थापनम् ॥

ततः इशानेगणेशांबिकयोः ॥ होमेचग्रहहोमंपरिसमाप्य यजमानस्यभद्रासनोपवेशनादिवैनायकचरुहोमांतंकुर्यात् ॥
ततोग्रहाणांयजनं ॥ गणेशांबिकयोर्बलिदानम् ॥ चत्वरेबलिदानंचवन्हिपूजा ॥ बलिदानं ॥ पूर्णाहुतिः ॥ ततः
स्विष्टकृदादिबर्हिहोमांत मुत्तरतंत्रंकर्म ॥ ततोदक्षिणादानं ॥ अभिशेकः ॥ ततः प्रणिताविमोका दिशांत्यंतंकर्मकुया
दिति ॥ ॥ इतिश्रीमदथर्वब्रह्मसूत्रप्रयोग भानौषट्पन्नागरद्विवेदि रविशंकरकृतेसग्रहविनायक शांतिप्रयोगरश्मि
र्द्वाविंशः ॥ २२ ॥

अथगर्भाधानसंस्कारउच्यते ॥ तदुपयोगितयाप्रथम रजोदर्शनेदुष्ट मासादिनीर्णीयते ॥ तत्रचैत्रज्येष्ठाषाठ
भाद्रपदकार्तिकपौषमासादुष्टाः ॥ आश्विनोमध्यमः ॥ शेषाः शुभाः ॥ क्वचिद्वैशाखफाल्गुनपूर्वार्द्धयारधमत्व
मुक्तम् ॥ तिथीषुप्रतिपच्चतुर्थीषष्ठयष्ठमीद्वादशी चतुर्दशीपौर्णिमाअमावास्याअशुभाः शेषाःशुभाः कचित्सप्तम्येकादश्य
शुभेअष्टमीद्वादशी इत्युक्तंआसांशुभाशुभत्वाभ्यांमध्यमत्वमिति ॥ तथाच ॥ रविभौममंदवासरेषुभरणिकृत्तिकार्द्राश्लेषा
मघापूर्वात्रयविशाखाज्येष्ठा नक्षत्रेषुविष्कुंभगंडांतिगंडशुलव्याघातवज्र परिघपूर्वार्द्धव्यतीपातवैधृतयोगेषुविष्टयांगृहणे
रात्रिसंध्यापराह्णकाले षुनिद्रायांजीर्णरक्तनीलवस्त्रेषु नग्नत्वेपरग्रहपरग्रामेषु अल्पाधिकनीलादिरुधिरत्वेचा निष्फलम् ॥
संमार्जनीकाष्टतृणाग्निशूर्पान् हस्तेदधानाकुलटास्यात् वस्त्रेविषमारक्तबिंदवः पुत्रफलाः ॥ अथप्रथमऋतुअक्षतैरासनं
कृत्वातत्रतामुपवेश्यपतिपुत्रवत्यः स्त्रियोहरिद्राकुंकुमगंधपुष्प स्रकृतांबूलादितस्यैदत्वादीपैनीराज्य सदीपालंकृतेगृहेतांवा
सयेयुः ॥ सुवासिनीभ्योगंधादिकंलवणं मुद्गादिचदद्यात् ॥ अथसर्वऋतुसाधारणनियमः ॥ त्रिरात्रमस्पृश्याभूत्वा
चतुर्थेहनिषष्ठिवारंमृत्तिकाशौचेनमलंप्रक्षाल्यदंतधावन पूर्वकंसंगवकालेस्नायात् ॥ सूर्योदयात्प्राक्स्नानंत्वनाचारः ॥
चतुर्थेहनिरजोनिवृत्तौभतृशुश्रुषणादौशुद्धिः ॥ पंचमेहनिदेवपित्र्ययोः कर्मणिशुद्धिः ॥ कानिचिद्दिनानिरजोयद्यनुवर्त्ते
तत्तन्निवृत्तिपर्यंतंदेवपित्र्ययोर्नशुद्धिः केचित्तुचतुर्थेदिवसेदर्शेष्टयादि श्रौतकर्माणिकर्त्तव्यानीत्याहुः॥ अपरेतुइतरादिना

पेक्षयाचतुर्थदिवसस्यैवानुकालत्वेतत्रैवगर्भाधानं दुष्टरजोदर्शनशांतिश्चकर्त्तव्या॥ महासंकटेश्रीसूक्तहोम पूर्वकाभिशेकेन
उपनयनादिकं ॥ अपिचतुर्थेहनिकर्त्तव्यमित्याहुः ॥ अयंचतुर्थहन्यधिकारनिर्णयः सर्वथारजोभिवृत्तावेवज्ञातव्यः ॥
प्रथमेदुष्टरजोदर्शनेद्वितीयं प्रदीष्टयतस्मिन्नप्यशुभेविस्तरशांतिंकुर्यादित्यपिकेचित् ॥ ग्रहणव्यतीपातादिबहुतरदोषे
रजोदर्शनंद्वितीयादिरजोदर्शने शांतिपूर्वकंगर्भाधानंकार्यं ॥ गर्भाधानेगुरुशुक्रास्ताधिकमासादिदोषोनास्ति ॥ यदितु
प्रथमरजोदर्शनेशांतिर्नकृताद्द्वितीयादि रजोदर्शनेशुक्रास्तादिदोष प्रसक्तिस्तदानिमित्तानं तरमेवयत्रनैमित्तिकानुष्टानं
तत्रास्तादिदोषाभावोमुख्यकालाति क्रमेतुअस्तादिदोषोस्त्येवेतिसामान्य निर्णयानुसारेणऋतुशांतिरस्तादौनकार्या ॥
तदनुरोधेनगर्भाधानंचनकार्यमितिभाति ॥ शांतिश्चसग्रहमखैवकार्या ॥ अथरजोदर्शनशांतिप्रयोगउच्यते ॥ रजो
दर्शनानंतरंपंचमादिदिने चंद्रताराद्यनुकूलेशुचिदेशेषु स्नातयापत्न्यासहयजमानः कृतमांगलिकः श्रीपर्ण्यादिपीटेप्रा
ङ्मुखउपविश्यजीवास्थेतिमंत्रेण विधिवदाचम्यप्राणनायम्य देशकालौसंकीर्त्यममपत्न्याः प्रथमरजोदर्शनेऽमुकदुष्ट
मासादिशूचितसंकलानिष्ठनिरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थंसग्रहमखांशौनक्तांशांतिंकरिष्य इतिसंकल्प्य॥ स्वस्तिवा
चननांदिश्राद्धपूर्वकंसकलां वक्ष्यमाणप्रकारेण शांतिंकृत्वागर्भाधानोक्तकालेषष्ठाष्टमदशमद्वादश चतुर्दशषोडशदिना
मन्यतमस्मिन्नेकदिवसेगर्भाधानंकार्यं ॥ यद्वा ॥ गर्भाधानोक्तएकस्मिनदिने पूर्वोक्तशांतिसंकल्पंकृत्वा॥ गणेशपूजना
दिशांतिंसमाप्यपूर्वोक्तपुनर्मंगलस्नानंकृत्वा ॥ गणपतिपूजनस्वस्तिवाचनांदिश्राद्धादि संकल्पपूर्वकगर्भाधानंकार्यं ॥
अथवाएकस्मिनदिनेशांतिगर्भाधानयो स्तंत्रेणनांदिश्राद्धादिकुर्यात् कृत्वातंत्रेणसमापयेदिति ॥ तत्रसंकल्पेविशेषमाह ॥
देशकालयोः संकीर्त्तनांतेअस्याः ममपत्न्याः प्रथमरजोदर्शनेकरिश्यमाणयोः शांतिगर्भाधानयोः अंगत्वेनगणपति
पूजनपूर्वकंस्वस्तिपुण्याहवाचनमातृका पूजनंनांदिश्राद्धंचकरिष्यइतिसंकल्प्य ॥ एतानिकृत्वापुनर्देशकालौसंकीर्त्यमम
पत्न्याः प्रथमरजोदर्शनेदुष्टमासादिसूचितेत्यादिपूर्ववत्संकल्पंकृत्वा ॥ शांत्युदककलशस्थापनंचकृत्वाआचार्यादीन्
वरयेत् ॥ इतिप्रयोगदर्पणेस्पष्टं ॥ इतिपक्षत्रयमध्येएकंपक्षमगीकृत्य तदनुसारेणकर्मकुर्यादिति ॥ ॥ अथशिष्टा

चारानुसारेणप्रयोगः ॥ सपत्निकोयजमानः देशकालौसंकीर्त्य ॥ ममअग्निबित्सेदूदिनमारभ्येत्यादिसंकल्प्य पूर्वकं
गृह्याग्निपुनः संधानंकृत्वाततोशांतिसंकल्पः ॥ ममपत्न्याः प्रथमरजोदर्शनेऽमुकदुष्टमासादि सूचितसकलारिष्टनिरसन
द्वाराश्रीपरमेश्वरपीत्यर्थंसग्रहमखवां शौनकोक्तांआर्त्तवशांतिंकरिष्ये ॥ तत्रादौमहागणपति पूजनपूर्वकंस्वस्तिपुण्याहवा
चनंआचार्यऋत्विग्वरणंचकरिष्येइतिसंकल्पः ॥ स्वस्तिवाचनांतेआचार्यादीन्वरयेत् ॥ तद्यथा ॥ यजमानप्रवरमुच्चार्य ॥
अमुकप्रवरान्वितामुकगोत्रोत्पन्नः अमुकशर्मेहिंअमुकप्रवरान्वितामुकगोत्रोत्पन्न अमुकवेदांतर्गतामुकशाखाध्यायिनंअमुक
शर्माणंब्राह्मणंअस्मिन्सग्रहमखरजोदर्शनशांतिकर्मणि आचार्यत्वेनत्वामहंवृणे ॥ वृतोस्मि ॥ कर्मकरिष्यामीतितेन
वाच्यं ॥ आचार्यंगंधादिनासंपूज्यप्रार्थयेत् ॥ आचार्यत्वंयथास्वर्गेशक्रादीनांबृहस्पतिः ॥ तथात्वंममयज्ञेस्मिन्
आचार्योभवसुव्रत ॥ ततोब्रह्माणंवृत्वा ॥ अमुकप्रवरं० ॥ यथाचतुर्मुखोब्रह्मासर्ववेदधरोविभुः ॥ तथात्वंममयज्ञेस्मिन्
ब्रह्माभवद्विजोत्तम ॥ अस्मिन्सग्रहमखरजोदर्शनशांत्याख्येकर्मणिब्रह्मत्वेनत्वामहंवृणे ॥ वृतोस्मि ॥ गंधादिनासंपूज्य ॥
ब्रह्मणाकर्मपंचकंकर्त्तव्यं ॥ निरस्तश्चोपवेशश्चतथाब्रह्मजपोपिच ॥ प्रायश्चित्तमुपस्थानंब्रह्मणः कर्मपंचकम् ॥ ततः
पुस्तकधारणार्थंसदस्यवरणम् ॥ कर्मणामुपदेष्टारंसर्वकर्मविदुत्तमं ॥ कर्माणंदेवतत्वज्ञंसदस्यंत्वामहंवृणे ॥ वृतोस्मि ॥
गंधादिनासंपूज्य ॥ ततोहोमार्थमन्यानपिचतुरोष्टौवाऋत्विजोवृणुयात् ॥ ऋत्विगस्मिन्महायज्ञेभवसागरसुव्रत ॥ सर्व
कर्मप्रतिष्ठार्थंऋत्विक्त्वंमेमखेभव ॥ इतिवृणुयात् ॥ तान्गंधादिनासंपूज्यप्रार्थयेत् ॥ अस्ययागस्यनिष्पत्तौभवंतोभ्यर्थि
तामया ॥ सुप्रसन्नैः प्रकर्त्तव्यकर्मेदंविधिपूर्वकम् ॥ ततः आचार्यः पवित्रपाणिः प्राणानायम्यदेशकालौसंकीर्त्यब्रह्म
जज्ञानं० अव्यसच्चेत्यादिपठित्वासग्रहमखरजोदर्शनशांत्यंगत्वेनयजमानवृतोहमाचार्यकर्मकरिष्ये ॥ तत्रादावस्मिन्कर्मणि
योग्यतासिध्यर्थंपुरुषसूक्तकाॠत्त्विजपमहंकरिष्ये ॥ तद्यथा ॥ ॐसहस्रबाहुः पुरुषः सहस्राक्षः सहस्रपात् ॥ सभूमिं
विश्वतोवृत्वात्यतिष्ठद्दशांगुलं ॥ १ ॥ त्रिभिः पद्भिर्द्यामरोहत्पादस्येहाभवत्पुनः ॥ तथाव्यक्रामद्विश्वंगशनानश
नेअनु ॥ २ ॥ तावंतोअस्यमहिमानस्ततोज्यायांश्चपूरुषः ॥ पादोस्यविश्वाभूतानि त्रिपादस्यामृतंदिवि ॥ ३ ॥ पुरुषएवे

दंसर्वंयद्भूतंयच्चभाव्यं ॥ उतामृतत्वस्येश्वरोयदन्नेनाभवत्सह ॥ ४ ॥ यत्पुरुषंव्यदधुः कतिधाव्यकल्पयन् ॥ मुखंकि
मस्यकिंबाहूकिमुरुपादाउच्येते ॥ ५ ॥ ब्राह्मणोस्यमुखमासीद्बाहुराजन्योभवत् ॥ मध्यंतदस्ययद्वैश्यः पद्भ्यांशूद्रो
अजायत ॥ ६ ॥ चंद्रमामनसोजातश्चक्षोः सूर्योअजायत ॥ मुखादिंद्रश्चाग्निश्चप्राणाद्वायुरजायत ॥ ७ ॥ नाभ्याआसी
दंतरिक्षंशीर्ष्णोद्यौः समवर्त्तत ॥ पद्भ्यांभूमिर्दिशश्रोत्रात्तथालोकांअकल्पयन् ॥ ८ ॥ विराडग्रेसमभवद्विराजोअधि
पूरुषः ॥ सजातोअत्यरिच्यतपश्चाभूमिमथोपुरः ॥ ९ ॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥ वसंतोअस्यासीदाज्यं
ग्रीष्मइध्मः शरद्धविः ॥ १० ॥ तंयज्ञंप्रावृषाप्रौक्षन्पुरुषंजातमग्रशः ॥ तेनदेवाअयजंतसाध्यावसवश्चये ॥ ११ ॥ तस्मा
दश्वाअजायंतयेचकेचोभयादतः ॥ गावोहजज्ञिरेतस्मात्तस्माज्जाताअजावयः ॥ १२ ॥ तस्माद्यज्ञात्सर्वहुतऋचः सामा
नियज्ञिरे ॥ छंदांसिजज्ञिरेतस्माद्यजुस्तस्मादजायत ॥ १३ ॥ तस्माद्यज्ञात्सर्वहुतः संभृतंपृषदाज्यम् ॥ पशूंस्तांश्चक्रेवाय
व्यानारण्याग्राम्याश्चये ॥ १४ ॥ सप्तास्यासन्परिधयस्त्रिः सप्तसमिधःकृताः ॥ देवायद्यज्ञंतन्वानाअबध्नन्पुरुषंपशुं ॥ १५ ॥
मूर्ध्नोदेवस्यबृहतोअंशवः सप्तसप्ततिः ॥ राज्ञः सोमस्याजायंतजातस्यपुरुषादधि ॥ १६ ॥ इतिपुरुषसूक्तंपठित्वाततः
आचार्योयजमानोवावामहस्ते गौरसर्षपान्गृहीत्वादिग्रक्षणंकुर्यात् तत्ररक्षोहणंवाजिनमितिसूक्तंपठेत् ॥ तद्यथा ॥ रक्षो
हणंवाजिनमाजिघर्मिमित्रंपृथिष्टमुपयामिशर्म ॥ शिशानोअग्निः क्रतुभिः समिद्धःसनोदिवासरिषः पातुनक्तं ॥ १ ॥
अयोदंष्ट्रोअर्चिषायातुधानानुपस्पृशजातवेदः समिद्धः ॥ आजिह्वयामूरदेवान्रभस्वक्रव्यादोवृष्ट्वापिधत्स्वासन् ॥ २ ॥
उभोभयाविन्नुपदेहिदंष्ट्रा हिंस्रः शिशानोवरंपरंच ॥ उतांतरिक्षेपरियाह्यग्नेजंभैसंधेह्यभियातुधानान् ॥ ३ ॥ अग्नेत्व
चंयातुधानस्यभिंधिहिंस्राशनिर्हरसाहंत्वेनम् ॥ प्रपर्वाणिजातवेदः शृणीहिक्रव्याक्रविष्णुर्विचिनोत्वेनम् ॥ ४ ॥ यत्रेदा

नींपश्यंसि जातवेदस्तिष्ठंतमग्नउतवाचरंतम् ॥ उतांतरिक्षेपतंत्तंयातुधानंतमस्तांविध्यशर्वाशिशानः ॥५॥ यज्ञैरिषुः संन
ममानोअग्नेवाचाशल्यांअशनि भिर्द्विहानः ॥ ताभि र्विध्यहृदयेयातुधानान्प्रतिचोबाहून्प्रति भङ्ध्येषाम् ॥ ६ ॥
उतारब्धान्स्पृणुहिजातवेदउतारेभाणांऋष्टिभिर्यातुधानान् ॥ अग्नेपूर्वोनिजहिशोशुचानआमादक्ष्विंकास्तमदंत्वेनीः ॥
७ ॥ इहप्रब्रूहियतमः सोअंग्नेयातुधानोयइदंकृणोति ॥ तमारभस्वसमिधायविष्टनृचक्षसश्चक्षुषेरंधयेनम् ॥ ८ ॥ तीक्ष्णे
नांग्नेचक्षुषारक्षयज्ञंप्रांचंवसुभ्यः प्रणयप्रचेतः ॥ हिंस्रंरक्षांस्यभिशोशुचानंमात्वांदभन्यातुधानांनृचक्षसः ॥ ९ ॥ नृचक्षार
क्षः परिपश्यविक्षुतस्यत्रीणिप्रतीशृणीह्यग्रा ॥ तस्यांग्नेपृष्टीर्हरसाशृणीहित्रेधामूलंयातुधानस्यवृश्च ॥ १० ॥ ॥
त्रिर्यातुधानः प्रसितिंतएत्वृतंयोअंग्नेअनृतेनहंति ॥ तमर्चिषास्फूर्जयंन्जातवेदः समक्षमेनंगृणतेनियुंधि ॥ १ ॥
यदंग्नेअद्यमिथुनाशपातोयद्वाचाऽस्तृष्टंजनयंतरेभाः ॥ मन्योर्मनसः शरव्या जायंतेयातयाविध्यहृदयेयातुधानान् ॥
२ ॥ पराशृणी हितपसायातुधानान्पराग्नेरक्षोहरसाशृणीह ॥ परार्चिषामूरदेवाञ्छृणिहिपरासुतृपःशोशुचतःशृणीहि ॥
३ ॥ पराद्यदेवावृजिनंशृणंतुप्रत्यगेनंशपथायंतुसृष्टाः ॥ वाचास्तेनंशरवऋच्छंतुमर्मन्विश्वस्यैतुप्रसितिंयातुधानः ॥ ४ ॥
यःपौरुषेयेणक्रविषासमङ्क्तेयोअश्व्येनपशुनायातुधानः ॥ योअघ्न्यायाभरतिक्षीरमग्नेतेषांशीर्षाणिहरसापिवृश्च ॥ ५ ॥
विषंगवांयातुधानाभरंतामावृश्चंतामदितयेदुरेवाः ॥ परैणांदेवः ॥ सवितादंदातुपराभागमोषधीनांजयंताम् ॥ ६ ॥
संवत्सरीणंपयउस्रियायास्तस्यमाशीद्यातुधानोनृचक्षः ॥ पियूषमग्नेयतमस्तितृप्सात्तंप्रत्यंचमर्चिषाविध्यमर्मणि ॥ ७ ॥
सनादंग्नेमृणसियातुधानान्नत्वारक्षांसिपृतनासुजिग्युः ॥ सहमूरानुदहक्रव्यादोमातेहेत्यामुक्षतदैव्यायाः ॥ इत्येका ॥
८ ॥ त्वंनोअग्नेअधरादुदुक्तस्त्वंपश्चादुत्तरक्षापुरस्तात ॥ प्रतीत्येतेअजरासस्तपिष्ठाअघशंसंशोशुचतोदहंतु ॥ ९ ॥

पश्चात्पुरस्तादधरादुतोत्तरात्कविःकाव्येनपरिपाह्यग्ने ॥ सखासखायमजरोजरिम्णेअग्नेमर्त्ताँ अमर्त्यस्त्वंनः ॥ १० ॥
तदग्नेचक्षुः प्रतिधेहिरेभेशफारुजोयेनपश्यसियातुधानान् ॥ अथर्ववज्ज्योतिषादैव्येनसत्यंधूर्वंतमर्चितंन्योष ॥ १ ॥
परित्वाग्नइत्येका ॥ २ ॥ विशेणभंगुरावतःप्रतिस्मरक्षोंजहि ॥ अग्नेतिग्मेनशोचिषातपुरग्राभिरर्चिभिः ॥ ३ ॥ विज्यो
तिषोवृहताभात्यग्निराविर्विश्वानिकृणुतेमहित्वा ॥ प्रादेवीर्म्मायाः सहतेदुरेवाः शीर्षे ॥ तेशृंगेरक्षोभ्योविनिक्ष्वे ॥
४ ॥ येतेशृंगेअजरेजातवेदस्तिग्महेतीब्रह्मसंशिते ॥ ताभ्यांदुर्हार्दमभिदासंतंकिमीदिनंप्रत्यंचमर्चिषाजातवेदो
विनिक्ष्व ॥ ५ ॥ अग्निरक्षांसिसेधतिशुक्रशोचिरमर्त्यः शुचीः पावकईड्यः ॥ ६ ॥ इतिरक्षोहणसूक्तं पठित्वा
ततः स्मृतिमंत्राः ॥ यदत्रसंस्थितंभूतं स्थानमाश्रित्यसर्वदा ॥ स्थानंत्यक्त्वातुतत्सर्वं यत्रस्थंतत्रगच्छतु ॥
१ ॥ अपक्रामंतुभूतानिपिशाचाः सर्वतोदिशं ॥ सर्वेषामविरोधेन शांतिकर्मसमारभेत् ॥ २ ॥ इतिमंत्रैर्दिक्षु
प्रादक्षिण्येनसर्षपानविकीर्य ॥ अथपंचगव्यकरणं ॥ तद्यथा ॥ तिथीविष्णुस्तथावारोनक्षत्रं विष्णुरेवचयोगश्चकरणं
विष्णुःसर्वंविष्णुमयंजगत् ॥ अद्यपूर्वोच्चारितएवंगुणविशेषणविशिष्टायां शुभपुण्यतिथौरजोदर्शन शांत्यंगतयाविहित
मादौपंचगव्यसंमीलनंचकरिष्ये ॥ ताम्रपात्रेताम्रवर्णायाः गोमूत्रंत्रिःपलंअष्टमाषंवा ॥ गायत्र्याविश्वामित्रसवितागायत्री
पंचगव्यसिध्यर्थंजपेविनियोगः ॥ ॐतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ इतिमंत्रेणगोमूत्रं ॥
अंगुष्ठार्द्धपर्वमात्रंशोडशमाषंवा ॥ श्वेतायाःगोमयं ॥ यस्तेगंधेत्यानंदश्रीरनुष्टुप्पंचगव्यसिध्यर्थंजपेविनियोगः ॥ ॐ
यस्तेगंधःपुरुषेषु इतिगोमयं ॥ पीतकपिलायाःपयःसप्तपलं ॥ द्वादशमाषंवा ॥ पयस्वतीरोषधयोगौतमः सोमोगायत्री
पंचगव्यसिध्यर्थंजपेविनियोगः ॐ पयस्वतीरोषधय इतिपयः ॥ नीलवर्णायाःदधिपंचपलंदशमाषंवा ॥ ॥ दधिक्राव्ण
इत्यस्यवामदेवोदधिक्रावानुष्टुप् ॥ पंचगव्यसिध्यर्थंजपेविनियोगः ॥ ॐदधिक्राव्णइतिदधि ॥ कृष्णवर्णायाः घृतं

त्रिःपलमष्टमाषंवा ॥ घृतंते अग्नेदिव्येसधस्थे घृतेनत्वांमधुरध्यास्मभिधे घृतंते देवीनृत्य१ आवहंतुघृततुभ्यं दुहृतांगावो अग्नेइत्याज्यं ॥ देवस्यत्वेतित्रिःपलंचतुर्माषंवाकुशोदकंप्रक्षिप्य ॥ आपोहिष्ठेत्येकयाऋचायज्ञियशफल मूलेनप्रणवेनच नीर्मथनियम् ॥ प्रणवेनाभिमंत्र्य ॥ अत्रमाषः पंचगुंजात्मकः ॥ टंकुद्वयसमतोलितपलमित्यर्थः ॥ हिरण्यवर्णा इत्यादिग्रहशांतिक्रमोक्तमंत्रैः पंचगव्येनयागभूमिंसंप्रोक्ष्य आपोहिष्ठेतितृचेनशुद्धाभिरद्भिस्तथैवसंप्रोक्ष्य ॥ कृतांजलिः सन्देवाआयांतुआपः आयांतुधानाविष्णोर्देवयजनंसरक्षस्व ॥ स्वस्तयनं ॥ त्रयःसुपर्णाभ्यामितिमंत्राभ्यांदेवताः संप्रार्थ्य ॥ तद्यथा ॥ त्रयःसुपर्णास्त्रिवृतायंदायन्नेकाक्षरमभिसंभूयंशक्राः ॥ प्रत्यौहन्मृत्युममृते नसाकर्म तर्दधानादुरितानिविश्वा ॥१॥ दिवस्त्वापातुहरितंमध्यात्स्वापात्वर्जुनं ॥ भूम्य अयस्मयंपातुप्रागादेवपुराअयं ॥ २ ॥ इतिमंत्रद्वयेन देवताःसंप्रार्थ्य ॥ ततोभुवनेश्वर्यादिप्रतिमात्रयस्यअग्न्युत्तारणमुक्त ग्रहशांतिक्रमादुध्धृत्ययथोचितमंत्रैःकुर्यात् ॥ तत्र संकल्पविशेषः ॥ देशकालौसंकीर्त्य आसुनूतनमूर्त्तिषुदेवकलासानिध्य पूर्वकपूज्यत्वादिअधिकारसिध्यर्थं घनदग्निदोष निवर्हणातुयूराारोग्यैश्वर्याभिवृध्यर्थं अग्न्युत्तारणपूर्वकंप्राणप्रतिष्ठापनंचकरिष्ये ॥ इमंमेअग्नेत्यग्न्युत्तारणसूक्तस्यांगिराग्निस्त्रिष्टुपादिनिछंदांसिमूर्त्तीनामग्न्युत्तारणेविनियोगः ॥ इमंमे अग्ने० ब्रह्मणानाशयंत्वित्यंतंसूक्तंपठेत् ॥ ततोप्राणप्रतिष्ठा॥ ॐअस्यश्रीप्राणप्रतिष्ठामंत्रस्यब्रह्माविष्णुमहेश्वराऋषयःऋग्यजुःसामाथर्वाणिछंदांसि॥चैतन्यरूपापराप्राणशक्तिर्देवता॥ आंबीजं ॥ ह्रींशक्तिः क्रौंकिलकं ॥ देवस्यप्राणप्रतिष्ठापनेविनियोगः ॥ ॐआंह्रींक्रोंअंकंखंगंघंङं आंह्रींआंपृथिव्यप्तेजो वाय्वाकाशात्मने आंअंगुष्ठाभ्यांनमः॥ ॐआंह्रींक्रौंईचंछंजंझंञं अंईक्रौंह्रींआं शब्दस्पर्शरसरूपगंधात्मनेतर्जनीभ्यांनमः॥ ॐआंह्रांक्रौं ऊंटंठंडंढंणं ऊंक्रौं ह्रींआं श्रोत्रत्वक्चक्षुजिह्वाघ्राणात्मने ऊंमध्यमाभ्यांनमः । ॐआंह्रींक्रौं ऐंतंथंदंधंनं ऐंक्रौंह्रीं आंवाक्पाणिपादपायूपस्थात्मने ऐंअनामिकाभ्यांनमः ॥ ॐआंह्रींक्रौं ॐपंफंबंभंमं ॐक्राह्रींआं नादानगति विसर्गानंदात्मने औंकनिष्ठिकाभ्यांनमः ॥ ॐआंह्रींक्रों यंरंलंवंशंषंसंहंक्षं अःक्रोंह्रीं आंमानोबुध्यहंकारचित्तविज्ञानात्मने अःकरतलकरपृष्ठाभ्यांनमः ॥ एवंहृदयादिः ॐआंह्राक्रों अंकंखंगंघंङं आंक्रांह्रीं पृथिव्यप्तेजोवायवाकाशात्मने

आंहृदयायनमः ॥ ॐआंह्रींक्रोंईचंछंजंझंञं ईक्रोंह्रींआंशब्दस्पर्शरूपरसगंधात्मने शिरसेस्वाहा ॥ ॐआंह्रींक्रों ऊंटंठंडंढंणं ऊंक्रोंह्रीं श्रोत्रत्वक्चक्षुजिह्वाघ्राणात्मने शिखायैवषट् ॥ ॐआंह्रींक्रोंऐंतंथंदंधंनं ऐंक्रोंह्रींआं वाक्पाणिपादपायूपस्थात्मनेकवचायहुं ॥ ॐह्रींक्रोंअंपंफंबंभंमं ॐक्रोंह्रींआं वचनादानगतिविसर्गानंदात्मने औंनेत्रत्रयायवौषट् ॥ ॐआंह्रींक्रों यंरंलंवंशंषंसंहंक्षं अःक्रोंह्रीं आंमनोबुध्यहंकार चित्तविज्ञानात्मने अःअस्त्रायफट् ॥ ॐआंह्रींक्रों यंरंलंवंशंषंसंहंक्षं अःक्रों ह्रींआं देवस्यप्राणाइहप्राणाः ॥ ॐआंह्रींक्रों यंरंलंवंशंषंसंहंक्षं अःक्रोंह्रीं आंदेवस्यजीवइहस्थितः ॥ ॐआंह्रींक्रों यंरंलंशं षंसंहंक्षं अःक्रोंह्रीं आं देवस्यसर्वेंद्रियाणि वाङ्मनश्चक्षु श्रोत्रजिह्वाघ्राण पाणिपादपायूपस्थ इहैवागत्यसुखं चिरंतिष्ठंतु स्वाहा ॥ ॐअसुनीते पुनरस्मासु चक्षुःप्राणमिहनोधेहिभागं ॥ ज्योक्पश्येमसूर्यमुच्चरंतमनुमते मृलयानस्वस्ति ॥ ॐचित्रंदेवाना मांगिरसः कुत्सः सूर्यस्त्रिष्टुप् ॥ नेत्रोन्मीलने विनियोगः ॥ ॐ चित्रंदेवाना मुदगादनीकं चक्षुर्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवी अंतरिक्षंसूर्यआत्माजगतस्तस्थुषश्च ॥ नैवेद्यं समर्प्य॥ गर्भाधानादिपंचदशसंस्कारसिध्यर्थं पंचदशप्रणवावृत्तिगणनया कुर्यात ॥ ततः रक्तांभोधिस्थपोतोल्लसदरुणसरोजाधिरूढाकराब्जैः पाशांकोदंडमिक्षुद्भवममृत मथाप्यंकुशंपंचबाणान् बिभ्राणासृक्कपालं त्रिनयनलसितापीन वक्षोरुहाढ्यादेवी बालार्कवर्णाभवतु सुखकरीप्राणशक्तिः परानः ॥ ततः पूर्णकलशपात्रो परिसौवर्ण देवंतत्तद्देवता प्रकाशकमंत्रेण संस्थाप्य पूजयेत् ॥ पात्रांतरेवापंचामृतस्नानांतंसंपूज्यत दनंतरंकलशेस्थापयेदिति ॥ तत्रस्वस्तिवाचनोक्तरीत्याशोभनकलशत्रयंसंस्थाप्य ॥ तेषुकलशेषुहेमपंचरत्नप्रक्षेपोत्तरं गंधादिरत्नप्रक्षेपानवक्ष्यामः ॥ ततोमध्यमकुंभेगायत्र्यायवव्रीहितिलमाषकंगुश्यामाकमुद्गानक्षिप्त्वा ॥ तथैवोदुंबरदुर्वारक्तोत्पलचंपकबिल्वविष्णुक्रांतातुलसीबर्हिः शंखपुष्पीशतावर्याश्वगंधानिर्गुंडीरक्तपीतसर्ष पापामार्गपलाशफनसजीवका प्रियंगुगोधूमव्रीहिअश्वत्थदधिदुग्ध घृतशतपत्रनीलोत्पलसीतरक्त पीतकरंडकगुंजावता नभद्रारूयानिद्वात्रिंशदौषधानि सर्वाणियथासंभवानिक्षिपेत् ॥ ततस्त्रिषुकलशेषुदुर्वामंत्रेणदुर्वाप्रक्षेपः ॥ कलशेषुसर्वत्रशांतिषुविवाहप्रकरणोक्तऔषधीप्रक्षेपः कार्यः ॥ औषध्यलाभेभाष्यकारोक्तयवप्रक्षेपोवा ॥ अश्व

त्येवोइतिपंचपल्लवान् ततः गंधपुष्पसौभाग्यद्रव्यफलहिरण्यसुवासोभिः तान्भूषयेत् ततस्त्रिषुधातुमयानिवावैणवमयानि वामृन्मयानिपूर्णपात्राणिनिधायतदुपरिश्वेतवस्त्रत्रयंचंदनादिनाकृताष्टदलयुक्तंन्यसेत् ॥ मध्यमेस्थापितप्रतिमायांभुवनेश्वरीमावाहयेत् ॥ ॐतत्सवितुरितिगायत्र्याभुवनेश्वरींस्थापयामि ॥ एवंदक्षिणकलशेप्रेतंपादाथर्वेंद्राण्यनुष्टुप् ॥ इंद्राणिस्थापनेविनियोगः ॥ ॐप्रेतंपादौप्रस्फुरंतंवहतंप्रणताग्रहान ॥ इंद्राण्येतुप्रथमाजीतामुशीतापुरः ॥ इंद्राणींस्थापयामि ॥ उत्तरकलशेइंद्रमिंद्रब्रह्माथर्वाइंद्रस्त्रिष्टुप् ॥ इंद्रस्थापनेविनियोगः ॥ ॐइममिंद्रवर्द्धयक्षत्रियंमइमंविषामेकवृषंकृणुत्वं ॥ निरमित्रांनक्ष्णुह्यस्यसर्वास्तान्रंधयास्माअहमुत्तरेषु ॥ इंद्रंस्थापयामि ॥ ततस्तदस्त्वितिप्रतिष्ठाप्यसुप्रतिष्ठितमस्तु ॥ ततउक्तमंत्रैरुक्तक्रमेणवस्त्रादिदक्षिणांतैः संपूज्य ॥ अन्यथाशरणंनास्ति इतिप्रार्थनापूर्वकंनमस्कारान्कृत्वा ॥ अनयापूजया श्रीभुवनेश्वर्याद्यावाहितदेवताः प्रीयंतां ॥ इतिपूजांनिवेदयेत् ॥ ततोमध्यमकुंभेआचार्योष्टसहस्र १००८ मष्टोत्तरशतंवा १०८ गायत्रींजप्त्वावृष्टिकेतिश्रीसूक्तंपूर्वलिखितंजपेत् ॥ ततएकोऋत्विकृदक्षिणकुंभेरुद्रसूक्तंजपेत् ॥ तद्यथा ॥ ॐभवाशर्वाविदंब्रूमब्रह्मासोममानुष्टुभंरुद्रसूक्तजपेविनियोगः ॥ ॐभवाशर्वौमन्वेदांतस्यवित्तंययोर्वामिदंप्रदिशियविरोचते ॥ यावस्पशाथेद्विपदोयश्चतुष्पदस्तेनोमुंचतमंहसः ॥ १ ॥ ययोरभ्यध्वऊतयेदुरेचिद्यौवि दिवि षुभृतामसिष्ठौ ॥ २ ॥ सहस्राक्षौवृत्रहणाहुवेहंदूरेगव्यूतिस्तुवन्नेभ्युग्रौ ॥ ३ ॥ यावारेभाथेप्रहुसारिकमग्रेप्रचेदस्रांप्ट्रममिमांजनेषु ॥ ४ ॥ ययोर्वधानापपद्यतेकश्चनांतर्देवेषुतपानुषेष ॥ ५ ॥ यःकृत्यातृन्मुलतूद्यातुधानोनितस्मिनधत्तंवज्रमुग्रौ ॥ यावस्येशाथेद्विपदोयश्चतुष्पथस्तौनोन्नौमुंचतमंहसः ॥ ६ ॥ अधिंनोब्रूतंब्रह्मणामूग्रौसंवत्रेणसृजतंयःकिमिदि ॥ स्तौमिभवाशर्वौनाथितोजोह्वविमितौनोमुंचतमंहसः ॥ ७ ॥ इतिरुद्रसूक्तंपठेत् ॥ अन्योऋत्विगुत्तरकुंभेएकादशावृत्तिभिर्रुद्रंजपेत् ॥ ततः कुंभपश्चिमदेशेस्थंडिलेऽग्निंविधाय ॥ अस्मिन्सग्रहमख० रजोदर्शनशांतिकर्मणिस्थंडिलेऽग्निप्रतिष्ठापनंचकरिष्ये ॥

वरदनामाग्निमुक्तमंत्रेणप्रतिष्ठाप्य ॥ तदीशान्यांवेद्यादौनवग्रहादीनतत्तन्मंत्रैरावाहयेत् ॥ विस्तृतप्रयोगस्तुग्रहयज्ञप्रकरणे प्रागुक्तः ॥ आधारावाज्यभागाभ्यात्तानादिपूर्वतंत्रं ॥ ततोसूर्यादीनुक्तक्रमेणसमिदाज्यचर्वाहुतिभिः भुवनेश्वरींसूर्ये अष्टोत्तरशतसंख्याकाभिर्दूर्वाभि स्तिलमिश्रगोधूमाहुतिभिः पायसआहुतिभिश्चाज्याहुतिभिश्च इंद्राणिमिंद्रंप्रत्येकंअष्टाविंशच्छंख्याकाभिर्दूर्वादिचतुर्विधाहुतिभिः द्वित्रादिबहुतरदोषेअष्टोत्तर सहस्रहोमोभुवनेश्वर्यास्तदाविंद्रेंद्राण्योः प्रत्येकं अष्टोत्तरशतहोमः ॥ इंद्रेंद्राण्योर्होमः कृताकृतः ॥ अकृतपक्षेस्थापनपूर्वकंपूजन मेवहोमस्तुनकार्यः ॥ प्रतिदैवतंसर्वत्र त्यागः ॥ स्थापितदेवतानांपूजनपूर्वकंदिक्पालेभ्योबलिदानं ॥ पूर्णाहुतिस्तुपूर्ववत् ॥ अभ्यात्तानाद्युत्तरतंत्रं ॥ अथाभिषेकः ॥ सपत्निकंयजमानंसर्त्विगुदङ्मुखआचार्यः स्थापितकलशचतुष्कात् पात्रांतरेजलंकृत्वा पंचपल्लवदूर्वांकुशादिभिरभिशेकंकुर्यात् ॥ आपोहिष्ठेतिनवऋग्भिः ॥ उषतीः कन्यलाइमाःपितृलोकात्पतिं यतीः ॥ अवदीक्षांपसृक्षतस्वाहा ॥ २ ॥ बृहस्पतिनावसृष्टांविश्वेदेवाअधारयन् ॥ वर्चोगोषुप्रविष्टंयत्तेनेमांसंसृजामसि ॥ ३ ॥ बृहस्पतिनावसृष्टांविश्वेदेवाअधारयन ॥ तेजोगोषुप्रविष्टंयत्तेनेमांसंसृजामसि ॥ ४ ॥ बृहस्पतिनावसृष्टांविश्वेदेवाअधारयन् ॥ भगोगोषुप्रविष्टोयस्तेनेमांसंसृजामसि ॥ ५ ॥ बृहस्पतिनावसृष्टांविश्वेदेवाअधारयन् ॥ यशोगोषुप्रविष्टंयत्तेनेमांसंसृजामसि ॥ ६ ॥ बृहस्पतिनावसृष्टांविश्वेदेवाअधारयन् ॥ पयोगोषुप्रविष्टंयत्तेनेमांसंसृजामसि ॥ ७ ॥ बृहस्पतिनावसृष्टांविश्वेदेवाअधारयन ॥ रसोगोषुप्रविष्टोयस्तेनेमांससृजामसि ॥ ८ ॥ यदिमेकेशिनोजनागृहेतंसमनर्तिषुरोदेनकृण्वंत्योऽघं ॥ अग्निष्ट्वातस्मादेनसः सविताचप्रमुंचताम् ॥ ९ ॥ यदीयंदुहितातवविकेश्यरुदद्गृहे रोदनेनकृण्वइत्या१घं अग्निष्ट्वातस्मादेनसः सविताचप्रमुंचताम् ॥ १० ॥ अक्षीभ्यामित्यथर्वाब्रह्मात्रिष्टुप्वरुणसूक्तजपेविनियोगः ॐअक्षीभ्यांतेनासिकाभ्यांकर्णाभ्यांछुबुकादधि ॥ यक्ष्मंशीर्षण्यंमस्तिष्कांजिह्वायाविवृहामिते ॥ १ ॥ ग्रीवाभ्यस्तउष्णिहाभ्यः कीक

साभ्याः अनूक्यात्॥ यक्ष्मन्दोषण्य१इमंसाभ्यांबाहुभ्यांविवृंहामिते ॥ २ ॥ हृदयात्तेपरिक्लोम्नोहलीक्ष्णात्पार्श्वाभ्यां ॥
यक्ष्मंमतस्नाभ्यांप्लीहोयन्कस्तेविवृंहामसि ॥ ३ ॥ आन्त्रेभ्यस्तेगुदाभ्योवनिष्ठोरुदरादधि॥ यक्ष्मंकुक्षीभ्यांप्लाशेर्नाभ्या
विवृंहामिते ॥ ४ ॥ ऊरुभ्यांतेअष्ठीवद्भ्यांपार्ष्णिभ्यांप्रपदाभ्यां ॥ यक्ष्मंभसद्य१श्रोणिभ्यांभासदंभंससोविवृंहामिते ॥
५ ॥ अस्थिभ्यस्तेमज्जभ्यः स्नावभ्योधमनिभ्यः ॥ यक्ष्मंपाणिभ्यामंगुलीभ्योनखेभ्योविवृंहामिते ॥ ६ ॥ अंगेअंगे
लोम्निलोम्नीयस्तेपर्वणिपर्वणि ॥ यक्ष्मंत्वचस्यंतवयंकश्यपस्यविवर्हेणविष्वंचंविवृंहामसि ॥ ७ ॥ अथपापहाविष्णु
सूक्तम् ॥ ॐव्यात्यापवमानोविशक्तः पापकृत्तया ॥ व्य१हंसर्वेणपाप्मनावियक्ष्मेणसमायुषा ॥ १ ॥ विग्राम्याः पशव
आरण्यैर्व्यापः स्तृष्टयासरन् ॥ व्य१हंसर्वेणपाप्मनावियक्ष्मेणसमायुषा ॥ २ ॥ वो३मेद्यावापृथिवीइतोविपंथानोदिशं
दिशं ॥ व्य१हंसर्वेणपा० ॥ ३ ॥ त्वष्टादुहित्रेवहतुंयुनक्तीतीदंविश्वंभुवनंवियाति ॥ व्य१हंसर्वेणपाप्मना० ॥ ४ ॥
अग्निः प्राणान्संदधातिचंद्रः प्राणेनसंहितः ॥ व्य१हंसर्वेणपाप्मना० ॥ ५ ॥ प्राणेनविश्वतोवीर्यंदेवाः सूर्यसमैरयन् ॥
व्य१हंसर्वेणपाप्मना० ॥ ६ ॥ आयुष्मतामायुष्कृतांप्राणेनजीवमामृथाः ॥ व्य१हंसर्वेणपाप्मना० ॥ ७ ॥ प्राणेनप्राणतां
प्राणेहैवभवमामृथाः व्य१सर्वेणपाप्मना० ॥ ८ ॥ उदायुषासमायुषोदोषधीनांरसेन ॥ व्य१हंसर्वेणपाप्मना० ॥ ९ ॥
अपर्जन्यस्यशुष्मयोदस्थामामृतावयं ॥ व्य१हंसर्वेणपाप्मना० ॥ १० ॥ ततः पूर्वोक्तवरुणसूक्तसूर्यसूक्तेयथाविधि
वियोगादिपठेत् ॥ सुरास्त्वामभिषिंचंतु ब्रह्माविष्णुमहेश्वराः ॥ वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः ॥ १ ॥
प्रद्युम्नश्चानिरुद्धश्च भवंतुविजयायते ॥ आखंडलोग्निर्भगवान् यमोवैनिर्ऋतिस्तथा ॥ २ ॥ वरुणः पवनश्चैवधना
ध्यक्षस्तथाशिवः ॥ ब्रह्मणासहिताः सर्वेदिक्पालाः पांतुमेसदा ॥ ३ ॥ कीर्तिर्लक्ष्मीधृतिर्मेधापुष्टिः श्रद्धाक्रि
यामतिः ॥ बुद्धिर्लज्जावपुः शांतिकांतिस्तुष्टिश्चमातरः ॥ ४ ॥ एतास्त्वामभिषिंचंतुदेवपत्न्यः समागताः ॥

आदित्यश्चंद्रमाभौमोबुधोजीवसितार्कजाः ॥ ५ ॥ ग्रहास्त्वामभिषिंचंतुराहुः केतुश्चतर्पिताः ॥ देवदानवगंधर्वा
यक्षराक्षसपन्नगाः ॥ ६ ॥ ऋषयोमुनयोगावो देवमातरएवच ॥ देवदैत्योद्रुमानागादैत्याश्चाप्सरसांगणाः ॥
७ ॥ अस्त्राणिसर्वशस्त्राणिराजानोवाहनानिच ॥ औषधानिचरत्नानि कालस्यावयवाश्चये ॥ ८ ॥ सरितः
सागराश्चैवतीर्थानिजलदानव ॥ एतेस्त्वामभिषिंचंतुसर्वकामार्थसिद्धये ॥ ९ ॥ ततः ग्रहाणामादिरादित्योलोकरक्षण
कारकः ॥ विषमस्थानसंभूतांपीडांदहतुतेरविः ॥ १ ॥ रोहिणीशः सुधामूर्तिरत्रिपुत्रः सुधाशनः ॥ विषमस्थानसं
भूतांपीडांदहतुतेविधुः ॥ २ ॥ भूमिपुत्रोमहातेजाजगतांभयकृत्सदा ॥ वृष्टिकृद्वृष्टिहर्त्ताचपीडांदहतुतेकुजः ॥ ३ ॥
उत्पातरूपोजगतांचंद्रपुत्रोमहाद्युतिः । सूर्यप्रियकरोविद्वान्पीडांदहतुतेबुधः ॥ ४ ॥ देवमंत्रीविशालाक्षोसदालोकहि
तेरतः ॥ अनेकशिष्यसंपूर्णः पीडांदहतुतेगुरुः ॥५॥ दैत्यमंत्रीगुरुस्तेषांप्राणदश्चमहाद्युतिः॥ प्रभुस्ताराग्रहाणांचपीडांद
हतुतेभृगुः ॥ ६ ॥ सूर्यपुत्रोदीर्घदेहोविशालाक्षः शिवप्रियः ॥ मंदचारः प्रसन्नात्मापीडांदहतुतेशनिः ॥ ७ ॥ महा
शनोमहावक्त्रोदीर्घदंष्टोमहाबलः ॥ अतनुश्चोर्ध्वकेशश्चपीडांदहतुतेतमः ॥ ८ ॥ अनेकरूपवर्णैश्चशतशोथसहस्रशः ॥
उत्पातरूपोजगतांपीडांदहतुतेशिखी ॥ ९ ॥ ततः कलशोदकेनान्येनच जलेनतैलाभ्यंगसर्वौषध्यनुलेपनपूर्वकं सुस्नातौ
दंपतीतैजसपात्रस्थ तैलेरूपमितिप्रतिबिंबमालोक्य॥ अभिषेककालीनवाससीपरित्यज्यअहत शुक्लवाससीपरिधायश्वेत
चंदनपुष्पधारणंकुर्यात् ॥ त्यक्तवासांस्याचार्यस्य ॥ अग्नेः पश्चादुपविश्यदक्षिणतः पत्नीं ॥ ततोविभूतिधारणंकृत्वा
ततोभुवनेश्वर्यादीनांउत्तरपूजनं कृत्वाविसर्जनंकुर्यात् ॥ ततः यजमानोआचार्यादीनांश्रेयोग्रहणंकुर्यात् ॥ वरणक्रमेण
ऋत्विजउदङ्मुखयजमानहस्तेश्रेयः संपादनंकुयुः॥ अथवासर्वेऋत्विजः आचार्यद्वाराश्रेयोदानंकुर्युः। तद्यथा॥ सग्रहमख
रजोदर्शनशांत्याख्येकर्मणि यजमानाज्ञयामयाएभिर्ब्राह्मणैः सहयत्कृतंआचार्यत्वंब्रह्मत्वादितदुत्पन्नश्रेयोदानंकरिष्ये ॥
यजमानः श्रेयोंगीकरणंकरिष्यइति ॥ शिवाआपः संतुसतुशिवाआपः॥ इतिप्रतिवचनं ॥ सौमनस्यमस्तुइतिपुष्पाणि ॥
अस्तुसौमनस्यम् ॥ अक्षतंचारिष्टंचास्तुइत्यक्षताः ॥ अस्त्वक्षतमरिष्टंच ॥ यत्पापमशुभंअकल्याणंतद्दूरेप्रतिहतमस्तु ॥

भवन्नियोगेनमयाअस्मिन्सग्रहमख रजोदर्शनशांत्याख्येकर्मणि यत्कृतमाचार्यत्वंतथाचएभिर्ब्राह्मणैः सहयतोहामः तथा चयत्कृतोजपः तथाचयत्कृतंब्रह्मत्वं ,॥ आचार्यत्वात्ब्रह्मत्वाद्धोमाज्जपात्यदुत्पंन्नं श्रेयस्तस्तुभ्यमहंसंमददे ॥ तेनश्रेय सात्वंश्रेयोवान्भव ॥ भवामीतितेनवाच्यं ॥ निर्मूलमिदंश्रेयः संपादनंतथापियजमानमनः प्रसन्नतायैउक्तं ॥ वस्तुतस्तु विद्वद्भिरुपेक्ष्यमिदंनिर्मूलत्वात् ॥ ततः आचार्यादीनांचरणक्षालनगंधाक्षत पुष्पवस्त्रालंकाादिभिः संपूज्यकृतस्यसनव ग्रहमखरजोदर्शनशांतिकर्मणः सांगतासिध्यर्थआचार्याय धेनुप्रतिनिधिभूतं यथाशक्तिद्रव्यंदातुमहमुत्सृजे ॥ रुद्रजापिने सदक्षिणंकृष्णमनड्वाहंदातुमहमुत्सृजे ॥ ऋत्विग्भ्योयथाशक्ति यथाविभागंदक्षिणांदातुमहमुत्सृजे ॥ अथमूर्त्तिदानं ॥ इमांसोपस्करांभुवनेश्वरीप्रतिमांग्रह पीठंचतुभ्यमहंसंप्रददेइत्याचार्यहस्तेप्रतिपादयेत् ततोग्निंविसृज्य ॥ गच्छगच्छसुरश्रेष्ठ स्वस्थानंपरमेश्वर ॥ यत्रब्रह्मादयोदेवास्तत्रगच्छहुताशन ॥ अर्चितोसिमयादेवशक्त्याश्रीयज्ञपूरुष ॥ अथगच्छमिहस्थान् मिहत्वंलौकिकोभवेतिविसृजेत् ॥ ततः महाशांतिंपठेत् ॥ कृतस्यसनवग्रहमखरजोदर्शनशांतिकर्मणः सांगतासिध्यर्थं भुवनेश्वरीद्राणींद्रप्रीत्यर्थंग्रहप्रीत्यर्थं चप्रत्येकंत्रीन्त्रीन्ब्राह्मणान्भोजयेत् ॥ नानागोत्रेभ्योब्राह्मणेभ्यः भूयसींदक्षिणां दातुमहमुत्सृजे ॥ मयायत्कृतंसग्रहमखरजोदर्शन शांत्याख्यंकर्मतत्कालहीनंभक्तिहीनंश्रद्धाहीनं ब्राह्मणानांवचनात् श्रीभुवनेश्वरीप्रसादात्तत्सर्वंपरिपूर्णमस्त्विनिभवंतोब्रुवंतु ॥ ॐअस्तुपरिपूर्णं ॥ यस्मात्कोशेतिमंत्रजपः ॥ अनेनसग्रह मखरजोदर्शनशांत्याख्येनकर्मणाश्रीभगवान्यज्ञरूपीपरमेश्वरः प्रीयतांनमम ॥ ततः विप्राशिषोगृहीत्वासुहृद्भिः समं भुंजीतेति ॥ एवंकृतेसर्वारिष्टशांतिर्भवतीति ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोग भानौषट्पन्नागरद्विवेदिरविशंकर कृतेशौनकोक्ताशयोद्घाटितसनिर्णयर्त्तुशांतिप्रयोगरश्मिस्त्रयोविंशः ॥ २३ ॥

अथसर्वसाधारणशांत्युपयोगिकर्मकर्त्तव्यक्रमः ॥ संकल्पस्वस्तिवाकूविप्रवरणंभूतिनिः सृतिः ॥ पंचगव्यैर्भूमि शुद्धिर्मुख्यदैवतपूजनं ॥ अग्निप्रतिष्ठासूर्यादिग्रहस्थापनपूजनं ॥ यथाक्रमंत्यागहोमाविति पूर्वांगकक्रामात् ॥ उत्तरांगं पुनः पूजावलिपूर्णाहुतितथा ॥ श्रेयः ग्राहोदक्षिणादिदानंकर्मेश्वरार्पणम् ॥ अभिदेकश्चसर्वत्रचेतिशांतिक्रमः शुभः ॥

अथचंद्रसूर्योपरागकालेप्रथमरजोदर्शनशांतिर्विधीयउच्यते ॥ शांतिरत्नेशौनकः ॥ ग्रहणेचंद्रसूर्यस्यप्रसूतिर्यदिजायते ॥ व्याधिपीडातदास्त्रीणामादौतुर्क्तुदर्शनात् इत्थंसंजायतेयस्यतस्यमृत्युर्नसंशयः व्याधिपीडाचदारिद्र्यंशोकश्चकलहोभ वेत् ॥ शांतिस्तेषांप्रवक्ष्यामिनरीणांहितकाम्यया ॥ अत्रशिष्टमूलवाक्यानिशांतिरत्नेज्ञेयानि ॥ ॥ अथप्रयोगः ॥ सूर्यग्रहणेरजोदर्शने हेमनिर्मितनक्षत्राधीशप्रतिमां सूर्यप्रतिमांचकृत्वा ॥ ततः राहोः सीसेननागाकृतिंकृत्वाशुभदिने शांतिंकुर्यात् ॥ चंद्रग्रहेराजतचंद्रबिंबंकुर्यात् ॥ अन्यद्वयंपूर्ववत् ॥ कर्त्तासभार्योदेशकालौसंकीर्त्य ॥ ममपत्न्याः सूर्यो परागेप्रथमरजोदर्शन सूचितारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं सग्रहमखांशौनकोक्तांशांतिंकरिष्ये ॥ चंद्रग्राहेतुमम पत्न्याः चंद्रोपरागेप्रथमरजोदर्शन सूचितारिष्टनिरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थंसग्रहमखां शांतिंकरिष्ये ॥ अत्रग्रह मखस्यानवश्यकत्वमितिकेचित् ॥ तत्रादौतिर्विघ्नतासिध्यर्थं महागणपतिपूजनपूर्वकंस्वस्तिपुण्याह वाचनंनांदिश्राद्धं शांतिकलशकरणंआचार्यादिवरणंच करिष्येइतिसंकल्प्य ब्रह्मजज्ञानंअंब्यसश्चेत्यादिपठित्वाएतानि यथाविधिकृत्वा ॥ ततः वृताचार्यः सर्षपविकीरणादिप्रार्थनांतंविधायः ततः शुचिदेशेगोमयोपलीप्तभूमौपंचवर्ण रजोभिरष्टदलंविरच्य तदुपरिनवंश्वेतवस्त्रमुदग्दिशंसंस्थाप्यतत्र यथाशक्तिपूर्वनिर्मितहेमप्रतिमायां विषासहिमितिमंत्रेण सूर्यमावाह्यतदुत्तरेसीस निर्मितराहुप्रतिमां ॥ दिव्यंचित्रंकौशिकोराहुस्त्रिष्टुप् राहुस्थापनेविनियोगः ॥ दिव्यंचित्रमितिमंत्रेणराहुंस्थापयामि ॥ तदुत्तरेयन्नक्षत्रग्रहणंतत्तन्नक्षत्रदेवताप्रतिमांयथाशक्तिस्वर्णनिर्मितांतत्तन्मंत्रैनाममंत्रैर्वाआवाह्य॥ नक्षत्रसूक्तेननक्षत्रस्थापनं॥ चित्राणिसाकंइतिनक्षत्रसूक्तंग्रहयज्ञेज्ञेयं ॥ नक्षत्रदेवतानामानितु ॥ अश्विनौ० ॥ यमः ॥ अग्निः ॥ प्रजापतिः॥ सोमः रुद्रः॥ अदितिः॥ बृहस्पतिः ॥ सर्पाः ॥ पितरः ॥ भगः ॥ अर्यमाः ॥ सविताात्वष्टा ॥ वायुः ॥ इंद्राग्निः मित्रः॥ इंद्रः ॥ निर्ऋतिः ॥ अपः ॥ विश्वेदेवाः ॥ विधिः ॥ विष्णुः ॥ वसवः ॥ वरुणः ॥ अजैकपात् ॥ अहिर्बुध्न्यः पुरुषः ॥ इत्याष्टाविंशतिनक्षदेवतानामानि ॥ एवंदेवतात्रयमावाह्यस्थापनमंत्रैः षोडशोपचारैः संपूज्य ॥ पूजाकालेचंद्रंश्वेतवस्त्रादि गंधमाल्यैः पूजयेत् ॥ सूर्यंरक्तचंदनपुष्पादिभिः ॥ राहुंकृष्णवर्णवस्त्रकस्तूरिलेपन कृष्णपुष्पैश्चसंपूजयेदिति ॥ नक्षत्र

बतानांयथोक्तविधिनाश्वेतचंदनादिना पूजनंकार्यम् ॥ ततोग्निंसंस्थाप्यग्रहस्थापनंचकृत्वा ॥ आधारावाज्यभागाभ्यात्ता
नादिपूर्वतंत्रंकृत्वासूर्यमष्टोत्तरशतसंख्याकाभिः॥ राहुंअष्टाविंशतिसंख्याकाभिः ॥ नक्षत्रदेवतांअष्टाविंशतिसंख्याकाभिः ॥
चरुघृततिलसमिधानियथाक्रमंहुत्वा ॥ एवंचंद्रग्रहेपि ॥ चंद्रमष्टोत्तरशतसंख्याकाभिः ॥ शेषंपूर्ववत् ॥ एवंहुत्वायजमाने
नत्यागः उदपात्रेसंपातश्चकार्यः ॥ तत्रायंक्रमः ॥ ॐविषासहिंसहमानंसासहानंसहीयांसं ॥ सहमानंसहोजितंस्वर्जितं
गोजितसंधनाजितं ॥ इडयंनाममहइंद्रमायुष्मान्भूयासं ॥ १ ॥ विषासहिंसहमानंसासहानंसहीयांसं ॥ सहमानंसहो
जितंस्वर्जितंगोजितंसंधनाजितं ॥ इड्यंनाममहइंद्र प्रियोदेवानांभूयासं ॥ २ ॥ विषासहिंसहमानंसासहानंसहीयांसं ॥
सहमानंसहोजितंस्वर्जितंगोजितंसंधनाजितं॥ इडयंनाममहइंद्र प्रियः प्रजानांभूयासं॥३॥ विषासहिंसहमानंसासहानंसही
यासं ॥ सहमानंसहोजितंस्वर्जितंगोजितंसंधनाजितं॥ इडयंनाममहइंद्रं प्रियः पशुनांभूयासं ॥ ४ ॥ विषासहिंसहमानं
सासहानंसहीयांसं ॥ सहमानंसहोजितंस्वर्जितंगोजितंसंधनाजितम् ॥ इडयंनाममहइंद्रं प्रियः संभानानांभूयासम् ॥ ५ ॥
उदिह्युदिहिसूर्यवर्चसामाभ्युदिहि ॥ द्विषंश्चमह्यंरध्यतुमाचाहंद्विषतेरधंतवेद्विष्णोबहुधावीर्याणि ॥ त्वन्नःपृणीहिपशुभि
र्विश्वरूपैः सुधायांमाधेहिपरमेव्योमन ॥ ६ ॥ उदिह्युदिहिसूर्यवर्चसामाभ्युदिहि ॥ योंश्चपश्यामियोंश्चनतेषुमासुमतिं
कृधितवेद्विष्णोबहुधावीर्याणि ॥ त्वन्नः पृणिहि पशुभिर्विश्वरूपैः सुधायांमाधेहिपरमेव्योमन् ॥ ७ ॥ मात्वादभन्सलिले
अप्स्वं१तर्येपाशिनंउपतिष्ठंत्यत्र ॥ हित्वाशस्तिंदिवमारुक्षएतांसनोमृडसुमतौतेस्यामतवेद्विष्णोबहुधावीर्याणि ॥ त्वन्नः
पृणीहिपशुभिर्विश्वरूपैः सुधायांमाधेहिपरमेव्योमन् ॥ ८ ॥ त्वन्नइंद्रमहतेसौभगायदब्धेभिः परिपाह्यक्तुभिस्तवे
द्विष्णोबहुधावीर्याणि॥ त्वन्नःपृणीहिपशुभिर्विश्वरूपैः सुधायांमाधेहिपरमेव्योमन ॥ ९ ॥ त्वन्नइंद्रोतिभिः शिवाभिः

शंतमोभव ॥ आरोहं स्त्रिदिवंदिवोगृणानः ॥ सोमपीतयेप्रियधामास्वस्तयेतवेद्विष्णोबहुधावीर्याणित्वन्नः पृणीहिपशुभि
र्विश्वरूपैः सुधायांमाधेहिपरमेव्योमन् ॥ १० ॥ स्वाहेतिप्रतिऋचंवाच्यं ॥ ॐदिव्यंचित्रंमृतूनायाकल्पयंतमृतूनामुग्रंभ्र
मरंतुदेतितदादित्यः प्रतरंनेतुआपइमांल्लोकाननुसंचरंति ॥ ओषधीभिः संविदानाविंद्राग्नीत्वाभिरक्षतां ॥ ऋतेनसत्य
वाकेनतेनसर्वंतमोजह्यादित्यायस्वाहेति ॥ इतिमंत्रेणराहुंजुहुयात् ॥ इतिऋतुमत्याशिरसिसंपातान्दत्वा ॥ अभ्यात्ता
नादिपूर्ववदुत्तरतंत्रंसमाप्यपूर्वोक्तरीत्या पूर्णाहुतिंकृत्वाब्राह्मणैश्चाभिशेकः कर्त्तव्यः ॥ शांताद्यौरितिशांतिसूक्तं पठित्वा
ब्राह्मणभोजनसंकल्पः ॥यस्मात्कोशेतिकृतंकर्मेश्वरार्पणंकुर्यादिति ॥ ॥ अथचंद्रग्रहणकालेऋतुप्राप्तौविशेषः ॥ राहु
राजानंत्स्वरति स्वरतिस्वरंतमेनमिहहंतिपूर्वः ॥ सहस्रमस्यतन्वइहानात्याशतं तन्वोविनश्यतुचंद्राय स्वाहेतिहुत्वाशकधूमं
नक्षत्राणीत्यंतेनसूक्तेनजुहुयात्सातत्रप्रायश्चित्तिः ॥ इतिचंद्रग्रहणेविशेषःअन्यत्सर्वंपूर्ववदिति ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोग
भानौषट्पन्नागरद्विवेदिरविशंकरकृते सूर्यचंद्रोपरागकालेप्रथम रजोदर्शनशांतिक्रमप्रयोगरश्मिश्चतुर्विंशः ॥ २४ ॥

श्रीकृष्णायनमः ॥ श्री ॥ अथगर्भाधानम् ॥ तदुपयोगिप्रसंगात्किंचिज्छास्त्रार्थोनिर्णीयते ॥ प्राक्रजोदर्शना
त्पत्नीगमनेब्रह्महत्यादोषोक्तेः ॥ किंचित्प्राजापत्यंविधेयमितिभाति ॥ यत्रोक्तंयत्रवानोक्तंप्राजापत्यमुदीरयेदिति
वचनात् ॥ अत्यंताशक्तेनप्राजापत्यात्मकं प्रायश्चितंकार्यंनतन्न्यूनं ॥ देशकालावुच्चार्यममप्राक् रजोदर्शनात्पत्नीगमन
जनितब्रह्महत्यादिदोषपरिहारार्थमेकंप्राजात्यात्मकं प्रायश्चितंतत्प्रत्याम्नायेनगोनिष्क्रयभूतं यथासंभवद्रव्यदानेनाहमा
चरिष्येतिसंकल्प्य ॥ तद्रव्यंब्राह्मणायदत्वा ॥ ऋतौतुगमनमावश्यकं ॥ अन्यथाभ्रूणहत्यासंभवदोषः ॥ अयंचमनसि
कामेसति ॥ द्वेषादिनास्त्रियमनुपगच्छताज्ञेयः ॥ विरक्तस्यनकोपिदोषइति ॥ श्रीमद्भागवतेलोकेव्यवायेतिस्पष्टंकृतं ॥
ऋतुकालस्तुरजोदर्शन दिनमारभ्यषोडशदिनपर्यंतंज्ञेयः ॥ तत्रप्रथमदिनचतुष्टयैकादश त्रयोदशदिनेषुगमनंवर्ज्यं ॥
अवसिष्टदशदिनेषु पुत्रार्थिनासमदिनेकन्यार्थिना विषमदिनेगमनंकार्यं ॥ तत्राप्युत्तरोत्तररात्रीणांप्राशस्त्यं ॥ एकस्यां

रात्रौसकृदेवगमनंकार्यं ॥ सकृद्गमनंचयुग्मासुसार्वासुआवश्यकमितिकेचित् ॥ अन्यकालेप्रतिबंधादिनागमनासंभवेश्राद्धे कादश्यादिदिनेपिऋतुगमनं कार्यमितिकेचित् ॥ स्त्रीणांवरमनुस्मरन पत्नीछयानृतावपिगछन्नदोषभाक् ॥ किंतुब्रह्म चर्यहानिमात्रं ॥ ऋतौगछतियोभार्यामनृतौनैवगछति ॥ यावज्जीवंब्रह्मचारिमुनिभिः परिकीर्त्तितः ॥ अष्टमीचतुर्दशीपौ र्णिमामावास्यासूर्यसंक्रांतिवैधृतव्यतिपातपरिघपरिघपूर्वदलंत्रिष्टि संध्यासुमातापित्रोर्मृतदिनेश्राद्धतत्प्राक् दिनेजन्मनक्षत्रे दिवाचस्त्रीगमनंवर्ज्यम् ॥ अथगर्भाधानकालः ॥चतुर्थीषष्ठीचतुर्दश्यष्टमी पंचदशीरहितास्तिथयः प्रशस्ताः ॥ चंद्रगुरुबुध शुक्रवाराःशुभाः ॥ मूलमघारेवतीज्येष्टादिनि ऋक्षाणिवर्ज्यानि ॥ भरणीकृत्तिकाद्राश्लेषापूर्वात्रयवि शाखामध्यमानि ॥ शेषाणिशुभानि ॥ सर्वकर्मसुचंद्रवलंग्राह्यं ॥ चंद्रान्नप्रधानंसौख्यंरोगंकार्यंश्रियंक्षितिं ॥ स्त्रियंमृत्युंनृपभयंसुखमायुंन्यक्र मात् ॥ स्छानेषुद्वादशस्वैतज्जन्मराशेः प्रयछति ॥ शुक्लपक्षेशशिश्रेष्टोद्विपंचनवमेष्वपि ॥ अनेकभार्यस्यऋतुयौगपद्ये विवाहक्रमेणऋतुक्रमेणवागर्भाधानं ॥ ऋतावप्यगमनदोषपवादः ॥ व्याधितोबंधनस्थोवाप्रवासेष्वथपर्वसुः वृद्धांवंध्याम सद्वृत्रांमृतापत्यामपुष्पिणीं ॥ कन्यासुबहुपुत्राश्चअगछन्नैवदोषभाक् ॥ गर्भाधानस्यकर्त्ताभर्तैवनान्यः ॥ अयंगृह्याग्नौकार्य इतिमुख्यःपक्षः ॥ तदभावेलौकिकाग्नावेवहोमःकार्यः ॥ येषांसूत्रेहोमोनोक्तस्तैर्होमवर्ज्यमंत्रपाठादिरूपःगर्भाधानसंस्कारः कार्यः प्रथमगमनेइतिनिर्णयः ॥ ॥ अथगर्भाधानप्रयोगः ॥ दंपत्योः प्रातरभ्यंगंकृत्वामंगलवस्त्राभरणादि धृत्वाजीवास्थेतिमंत्रेणविधिवदाचम्य ब्रह्मजज्ञानंअव्यसश्चेतिपठित्वा देशकालौस्मृत्वा ॥ ममभार्यायाः प्रतिगर्भ संस्कारातिशयद्वाराऽस्यांजनिष्यमाण सर्वगर्भाणांबीजगर्भ समुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थंगर्भाधानाख्यं कर्मकरिष्ये ॥ तत्रादौगणपत्यंबिकयोः पूजनपूर्वकंस्वस्तिपुण्याहवाचनंकृत्वा ॥ पुण्याहांतेपूर्वोक्तप्रकारेणाग्निंसंस्थाप्य मारुतनामानमग्निंसंपूज्य ॥ आगमकृशरंचरुद्वयंश्रपयित्वाऽभ्यात्तानादि पूर्वतंत्रंकृत्वा ॥ पर्वतादिवेतिसूक्तेनप्रथमचरौ संपातानद्द्यात् ॥ तद्यथा ॥ पर्वतादिवेतित्रयोदशर्चस्यसूक्तस्याथर्वाधाताइंद्रादिदेवताः त्रिष्टुपादिछंदांसिचरुसंपाताज्य होमेवियोगः ॥ ॐपर्वतादिवोयोनेरंगांदंगासमाभृतम् ॥ शेपोगर्भस्यरेतोधासरौपर्णमिवादधत्स्वाहा ॥ प्रजापतयइदंन

मम ॥ १ ॥ यथेयंपृथिवीमहिभूतानांगर्भमादधे ॥ एवादधामितेगर्भंतस्मैत्वामवंसेहुवेस्वाहा ॥ २ ॥ गर्भंधेहिसिनी वालीगर्भंधेहिसरस्वति ॥ गर्भंतेअश्विनोभाधत्तांपुष्करस्रजास्वाहा ॥ ३ ॥ गर्भंतेमित्रावरुणौगर्भंदेवोबृहस्पतिः ॥ गर्भंतइंद्रश्चाग्निश्चगर्भंधातादधातुतेस्वाहा ॥ ४ ॥ विष्णुर्योनिंकल्पयतुत्वष्टारूपाणिपिंशतु ॥ आसिंचतुप्रजातिर्धाता गर्भंदधातुतेस्वाहा ॥ ५ ॥ यद्वेदराजावरुणोयद्वादेवीसरस्वति ॥ यदिंद्रोवृत्रहावेदतद्गर्भकरणंपिबत्स्वाहा ॥ ६ ॥ गर्भोअस्यौषधीनांगर्भोवनस्पतीनां ॥ गर्भोविश्वस्यभूतस्यसोअग्नेगर्भमेहधाः स्वाहा ॥ ७ ॥ अधिस्कंदवीडयस्व गर्भमाधेहियोन्यां ॥ वृषासिवृष्ण्यावान्प्रजायैत्वानयामसिस्वाहा ॥८॥ विजिहीष्वबार्हत्सामेगर्भस्तेयोनिमाशयाम् ॥ अदुष्टेदेवाः पुत्रंसोमपाउभयाविनंस्वाहा ॥९॥ धातश्रेष्ठेनरूपेणास्यानार्यागवीन्योः ॥ पुमांसंपुत्रमाधेहिदशमेमासिसूतवे स्वाहा ॥ १० ॥ त्वष्टः श्रेष्ठेनरूपेणास्यानार्यागवीन्योः ॥ पुमांसंपुत्रमाधेहिदशमेमासिसूतयेस्वाहा ॥ ११ ॥ इदंधात्रे नमम ॥ सवितः श्रेष्ठेनरूपेणास्यानार्याः गवीन्योः ॥ पुमांसंपुत्रमाधेहिदशमेमासिसूतयेस्वाहा ॥ इदंधात्रे० ॥ १२ ॥ प्रजापतेश्रेष्ठेनरूपेणास्यानार्याः गवीन्योः ॥ पुमांसंपुत्रमाधेहिदशमेमासिसूतयेस्वाहा ॥ इदंधात्रेनमम ॥ १३ ॥ इति सूक्तेनसंपात्यद्वितीयाहुत्या तेनैवसूक्तेनाभिमंत्र्यततोतृतीया हुत्याद्वितीयंचरुंयुगछीद्रेणपुनस्ते नैवसूक्तेनसंपात्यपुनस्ते नैवाभिमंत्र्यपर्वतादिवेतिसूक्तेनप्रत्यृचंभार्यायैप्राशयेत् ॥ ततोभ्यात्तानाद्युत्तरतंत्रंसमाप्य ॥ अस्यगर्भाधानाख्यकर्मणः सांगतासिध्यर्थंइदंगोदानंनिष्क्रयद्रव्यंआचार्यायतुभ्यम० ॥ अस्यकर्मणः प्रादुर्गुणार्थंयथोत्साहाभूयसींनानागोत्रेभ्यो ब्राह्मणेभ्यः० ॥ अस्यकर्मणः सांगतांसिध्यर्थंयथाशक्तिस्मृत्युक्तान्ब्राह्मणान्भोजयिष्ये ततः शांताद्यौरितिशांतिसूक्तं जपेत् ॥ एवंदिवसकर्मपरिसमाप्यततःरात्रौवक्षमाणंकर्मकुर्यात् ॥ केलूनांपलाशंखदहृष्टयानिघृष्टयपर्वतादिवेतिसूक्तेनाभि मंत्र्यशिश्नेसंलिप्यमैथुनंकुर्यात् ॥ सिक्तेरेतसिस्त्रीमुखेभूर्भुवः स्वर्जनदोमि[illegible]निश्वासंमुमुचेत् ॥ ऋतौगमनेतु

स्नानंअनृतातुस्नानाभावः ॥ अनृतौतुयदागलेच्छौचंमूत्रपुरीषवदिसूक्तेः ॥ इतिगर्भाधानविषयोयंसूत्रोक्तएकः पक्षः ॥ अथचद्वितीयपक्षमाश्रित्यगर्भाधानमुच्यते ॥ ॥ गणपतिपूजनाद्यारभ्यात्तानादिपूर्वतंत्रस्तुपूर्ववत् ॥ अभ्यात्तानांते मधुमंथेशमिमश्वत्थेतिसूक्तेनाग्निनिक्षिप्य ॥ तद्यथा ॥ शमीमश्वत्थेतिषर्डचसूक्तस्याथर्वाप्रजापतिरनुष्टुप् ॥ मधुमंथेऽग्नि निक्षेपणेविनियोगः ॥ ॐशमीमश्वत्थाआरूढस्तत्रपुंसवनंकृतं ॥ तद्वैपुत्रस्यवेदनंतत्स्त्रीष्वाभरामसि ॥ १ ॥ पुंसिवैरेतो भवतितत्स्त्रीयामानुषिच्यते ॥ तद्वैपुत्रस्यवेदनंतत्प्रजापतिरब्रवीत ॥ २ ॥ प्रजापतिरनुमतिसिनीवाल्यचीक्लृपत् ॥ स्त्रैपूयमन्यत्रदधत्पुमांसंमुदधदिह ॥ ३ ॥ परिधामिवम्) हस्तावर्त्तकंकणादिकंयंतासीति सूक्तनसंपात्याभिमंत्र्य बध्नाति ॥ तद्यथा ॥ यंतासोतिसूक्तस्याथर्वालिंगोक्तादेवता त्रिष्टुबादिनिछंदांसिगर्भाधानकर्मणि हस्तकंकणसंपाताज्य होमेविनियोगः ॥ ॐयंतासियच्छसेहस्तावपरक्षांसिसेधसि सेधसो ॥ प्रजांजनंवगृह्णनः परिहस्तोअभूदयं ॥ १ ॥ परिहस्त विधारययोनिंगर्भ,यधातवे ॥ मर्यादेः पुत्रमाधेहित्वंतमागमयागमे ॥ २ ॥ यंपरिहस्तमविभरदितिः पुत्रकाम्या ॥ त्वष्टातमस्याआबध्नायथापुत्रंजनादिति ॥ ३ ॥ आगछंतआगतस्यनामगृह्णाम्यागतः ॥ इंद्रस्यवृत्रघ्नोवन्वे वासवस्यशतक्रतोः ॥ ४ ॥ येनसूर्यांसावित्रिमश्विनोहतुः पथा ॥ तेनमामब्रवीद्भगोजायामावहतादिति ॥ ५ ॥ यस्ते कुशोवसुदानोबृहन्निंद्रहिरण्ययः ॥ तेनाजनियतेजायांमह्यंवे,हिशचिपतेस्वाहा ॥ ६ ॥ इंद्रायनममेतित्यागः संपातश्च भार्यायाहस्तकंकणेपुनस्तेनैवसूक्तेनकंकणमभिमंत्र्यबंधयेत् अभ्यात्तानाद्युत्तरतंत्रस्तुपूर्ववत् ॥ पूर्वोक्तंरात्रिकर्मापितद्वत्॥ यस्मात्कोशेतिकर्मसमापनं ॥ शांताद्यौरितिसूक्तपाठः ॥ कृतंकर्मेश्वरार्पणंकुर्यादिति ॥ ॥ इतिश्रीमदथर्ववेदगृह्यसूत्रप्रयोग भानौषट्पत्नागरद्विवेदिरविशंकरकृतेगर्भाधानसंस्कारा प्रयोगरश्मिपंचविंशः ॥ २५ ॥

॥ अथपुंसवनप्रयोगरश्मिप्रारंभः ॥ तच्चव्यक्तेगर्भेद्वितीये तृतीयेमासिचतुर्थे षष्ठेऽष्टमेवामासिसीमंतेनवा सहकार्यम् ॥ शुक्लपंचम्यारभ्यकृष्णपंचमीपर्यंतं चतुर्दशीचतुर्थीनवमी पंचदशीवर्जितेतिथौसूर्यभौमगुरुवासरेषुप्रसिद्धं॥ केचिच्चंद्रबुधशुक्रवाराःकथ्यंते ॥ नक्षत्राणितुपुंनामकानिप्रशस्तानीतिकथ्यंते ॥ पुष्यश्रवणहस्तपुनर्वसुमृगाभिजित् मूलानुराधाश्विनीति ॥ अत्रपुष्योमुख्यः तदभावेश्रवणंतदभावेहस्तादि ॥ गर्भाधानसीमंतोन्नयनेतुस्त्रीसंस्काराः प्रति गर्भंनावर्त्तते ॥ किंतुप्रथमगर्भएवकार्याः ॥ प्रथमगर्भालाभेतुप्रतिगर्भेतेषांप्रायश्चित्तमावश्यकम् ॥ नचप्रथमापत्येतयोः प्रायश्चित्तेनद्वितीयादिगर्भाणांसंस्कारसिद्धिर्भवति ॥ प्रायश्चित्तेनपरिहारमात्रंनतत्पूर्वाख्यातिशयोत्पादनं ॥ तत्तुसंस्कार विधिनैवेतियुक्तंप्रतिगर्भप्रायश्चित्तं ॥ प्रतिसंस्कारंपादकृच्छ्रंबुद्धिकृतलोपेद्विगुणम् ॥ पुंसवनेप्रतिरेवकर्त्तानान्यइति ॥ अथप्रयोगः ॥ अथज्योतिर्विदुपदिष्टेसुमुहूर्ते कृतनित्यक्रियोयजमानः श्रीपर्ण्यादिप्रशस्तदारुमयेपीठेसपत्नीकः प्राङ् मुखोपवीश्यजीवास्थेति मंत्रेण विधिवदाचम्यब्रह्मजज्ञानंअव्यसश्चेतिपठीत्वा विघ्नत्यंतंसंकल्पंविधायदेशकालौसंकीर्त्य ममास्याःभार्यायाः प्रतिगर्भबीजसमुद्भवैनोनिवर्हणद्वारा प्रतिगर्भसंस्कारार्थं क्षेत्रशुध्यर्थंचपुंसवनाख्यं कर्माहंकरिष्ये इतिसंकल्पः ॥ ततः गणेशांबिकयोःपूजनंमातृपूजानांदी श्राद्धस्वस्तिपुण्याहवाचनांतंकर्मकृत्वा ॥ ॥ अव्यसश्चेतिवेद्या मग्निंसंस्थाप्याभ्यात्तानादिपूर्वतंत्रंकृत्वा ॥ रजउद्वासायाभार्यायाःशरमणिंसंपात्याभिमंत्र्यबंधयेत् ॥ तद्यथा ॥ येनवेह दितिसूक्तस्याथर्वाब्रह्मात्रिष्टुप्शरमणिसंपाताज्यहोमेविनियोगः॥ ॐयेनवेहद्बभूविथनाशयामसितत्वत् ॥ इदंतदन्यत्रत्व दपदूपनिदध्मसि ॥ १ ॥ आतेयोनिंगर्भएतुपुमान्बाणइवेषुधिं ॥ आविरोत्रजायतांपुत्रस्तेदशमास्यः ॥ २ ॥ पुमांसं पुत्रंजनयंतपुमाननुजायतां ॥ भवासिपुत्राणां माताजातानांजनयाश्चयां ॥३॥ यानिभद्राणिबीजान्यृषभाजनयंतिच॥ तैस्त्वंपुत्रंविंदस्वसाप्रसूर्धेनुकाभव ॥ ४ ॥ कृणोमितेप्राजापत्यमायोनिंगर्भएतुते ॥ विंदस्वत्वं पुत्रंनारीयस्तुभ्यंशमस च्छमुतस्मैत्वंभव ॥ ५ ॥ यासांद्यौःपितापृथिवीमातासमुद्रोमूलंवीरुधांबभूव ॥ नास्त्वापुत्रविद्यायदैवीःप्रावंत्वोषधयः

॥ ६ ॥ इतिसंपात्यपुनस्तेनैवसूक्तेनाभिमंत्र्यभार्यायाशिरसिबंधयेत् ॥ अभ्यात्तांनाद्युत्तर तंत्रंसमाप्य ॥ आचार्यायगां दत्वा ॥ अन्येभ्यःभूयसींदद्यात् ॥ स्मृत्युक्तान्ब्राह्मणान्भोजयेत् ॥ यस्मात्कोशेति कर्मसमापनीयंमंत्रंजप्त्वाकृतंकर्मेश्वरार्पणंकुर्यात ॥ कर्मसमाप्तौशांताद्यौरिशांतिसूक्तंजपेत् ॥ इत्येकंपुंसवनम् ॥ अथत्रागणपतिपूजनादि पुण्याहांतंकर्मकृत्वा येनवेहदितिसूक्तेनकेवलं बाणमभिमंत्र्यस्त्रीमूर्द्धिन् बंधयेन्नात्राग्नि स्थापनादिकर्मभवतीति द्वितीयंपुंसवनं ॥ अथतृतीयं पुंसवनं ॥ तत्रगणपत्यंबिकांपूजनादि पुण्याहांतपुर्ववत्कृत्वा ॥ फाल्गुनमसेसरूपवत्साया दुग्धं निक्षिप्यतत्रव्रीहियवा न्धायसूर्छयित्वा तत्राध्यांडावृहतीवापलाशविदारीयेनवेहदिति सूक्तेनपिष्ट्वांपुनस्तेनैवसूक्तेनाभि मंत्र्यभर्त्तास्वदक्षणांगुष्ठेनभार्याया दक्षिणस्यांनासिकायांतेनैवसूक्तेननिर्षिंचेत् ॥ नात्राग्निस्थापनादि ॥ शेषंपूर्ववत् ॥ इतितृतीयंपुंसवनं ॥ अथचतुर्थंपुंसवनम् ॥ गणपत्यंबिकापूजनादिसर्वंपूर्ववत् ॥ मधुमंथे अग्निंनिक्षिप्यशमीमश्वत्थेतिसूक्तेनाभिमंत्र्यभार्यायै भर्त्तापाययतियद्वास्त्री ॥ शमीमश्वत्थेतिषडर्चस्यसूक्तस्याथर्वाप्रजापतिरनुष्टुप् पुंसवनमधुमंथपानेविनियोगः ॥ ॐशमी मश्वत्थ आरूढस्तत्रपुंसवनंकृतं । तद्वैपुत्रस्यवेदनंतत् स्त्रीष्वाभरामसि ॥ १ ॥ पुंसिवैरेतोभवति तत्स्त्रियामनुषिच्यते ॥ तद्वैपुत्रस्यवेदनंतत्प्रजापतिरब्रवीत् ॥ २ ॥ प्रजापतिरनुमतिसिनीवाल्यचीक्लृपत् ॥ स्त्रैषूयमन्यत्रदधत्पुमांसमुदधदिह । ३ ॥ परिष्वामिवसूर्योहिनांजनिमागमं ॥ रात्रिजगदिवान्यद्धंसातेनातेवारयेविषं ॥ ४ ॥ यद्ब्रह्मभिर्यदृषिभिर्यद्देवैर्विदितंपुरा ॥ यद्भूतंभव्यमासन्वतेनातेवारयेविषं ॥ ५ ॥ मध्वोपृंचेनद्यः पर्वतागिरयोमधु ॥ मधुपरुष्णीशीपालाशमास्तेअस्तुशंहृदे ॥ ६ ॥ इत्यभीमंत्र्यपाययेत्तेनैवसूक्तेन ॥ नात्रांग्निस्थापनादिकंकर्मशेषंपूर्ववत् ॥ इतिचतुर्थं पुंसवनं ॥ अथपंचमंपुंसवनं ॥ गणेशांबिकयोःपूजनादिसर्वंपूर्ववत् ॥ अव्यसश्चेत्यग्निंप्रतिष्ठाप्य ॥ शमीगर्भाश्वत्थस्य अग्निंकृष्णोरणयावेष्ठयोस्त्वा पूर्वोक्तेनशमीमश्वत्थेतिसूक्तेनसंपातानदत्वा पुनस्तेनैवाभिमंत्र्यभर्त्ताभार्यायाः कंठेबंधयेत्॥ अभ्यात्तानाद्युत्तरतंत्रंसमाप्यसर्वंपूर्ववत् ॥ इतिपंचमपुंसवनं ॥ अत्रपक्षपंचकानांपुंसवनानांकरणेफलाधिक्यंसकृत्करणे

संस्कारमात्रंनतुफलाधिक्यं ॥ इदंपक्षपंचकं पुंसवनंकर्मसग्रहमस्वंकार्यंदुष्टस्थानस्थित सूर्यादिग्रहजनितपीडोपशांतये लोकाचाराश्चेति ॥ ॥ इतिश्रीमदथर्ववेदसूत्रप्रयोगभानौषट्पदागर द्विवेदिरविशंकरकृतेपुंसवनपंचकसंस्कारप्रयोग रश्मिःषड्विंशः ॥ २६ ॥

॥ अथगर्भरक्षणप्रयोगरश्मिः ॥ तत्रादौकृतनित्यक्रियोयजमानो श्रीपर्ण्यादिप्रशस्तदारुमयेपीठेउपविश्य जीवास्थेतिविधिवदाचम्यत्यसूषुइति स्वस्त्ययनसूक्तेनमंगलतिलकादिकंकृत्वा शांतयेब्रह्मजज्ञानं अव्यसश्चेतिपठित्वा ॥ सुमुखश्चेत्यादि प्रयोगंपठित्वा देशकालौसंकीर्त्यममास्याभार्या याउदरस्थगर्भरक्षणार्थं कर्माहंकरिष्ये इतिसंकल्पः ॥ गणेशांबिकयोःपूजनादिपुण्याहवाचनांतं कर्मकृत्वा अव्यश्चेत्यारभ्याग्नि प्रतिष्ठापनांतंचकृत्वाभ्यात्तानादि पूर्वतंत्रं विधाय ॥ ततःधनुर्ज्यांत्रिरुद्ग्रंथ्यब्रह्माग्रेसंस्थाप्य ऋधङ्मंत्रेत्यंगिराब्रह्मानुष्टुप् गर्भरक्षणकर्मणि धनुर्ज्यासंपाताज्य होमेविनियोगः ॥ ऋधङ्मंत्रः ॥ अष्टोत्तरसहस्रंवाष्टोत्तरशतं वाष्टाविंशतिअष्टौवासंपात्याभिमंत्र्यतेनैवमंत्रेणबंधयेत् ॥ अभ्यात्तानाद्युत्तरतंत्रंसमाप्य ॥ आचार्यायगां ॥ अन्येभ्योब्राह्मणेभ्यो भूयसींयथाशक्ति ॥ स्मृत्युक्तान्ब्राह्मणान् भोजयेत् ॥ व्रतेभ्योब्राह्मणेभ्योयथाविधि दक्षणांदत्वायस्मात्कोशेति कर्मसमापनीयमंत्रंजप्त्वा शांताद्यौरितिशांतिसूक्तं पठित्वा कृतंकर्मेश्वरार्पणंकुर्यादिति ॥ इत्येकंगर्भरक्षणम् ॥ अथद्वितीयंगर्भरक्षणं ॥ गणपत्यंबिकापूजनसंकल्पादिसर्वं पूर्ववत् ॥ पूर्ववदग्निंसंस्थाप्य ॥ धनुर्ज्यांत्रिरुद्ग्रंथ्यब्रह्माग्रेसंस्थाप्य ॥ यथेयंपृथिवीतिचतुर्ऋचसूक्तस्यब्रह्मापृथिव्यनुष्टुप्॥ धनुर्ज्यासंपाताज्यहोमेविनियोगः ॥ ॐयथेयंपृथिवीमहिदाधारेमान्वनस्पतीन् ॥ एवातेध्रीयतां गर्भोअनुसूतुंसवितवे ॥ १ ॥ यथेयंपृथिवीमहिदाधारपर्वतान्गिरीन् ॥ एवातेध्रीयतांगर्भोअनुसूतुंसवितवे ॥ २ ॥ स्वाहा ॥ पृथिव्याइदंनमम यथेयंपृथिवीमहिदाधारविष्ठितंजगत् ॥ एवातेध्रीयतां० ॥ स्वाहाइदंपृथिव्यै ॥ ३ ॥ यथेयंपृथिवीमहिभूतानांगर्भमादधे ॥ एवातेध्रियतांगर्भोअनुसूतुंसवितवेस्वाहा ॥ पृथिव्याइदंनमम ॥ ४ ॥ इतिसूक्तं ॥ तथाचअच्युताद्यौरेतिसूक्तेन

संपात्याभ्यांसूक्ताभ्यामभिमंत्र्यकटयांबंधयेत् ॥ अभ्यात्तानाद्युत्तरतंत्रस्तुपूर्वस्तुपूर्ववत् ॥ इतिद्वितीयंगर्भरक्षणं ॥ अथ तृतीयं ॥ संकल्पादिपुण्याहांतंसर्वंपूर्ववत् ॥ ऋषङ्मंत्रेतिएकाऋक् ॥ यथेयपृथिवीतिसूक्त० ॥ अच्युताद्यौरितिसूक्तं० ॥ एतैःक्षेत्रलोष्टमृत्तिकामभिमंत्र्यगर्भिणींप्राशयेत्प्रत्यृचं ॥ शेषंपूर्ववत् ॥ नात्राग्निस्थापनंकार्यं ॥ इतितृतीयंगर्भरक्षणंकर्म ॥ अथचतुर्थं ॥ संकल्पादिपुण्याहांतंसर्वंपूर्ववत्कृत्वा ॥ ऋषङ्मंत्रमित्येकयर्चा१कृष्णसिकतामभिमंत्र्य गर्भिण्याःशयनं परिकिरतिभर्त्ता ॥ अन्यत्सर्वंपूर्ववत् ॥ इतीचतुर्थंगर्भरक्षं ॥ अथपंचमं ॥ संकल्पादिकंपूर्ववत् ॥ पूर्वोक्ताभ्यांयथेयं पृथिवी अच्युताद्यौरितिसूक्त.भ्यांश्यामसिकतामभिमंत्र्यगर्भिण्याःशयने प्रत्यृचंपरिकिरति ॥ इतरत्सर्वंपूर्ववत् ॥ एषु सर्वेषुगर्भाधानादिसंस्कारेषु पुण्याहहोमोकर्त्तव्यः ॥ तदग्रेसीमंतप्रकरणेवक्ष्यामः ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोग भानौषट्पत्नागरद्विवेदिरविशंकरकृतेगर्भरक्षणपंचकप्रयोगरश्मिःसप्तविंशः ॥ २७ ॥ श्रीरस्तु ॥

॥ अथवीरकर्मप्रयोगरश्मिः ॥ कृतनित्यक्रियोयजमानःकृत स्वस्त्ययनतिलकोआचांत आसनेउपविश्य सुमुखश्चेदिविप्रनत्यतंविधाय ॥ हस्तेजलमादायममास्यां भार्यायाजनिष्यमाणगर्भस्यवीर्यत्वादिप्राप्तये वीरकर्माहं करिष्येइतिसंकल्प गणपतिस्मरणं ॥ अत्रगणपतिपूजनादि नांदिश्राद्धांतंकर्मकृताकृतं ॥ ततोभार्याया उदरंअभिमृशति भर्त्ता ॥ धातादधातितितत्स्रभिर्मत्रैर्गर्भिण्या उदराभिमर्शनंकुर्यात् ॥ अनेनकर्मणाब्राह्मणक्षत्रियवैश्यशूद्राणांपुत्राः स्वधर्मबलवीर्यादियुक्ताभवंतीतिभाष्यात् ॥ यस्मात्कोशेतिकृतंकर्मेश्वरार्पणंकुर्यात् ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोग भानौरविशंकरकृतेवीरकर्मप्रयोगरश्मिरष्टाविंशः ॥ २८ ॥

॥ अथप्रजननकर्मप्रयोगः ॥ संकल्पादिकंसर्वंपूर्ववत् ॥ प्रजापतिर्जनयत्विति सूक्तेनप्रजाकामायाः स्त्रियउत्संगे आज्यंजुहोतिभर्त्ता ॥ अन्येपक्षास्तुभाष्येद्रष्टव्याः ॥ शेषंपूर्ववत् ॥ कृतंकर्मेश्वरार्पणंकुर्यादिति ॥ ॥ इतिश्रीमदथर्वगृह्य सूत्रप्रयोगभानौरविशंकरकृतेप्रजननकर्मप्रयोगरश्मिरेकोनत्रिंशः ॥ २९ ॥

॥ श्रीगणेशायनमः ॥ अथसीमंतोन्नयनं ॥ तत्रकालः ॥ तच्चगर्भधारणदिनादारभ्यसावनेसौरेवासप्तमेमासि पुंन्नक्षत्रयुक्तेचंद्रतारानुकूलेशुभेऽह्निकुर्यादिति ॥ तदुक्तंमूहूर्त्तचिंतामणौ ॥ जीवार्कारदिनेमृगेज्यनिहतिचित्रादितिबुध्नभे रिक्तामार्करसाष्टवर्ज्यतिथिभिमासाधिपेयिरवे ॥ सीमंतोषष्टमष्ठमासिशुभदैकेंद्रित्रिकोणेखिलेलाभारित्रिषुवाध्रुवाल्यसदहे लग्नेचपुंभांशके ॥ १ ॥ मासेश्वरासितकुजेज्यरवींदुसौरी चंद्रात्मजास्तनुपचंद्रदिवाकरास्युः ॥ स्त्रीणांविधोर्बलमुशंति विवाहगर्भसंस्कारयोरितरकर्मसुभर्त्तुरेव ॥ २ ॥ पूर्वोदितैःपुंसवनंविधेयं मासेतृतीयेत्वथविष्णुपूजा ॥ मासेष्टमेविष्णु विधात्रजीवैलग्नेशुभेमृत्युगृहेचशुभ्रे ॥ ३ ॥ ग्रंथांतरेपि ॥ मार्त्तंडः ॥ पुंभेर्केज्यारवारेविमिथुनबिशमांगाशयापुंसवंस्यात् सीमंतास्यंसत्सुव्यय१२सुनग्रहयोपर्वरिक्तेनतिथ्यां ॥ मासेद्वित्रिप्रसंख्येप्रथमकमपरंतूर्य४षष्टाष्टमेषुप्रोक्तंपुंगर्भलग्नंग्रहबल मुनयोयोज्यमाद्यश्चपक्षः ॥ ॥ अगर्भधारणात्सौरेसावनेवासप्तमेमासिचंद्रतारानुकूलेपुंन्नक्षत्रे ज्योतिर्विदुपदिष्टेशुभेह्नि स्वयंनित्यक्रियोनिवर्त्यवैश्वदेवंविधाय मंडपप्रतिष्ठादिग्रहयज्ञांतंकृत्वा श्रीपर्ण्यादिप्रशस्तदारुमयेपीठे प्राङ्मुखउपविश्य स्वदक्षिणतमांगल्यद्रव्यैःसुस्नातांपरिहिताहतवसनां सालंकृतांभार्यांचोपवेश्याचम्यसुमुखश्चेत्यादिविप्रनत्यंतंकृत्वासंकल्प येत् ॥ देशकालौस्मृत्वा ममास्यांभार्यायांजनिष्यमाण सर्वगर्भाणांतनुरुधिरप्रियराक्षसी गणदूरनिरसनक्षम सकल सौभाग्यनिदानभूतमहालक्ष्मी समावेशद्वारा प्रतिगर्भबीजगर्भसमुद्भवैनोनिबर्हणद्वाराचक्षेत्रशुध्यर्थं श्रीपरमेश्वरप्रीत्यर्थं सीमंतोन्नयनाख्यं कर्माहंकरिष्येइतिसंकल्प्य ॥ सग्रहमखेत्यूहःकार्यः ॥ गणेशांबिकयोःपूजनादिसर्वंपूर्ववत् ॥ ततः स्वयंभर्त्तावाआचार्यःअग्निस्थापनादिपूर्वतंत्रंकृत्वा मंगलनामानमग्निंसंपूज्य अभ्यात्तानानिहुत्वा ॥ येनवेहदितिसूक्त स्याथर्वाब्रह्मात्रिष्टुप् सीमंतिन्याभार्यायासिरशिबाणबंधनेविनियोगः ॥ ॐयेनवेहदितिसूक्तं ॥ अनेनाभिमंत्रितंबाणं सीमंतिन्यामूर्ध्निबंधयेत् ॥ ततोब्रह्माग्रेश्वेतपीतसर्षपानसंस्थाप्य ॥ तथाचअन्यस्मिन्पात्रेलिबुजवृक्षयोःशकलौतगरांजन कुष्टांतरालपूरितौकृत्वासंस्थाप्य ॥ स्वस्त्ययनहोमंकृत्वासंपातानद्यान् ॥ तद्यथा ॥ यौतेमातेतिसूक्तस्यांगिराथर्वैंद्रोऽनुष्टु सीमंतप्रधानश्वेतपीतसर्षपलिबुजशकलसंपाताज्यहोमेविनियोगः ॥ ॐयौतेमातोन्ममार्जजातायांपतिवेदनौ ॥ दुर्णा-

मातत्रमागृधदलिंश उतत्रत्सपःस्वाहा मात्रनाम्नेइदंनममेतिसर्वत्रत्यागः ॥ १ ॥ संपातश्च ॥ पलालातुपलालौशर्कुकोकं
मलिम्लुचंपलीजकं ॥ आश्रेषंवत्रिवासंसमक्षंग्रीवमप्रमीलिनम् ॥ २ ॥ स्वाहामात्रनाम्ने० ॥ मासंवृतोमोपसृपउरूमावं
सृपोतन्रा ॥ कृणोम्यस्मैभेषजंबजंदुर्णामचातनं ॥ ३ ॥ स्वाहामात्रनाम्ने० ॥ दुर्णामांवसुनामांचोभासंवृतमिछतः ॥
अरायानपहन्मःसुनामास्त्रैणमिछताम् ॥ ४ ॥ स्वहामात्रनाम्ने० यःकृष्णकेश्यसुरस्तंबजउततुंडिकः ॥ अरायानस्या
मुष्काभ्यांभससोपहन्महि ॥ ५ ॥ स्वाहामात्रनाम्ने०॥ अनुजिघ्रंपृमृशंतंक्रव्यादमुत्तरेरिहं ॥ अरायान्वाकिंकिणोबजः
पिंगोअनीनशत् ॥ ६ ॥ स्वाहामात्रनाम्ने ॥ स्यवास्वप्नेनिपद्यतेभ्रातांभूत्वापितेवच ॥ वजस्तांअहितामितः क्लीव
रूपांस्तिरिटिनः ॥ ७ ॥ स्वाहामात्रनाम्ने० ॥ यस्त्वांखपंतितत्सरंतियस्त्वादिप्संतिजाग्रतीम् ॥ छायामि वप्रतात्सूर्यः
परिक्रामंननीनशत् ॥ ८ ॥ स्वाहामात्रनाम्ने०॥ यःकृष्णोतिमृतवत्साःमवतोकामिमास्त्रियं ॥ तमोषधेत्वन्नाशयास्वा
कमलंमंजिवं ॥ ९ ॥ स्वाहामात्रनाम्ने० ॥ येशालाःपरिनृत्यंतिसायंगर्धभनादिनाः ॥ कुसुलायेचकुक्षिलाःकुंकुभःकुरु
मास्त्रिमाः ॥ ननोंषधेत्वंगंधेनविशूचीनाविनाशय ॥ १० ॥ स्वाहामात्रनाम्ने इदंनमम ॥ एवंसंपात्यपुनस्तेनैवसूक्ते
नाभिमंत्र्यभार्यायैबंधयेत् ॥ ततोतगरादिकंस्त्रियवृक्षत्वकूसराखंडं तगरंअंजनंकुष्टंजेष्टिमधुएतानि द्रव्याण्याज्यमध्येपेष
यित्वा यथेदंभूम्याइतिसूक्तेनाभिमंत्र्य अंगंसमालभेत् ॥ ततःपूर्वोक्तद्रव्याणिलिबुजवृक्षखंडंचआज्वेनालोड्य ॥ यथावृक्ष
लिबुजस्यांगिराथर्वानुष्टुप्प्रलेपनेविनियोगः॥ तथाचकलकाभिमंत्रणेविनियोगः॥ ॐयथावृक्षंलिबुजासमंतंपरिसंष्वजे॥
एवापरिष्वजस्वमांयथामांकामिन्यसोयथामन्नापगाअसः ॥१ ॥ यथासुपर्णःप्रपतन्पक्षौनिहंतिभूम्यां ॥ एवानिहन्मिते
मनोयथामांकामिन्यसोयथामन्नापगाअसः ॥ २ ॥ यथेमेद्यावापृथिवीसद्यःपर्येतिसूर्यः ॥ एवापर्येमितेमनोयथा० ॥३॥

तथाचवांछामइतिसूक्तं०॥ इतिद्वाभ्यांसूक्ताभ्यां अभिमंत्र्यलिंपयेत् ॥ ततोआचारात्उदुंबरफलादिरचितामालांकंठेआरो
पयेत् ॥ ततोश्वतरोयमूत्रम‍मखंडाभ्यांसंघर्ष्य ॥ ॐअग्नेजातान्प्रणुदामेसपत्नान्प्रत्यजातान्जातवेदोनुदस्व ॥ अधस्पदं
कृणुष्वयेप्रतन्यवोनागसस्तेवयमदितयेस्याम इतिमंत्रेणसीमंतंअभ्युक्ष्य ततोभर्त्तातृष्टिकेति पूर्वोक्तसूक्तेनभार्यायासीमंतं
आचारात्रिशलल्याउन्नयेदिति ॥ ततोभार्यायाउदराभिमर्शनंकुर्यात् ॥ ॐयदुदरंवरुणस्यानुप्राविषयावशे ॥ ततस्त्वा
ब्रह्मोदंकयत्सहिनेत्रमबेत्तत्र ॥१॥ सर्वेगर्भादवेपंतजायमानादसूस्वः ॥ ससूवहितामाहुर्वशेतिब्रह्मभिः क्लृप्तःसह्यस्याबंधुः
॥ २ ॥ इतिमंत्रद्वयेनगर्भिण्याउदरमभिमृशेत् ॥ ततः अभ्युत्तानाग्युत्तरतंत्रंपरिसमाप्य ॥ आचाराल्लौकिकाचयत्प्राप्तं
तत्सर्वंकुर्यात् ॥ ततोभोजनसंकल्पंविधाय आचार्यायगांदत्वा ब्राह्मणेभ्योभूयसींदत्वा अद्येत्युत्तरंसंकल्पंबिधाय ॥ शांता
द्यौरितिशांतिसूक्तंजप्त्वा ॥ तिलकंचाशिर्वादः ॥ यस्मात्कोशेतिकृतं कर्मेश्वरार्पणंकुर्यादिति ॥ ॥ इतीश्रीमदथर्वगृह्य
सूत्रप्रयोगभानौषट्पन्नागर द्विवेदिरविशंकरकृते सीमंतोन्नयनाख्यकर्मप्रयोगरश्मिस्त्रिंशः ॥ ३० ॥

॥ अथसर्वकर्मोपयोगित्वात् भाष्योक्तस्वस्त्ययनहोमः ॥ जीवास्थेत्याचम्यप्राणानायम्येतिकृतनित्यक्रियो
यजमानःब्रह्मजज्ञानंअव्यसश्चेतिपठित्वा देशकालौसंकीर्त्य शांतिकपौष्टिकनित्यनैमित्तिककाम्यकर्मसुतथातथोहकार्यः॥
॥ तद्यथा ॥ अमुककर्मणेस्वस्त्ययनहोमंकरिष्यइतिसंकल्प ॥ फलतांबुलानिविप्रहस्तेदत्वायजमानः पृछतिकिमद्याह
इतितथाचतेब्रूयुः ॥ शोभनमद्याहःमंगलमद्याहइति ॥ ततोपाकयज्ञविधानेनअग्निस्थापनादि पूर्वतंत्रंकृत्वा ब्रह्माग्रेशांत
वृक्षस्यचतुरस्रमणिंसंस्छाप्य ॥ तदुक्तंभाष्ये ॥ चतुरस्रोमणिप्रोक्तोअंगुष्टपर्वमात्रकः ॥ सूत्रेप्रोत्यचसपात्यबध्यः पुण्याह
वाचने ॥ १ ॥ शकधूमेतिचतसृणांमंत्राणांब्रह्मात्रिष्टुपू पुण्याहबाचनप्रधानचतुरस्रमणि संपाताज्यहोमेविनियोगः ॥
ॐशकधूमंनक्षत्राणियद्राजानमकुर्वत ॥ भद्राहमस्मैप्रायंछनिदंराष्ट्रमसादिति ॥ १ ॥ भद्राहंन्नोमध्यंदिनेभद्राहंसाय

मंस्तुनः ॥ भद्राहन्नोअह्नां प्रातारात्रीभद्राहमस्तुनः ॥ २ ॥ अहोरात्राभ्यांनक्षत्रेभ्यः सूर्याचंद्रमसांभ्यां ॥ भद्राहमस्मभ्यं
राजन्छकथूमत्वंकृधि ॥ ३ ॥ योनोभद्राहमकरःसायंनक्तमथोदिवा ॥ तस्मैतेनक्षत्रराजशकधूमसदानमः ॥ ४ ॥
स्वाहाइदंसूर्यचंद्रमोभ्यांनममेतिप्रत्यृचैत्यागः चतुरस्रमणौसंपातश्च ॥ भवाशर्वौइतिसूक्तं० ॥ शर्वायनममेतित्यागः
संपातश्च ॥ ततयेस्यांस्थेतिसूक्तस्याथमंत्रोक्तादित्रिष्टुबादिछंदांसिपुण्याह वाचनप्रधानचतुरस्रमणि संपाताज्यहोमेविनि
योगः ॥ ॐये१स्यांस्थप्राच्यांदिशिहेतयोनामदेवास्तेषांवोअग्निरिषवः ॥ तेनोमृडततेनोधि ब्रूततेभ्योवोनमस्तेभ्योवः
स्वाहा ॥ १ ॥ ये१स्यांस्थदक्षिणायांदिश्यविष्यवोनामदेवातेषांवःकामइषवः ॥ तेनोमृडतनोधिब्रूततेभ्योवोनमस्ते
भ्योवःस्वाहा ॥ २ ॥ ये१स्यांस्थप्रतीच्यांदिशिवैराजानामदेवास्तेषांवआपइषवः ॥ तेनोमृडततेनोधि ब्रूततेभ्योवो
नमस्तेभ्योवःस्वाहा ॥ ३ ॥ ये१स्यांस्थोदीच्यांदिशिप्रविध्यंतोनामदेवास्तेषांवोवातइषवः ॥ तेनोमृडततेनोधि ब्रूत
तेभ्योवोनमस्तेभ्योवःस्वाहा ॥ ४ ॥ ये१स्यांस्थध्रुवायांदिशिनिलिंपानामदेवास्तेषांवऔषधीरिषवः ॥ तेनोमृडतते
नोधि ब्रूततेभ्योवोनमस्तेभ्योवःस्वाहा ॥ ५ ॥ ये१स्यांस्थोर्ध्वायांदिश्यवस्वंतोनामदेवास्तेषांवोबृहस्पतिरिषवः ॥
तेनोमृडततेनोधि ब्रूततेभ्योवोनमस्तेभ्योवःस्वाहा ॥ ६ ॥ स्वाहाइदंमंत्रोक्तनानादेवताभ्योनममेतित्यागः चतुरस्रमणौ
संपातश्च ॥ ततःअभ्यात्तानाद्युत्तरतंत्रपरिसमाप्य ॥ चतुरस्रमणिंबंधयेत् ॥ तद्यथा ॥ आयमगन्निति अष्टर्चसूक्तस्याथर्वा
ब्रह्मात्रिष्टुप्मणिबंधेविनियोगः ॥ ॐआयमगन्पर्णमणिर्बलीबलेनप्रमृणन्सपत्नान् ॥ ओजोदेवानापयओषधीनांवर्चं
सामाजिन्वत्वप्रयावान् ॥ १ ॥ मयिक्षत्रंपर्णमणेमयिधारयतांद्रयिं ॥ अहंराष्ट्रस्याभीवर्गेनिजोभूयासमुत्तमः ॥ २ ॥
यन्निदधुर्बनस्पतौ गुह्यंदेवाःप्रियंमणिं ॥ तमस्मभ्यंसहायुषादेवादंददतुभर्त्तवे ॥ ३ ॥ सोमस्यपर्णःसहउग्रमागदिंद्रेणदत्तो

वरुणेन शिष्टः ॥ तंप्रियासंबहुरोचमानोदीर्घायुत्वायशतशारदाय ॥ ४ ॥ आमारुक्षत्पर्णमणिर्मह्या अरिष्टतातये ॥ यथाह
मुत्तरोसान्यर्यम्णउतसंविदः ॥ ५ ॥ यधीवानोरथकाराःकर्मारायेमनीषिणः ॥ उपस्तीन्पर्णमह्यंत्वं सर्वान्कृण्वभितो
जनान् ॥ ६ ॥ येराजानोराजकृतःसूताग्रामण्यश्चये ॥ उपस्तीन्पर्णमह्यंत्वंसर्वान्कृण्वभितोजनान् ॥ ७ ॥ यःपर्णोसितनूपानः
सयोनिवीरोवीरेणमया ॥ संवत्सरस्यतेजसा तेनबध्नामित्वामणे ॥ ८ ॥ इतिसूक्तंपठित्वामणिबंधनंकुर्यात् ॥ ततःकृत
तिलकःविप्राशिषोगृहीत्वा ब्राह्मणायपलंपक्वांद्वयासुवर्णंदद्यात् अनेनश्रीकर्मांगदेवताःप्रीयंतांनमम ॥ आचार्ययेगां
अन्येभ्योब्राह्मणेभ्योयथाशक्तिभूयसींदद्यात् ब्राह्मणभोजनसंकल्पः ॥ यस्मात्कोशेतिकर्मसमापनीयमंत्रंजप्त्वा शांता
द्यौरिति शांतिसूक्तंपठित्वा कृतंकर्मेश्वरार्पणंकुर्यादिति ॥ ॥ इतिश्रीमदथर्ववेदगृह्यसूत्रप्रयोगभानौभट्टपत्नागर द्विवेदि
रविशंकरकृतेस्वस्त्ययनहोमप्रयोगरश्मिःरेकत्रिंशः ॥ ३१ ॥

॥ अथसूतिग्रहप्रवेशरश्मिः ॥ ॥ अथयदिदैवान्मानुषाद्वास्वस्वकालेऽननुष्ठितानि गर्भाधानादीनिसोमंतेन
सहवाकार्याणि ॥ गर्भाधानस्यप्रायश्चित्तं ॥ तदुक्तं ॥ गर्भाधानस्याकरणात्तस्यांजातस्तुदुष्यति ॥ अकृत्वागांद्विजेदत्वा
कुर्यात्पुंसवनपतिरिति ॥ अन्येतु ॥ आरभ्याधानमाचौलात्कालेऽतीतेतुकर्मणां ॥ व्याहृत्याज्यंतुसंस्कृत्यहुत्वाकर्मयथा
क्रममिति ॥ शौनकवचनात् ॥ अतीतानिकर्माणीकार्याणीत्याहुः ॥ तत्रसंकल्पोयथा ॥ देशकालौसंकीर्त्यममास्याभार्याया
गर्भाधानाकरण जनितप्रत्यवायापनोदार्थमिमांगां अथवातन्निष्क्रयभूतंद्रव्यं ब्राह्मणायतुभ्यमहंसंप्रददेतेन गर्भाधाना
करणप्रत्यवायपरिहारोस्तु ॥ अशक्तौवानप्रत्यवायप्रतिसंस्कारब्राह्मणभोजनसंकल्पइतिरघुनाथः ॥ ममास्याभार्यायाः
गर्भाधानादिसंस्कारकालातिक्रमजनितप्रत्यवाय परिहारार्थंप्रायश्चित्तमहंकरिष्ये ॥ अग्निस्थापनं ॥ व्याहृतिहोमः ॥
अयाश्चाग्ने० यजंस्वाहा ॥ इतिजुहुयात् ॥ कात्यायनोपि ॥ कालातिक्रमेनियतवदितिव्याख्यातं ॥ गर्भाधानादिनियत
कालानांकर्मणांनियतकालव्यतिक्रमेसतिप्रायश्चित्तं नियतवदितिगदाधरभाष्येप्युक्तं ॥ अतीतानांकर्मणांप्रायश्चित्तेकृते

पुनःकरणमकरणंवेतिपक्षद्वयं ॥ तत्रोभयपक्षेपिहोमकृच्छ्रयोः समुच्चयार्थइतिबहवः ॥ रघुनाथस्तुपुनःकरणपक्षेहोममात्रम्॥ अकरणपक्षेर्द्धकृच्छ्रमित्याह ॥ ॥ इतिश्रीमदथर्ववेदगृह्यसूत्रप्रयोगभानौषट्पन्नागरद्विवेदिरविशंकरकृतेकालातिक्रांतप्रायश्चित्तनिर्णयरश्मिर्द्वात्रिंशः ॥ ३२ ॥

॥ अथजननोत्तरंसीमंतकरणेविशेषः ॥ यद्वादैवान्मानुषाद्वाऽकृतेसीमंतोनयनेप्रसवोभवेत्तदाजातकर्मनकार्यं ॥ ततएकादशेऽह्निकालातिक्रांतनिमित्तं महाव्याहृतिहोमात्मकंप्रायश्चित्तंकृत्वा मातुरुत्संगेबालकंस्थापयित्वा सीमंतोन्नयनजातकर्मनामकर्मकुर्यात् ॥ ॥ इतिश्रीमदथर्ववेदगृह्यसूत्रप्रयोगभानौषट्पन्नागरद्विवेदिरविशंकरकृते जननोत्तरंसीमंतोन्नयनकरणनिर्णयरश्मिस्त्रयस्त्रिंशः ॥ ३३ ॥

॥ अथसूतिगृहप्रवेशः ॥ ॥ निर्णयसिंधौगर्गः ॥ रोहिण्यैंद्ववपौष्णेषुस्वातिवारुणयोरपि ॥ पुनर्वसौपुष्पहस्तधनिष्ठात्र्युत्तरध्रुव ॥ मैत्रेत्वाष्ट्रेतथाश्विन्यांसूतिकागारवेशनं ॥ एतच्चसतिसंभवे ॥ प्रसूतिसंभवेकालेसद्यएवप्रवेशयेदितिविशिष्टः ॥ विष्णुधर्मे ॥ दशाहंसूतिकागारमायुधैश्चविशेषतः ॥ बृहतीतिंदुडीलीतैःपूर्णकुंभैः प्रदीपकैः ॥ मुशलेनतथावारिरावकैश्चिह्नितेनच ॥ काकजंघाश्वेतगुंजेतिवैद्यकोशे ॥ पंपाटीबृहतीकंटकारी ॥ एतासांमूलानिपेषयित्वासूतिकागारंराक्षसोपद्रवशांतयेसुपलेपयेत् ॥ ॥ इतिश्रीमदथर्ववेदगृह्यसूत्रप्रयोगभानौषट्पन्नागरद्विवेदिरविशंकरकृतेसूतिगृहप्रवेशनिर्णयरश्मिःश्चतुस्त्रिंशः ॥ ३४ ॥

॥ कृष्णायनमः । अथगर्भिणीधर्माः ॥ भूम्यांनैवोच्चनीचायामारोहणावरोहणेनदिप्रतारणेचैवशकटारोहणंतथा ॥ उग्रौषधंतथाक्षारंमैथुनंभारवाहनं ॥ कृतेपुंसवनेचैवगर्भिणीपरिवर्जयेत् ॥ हरिद्राकुंकुमंचैवसींदूरंकज्जलंतथा ॥ केशसंस्कारतांबूलंमांगल्याभरणंशुभं ॥ चतुर्थेमासिषष्ठेवाप्यष्टमे गर्भिणीवधुः ॥ यांत्रांविसर्जयेन्नित्यंमाषाढेतु

विशेषतः ॥ इत्यपक्षेपतोगर्भिणीधर्माः ॥ अथगर्भिणीपतिधर्माः ॥ गर्भिणीवांछितंद्रव्यंतस्यैदद्याद्यथोचितं ॥ सूतेचिरायुषंपुत्रमन्यथादोषमर्हति ॥ सिंधुस्नानंद्रुमच्छेदंवपनंप्रेतवाहनं ॥ विदेशगमनंचैवनकुर्याद्गर्भिणीपतिः ॥ वपनंमैथुनंतीर्थंश्राद्धभोजनमेवच ॥ वर्जयेत्सप्तमान्मासात्पर्वतारोहणं तथामुंडनंपिंडदानंचपेतकर्मचसर्वशः ॥ नजातवत्पितृकःकुर्याद्गुर्विणीपतिरेवच ॥ अत्रकर्त्तनमपिनिषिध्यते ॥ एतद्वादः ॥ क्षौरंनिमित्तकंकुर्यान्निषेधेसत्यपिध्रुवम् ॥ पित्रोःप्रेतविधानंचगर्भिणीपतिराचरेत् ॥ अन्वष्टक्याष्टकयोर्गर्भिणीपतिःपिंडदानंकुर्यात् ॥ केचित्पित्रोःप्रतिवत्सरिकेपिंडदानंकुर्वंति॥ दर्शमहालयादिषुनैवकार्यं इतिगर्भिणीपतिधर्माः॥ अथगर्भस्रावहरंकांचनयज्ञोपवीतदानंतद्धिकौस्तुभेद्रष्टव्यम् ॥
॥ अथपुनप्रसवसमयेसूतिकाग्रहप्रवेशः ॥ गृहंनैर्ऋत्यांसूतिकाग्रहंकृत्वा तत्राश्विनीरोहिणीमृग पुनर्वसुपुष्यत्र्युत्तराहस्तचित्रास्वात्यनुराधाधनिष्ठाशततारिकानक्षत्रेषुरिक्तादिवर्जतियौचंद्रानुकूल्येशुभलग्ने सूतिकागारवेशोगोविंदवपूजनंकृत्वामंत्रवाद्यघोषेणसापत्यस्त्रीभिःसहकार्यः ॥ उक्तमुहूर्त्तासंभवेसद्योवा ॥ इतीसूतिकाग्रहप्रवेशः ॥ अथशीघ्रप्रसवोपायः ॥ ग्रथांतरोक्तः ॥ प्रसवप्रतिबंधेऋग्विधाने ॥ प्रमंदिनेइत्यृचंविजहीष्वेतिसूक्तंजपेत् ॥ एताभ्यामभिमंत्रितंजलंवापाययेत्तेनसुखप्रसवः ॥ शीघ्रप्रसवमंत्रस्तु ॥ हिमवत्युत्तरेपार्श्वेसुरतानामयक्षिणी ॥ तस्याःस्मरणमात्रेणविशल्यागर्भिणीभवेत् ॥ ॐश्रींॐस्वाहा इतिमंत्रेणयवांकुरेणतिलतैलंशतसहस्रंवाभिमंत्र्यकिंचित्पाययेत्किंचित्मात्रस्यगर्भेलेपश्चसम्यक्लेपेशीघ्रंसुखप्रसवः ॥ अस्थिमात्रावशिष्टगोमस्तकस्यसूतिगृहोपरिनिधानेनसुखप्रसवः ॥ वंशनोंबयोस्त्वक्तुलसीमूलंकपित्थपत्रकरवीरबीजंच समभागंमहिषीदुग्धेनपेषयीत्वातेनसतैलयोनिलेपेसद्यःप्रसवः ॥ अथविनियोगमालायामुक्तोब्रह्मवादीनांमंत्रशीघ्रप्रसवोपायः ॥ अग्निस्थापनंकृत्वा इदंजनासेतिसूक्तेनचरुंसंपात्य सोष्यंतींस्त्रियंप्राशयेच्छीघ्रंप्रसवोभवतितत्रसूक्तं ॥ इदंजनासेतिसूक्तस्याथर्वाप्रजापतिदनुष्टुप् चरुसंपाताज्यहोमेविनियोगः ॥ ॐइदंजनासोविदथंमहद्ब्रह्मवदिष्यति नतत्पृथिव्यांनोदिवियेनप्राणंतिवीरुधः ॥ १ ॥ अंतरिक्षआसांस्थामश्रांतसदामिच ॥ आस्थानमस्यभूतस्यविदुष्टद्वेधसोनवा ॥ २ ॥ यद्रोदसीरेजमाने भूमिश्चनिरतक्षतं ॥ आर्द्रंतदद्यसर्वदासमुद्रस्येववस्रोत्याः ॥ ३ ॥

विश्वंमन्यामभि शारतदन्यस्यामधि श्रितंदिवेचविश्ववेदसेपृथिव्यैचाकरन्नमः ॥ ४ ॥ इतिसूक्तं ॥ ॥ द्वितीयोपायः॥
शीघ्रपसवोपायेकाकजंघामूलंवषट्तेपूषमितिसूक्तेनाभिमंत्र्यशिरसिवध्नाति॥ ॐवषट्तेपूषन्नस्मिन्स्त्वावर्यमाहोताकृणोतु
वेधाः ॥ सिस्रंतान्नार्य्युतप्रजाताविपर्वाणि जिहतांसूतवाउ ॥ १ ॥ चतस्रोदिवः प्रदिशश्चतस्रोभूम्यांउत ॥ देवागर्भंसमै
रयन्तांव्यूर्णुवंतुसूतवे ॥ २ ॥ सूषाव्यूर्णोतुवियोनिंहापयामसि ॥ श्रथयासूषणेत्वमवत्वंविष्कलेसृज ॥ ३ ॥ नेवमांसे
नपीवसिनेवमज्जस्वाहतं ॥ अवैतुपृश्निशेवलं शुनेजराय्वत्तवेवजरायुपद्यताम् ॥ ४ ॥ वितेभिनद्मिमेहनंवियोनिंवि
गवीनिके ॥ विमातरंचपुत्रंचविकुमारंजरायुणावजरायुपद्यतां ॥ ५ ॥ यथावातोयथामनोयथापतंतिपक्षिणः ॥ एवात्व
दशमास्यसाकंजरायुणापतावजरायुपद्यताम् ॥ ६ ॥ इतिसूक्तेनाभिमंत्र्यशिरसिबंधयेत् ॥ इत्युपायांतरंविनियोगमालो
क्तम् ॥ ॥ इतीश्रीमदथर्वगुह्यसूत्रप्रयोगभानौषट्पन्नागर द्विजातिरविशंकरकृतेगर्भिणीधर्मतत्पतिधर्मसूतिकाग्रहप्रवेश
शीघ्रप्रसवोपायगुंफितनिर्णयरश्मिःपंचत्रिंशः ॥ ३५ ॥

॥ श्रीगणेशायनमः ॥ अथजातकर्मप्रारंभः ॥ जातमात्रेपुत्रेपितातस्यमुखंनिरीक्ष्यनद्यादावुदङ्मुखस्नात्वा
असंभवेदिवाहृताभिःसीताभिःसुवर्णयुक्ताभिर्गृहेएवस्नात्वा चम्यजीवास्येतिविधिवत् ॥ सितचंदनमालादिभिरलंकृतो
नालछेदनात्पूर्वंसूतिकादिव्यति रिक्तैरस्पृष्टमकृतस्तनपान प्रक्षालितमलंकुमारंमातुरुत्संगेप्राङ्मुख मवस्थाप्यब्राह्मणैःसह
पुण्याहवाचनंकृत्वा ब्रह्मजज्ञानं० अव्यसश्चेतिमंत्रौपठित्वा देशकालौस्मृत्वाममास्यकुमारस्य गर्भाम्बुपानजनितसकलदोष
निवर्हणायुर्मेधाभिवृद्धिबीजगर्भसमुद्भवैनो निबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थंजातकर्माहंकरिष्येतिसंकल्पः ॥ तदंगस्वस्ति
पुण्याहवाचनं मातृकापूजनं हिरण्येननांदिश्राद्धंचकरिष्ये आदौनिर्विघ्नतासिध्यर्थं गणपतिपूजनंचकरिष्ये ॥ नांदिश्राद्धंच
कृत्वाशंखपुष्पिकां अथोपुष्पिकांच अथवाशंखनाभिंपिप्पलीचउपलेनदृशदि सम्यक्पिष्ट्वा अहंरुद्रेभिरिति सूक्तेनअभिमंत्र्य
हिरण्यशकलेनकुमारंप्राशयेत् ॥ प्राकृस्तनग्रहात ॥ अहंरुद्रेत्यष्टर्चस्य सूक्तस्याथर्वादेवतात्रिष्टुप्षष्ठीजगतीशंखपिष्पिका

धोपुष्पिकाकल्कोभिमंत्रणेथवाशंखनाभिपिप्पलीकल्काभि मंत्रणेविनियोगः ॥ अहंरुद्रेभि० ॥ त्वक् अहंरुद्रेभिरितिशुक्ल
पुष्पेत्यादिपंचकर्माणिआयुष्कामोपिकरोति ॥ वार्शवतिकंकर्मेतिवचनात् ॥ अथवार्षशतिककर्मप्रयोगः ॥ जीवास्थेति
विधिवदाचम्यप्राणानायम्यदेशकालौसंकीर्त्य ममअस्यशिशोःसम्यक्वचनमेधायुष्याभिवृध्यर्थं श्रीपरमेश्वरप्रीत्यर्थंवार्ष
शतिककर्मकरिष्ये ॥ ब्रह्मजज्ञानंअव्यसश्चेत्यारभ्याग्निप्रतिष्ठापनांतंकृत्वा अभ्यात्तानादिपूर्वतंत्रंविधाय वलवर्द्धननामान
मग्निंप्रतिष्ठाप्य ॥ मातुरुत्संगस्थशिशोः तालिनिसंपातानानयनं ॥ अहंरुद्रेत्यष्टर्चस्यसूक्तस्याथर्वावाक्देवतात्रिष्टुप्षष्ठि
जगतीतालुसंपातकर्मणिवार्षशतिकप्रधानाज्यहोमेविनियोगः ॥ ॐअहंरुद्रेभिरितिऋक्८वाग्देवतायै इदंनममेतिप्रत्यृचं
त्यागःसंपातश्च ॥ अभ्यात्तानाद्युतरतंत्रंकृत्वा ॥ यस्मात्कोशेतिकृतंकर्मेश्वरार्पणंकुर्यादिति ॥ ॥ आचम्यप्राणानायम्य
देशकालौस्मृत्वा ममास्यशिशोःसम्यक्वचनमेधायुष्यभिवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं द्वितीयंवार्षशतीककर्मकरिष्ये ॥
ब्रह्मजज्ञानंअव्यसश्चेत्यारभ्याग्निप्रतिष्ठापनांतंकृत्वा वलवर्द्धननामानमग्निंप्रतिष्ठापयामित्यग्निंप्रतिष्ठाप्य ॥ अभ्यात्तानांतं
कृत्वादधिमधुनिएकस्मिन्पात्रे अग्नेर्दक्षिणतआसाद्य अहंरुद्रेभिरितिसूक्तेनाज्यंजुह्वन् ॥ दधिमधुनिसंपात्यप्राशयेत् ॥तद्यथा॥
अहंरुद्रेत्यष्टर्चस्यसूक्तस्याथर्वा वाग्देवतात्रिष्टुप्षष्ठि जगतिवार्षशतिककर्मप्रधानाज्यहोमेविनियोगः ॥ अहंरुद्रेभिरिति
ऋक्८वाग्देवतायैइदंनममेतित्यागः पुनस्तेनैवसूक्तेनदधिमधुनिअभिमंत्र्यतेनैवसूक्तेनबालकंप्राशयेत् ॥ अभ्यात्तानाद्युत्तर
तंत्रंयस्मात्कोशेतिकृतं कर्मेश्वरार्पणंकुर्यात् ॥ इतिचतुर्थप्रयोगः ॥ यदिउपनयनेनसहतंत्रेण जातकर्मकरोति तदासूक्तमपि
पठेत्कुमारायसंकल्पंवाचयेत् ॥ तद्यथा ॥ आचम्यप्राणानायम्यदेशकालौसंकीर्त्यममास्यशिशोः प्रथमप्रवदस्यसम्यक्
वचनाकामाद्यायुष्याभिवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं वार्शवतिककर्मांगतयामाणवकमहंरुद्रेभिरिति सूक्तवाचनंकरिष्ये ॥
माणवकंअहंरुद्रेतिसूक्तंपच्छःवाचयति ॥ अहंरुद्रेत्यष्टर्चस्यसूक्तस्याथर्वावाग्देवतात्रिष्टुप्षष्ठिजगति माणवकस्यवाचने
विनियोगः ॥ ॐअहंरुद्रेभिर्वसुभिश्चरामि॥ ॐअहमादित्यैरुतविश्वदेवैः ॥ एवंपच्छःवाचयति ॥ यस्मात्कोशेतिमंत्रपाठः॥
कृतंकर्मेश्वरार्पणंकुर्यात् ॥ इतिवार्षशतिकपंचमप्रयोगः ॥ ॥इतीश्रीमदथर्वगृह्यसूत्रप्रयोगभानौषट्पन्नागर द्विवेदिरविशंकर
कृतेजातकर्मप्रयोगरश्मिषट्त्रिंशः ॥ ३६ ॥

॥ अथकुमार्याअपिजातकर्मादिसंस्काराः चौलांताःसर्वेऽमंत्रकाःकार्याः ॥ विवाहस्तुसमंत्रकः ॥ अतःकन्या
याजातकार्मादिसंस्कारलोपेतत्तत्कालेविवाहकालेप्रायश्चित्तंविधायविवाहःकार्यः ॥ अथसर्वत्रजातकर्मनामकर्मादौमुख्य
कालातिक्रमेगुर्वाद्यस्तादौरहिते शुभनक्षत्रादौजातकर्मादिकंकार्यम् ॥ तत्रजातकर्मणिनक्षत्राणि ॥ रोहिणीत्र्युत्तराअश्विनि
हस्तपुष्यानुराधारेवतीमृगचित्राश्रवणादित्रयस्वातिपुनर्वसवः ॥ रिक्तापर्वरहितास्तिथयः ॥ भौमशनिवारभिन्नावाराः॥
भद्रावैधृत्यादिशून्येशुद्धेऽद्रलग्नेशुभं ॥ अथपंचमषष्ठमदिनयोर्जन्मदानांपूजनं ॥ रात्रौप्रथमेयामेपित्रादिनास्नात्वाचम्यदेश
कालौसंकीर्त्य ॥ अस्यशिशोःसमातृकस्यायुरारोग्यप्राप्ति सकलारिष्टशांतिद्वारा श्रीपरमेश्वरप्रीत्यर्थंविघ्नेशस्यजन्मदानां
जीवंत्यपरनाम्नांषष्ठिदेव्याः शस्त्रगर्भेभगवत्यापूजनंकरिष्ये ॥ इतिसंकल्प्यः तंदुलपुंजेषुपूगिफलेषुवाआवाहनंकुर्यात् ॥
तद्यथा ॥ विघ्नेशायनमः विघ्नेशंआवाहयामि ॥ जन्मदायैनमः जन्मदांआवाहयामि ॥ आयाहिवरदेदेवीमहाषष्ठीति
विश्रुते ॥ शक्तिभिःसहबालंमेरक्षजागरवासरे ॥ इतिमंत्रेणषष्ठिदेव्यैनमः षष्ठिदेवींआवाहयामि ॥ ॐभगवत्यैनमः
भगवतींआवाहयामि ॥ इतिदेवताचतुष्टयंआवाह्य ॥ विघ्नेशाद्यावाहितदेवताभ्योनमः आसनंसमर्पयामि ॥ एवंशोडषो
पचारैःसंपूज्य ॥ प्रार्थनांकुर्यात् ॥ शक्तिस्त्वंसर्वदेवानांलोकानांहितकारिणी ॥ मातर्बालमिमंरक्षमहाषष्ठिनमोस्तुते ॥
लंबोदरमहाभागसर्वोपद्रवनाशन ॥ त्वत्प्रसादाच्चविघ्नेशचिरंजीवतुबालकः ॥२॥ जननीसर्वदुखानांबालानांचविशेषतः
नारायणिस्वरूपेणबालंमेरक्षसर्वदा ॥३॥ प्रेतभूतपिशाचेभ्योडाकिनीयोगिनीतथा॥ मातेवरक्षबालंमेश्वापदेपन्नगेषुवा॥
॥४॥ गौरिपुत्रोयथास्कंदः शिशुत्वेरक्षितःपुरा ॥ तथाममाप्ययंबालषष्ठिकेरक्षतांनमः ॥५॥ विप्रेभ्यःतांबूलदक्षिणादि
दद्यात् ॥ रात्रौजागरणंकुर्यात् ॥ पंचमषष्ठमदिनयोर्दानप्रतिग्रहयोर्नदोषः ॥ दशमदिनेबलिदानंस्त्रीयेभ्योऽन्नदानंच
कार्यम् ॥ तदुक्तंभागवतश्रीधर्य्यां ॥ पुत्रजन्मव्यतीपातेदत्तंभवति वाक्षयमितिवचनात् ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्र
प्रयोगभानौषट्पन्नागर द्विवेदीरविशंकरकृते कुमारीसंस्कारनिर्णयसहित पंचमषष्ठदिनयोर्जन्मदानांपूजनप्रयोगरश्मिः
सप्तत्रिंशः ॥ ३७ ॥

अथाशौचेकर्त्तव्याकर्त्तव्यनिर्णयः ॥ सूतकेमृतकेकुर्यात्प्राणायाममंत्रकं ॥ तथामार्जनमंत्रांश्चमनसोच्चार्य्य
मार्जयेत् ॥ गायत्रींसम्यगुच्चार्य्य सूर्यायार्घ्यंनिवेदयेत् ॥ उपस्थानंनैवकार्यंमार्जनंतुकृताकृतं ॥ सूर्यंध्यात्वानमस्कुर्यात् ॥
गायत्रीजपोनकार्यः ॥ अर्घांतामानसीसंध्याइत्युक्तेः ॥ केचिन्मनसागायत्रीजपःकार्यइत्याहुः ॥ वैश्वदेवब्रह्मयज्ञादयः
पंचमहायज्ञानकार्याः ॥ वेदाभ्यासोपिनकार्यः ॥ औपासनहोमपिंडपितृयज्ञावसगोत्रेणकारयेत् ॥ केचिच्छ्रौतकर्मणि
सद्यःशुध्युक्तेरग्निहोत्रेहोमः स्नात्वाचम्यस्वयंकार्यइत्याहुः ॥ अपरेतुसर्वथाप्याशौचापवादस्यानन्यगतिकत्वात्सति
ब्राह्मणद्वारैवकार्यः ॥ ब्राह्मणाभावेस्वयंकार्यइत्याहुः स्थालीपाकोनकार्यः ॥ सर्वथालोपप्रसक्तौस्थालीपाकोपिब्राह्मण
द्वाराकार्यः ॥ अन्वाधानोत्तरमूतकप्राप्तौब्राह्मणद्वाराश्रौतेष्टिस्थालीपाकौकार्याविति ॥ होमादौत्यागः स्नात्वास्वयं
कार्यः ॥ दर्शादिश्राद्धस्यलोपएव ॥ प्रतिसांवत्सरिकश्राद्धमाशौचांतेएकादशाहेकार्यं.तत्रासंभवेदर्शव्यतिपातादिपर्वणि॥
आशौचेऽन्यस्यान्नंनाश्नीयात् ॥ पितृयज्ञस्थालीपाकश्रपणाकर्मादिसंस्थानांप्रथमारंभोब्राह्मणद्वाराप्याशौचयोर्नभवति॥
प्रथमारंभोत्तरंश्रवणाकर्मादिकंविप्रद्वाराः शौचेपिपत्न्यार्त्तवेपिकार्यं ॥ आग्रयणंतुनभवति अग्निसमारोपप्रत्यवहारौआ
शौचेनभवतः ॥ तेनसमारोपोत्तरमाशौचेतैत्तरीयादीनांत्रिदिनं ॥ होमलोपेबहुहृचानांद्वादशदिनंहोमलोपेग्निनाशादा
शौचेपुनराधानमेव ॥ समारोपप्रत्यवरोहयोइत्यकर्तृकत्वाभावात् ॥ अग्न्युनुगमनेप्रायश्चित्तपूर्वकपुनरुत्पत्तिरन्यद्वारा
भवति ॥ भोजनकालेआशौचेप्राप्तौमुखस्यग्रासं त्यक्त्वास्नायात् ॥ तद्ग्रासभक्षणेएकोपवासः ॥ सर्वान्नभक्षणेत्रिरा
त्रमुपवासः ॥ ग्रहणसंक्रांतौचश्राद्धदानजपादिकर्माशौचेपिकार्यं व्रतेषुनाशौचं ॥ अनंतव्रतादिकमन्यैःकारयित्वासूतकांते
द्विजभोजनं॥ उदकदुग्धदधिघृतलवण फलमूलभर्जितापन्नानांसूतकीग्रहस्थितानां स्वयंग्रहणेदोषाभावः ॥ सूतकीहस्ता
न्नतुग्राह्यम् ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौषट्पन्नागरद्विवेदिरविशंकरकृते कर्त्तव्याकर्त्तव्यसंक्षेपनिर्णयरश्मि
रष्टत्रिंशः ॥ ३८ ॥

॥ अथसूतकीशुद्धिः ॥ ॥ दशाहांतेसूतकायाअस्पृश्यनिवृत्तिनांमजातकर्मादिप्राप्तधर्माधिकारश्च ॥ जातेष्टि

विवाहोपनयनादिषुतत्पुत्रप्रसूतानांविंशतिरात्रांतेधिकारः ॥ कन्याप्रसूतानांमासांतेधिकारः ॥ अथजन्मनिदुष्टकालाद्यां
तयश्चनीर्णीयंते ॥ तत्रादौसर्वशांत्युपयोगिशुभदिननिर्णयमाह ॥ कौस्तुभे ॥ मुख्यकालंप्रवक्ष्यामिशांतिहोमस्ययत्नतः॥
जातस्यद्वादशाहेतुजन्मर्क्षेवाशुभेदिने ॥ जननाद्वादशाहेशांतिकरणेशांत्युक्त नक्षत्राहुतिवह्निचक्रात्र लोकनादिकंना
वश्यकं ॥ कालांतरेआवश्यकं ॥ एवंमूलादिसर्वत्रशांतिष्वपिज्ञेयं ॥ तद्यथा ॥ शुक्लादितिस्तिथिःसैकावारयुक्ताग्निशे-
षिता ॥ खे०गुणेदभुविवासोग्नयेध्यौ२घु१योःस्यादधोदिवि ॥ भुव्वादग्निशुभःअन्यत्राशुभाः ॥ होमाहुतिःसूर्यभतःस्त्रि
भगस्यंमुहुस्तत्रचंद्रभावधिसूर्यज्ञंशुक्रार्कजचंद्रभूमिजाजीवस्तमः केतुरसत्यसन्मुखे ॥ ज्ञंबुधःअर्कजःशनिःभूमिजोभौमः
जीवःगुरुःतमःराहुः ॥ आदित्येचभवेच्छोकंबुधेसंपत्तिरुत्तमा ॥ शुक्रेणचधनप्राप्तिशनौपीडाचजायते ॥ चंद्रेभवति
लाभश्चभौमेचैवधनक्षयम् ॥ गुरौपश्यतिकल्याणंराहुहानिश्चजायते ॥ केतौसुप्राकूसंदेहोवह्निचक्रमुदाहृतं ॥ संस्कार
नित्यकर्मसुनिमित्ताप्यवहितनैमित्ति केषुरोगातुरेचवह्निचक्रादिकंनापेक्षितं ॥ अग्नेस्थापनवेलायांपूर्णाहुत्यामथापिवा ॥
आहुतिबह्निवासश्चविलोक्यो शांतिकर्मणि त्र्युत्तरारोहिणी श्रवणधनिष्ठाशततारिका पुनर्वसुस्वातिमघाश्विनी हस्तपुष्या
नुराधारेवतीनक्षत्रेषुगुरुशुक्रास्तमलमासरहितेषु शुभवारतिथ्यादौशांतिःकार्या ॥ निमित्ताप्यवहितनैमित्तकंरोगशांतौच
अस्ताविचारणानास्ति ॥ ॥ इतिश्रीमदथर्वगुह्यसूत्रप्रयोगभानौ षट्पन्नागरद्विवेदिरविशंकरकृतेमृतकीशुद्धिकर्त्तव्या
कर्त्तव्यनिर्णयरश्मिरेकोनचत्वारिंशत् ॥ ३९ ॥

॥ अथतत्रादौगोमुखप्रसवशांतिरुच्यते ॥ तत्रगर्गः ॥ प्रणिपत्यारविंदाक्षंप्रायश्चित्तमनुस्मन् ॥ सर्वारिष्ट
विनाशाययदुक्तंज्योतिषार्णवे ॥ पुत्ररिष्टेसुतारिष्टेमातृरिष्टे तथैवच॥ पौष्णाश्विन्योगुरौसार्प्यमघाचंद्रेद्रमूलभे॥ एषुऋक्षेषु
जातस्यकुर्याद्गोजननंशुभं ॥ अथगोप्रसवः ॥ यत्रजन्मकाले पितुर्मातुःसुतस्य वारिष्टमुक्तंतत्रगोप्रसवशांति तन्नक्षत्रादि
शांतिश्चकार्या ॥ धनाद्यरिष्टेषुनकार्यामूलाश्लेषाज्येष्टामघानक्षत्रेषु जननेचतुर्थपादादिषुपित्राद्यरिष्टाभावेषुगोप्रसवः ॥
अश्विनींरेवतीपुष्यचित्रासुनक्षत्रशांत्यभावेपिगोमुखप्रसवशांतिरेवकार्या ॥ ॥ अथप्रयोगः ॥ देशकालौस्मृत्वाअस्य

बालकस्यामुकदुष्टकालोत्पत्तिसूचितारिष्टनिवृत्तिद्वाराश्रीपरमेश्वरप्रीत्यर्थं गोमुखप्रसवाख्यांशांतिंकरिष्ये इतिसंकल्प्य ॥
तत्रादौनिर्विघ्नतासिध्यर्थं गणेशांबिकयोःपूजनंचकरिष्ये ॥ गणेशांबिकयोःपूजनमात्रंकृत्वा ब्रह्मजज्ञानंअन्यसश्चेति
पठित्वा ॥ ततःशिशुमूर्ध्यवघ्राणांतेप्रयोग मध्यएवपुण्याहवाचनमितिकौस्तुभमयूखौ ॥ नांद्विश्राद्धंनकार्यं॥ ततोआचार्यं
वरयेत् ॥ यजमानप्रवरमुच्चार्य ॥ अमुकप्रवरान्वितोअमुकगोत्रोत्पन्नःअमुकशर्माहं ॥ अमुकप्रवरान्वितामुकगोत्रोत्पन्न
ममुकशर्माणंब्राह्मणंअस्मिन्गोप्रसवशांत्याख्येकर्मणिआचार्यत्वामहंवृणे ॥ वृतोस्मीतितेनवाच्यं ॥ ततोआचार्यंसंपूज्य
आचार्येरक्षोहणंवाजिनमितिसर्षपविकीरणंपंचगव्यंच संपाद्यआपोहिष्ठेतिअद्भिश्चदेशप्रोक्षणं स्वस्त्ययनंत्यमूषुवाजिन
मितिमार्थनंविधाय ॥ ग्रहस्येशानभागे गोमयेनोपलिप्यश्वेतरज्योभिः कर्णिकायुक्तपंकजंकृत्वा तत्रयथाशक्तिव्रिहीन्नि
क्षिप्यतेषुशूर्पंतस्मिन्रक्तवस्त्रं प्रसारितंतत्रतिलविकीरणंचकृत्वा तत्रप्राङ्मुखदक्षिणदिक्पादंशिशुंनिधायसशिसुशूर्पंसूत्रेण
वेष्टयित्वातत्रगोमुखवांनिःयंकृत्वामूत्रपठेत् ॥ ॐयथेयपृथिवीयोनिमेतिमूक्तेनपूर्वोक्तेन जन्मविधानंकृत्वा ॥ तेनैवावृत्या
पंचगव्येनशिशुंस्नापयित्वा ॥ गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश ॥ यस्मात्तस्माच्छिवंमेस्यादिहलोकेपरत्रच ॥ इतिमंत्रेण
गोःसर्वांगेषुवामांगेष्वेववास्पृशेत् ॥ ततःआचार्यैबालकमादाय विष्णोश्रेष्ठेनरूपेणइतिमंत्रेणमात्रेदद्यात् ततःपितामात्रेण
दद्यात् ॥ ततोमातावस्त्रंप्रसार्यसूर्पेसंस्थापयेत् अथपितातस्यमुखमीक्षते ॥ ततःपंचगव्येनाचार्यःशिशुंप्रोक्षयेत् ॥ आपो
हिष्ठेतिसूक्तेनतथाचकौशिकसूत्रभाष्योक्तसूक्तैः सिहव्याघ्रंयशोहविरितिप्रातरग्निं गिरावरगराटेषुदिवस्पृथिव्याइतिसूक्तैः
ऋग्भिरभिषेकंकुर्यात् ॥ ततोभिषेकांतेपिताहस्तद्वयेनपरिग्रहपूर्वकंशिशोर्मूर्द्धनित्रिरवघ्रायतत्रमंत्रः ॥ अंगादंगात्सभवसि
हृदयादधिजायसे ॥ आत्मावैपुत्रनामासिसंजीवशरदःशतम् ॥ इतिमंत्रेणवघ्राणंकृत्वा पूर्वप्रसारितवस्त्रयुग्मेनाच्छाद्यगंध
पुष्पादिभिःकलशमभ्यर्च्य कृताग्न्युत्तारणौविष्णुवरुणौसंपूज्यौ ॥ प्रतिमात्रयेषुविष्णुवरुणयक्ष्महणश्चपूज्या इतिमयूरवे ॥
यक्ष्महणस्थापनपक्षे अक्षीभ्यामितिसप्तभिर्ऋतुशांतिप्रकरणोमंत्रैःस्थापनंकुर्यात् ॥ अथपूजाक्रमः ॥ ॐतद्विष्णोःपरमं०॥
विष्णवेनमः विष्णुंआवाहयामि ॥ ॐयेपक्षाज्जुहोतिइतिमंत्रेणवरुणमावाहयामि ॥ एवमग्रेपिशोडषोपचारैःसंपूज्य ॥

पूजांतेकुंभंस्पृष्ट्वाऽभिमंत्रयेत् ॥ तत्रमंत्राः ॥ ॐमानेविदन्विव्याधिनोमोअभिव्याधिनोविदन् ॥ आराच्छरव्याअस्मद्वि
शूचीरिंद्रपातय ॥ १ ॥ ॐविश्वंचोअस्मछरवःपतंतुयेअस्तायेचास्याः ॥ दैवीर्मनुष्येशवोममामित्रान्विविध्यत ॥ २ ॥
ॐयोनःस्वायोअरणःसजातउतविष्ट्योयोअस्मान् अभिदासति ॥ इंद्रःशरव्ययैतान् ममामित्रान्विविध्यतु ॥ ३ ॥ ॐयः
सपत्नोयोसपत्नोयश्चद्विषंच्छपातिनः ॥ देवास्तंसर्वंधूर्वंतुब्रह्मवर्ममममांतरं ॥ ४ ॥ ॐअदारसृद्भवतुदेवसोमास्मिन्यज्ञे
मरुतोमृडतानः ॥ मानेविददभिभामोअशस्तिर्मानेविदवृजिनाद्वेष्याय ॥ ५ ॥ ॐयोअद्यसेन्योवधोघायूनामुदीरते॥
युवंतंमित्रावरुणाअस्मद्यावयतंपरि ॥ ६ ॥ ॐइतश्चयदमुतश्चयद्वधंवरुणायावय ॥ विमहच्छर्मयच्छवरीयोयावयावधम्
॥ ७ ॥ ॐशासइत्यामहांअस्यमित्रसाहोअस्तुनः ॥ नयस्यंहन्यतेसखानजीयतेकदाचन ॥ ८ ॥ ॐस्वस्तिदाविशांपति
वृत्रहाविमृधोवशी ॥ वृषेंद्रःपुरएतुनःसोमपाअभयंकरः । ९ ॥ ॐ विनइंद्रमृधोजहिनीचायंछपृतन्यतः ॥ अधमंगमया
तमोयोअस्मांअभिदासंति ॥ १० ॥ ॐविरक्षोविमृधोजहिविवृत्तस्यहनूरुज ॥ विमन्युमिंद्रवृत्रहन्नमित्रस्याभिदासतः ॥
॥११॥ ॐअपेंद्रद्विषतोमनोपजिज्यासतोवधं ॥ विमहच्छर्मयच्छवरीयोयावयावधं ॥ १२ ॥ ॥ इतिसूक्तंजप्त्वाअभ्यात्ता
नादिपूर्वतंत्रंकृत्वा मूंजरज्वाशिशुंकंठपादेचबध्वा ॥ पत्नोहीतिसूक्तेनसजलंकुंभंसंस्थाप्य ततोहोमकालेयजमानस्त्यागं
कुर्यात् ॥ मंत्रोक्तदेवताभ्यःपत्नाहीतित्रिरावृत्याज्यंनमम ॥ द्वात्रिंशदाहुतिपर्याप्तं मिलितदधिमध्वाज्यद्रव्यंअद्भ्योन
मम ॥ अष्टसंख्याहुतिपर्याप्तंतद्रव्यंविष्णवेनमम ॥ अष्टचत्वारिंशत्संख्याहुति पर्याप्तंमिलितदधिमध्वाज्यद्रव्यंयक्ष्मघ्ने
नमम ॥ अष्टअष्टाहुतिपर्याप्तंमिलितदधिमध्वाज्यद्रव्यं आदित्यादिनवग्रहेभ्योनमम ॥ एवंत्यागे कृतेआचार्यःस्रुवेणजुहु
यात् ॥ पत्नोहीतित्रिरावृत्तिराज्यहोमोदकुंभेसंपतः ॥ अथकेवलाचार्येणहोमकरणपक्षेप्रधानहोमः ॥ आपोहिष्ठेति
तिसृणांसिंधुद्वीपआंवरीषआपोगायत्री गोप्रसवप्रधानहोमेविनियोगः ॥ आपोहिष्ठा० ॥ स्वाहाअद्भ्यइदंनमम ॥

ॐयोवःशिवस ॥ स्वाहाअद्भ्यइदंनमम ॥ ॐतस्माअरंग ॥ स्वाहाअद्भ्यइदंनमम ॥ ३ ॥ ॐअप्सुमेधातिथिरापो
रनुष्टुप् ॥ गोप्रसवप्रधानहोमेविनियोगः ॥ ॐअप्सुमे०षजा ॥ अग्निंचवि०षजीस्वाहाअद्भ्यइदंनमम ॥४॥ तद्विष्णो
र्मेधातिथिगायत्रीगोप्रसवप्रधानहोमेविनियोगः ॥ ॐतद्विष्णोःपरमंपदं०स्वाहाविष्णवइदंनममः ॥ ५ ॥ अक्षीभ्या
मितिषण्णंविवृहायक्ष्महानुष्टुप् ॥ गोप्रसवप्रधानहोममिलितदधिमध्वाज्यहोमेविनियोगः ॥ ॐअक्षीभ्यांतेनाशिकाभ्यां
कर्णाभ्यांछुबुकादधि ॥ यक्ष्मंशीर्षण्यंमस्तिष्का जिह्वयाविवृहामितेस्वाहा यक्ष्मणइदंनममैवंसर्वत्र ॥ ॐग्रीवाभ्यांस्त
उष्णिहाभ्यःकीकसाभ्योअनूक्यात् यक्ष्मंदोषण्यं ॥१॥ मंशाभ्यांबाहुभ्यां विवृहामितेस्वाहा ॥२॥ हृदयात्तेपरिक्लोम्नो
हलीक्ष्णात्पार्श्वाभ्यांयक्ष्मंमतस्नाभ्यांप्लीन्होयत्कस्तेविवृहामसि ॥ ३ ॥ ॐआंत्रेभ्यस्तेगुदाभ्योवनिष्टोहृदयादधि ॥
यक्ष्मंकुक्षीभ्यांप्लाशेर्नाभ्याविवृहामिते ॥४॥ ॐउरुभ्यांतेअष्ठीवद्भ्यांपार्ष्णिभ्यांप्रपदाभ्यां ॥ यक्ष्मंभसद्यंश्रोणिभ्यां
भासदंभंससोविवृहामितेस्वाहा ॥ ५॥ सिहनादृनंकरणाल्लोमभ्यस्तेनखेभ्यः ॥ यक्ष्मंसर्वस्वात्मनअस्थिभ्यं स्तंमज्जभ्य
स्नावभ्योधमनिभ्यः ॥ यक्ष्मंपाणिभ्यामङ्गुलिभ्योनखेभ्योविवृहामिते ॥ ६ ॥ ॐअंगेअंगेल्लोम्निलोम्नियस्तेपर्वणि
पर्वणि ॥ यक्ष्मंत्वचस्यंतेवयंकश्यपस्यवीवर्हेणविष्वंचंविवृहामसि ॥ ७ ॥ यक्ष्महणइदंनमम ॥ इतिऋचंअष्टाविंशति
मष्टौवाहुत्वा ॥ नवग्रहाणांतत्तन्मंत्रैर्मिलितदधिमध्वाज्यद्रव्यैः प्रत्यकमष्टाविंशतिमष्टौवाएकैकाहुतिभिर्वाजुहुयात् ॥
सवित्रेसोमायेत्यादित्यागः स्विष्टकृदादिहोमः ॥ ततोभ्यात्तानाद्युत्तरतंत्रशेषंपरिसमाप्य ॥ पत्नोहीत्यभिमंत्र्यसपत्नीकं
सशिशुंयजमानंसिंहव्याघ्रादिवेति पूर्वोक्तैःसूक्तैःस्नापयेत् ॥ ततःगच्छगच्छेतिविसृज्यतिलकंचाशिर्वादः ॥ दशवात्रीन्
ब्राह्मणान्भोजयेत् ॥ आचार्यायगामन्येभ्योवृतेभ्यो सुवर्णादियथाशक्तिदानंदत्वाऽन्येभ्यो भूयसींदत्वायस्मात्कोशेति
कर्मणःसंपूर्णतांवाचयित्वाकृतं कर्मेश्वरार्पणंकुर्यात् ॥ मुंजरज्वादिकमुन्मुच्यनदीफेनेषुनिक्षिपेदिति ॥ ॥ इतिश्रीमदथर्व
गृह्यसूत्रप्रयोगभानौषट्पन्नागर द्विवेदिरविशंकरकृतेगोमुखप्रसवशांतिप्रयोगरश्मिश्चत्वारिंशत् ॥ ४० ॥

॥ अथगोमुखप्रसवोपयोगिगोदानप्रयोगरश्मिरारभ्यते ॥ देशकालौस्मृत्वा श्रीकर्मांगदेवतास्वरूपीपरमेश्वर प्रीत्यर्थं आचार्यीयगोदानंकरिष्ये ॥ तदंगभूतंब्राह्मणवरणंब्राह्मणपूजनं गोपूजनंकरिष्येइतिसंकल्प्य ॥ पूगिफलंगृहींत्वा अमुकप्रवरान्वितोमुकगोत्रोत्पन्नःअमुकशर्माहंयजमानः ॥ अमुकप्रवरात्वितामुकगोत्रोत्पन्नंअमुकशर्माणंब्राह्मणंअस्मद्गो प्रतिग्रहीतारंत्वामहंवृणे ॥ वृतोस्मिइतितेनवाच्यं ॥ ततोद्विजंयथाविभवैःसंपूज्य ॥ गवामंगेआदौदेवतान्यासंकुर्यात् ॥ श्रृंगमूलयोः ब्रह्माणंविष्णुंचन्यसामि ॥ एवमग्रेपि ॥ ललाटेमहादेवंन्यसामि ॥ नासाग्रेपण्मुखंन्यसामि ॥ कर्णयोः अश्विनौदेवौन्यसामि ॥ चक्षुषोःशशिभास्करौन्यसामि ॥ दंतेषुवायूंन्यसामि ॥ जिह्वायांवरुणंन्यसामि ॥ हुंकारे सरस्वतींन्यसामि ॥ गंडयोःयमजौन्यसामि ॥ ओष्टयोःसंध्याद्वयंन्यसामि ॥ कुक्षिदेशेरक्षोन्यसामि ॥ पृष्टेएकादश रुद्रान्न्यसामि ॥ सर्वसंधीषुवसून्न्यसामि ॥ श्रोणितटेपितृन्न्यसामि ॥ लांगूलेसोमंन्यसामि ॥ वालेषुसूर्यकोटिरश्मीन् न्यसामि ॥ गोमुत्रेगंगांन्यसामि ॥ गोमयेनर्मदान्यसामि ॥ क्षीरेसरस्वतींन्यसामि ॥ दध्निनर्मदांन्यसामि ॥ सर्पिषु हुताशंन्यसामि ॥ रोमेषुदेवानांत्रयस्त्रिंशत्कोटिन्न्यसामि ॥ उदरेपृथ्वींन्यसामि ॥ पयोधरेषुचतुःसागरान्न्यसामि ॥ एवंन्यासविधिंकृत्वा उपह्वयेतिध्यायेत् ॥ सौरभेयोसर्वहितेपवित्रेपापनाशिनी ॥ प्रतिगृह्णमयादत्तंपाद्यंत्रैलोक्यरक्षिते॥ ॐभूर्भुवःस्वर्जनदे।विष्णुरूपिण्यैधेन्वैनमः पाद्यंसमर्पयामि ॥ सर्वदेवमयेदेविसर्वदेवमयेशुभे॥ गृहाणार्घ्यंमयादत्तंसौरभे यिनमोस्तुते॥ गवयेनमः अर्घ्यंसमर्पयामि॥ देहस्थितानरुद्राणिशंकरस्यसदाप्रिये ॥ धेनुरूपेणसादेविममपापंव्यपोहतु॥ ॐभूर्भुवःस्वर्जनदोंगवयेनमः आचमनीयंसमर्पयामि॥ यालक्ष्मीसर्वलोकेषुयाचदेवेव्यवस्थिता॥ धेनुरूपेणसादेवीमम पापंव्यपोहतु॥ ॐभू०॥ स्नानंस०॥ आच्छादनंगवेदत्वा सम्यक्शुद्धंसुशोभनम् ॥ सुरभिर्वस्त्रदानेनप्रीयतांपरमेश्वरी ॥ गवेनमःवस्त्रं०॥ श्रीखंडमितिगंधं॥ अक्षताः॥ पुष्पाणि॥ सौभाग्यंद्रव्यं॥ततःगवेअलंकारान्दत्वा॥ अंगभूषणार्थंसुवर्णं॥ चरणभूषणार्थंरजतं॥ भालभूषणार्थमादर्शं॥ नेत्रभूषणार्थंरत्नद्वयं॥ कंठभूषणार्थंघंटांपुष्पस्रजंच॥सर्वावयवभूषणार्थंपट्टकूलं पृष्टभूषणार्थंताम्रं॥ पुच्छभूषणार्थंमुक्ताफलानि॥दोहनार्थंकांस्यं॥ कुंकुमकर्पूरकस्तूरिकासुगंधिद्रव्याणि॥ सप्तधान्यानिपरितः

प्रकल्पयेत् ॥ घृतपूर्णंकुंभः॥ ततःवनस्पति०धूपं०॥ दीपं०॥ धान्यनैवेद्यं०॥ फलं०॥ तांबूलं०॥ दक्षिणां०॥ एतैरुपचारैः संपूज्य ॥ पंचगावः समुत्पन्नामथ्यमानेमहार्णवे ॥ तासांमध्येतुयानंदातस्यैधेन्वैनमोनमइतिमंत्रपुष्पांजलिः ॥ नमस्कारं चकृत्वा ॥ गावोमेअग्रतःसंतुगावोमेसंतुपृष्टतः ॥ गावोमेहृदयेसंतुगवांमध्येवसाम्यहं प इतिप्रार्थयेत् ॥ ततोयजमानः सजलतिलकुशंगृहीतगोपुच्छंधृताक्तंकृत्वा ब्राह्मणहस्तेगोपुच्छंदत्वा ॥ अमुकप्रवरान्वितामुकगोत्रोत्पन्नः अमुकशर्माहं ॥ अमुकगोत्रोत्पन्नाय अमुकशर्मणेब्राह्मणाय इमांगांसवत्सांतरुणींघटोध्नींपयः पूर्णांयथाशक्तिभूषितागोप्रसव सांगतसिद्धि द्वाराकर्मांगदेवतास्वरूपीपरमेश्वरप्रीत्यर्थंतुभ्यमहंसंप्रददेनमम ॥ गौस्तारयतु ॥ पुण्यंवर्द्धतां ॥ शांतिःपुष्टिस्तुष्टिश्चास्तु॥ यज्ञसाधनभूतायाविश्वस्याघौघनाशिनी ॥ विश्वरूपधरोदेवप्रीयतामनयागवा ॥ ॐदेवस्यत्वासवितु० ॥ प्रतिगृह्णतां॥ प्रतिगृह्णामोनिपुनर्भैत्वि द्रयेतिपठित्वा ॥ दानसांगतासिध्यर्थमिमांरजतमयींदक्षिणांतुभ्यमहंसंप्रददे ॥ आगावोअग्मंतु० प्रदक्षिणीकृत्य ॥ यस्यस्मृत्या० अनेनगोप्रदानाख्येनकर्मणा श्रीभगवानकर्मांगदेवतारूपी परमेश्वरःप्रीयतांनमम ॥ यस्म.त्कोाशतिकृतंकर्मेश्वरार्पणंकुर्यात् ॥ ॥इतीश्रीमदथर्वगृह्यसूत्रप्रयोगभानौषट्पत्नागर द्विवेदिरविशंकरकृतेगोप्रसव शांत्युपयोगिगोदानप्रयोगरश्मिःरेकचत्वारिंशत् ॥ ४१ ॥

॥ श्रीकर्माधीश्वरायनमः ॥ अथकृष्णचतुर्दशीजननशांतिप्रयोगरश्मिप्रारंभः ॥ कृष्णचतुर्दशीचषड्भागं कुर्यादादौशुभंस्मृतं ॥ द्वितीयेपितरंहंतितुतीयेमातरंतथा॥ चतुर्थेमातुलंहंतिपंचमेवंशनाशनं॥ षष्टेतुधनहानिस्यादात्मनो वंशनाशनं ॥ तत्रचतुर्दश्याःषडंशानांमध्येद्वितीयतृतीयषष्टांशेषुजनने गोमुखप्रसवपूर्वकंचतुर्दशीशांतिः अन्यभागेकेवल चतुर्दशीशांतिःकार्या ॥ ॥ अथप्रयोगः ॥ ॥ देशकालौस्मृत्वाऽस्यशिशोःकृष्णचतुर्दश्यां अमुकांशजन्मजनितसर्वा रिष्टनिरसनद्वाराश्रीपरमेश्वरप्रीत्यर्थं सग्रहमखांशांतिंकरिष्येइतिसंकल्प्य॥ तदंगगणपतिपूजनस्वस्तिपुण्याहवाचनमातृका पूजननांदिश्राद्धंआचार्यऋत्विग्वरणंचकरिष्ये ॥ एतानिकृत्वा ॥ पूर्वोक्तरीत्याशांत्युदकंसंपाद्य ॥ मूर्त्तीनामग्न्युत्तारण मपिपूर्ववत्कृत्वा ॥ स्थंडिलेग्निस्थापनादिहविर्ग्रहणांतावाज्यभागादिपूर्वतंत्रपरिसमाप्य ॥ स्थंदिलपूर्वभागेस्वस्तिवाचनो

त्करीत्याकलशपंचकंसंस्थाप्य ॥ तदुपरिस्वर्णनिर्मितांवृषारूढां श्रीरुद्रप्रतिमांसंस्थाप्य रुद्रंजलशेतिमंत्रेणावाह्यैकादशा
भिशेकपूर्वकंसंपूज्य ॥ अन्येषुकलशेषुयेपश्चाज्जुहतीतिवरुणमावाह्यपूजयेद्वारुणमंत्रैः ॥ ततोसर्वेसमुद्राःसरितस्तीर्थानि
जलदानदारितिकलशेषुतीर्थान्यावाह्य आसनादिदक्षिणातैरुपचारैः यथाविभवंकांडानुसमयेन पदार्थानुसमयेनवापूजये
दिति ॥ पूजांतेदेवदानव० ॥ इतिकलशेषुवरुणप्रार्थनांकृत्वा ॥ कलशचतुष्टयेसूक्तजपः ॥ आग्नेयकलशेस्वस्त्ययन
सूक्तजपार्थं एकंऋत्विजमुपवेश्यतेनजपःकार्यः ॥ त्यमूषुवाजिनमितिसूक्तं० ॥ नैर्ऋत्यकलशेवरुणसूक्तजपार्थमेकऋत्विजं
उपवेश्यतेनसूक्तजपःकार्यः ॥ अपनःशोशुचदघमिति० ॥ एवमेववायव्यांसहस्रबाहुरितिपुरुषसूक्तजपःकार्यः ॥ एव
मेवैशान्यांरुद्रसूक्तजपः ॥ शांतिसूक्तंचमध्यमेकलशेजपेदिति ॥ एवंसूक्तानिजप्त्वा ॥ ततोग्नेरीशान्यांगृहांश्चसंस्थाप्य ॥
अग्नेर्दक्षिणतः उदकुंभंसदर्भंसंस्थाप्य मुंजरज्वाशिशुंवध्नाप्रपतनोहितिसूक्तेनाज्यहोमंकुर्यात् ॥ ततोहोमःग्रहहोमंविधाय ॥
रुद्रंप्रत्येकंअष्टोत्तरशतसंख्याकाभिरश्वत्थपलाशखादिरसमिद्भिश्चर्वाहुतिभिर्होमंविधाय ॥ तिलद्रव्येणसमस्ताभिर्ष्याहुति
भिरष्टोत्तरशतंहोमः ॥ सर्वासांशांतीनांहोमेषुउदकुंभेसंपातश्च ॥ तेनैवसूक्तेनाभिमंत्र्यतेनोदकेनाभिशेकःकार्यइति
सर्वत्रज्ञेयं ॥ सर्वत्रतत्तद्देवतोद्देशेनत्यागः ॥ पुनःपूजनं ॥ बलिदानं ॥ पूर्णाहुतिः ॥ अभ्यात्तानाद्युत्तरतंत्रंसमाप्य ॥
पूर्वोक्तैःसूक्तैःसपत्नीकंसबालकंयजमानंकुंभोदकैःसिहव्याघ्रेत्यादिभिः सूक्तैःरभिषिंचेयुः ॥ ततस्तद्वस्त्रपरित्यागः ॥ यज-
मानोविभूतिंधृत्वाकांस्यपात्रेसकुटुंबोस्वमुखमवलोक्य ॥ सदक्षिणंतत्पात्रंविधायदत्वाश्रेयोग्रहणंदक्षिणादिदानंआचार्याय
कृतकर्मणःसांगतासिध्यर्थं गोदानंनिष्क्रयद्रव्यं आचार्यायाहंसंप्रददे ॥ ब्राह्मणभोजनंसंकल्पः ॥ ऋत्विभ्योदक्षिणांदत्वा
न्येभोभूयसींदद्यात् ॥ शांताघोरितिशांतिसूक्तंजप्त्वायस्मात्कोशेति कर्मसमापनीयमंत्रंपठित्वा कृतंकर्मेश्वरार्पणंकुर्यादिति
मुंजरज्यादिकंनदीफेनेषुनिक्षिपेत् ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौषट्पत्तनागरद्विवेदीरविशंकरकृते कृष्णचतुर्दशी
जननशांतिप्रयोगरश्मिर्द्विचत्वारिंशत ॥ ४२ ॥ श्रीकृष्णार्पणमस्तु ॥

॥ अथसिनीवालीकुहुजननशांतिप्रयोगरश्मिः ॥ तत्रामावास्यायाः प्रथमोयामोसिनीवाली ॥ अंत्योपांत्य

यामौकुहुः ॥ मध्यवर्त्तिपंचयामादर्शइतिकेचित् ॥ अपरेतुचतुर्दशीमात्रयुतेहोरात्रेवर्त्तमानामावास्यासिनीवाली ॥
प्रतिपन्मात्रयुतेहोरात्रेवर्त्तमानाकुहुः ॥ तेनअमायावासरत्रयस्यक्षयाभावेचदर्शोनास्त्येव ॥ उदयात्पूर्वाहोरात्रवर्त्तमाना
यासिनिवालित्वात् ॥ उत्तरोत्तरंवर्त्तमानायाकुहुत्वात् ॥ दिनक्षयेसत्यप्यमादर्शसंज्ञानतत्रशिनीवालीकुहुभागौ ॥ केवल
चतुर्दशींकेवलप्रतिपद्युक्तत्वाभावात् ॥ एवंदिनवृद्धौत्रिदिनस्पर्शे मध्यदिनस्थाषष्टीनाडिमितामावाभावास्यादर्शसंज्ञा ॥
चतुर्दश्यादियोगाभावात् ॥ पूर्वोत्तरदिनस्थौभागौसिनीवालीकुहुसंज्ञावित्याहुः ॥ इदंमयूखेस्पष्टम् ॥ सिनीवाल्यां
प्रसूतास्याद्यस्यभार्यापशुस्तथा ॥ गजाश्वमहिषीचैवशक्रस्यापिश्रियंहरेत् ॥ गोपक्षीमृगदासीनांप्रसूतिस्पतद्वत् ॥
कुहुप्रसूतिरत्यर्थंसर्वदोषकरीस्मृता ॥ यस्यप्रसूतिरेतेषांतयायुर्धननाशनं ॥ शांत्यभावेऽहेतिपाठमात्रज्ञातोनुसंशयः ॥
अत्यागेनाशयेत्किंचित्स्वयंवानाशमाप्नुयात् ॥ ॥ अथप्रयोगः ॥ कर्त्ताऽस्यकुमारस्यसिनीवालीजननसूचितसर्वारिष्ट
परिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थं ग्रहमखपुरःसरंसिनीवालीजननशांतिंकरिष्ये ॥ तदंगगणपतिपूजनपूर्वकंस्वस्तिपुण्याह
वाचनंमातृकापूजनंनांदिश्राद्धं शांतिकलशकरणंआचार्यादीनांवरणंचकरिष्ये ॥ एतानिकृत्वा ॥ कुहुजननेतुआदौगोतुख
प्रसवकरणमितिकेचित ॥ देशकालौस्मृत्वा अस्यकुमारस्यकुहुजननसूचितसकलारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं
सग्रहमखांगगोक्तांकुहजननशांतिंकरिष्ये ॥ तदंगगणपतिपूजनादि सर्वपूर्ववत्संकल्प्य ॥ ततःआचार्यादिवरणं ॥ तेषां
क्रमेणपूजनं ॥ ततोमूर्त्तित्रयस्याग्न्युत्तारणं ॥ ततःआचार्यःसपवित्रपाणिःदेशकालौसंकीर्त्य यजमानव्रतोहमाचार्यकर्म
करिष्येइतिसंकल्प्य यदत्रसंस्थितमितिसर्षपविकीरणादिकंकृत्वा ॥ ततःस्वस्तिवाचनोक्तरीत्थाकलशस्थापनं ॥ मध्य
कलशेरुद्रंजलाशेतिरुद्रंसंस्थाप्यपूजयेत् ॥ चतुर्दिक्षुकलशेषुदक्षिणतः यतइंद्रेतिभर्गःत्रिष्टुप् ॥ इद्रस्त्रिष्टुपूस्थाप० ॥ यतइंद्र
भयामहेततोनोइतिइंद्रंस्थाप्यावाह्य पूजयेत् ॥ येपश्चाज्जुहतीतिमंत्रेणवरुणंपृथक् आवाह्य ॥ सर्वेसमुद्राइतितीर्थान्यावाह्य
पूजयेत्तद्यथा ॥ आसनादिदक्षिणादानांतंपूजनंकृत्वा देवदानवइतिसंप्रार्थ्य ॥ चतुर्षुकलशेषुसूक्तजपः ॥ सूक्तानितु
पूर्वोक्तानि ॥ तत्राग्नेयकलशेस्वस्त्ययनं ॥ वायव्यकलशेपुरुषसूक्तं ॥ नैर्ऋत्येशांतिसूक्तं ॥ इशानेरुद्रसूक्तं ॥ अथाचार्योग्नि

स्थापयित्वावरदानामानमग्निंप्रतिष्ठाप्य ॥ इशान्यांगृहान्संस्थाप्य ॥ तत्रेशान्यांकलशंसंस्थाप्य ॥ तत्रवरुणमावाह्य संपूज्य ॥ तदुत्तरे आयंतुनइतिपितृन्संस्थाप्यपूजयेत् ॥ उदकुंभंअग्नेदक्षिणतःसंस्थाप्य पत्नोहीतिसंपातःपूर्ववत् ॥ उक्त रीत्याग्रहहोमविधाय ॥ रुद्रंअश्वत्थप्लक्षपलाशखादिरसमिदाहुतिभिर्हुत्वा प्रत्येकमष्टोत्तरशतहोमः ॥ आज्याहुतिभि स्तिलमात्रमाषाहुतिभिश्वसर्षपाहुतिभिर्हुत्वा ॥ इंद्रंपितृनप्रत्येकमष्टाविंशतिसंख्याकाभिः पूर्वोक्तद्रव्याहुतिभिर्हुत्वा ॥ स्थापितदेवतानांपुनःपूजनं ॥ श्रीसूक्तहोमश्चबलिदानंइंद्रादिदिक्पालेभ्योदत्वा ॥ पूर्णाहूतिर्जुहुयात् ॥ तत्रपूर्णाहुति सूक्तंगृहमखप्रकरणेपूर्वमुक्तंज्ञेयं ॥ तत्रगृहकुंभसहितचतुःकलशजलंगृहीत्वा शतछिद्रकुंभेनिक्षिप्यतेनोदकेनशूर्पादिना सपत्निकंसमौंजपाशबद्धबालकंयजमानं परिधत्तैकनूतनवसनंऋतुशांत्युक्ता भिशेकमंत्रैर्ब्राह्मणाअभिशेकंकुर्युरिति ॥ तत आचार्यादिऋत्विग्भ्योगवादिदानानिदद्यात् ॥ तेनांतेपृथक्दक्षिणादानंनकार्यं ॥ अतएवात्रगवादेर्दक्षिणारूपत्वात्स दक्षिणंदानंनभवति ॥ अन्यत्रदशदानादीनांसदक्षिणंदानंकार्यम् ॥ दानानितु ॥ गोदानंवस्त्रदानंचसुवर्णंचोर्वरांशुभां ॥ दशदानानिचोक्तानिक्षीरमाज्यंगुडस्तथा ॥ आज्यावेक्षणमेतानितत्तन्मंत्रैश्चकारयेत् ॥ क्रमेणदानानिदद्यात् ॥ देशकालौ स्मृत्वामयाकृतस्यकर्मणः साद्गुण्यार्थंआचार्यादिऋत्विग्भ्यो दक्षिणात्वेनगवादिविहितदानानिकरिष्ये ॥ आचार्यादीन् संपूज्य दानवाक्यं ॥ गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश ॥ यस्मात्तस्माच्छिवंमेस्यादिहलोकेपरत्रच ॥ इमांगांदक्षिणात्वेन आचार्यायतुभ्यमहंसंप्रददे ॥ एवंसर्वत्र ॥ अथवस्त्रदानं ॥ शरण्येसर्वलोकानांलज्जायारक्षणंपरं ॥ सुवेषधारिवस्त्रत्वमतः शांतिंप्रयच्छमे ॥ इदंवस्त्रत्रयंदक्षिणात्वेन अमुकशर्मणेब्राह्मणायतुभ्यमहंसप्रददे ॥ अथसुवर्णं ॥ हिरण्यगर्भगर्भस्तुइति हिरण्यंदत्वा ॥ अथभूमिदानम् ॥ सर्वभूताश्रया भूमिर्वराहेणसमुद्धृता ॥ अनंतसस्यफलदाह्यतःशांतिंप्रयच्छमे ॥ इमांभूमिं दक्षिणात्वेनअमुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे ॥ अथदशदानानि ॥ तत्रमंत्रःयज्ञसाधनभूतायाविश्वस्यौघप्रणाशिनि॥ विश्वरूपा० ॥ अथभूमिं० ॥ सर्वस्या० ॥२॥ अथतिलाः ॥ महर्षेगोत्रसंभूताकश्यपस्यतिलास्मृताः॥ तस्मादेषांप्रदाने नममपापंव्यपोहतु ॥ अथहिरण्यंहिरण्यगर्भ० ॥ अथआज्यं ॥ कामधेनुषुसंभूतंसर्वक्रतुषुसंस्थितं ॥ देवानामाज्यमाहार

मतःशांतिंप्रयच्छमे ॥ अथवस्त्रं ॥ शरण्ये० प्रयच्छमे ॥६॥ अथधान्यं ॥ सर्वदेवमयंधान्यं सर्वोत्पत्तिकरंमहत ॥ प्राणीनां जीवनोपायमतःशांतिंप्रयच्छमे ॥७॥ अथगुडदानम् ॥ यथादेवेषुविश्वात्माप्रवरश्चजनार्दनः ॥ सामवेदस्तुवेदानांमहादेव स्तुयोगिनां ॥ प्रणवःसर्वमंत्राणांस्त्रीणांचपार्वतीयथा तथारसानांप्रवरसदेवेक्षुरसोत्तमः ॥ ममतस्मात्परांलक्ष्मींददस्वगुड सर्वदा ॥८॥ अथरौप्यं ॥ प्रीतीयतःपितृणांचविष्णुशंकरयोःसदा ॥ शिवनेत्रोद्भवंरूप्यमतःशांतिंप्रयच्छमे ॥९॥ अथलवणं ॥ यस्मादन्नरसाःसर्वेनोत्कृष्टालवणंविनाशंभोः प्रीतिकरंनित्यमतः शांतिंप्रयच्छमे ॥१०॥ इतिदशदानानि ॥ ततःक्षीरंदद्यात ॥ क्षीरजातस्तथाशंखःक्षीरादमृतसंभवः ॥ क्षीरात्क्षीरोदवत्कीर्त्तिःक्षीरेप्राणस्यसंभवः ॥ तस्मात्क्षीरप्रदाने नह्यतःशांतिंप्रयच्छमे ॥ अथाज्यकामधेनु० ॥ २ ॥ अथगुडं ॥ यथादेवे० ॥ सामवे० ॥ प्रणव०॥ यथा० ॥ तथा० ॥ सर्वदा०॥ ततआज्यपूर्णंकांस्यपात्रेरूपंरूपमितिसकुटुंबः प्रतिरूपंवीक्ष्यदद्यात् ॥ आज्यंतेजःसमुद्दिष्टमाज्यंपापहरंपरं ॥ आज्यंसुराणामाहारआज्येदेवाःप्रतिष्ठिता ॥ इदंआज्यपात्रंदक्षिणात्वेनअमुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे ॥ एतानि दक्षिणात्वेनदेयानि ॥ अथतेषांमानं ॥ भुवोमानंगोचर्मगोचर्मनामहस्ता २९००० ॥ आज्यस्यचत्वारिंशत्पलानि ॥ वाससहितत्वम् ॥ धान्यस्यपंचद्रोणाः ॥ एवंगुडलवणयोः ॥ एतावत्प्रमाणाशक्तौनित्यनैमित्तिकेयथाशक्तिदेयानि ॥ यथाशक्तिहिरण्यंवातत्प्रतिनिधित्वेनहिरण्यगर्भेतिमंत्रेणदेयं ॥ नैमित्तिकादेरकरणेप्रत्यवायात् ॥ अभ्युदयादिफलार्थंतु दशदानानिशांतिंविनानकार्याणी तेनांते ॥ अत्रस्थानदेवयापूर्नोत्तरंपाठक्रमात् ॥ ऋत्विग्भ्योगवादिनंदक्षिणारूपत्वा दानानिकेचित्कुर्वंते ॥ ममतुइहकविषये अर्थक्रमेण अंतेदक्षिणादानमितिभाति ॥ कमलाकरेप्याशयएवमेव ॥ ततःपूर्ण पात्रादिकंदत्वा अभ्यात्तानानुत्तरतंत्रंपरिसमाप्य अग्न्यर्चनांतेविभूतिंधृत्वास्थापितदेवतानामुत्तरपूजनंविसर्जनं श्रेयोग्रहणं प्रतिपदानंच कृत्वा यथाशक्तिद्विजानुज्ञयाब्राह्मणानन्यांश्चांधपंग्वादीन्भोजयेत् यत्मातकोशेतिपठित्वा ॥ शांताद्यौरिति शांतिंपठित्वा कृतकर्मेश्वरार्पणंकुर्यात् ॥ ॥ इतीश्रीमदथर्वगृह्यसूत्रप्रयोगभानौ रविशंकरकृतेसिनीवालीकुहुजननशांति प्रयोगरश्मिःद्विचत्वारिंशत् ॥ ४२ ॥

॥ ॐ श्रीगणेशायनमः ॥ अथदर्शशांतिप्रयोगरश्मिप्रारंभः ॥ अथातोदर्शजातानांमातापित्रोर्दरिद्रता ॥ तद्दोष परिहारार्थंशांतिरस्यामितेसदा ॥ १ ॥ ॥ अथप्रयोगः ॥ अथकर्त्तादेशकालौसंकीर्त्य अस्यबालकस्यदर्शजननजनित सर्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थंदर्शजननशांतिंकरिष्ये ॥ तत्रादौब्रह्मजज्ञानंप्रथमसश्रेतिपठित्वा गणेशांबिकयोः पूजनादिब्राह्मणवरणांतंकृत्वा ॥ अथाचार्यःत्यमूषुवाजिनमितिस्वस्त्ययनसूक्तपठित्वा ॥ स्थंडिलात्पूर्वभागेसर्वतोभद्र पर्याप्तंस्थलंत्यक्त्वातदग्रात्पूर्वेकलश स्थापनक्रमेणकलशंस्थापयेत् ॥ तत्रतीर्थोदकंपूरयित्वा पंचगव्यमंत्रैःपृथक्पंच गव्यानिनिक्षिप्य ॥ वटोदुंबराश्वत्थाम्रनिंबमूलानांत्वचरौषधी मंत्रेणनिक्षिप्य ॥ एवंक्रमेणपूर्णपात्रादिस्थापनम् ॥ आयांत्वितिसमुद्रादितीर्थान्यावाह्य आसनादिदक्षिणा दानांतैरुपचारैःसंपूज्य ॥ अत्रकेचित्पूर्णपात्रस्थापनंनकुर्वंतिएतै र्मंत्रैरभिमंत्रयति ॥ आपोहिष्ठासूक्त ॥ अपनःशोशुचदघमितिसूक्तं० ॥ हिरण्यवर्णाइतिसूक्तं० ॥ इत्यभिमंत्र्य ॥ कलशाग्नयोर्मध्ये सर्वतोभद्रंविरच्यब्रह्मादि मंडलदेवतास्वस्वमंत्रैर्नाममंत्रैर्वाआवाह्यसंस्थाप्य ॥ ॐतदस्त्वितिप्रतिष्ठाप्य संपूज्यतदुपरिआचारात् धान्यराशिंकृत्वा तत्रकृताग्न्युत्तारणपूर्वकं मूर्त्तित्रयंस्थापयेत् ॥ मध्येसुवर्णप्रतिमां ॥ येबोदेवो त्यथर्वापितृन्जगती पितॄन्स्थापनेविनियोगः ॥ ॐयेबोदेवाःपितरोयेचपुत्रासचेतसोमेशृणुतेदमुक्तं ॥ सर्वेभ्योवः परिददाम्येतंस्वस्त्येनंजरसेवहाथ ॥ इतिपितृन् ॥ तद्दक्षिणेरजतप्रतिमायांशंकधूममितिमंत्रेणसोमंस्थापयेत् ॥ तदुत्तर तस्ताम्रप्रतिमायांविषासहीतिमंत्रेणसूर्यंस्थापयेत् ॥ ततःषोडशोपचारैःपूजयेच्च ॥ ततोवरदनामानमग्निंप्रतिष्ठाप्य ॥ सर्वतोभद्रमंडलादीशान्यांग्रहपीठदेवतास्थापनं पूजनांतंकृत्वा अभ्यातानादिपूर्वतंत्राद्याज्यभागौहुत्वा ॥ त्यागेकृते ॥ आयुरारोग्यसिध्यर्थं सर्वारिष्टप्रशांतये ॥ तेषामायुः श्रियेचैवशांतिहोमं करोम्यहम् ॥ आदावुदकुंभं पत्नोहीति संपात्याभिमंत्र्य ॥ पूर्वोक्तरीत्याग्रहहोमंकृत्वा पितॄन्अष्टोत्तरशतचर्वाहुतिभिः समिदाहुतिभिराज्याहुतिभिर्वा ॥ एव मेवसूर्यसोमयोरपिहोमंविदध्यात् ॥ ततोपुनःपूजनं ॥ बलिदानंपूर्णाहुतिश्चस्विष्टकृदादिउत्तरतंत्रंसमाप्य अभिषेकःकार्य इत्येकःपक्षः ॥ अपरेतुपूर्वंमातापितृशिशूनांपूर्ववदभिषेकः ॥ मौंजीपाशबंधनंच ॥ पक्षयोर्मध्येएकपक्षांगींकृत्यअभिषेकः

कार्यः ॥ तत्रलक्ष्मीसूक्तेनाभिषेकेतिविशेषः ॥ शेषंपूर्ववत् ॥ कृष्णांधेनुमाचार्यायदत्वा ॥ स्थापितदेवतोत्थापनंकृत्वा प्रतिमादिकंसर्वद्रव्यमाचार्यायदत्वा ॥ ब्राह्मणान्भोजयित्वा अन्येभ्यःभूयसीदत्वा स्वस्तिवाचनंकारयित्वा यस्मात् कोशेतिकर्मसमापनीयमंत्रंपठित्वा कृतंकर्मेश्वरार्पणंकृत्वासुहृद्भिःसहसंभुंजीतनदीफेनेषु मौंजीपाशमोचनंकुर्याद्कर्मणानेन भगवानकर्मांगदेवताप्रीयतांनममेति ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौषट्पन्नागर द्विवेदिरविशंकरकृतेदर्शजनन शांतिप्रयोगरश्मिश्चतुश्चत्वारिंशत् ॥४४॥

॥अथनक्षत्रशांतयः ॥ ॥ तत्रादौमूलशांतिप्रयोगरश्मिप्रारंभ ॥ तत्रादौमूलनक्षत्रफलं ॥ पिताम्रियतेमूलाद्ये कन्यापुत्रजनिर्यदि ॥ द्वितीयेजननीनाशोधननाशस्तृतीयके ॥ चतुर्थेकुलशोनःस्याच्छांतिःकार्याप्रयत्नतः ॥ क्वचिच्चतुर्थ चरणःशुभउक्तोमनीषिभिः ॥ एवंचदुहितुर्ज्ञेयंमूलजातफलंबुधैः ॥ केचित्तुकन्याहंतिमूलर्क्षेपितरंमातरंतथा ॥ मूलजा श्वशुरंहंतिश्वश्रूमाश्लेषयासुता ॥ ज्येष्ठायांतुयातिज्येष्ठंविशाखोत्थातुदेवरं ॥ शांतिर्वापुष्कलास्याच्चेत्तद्दिदोषोनविद्यते इत्याहुः ॥ अभुक्तमूलसंभावंपरित्यजेत्तुबालकं ॥ समाष्टकंपिताथवानतन्मुखंविलोकयेत् ॥ तदाद्यपादकेपिताविपद्यते जनन्यथतृतीयकेधनक्षयश्चतुर्थकेशुभावहः ॥ अथअभुक्तमूललक्षणं ॥ ज्येष्ठांतेघटिकाद्वयं ॥ अभुक्तमूलमथवासंधिनाडि चतुष्टयं ॥ वृषालिसिंहेचघटेचमूलंदिविस्थितं युग्मतुलांगनात्ये ॥ पातालगंमेषधनुःकुलिरनक्रेषुमर्त्येष्वितिसंस्मरंति ॥ वृषभवृश्चिकसिंहकुंभलग्नस्थितमूलस्वर्गस्थितं ॥ मिथुनतुलकन्यामीनलग्नस्थितमूलंपाताललोकेस्थितम् ॥ मेषधनकर्कमकर लग्नस्थितमूलंमृत्युलोकेस्थितं ॥ एतत्लग्नफलं ॥ स्वर्गेमूलेभवद्राज्यंपातालेचधनागमः ॥ मृत्युलोकेयदामूलंतदाशून्यं समादिशेत् ॥ नवमासंसव्यदोषोमूलदोषोष्टवर्षकं ॥ ज्येष्ठामासान्पंचदशतस्यदर्शनवर्जनं ॥ व्यतिपातेंगहानिःस्यात्परिघो मृत्युमादिशेत् ॥ वैधृतौपितृहानिःस्यान्नष्टेशावंधतांव्रजेत् ॥ मूलेसमूलनाशःस्यात्कुलनाशोधृतौभवेत् ॥ विलतांगैश्चहीने चसंध्ययोरुभयोरपि ॥ तद्वत्सदंतजातस्तुपादजातस्तथैवच ॥ तस्माच्छांतिंप्रकुर्वीतग्रहाणांक्रूरचेतसां ॥ व्यतीपातादौ ग्रहमखसहितातत्रशांतिरावश्यंकार्या इतरशांतिषुग्रहमखोनावश्यकःइत्यर्थः ॥ अभुक्तमूलोत्पत्तोवर्षाष्टकंशिशुत्यागः ॥

तदनंतरंशांतिः ॥ तदन्यमूलोत्पत्तौविधिनामूलशांतिंकरिष्ये ॥ द्वितीयादिपादोत्पन्नोसंकल्पेतथोहः ॥ देशकालौस्मृत्वा
ममास्यकुमारस्यमूल प्रथमचरणोत्पत्तौसूचितारिष्ट निरसनार्थंग्रहमखां शौनकोक्तद्वादशाहे अन्यविहितागामिमूलयुते
शुभदिनेवागोमसवशांतिंकृत्वा ॥ कंन्याजननेतुममास्याकुमार्याः मूलप्रथमचरणोत्पत्तौइतिविशेषः॥ तत्रादौनिर्विघ्नता
सिध्यर्थंमहागणपतिपूजनपूर्वकंस्वस्तिपुण्याहवाचनं नांदिश्राद्धंआचार्यादिकर्मकरिष्येइतिसंकल्प्य॥ नांदिश्राद्धांतंकृत्वा॥
आचार्यंब्रह्माणं ॥ तदस्यमृत्विजश्चाष्टौचतुरोवावृत्वा ॥ मधुपर्कवस्त्रालंकारादिभिर्यथाविभवमर्चयेत् ॥ ततःआचार्यः ॥
पवित्रपाणिर्जीवास्येतिविधिवदाचम्य अस्मीन्सग्रहमखमूलशांत्याख्ये कर्मणिआचार्यकर्मकरिष्ये ॥ ॐयदत्रसंस्थित
मितिमंत्रेणसर्षपविकीरणांदियागभूमौकृत्वा ॥ एतोन्विंद्रंस्तवामेतितिसृभि ऋग्भिर्जलमभिमंत्र्यतेनापोहिष्ठेतितृचेनतां
भूमिंप्रोक्ष्य ॥ ततःप्रतिमाग्न्युत्तारणंकृत्वा ॥ स्थंडिलादीशान्यांस्वस्तिकंविरच्य ॥ ततःस्वस्तिवाचनोक्तरीत्यातत्रोक्त
मंत्रैश्चतुरःकलशान्गंधादिना पूजयित्वाचतुर्दिक्षुयथाक्रमंसंस्थाप्याः ॥ प्रतिकलशंमंत्रावृत्तिः ततःमध्यकलशस्थपूर्णपात्रो
परिसाष्टदलरक्तवस्त्रे सुवर्णनिर्मितप्रतिमायां रुद्रंजलाशभेषजमिति पूर्वोक्तमंत्रेणरुद्रमावाह्य तेनैवमंत्रेणशोडषोपचारैः
संपूज्य ॥ चतुर्षुकुंभेषुयेपश्चाज्जुहतीतिमंत्रेणवरुणमावाह्यपंचोपचारैःसंपूज्य ॥ ततोमध्यमकुंभेजपः ॥ एकऋत्विक्रुद्र
कुंभंस्पृष्ट्वाचत्वारिरुद्रसूक्तानिजपेत् ॥ रुद्रंजलाषभेषजमितिमंत्रमष्टोत्तरशतंसहस्रंजपेत् ॥ अथपूर्वादिदिक्षुचतुर्षुवरुणकुंभेषु
सूक्तजपःतानि ॥ ततःपूर्वकुंभे ॥ इन्द्रस्यबाहूस्थविरौवृषणौचित्राइमावृषभौ पारयिष्णू तौयेक्षेभथमोयोग आगतेयाभ्यां
जितमसुराणांस्वं१र्यत् ॥ ॐआशुःशिशानोवृषभोनभीमोघनाघनः क्षोभणश्चर्षणीनां ॥ संक्रंदनोनिमिष एकवीरःशतं
सेनाअजयत्साकमिंद्रः ॥ १ ॥ संक्रंदनेनानिमिषेणजिष्णुनायोध्येनदुश्च्यवनेनधृष्णुना ॥ तदिंद्रेणजयततत्सहध्वंयुधोनर
इषुहस्तेनधृष्णां ॥ २ ॥ सइषुहस्तैः सनिषंगिभिर्वशीसंस्रष्टा सयुधइंद्रोगणेन । संसृष्टजित्सोमपावाहुशर्ध्यु१ग्रधन्वा
प्रतिहिताभिरस्तात् ॥ ३ ॥ बलविज्ञायस्थविरःप्रवीरः सहस्वान्वाजिसहमानउग्रः ॥ अभिवीरोअभिसत्वासहोजि

ज्जैत्रमिंद्ररथमातिष्ठगोविदं ॥ ४ ॥ इमंवीरमित्येका० ॥ ५ ॥ अभिगोत्राणिसहसागाहमानोदायउग्रःशतमन्युरिंद्रः ॥
दुश्च्यवनःपृतनाषाडयोध्यो३स्माकंसेनाअवतुप्रयुत्सु ॥ ६ ॥ बृहस्पतेपरिदीयारथेनरक्षोहामित्रौअपबाधमानः ॥ प्रभंजन्
छत्रुंन्प्रमृणंनमित्रांनस्माकमेध्यवितातनूनाम् ॥ ७ ॥ इंद्रएषांनेताबृहस्पतिर्दक्षिणायज्ञः पुरएतुसोमः ॥ देवसेनानामभि
भंजतीनांजयंतीनांमरुतोयंतुमध्ये ॥ ८ ॥ इंद्रस्यवृष्णोवरुणस्यराज्ञआदित्यानांमरुतांशर्द्धउग्रम् ॥ महामनसांभुवन
च्यवानांघोषोदेवानांजयतामुदस्थात् ॥ ९ ॥ अस्माकमिंद्रःसमृतेषुध्वजेष्वस्माकंयाइषवस्ताजयंतु ॥ अस्माकंवीरा
उत्तरेभवंत्वस्मांउदेवाअवताहवेषु ॥ १० ॥ ॥ अथदक्षिणदिक्स्थितवरुणकुंभे ॥ ॐपुनंतुमादेवजनाःपुनंतुमनवोधिया ॥
पुनंतुविश्वाभूतानिपवमानःपुनातुमाम् ॥ १ ॥ पवमानःपुनातुमांक्रत्वेदक्षायजीवसे ॥ अथोअरिष्टतातये ॥२॥ उभाभ्यां
देवसवितःपवित्रेणसवेनच ॥ अस्मान्पुनीहिचक्षसे ॥ ३ ॥ अग्नेरिवास्यदहतएतिशुष्मिणउतेवमत्तेविलपन्नपायति ॥
अन्यमस्मदिच्छतुकंचिदव्रतस्तपुर्वधायनमोअस्तुतक्मने ॥ ४ ॥ नमोरुद्रायनमोअस्तुतक्मने नमोराज्ञेवरुणायत्विषीमते॥
नमोदिवेनमःपृथिव्यैनम ओषधीभ्यः ॥ ५ ॥ अयंयोअभिशोचयिष्णुर्विश्वारूपाणिहरिताकृणोषि ॥ तस्यैतेवरुणाय
बभ्रवेनमःकृणोमेमन्यवेतक्मने ॥ ६ ॥ ॥ अथपश्चिमस्थवरुणकुंभे ॥ उपप्रागादेवोअग्नीरक्षोहामीवचातनः ॥ दहन्न
पद्वयाविनोयातुधानान्किमीदिनः ॥ १ ॥ प्रतिदहयातुधानान्प्रतिदेवकिमीदिनः ॥ प्रतीचीःकृष्णवर्तनेसंदहयातुधान्यः
॥२॥ याशशापशपनेनयाघंमूरमादधे ॥ यारसस्यहरणायजातमारेभेतोकमत्तुसा ॥ ३ ॥ पुत्रमत्तुंयातुधानीःस्वसारमुत
नप्त्यम् ॥ अथामिथोविकेश्यो३विघ्नंतांयातुधान्यो३वितृह्यंतामराय्यः ॥ ४ ॥ ॥ ततउत्तरकुंभे ॥ रक्षोहणंवाजिन
माजिघर्मिमित्रंपृथिष्ठमुपयामिशर्म ॥ शिशानोअग्निः क्रतुभिःसमिद्धःसनोदिवासरिषःपातुनक्तम् ॥ १ ॥ अयोदंष्ट्रो

अर्चिषायातुधानानुपस्पृशजातवेदःसमिद्धः ॥ आजिह्वयामूरदेवान्रभस्वक्रव्यादोवृष्ट्वापिधस्वासन् ॥ २ ॥ उभोभयां विन्नुपदेहिदंष्ट्रौहिंस्रः सिशानोवरंपरंच ॥ उतांतरिक्षेपरिपाह्यग्रेजंभैःसंधेह्यभियातुधानान् ॥ ३ ॥ अग्नेत्वचंयातुधान स्यभिंधिहिंस्राशनिर्हरसाहंत्वेनं ॥ प्रपर्वाणिजातवेदः शृणीहिक्रव्याक्रविष्णुर्विचिनोत्वेनम् ॥ ४ ॥ यत्रेदानींपश्यसि जातवेदस्तिष्ठंतमग्नउतवाचरंतं ॥ उत्तांतरिक्षेपतंतंयातुधानंतमस्ताविध्यशर्वाशिशानः ॥ ५ ॥ यज्ञैरिषुःसन्नममानोअग्ने वाचाशल्यांअशनिभिर्दिहानः ॥ ताभिर्विध्यहृदयेयातुधानान्प्रतीचोबाहून्प्रतिभङ्ध्येषाम् ॥ ६ ॥ उतारब्धान्स्पृणुहि जातवेदउतारेभाणांऋष्टिभिर्यातुधानान् ॥ अग्नेपूर्वोजंनिहिपोशुचानआमादःक्ष्विंकास्तमदंत्वेनीः ॥ ७ ॥ इहप्रब्रूहि यतमःसोअग्नेयातुधानोयइदंकृणोति ॥ तमारभस्वसमिधायविष्ठनृचक्षसश्चक्षुषेरंधयेनम् ॥ ८ ॥ तीक्ष्णेनाग्नेचक्षुषारक्ष यज्ञंप्रांचंवसुभ्यःप्रणयप्रचेतः हिंस्रंरक्षांस्यभिशोशुचानंमात्वादभंन्यातुधानान्नृचक्षसः ॥ ९ ॥ नृचक्षारक्षःपरिपश्यविक्षुत स्यत्रिणिप्रतिशृणीह्यग्रा ॥ तस्याग्ने पृष्टीहरसाशृणीहित्रेधामूलंयातुधानस्यवृश्च ॥१०॥ त्रिर्यातुधानःप्रसितिंतएत्वृतंयो अग्नेअनृतेनहंति ॥ तमर्चिषास्फूर्जयन् जातवेदसमक्षमेनंगृणतेनियुङ्धिः ॥ १ ॥ यदग्नेअद्यमिथुनाशपातोयद्वाच स्तृष्टंजनयंतरेभाः ॥ मन्योमनसःशरव्या३जायतेयातयाविध्यहृदयेयातुधानान् ॥ २ ॥ पराशृणीहितपसायातुधानान् पराग्नेरक्षोहरसाशृणीहि ॥ परार्चिषामूरदेवान्शृणीहि परासुतृपःशोशुचतःशृणीहि ॥ ३ ॥ पराद्यदेवावृजिनंशृणंतु प्रत्यगेनंशपथायंतुसृष्टाः ॥ वाचास्तेनंशरवऋच्छंतुमर्मन् विश्वस्यैतुप्रसितिंयातुधानः ॥ ४ ॥ यःपौरुषेयेणक्रविषासमङ्क्ते योअश्व्येनपशुनायातुधानः योअघ्न्यायाभरतीक्षीरमग्नेतेषांशीर्षाणिहरसापिवृश्च ॥ ५ ॥ विषंगवांयातुधानाभरंतामावृश्चं तामदितयेदुरेवाःपरैणांदेवः सवितादददातुपराभागमोषधीनांजयंताम् ॥६॥ संवत्सरीणंपयउस्रियायास्तस्यमाशीद्यातुधानो

नृचक्षः ॥ पीयूषमग्नेयतमस्तितृप्सात्तंप्रत्यंचमर्चिषाविध्यमर्मणि ॥ ७ ॥ सनादग्नेमृणासियातुधानान्नत्वा रक्षांसिपृतनासुजिग्युः सहमूराननुदहक्रव्यादोमाते हेत्यामुक्षतदैव्यायाः इत्येका ॥ ८ ॥ त्वन्नोअग्ने अधरादुदक्तस्त्वंपश्चादुत्तरक्षापुरस्तात् ॥ प्रतित्येते अजरासस्तपिष्ठा अघशंसंशोशुचतोदहंतु ॥ ९ ॥ पश्चात्पुरस्तादधरादुतोत्तरात्कविःकाव्येनपरिपाह्यग्ने ॥ सखासखायमजरोजरिम्णेअग्नेमर्ताँ१अमर्त्यस्त्वन्नः ॥ १० ॥ ॥इतिसूक्तानिपठेत् ततःस्थापित भोत्तर तश्चतुर्विंशतिदलंपंचकंपंचवर्णैःकृत्वातत्रव्रीहयः निक्षीप्यतत्रव्रीहिषुसौवर्णरजतंताम्रंमृन्मयंवाकुंभंविधिनास्थापयित्वा ॥ तत्रइमंगंगेतिजलमापूर्य ॥ गंधद्वारामितिगंधंप्रक्षिप्त्वा ॥ तत्रशतमूलानिनिक्षिपेत् ॥ तदभावेविष्णुक्रातासहदेवी ॥ तुलसी ॥ सतावरो ॥ प्रक्षिप्य ॥ कुशान् ॥ कुंकुमचनिक्षिप्य ततःपूर्णपात्रांतंकृत्वोपरिवस्त्रे अष्टदलंकृत्वाकर्णिकायां ॥ अभितंनिर्ऋतिमित्यथर्वकिण्वोनिर्ऋतिगायत्रीनिर्ऋतिस्थापनेविनियोगः ॥ ॐअभितंनिर्ऋतिधत्तमश्वमिवाश्वाभिधान्या ॥ मल्वोयोमह्यंकुध्यतिसउपाशान्नमुच्यते ॥ १ ॥ निर्ऋतिंसांगंसपरिवारंसायुधंसशक्तिकंआवाहयामि ॥ तद्दक्षिणेत्रातारमिंद्रमितिइंद्रंआवाहयामि ॥ उत्तरे येपश्चाज्जुह्वतीत्यापःआवाहयामि ॥ ततःप्रागादितश्चतुर्विंशतिषुभूमिस्थदलेपुउत्तराषाढा धनुराधांतानिनक्षत्राणितद्देवतावास्थापयेत् ॥ देवताश्चपूगिफलेषु अक्षतपुंजेषुवाआवाहयेत् ॥ सयथा ॥ ॐविश्वेभ्यो देवेभ्योनमः ॥ विश्वान्देवानावाहयामि ॥ एवंसर्वत्र ॥ ॐविष्णवेनमः ॥ ॐवसुभ्योनमः ॥ ॐवरुणायनमः ॥ ॐ अजैकपदेकपदेनमः ॥ ॐअहिर्बुध्न्यायनमः ॥ ॐपूष्णेनमः ॥ ॐअश्विभ्यांनमः ॥ ॐयमायनमः ॥ ॐअग्नयेनमः ॥ ॐप्रजापतयेनमः ॥ ॐसोमायनमः ॥ ॐरुद्रायनमः ॥ ॐआदित्यायनमः । ॐबृहस्पतयेनमः ॥ ॐसर्पेभ्योनमः ॥ ॐपितृभ्योनमः ॥ ॐभगायनमः ॥ ॐअर्यम्णेनमः ॥ ॐसवित्रेनमः ॥ ॐत्वष्ट्रेनमः ॥ ॐवायवेनमः ॥ ॐइंद्राग्निभ्यां नमः ॥ ॐमित्राभ्यांनमः ॥२४॥ इत्यावाहनांतेपूर्वादिक्रमेणलोकपालान् तत्तन्मंत्रेणनाममंत्रेणवास्थापयेत् ॥ तद्यथा ॥ पूर्वे इंद्रायनमः इंद्रं आवाहयामि ॥ एवमग्रेपि ॥ आग्नेयां अग्नयेनमः अग्निंआवाहयामि ॥ दक्षिणेयमायनमः यमंआवाहयामि ॥

नैर्ऋत्येनैर्ऋतयेनमः नैर्ऋतिंआवाहयामि ॥ ४ ॥ पश्चिमेवरुणायनमः वरुणंआवाहयामि ॥ ५ ॥ वायव्यांवायवेनमः वायुंआवाहयामि ॥ ६ ॥ उत्तरेसोमायनमः सोमंआवाहयामि ॥ ७ ॥ ईशान्यांइशानायनमः इशानंआवाहयामि ॥ ॥८॥ ततःतदस्त्वितिप्रतिष्ठाप्य सुप्रतिष्ठितमस्तु ॥ इतिवदेत् ॥ अत्रावसरेपूजनंनकार्यं ॥ उदकुंभस्थापनांतेपूजनं ॥ ततोनैर्ऋतिप्रदेशेस्थंडिलेवरदनामान मग्निंस्थापयित्वातदीशान्यां ग्रहानस्थापयित्वा संपूज्यतदीशान्यांकलशंसंपूज्य ॥ देवदानवेतिप्रार्थयेच्च ॥ ततोभ्याधानादिपूर्वंतंत्रंकृत्वोक्तरीत्या प्रत्नोहोतीत्युदकुंभंसंपात्याभिमंत्र्यग्रहहोमंविधाय प्रधान होमंकुर्यात् ॥ तत्रप्रतिदैवतंत्यागपूर्वकंहोमः ॥ ततोअभितंनिर्ऋतिमंत्रेणघृतमिश्रपायससमिच्चर्वाज्यैरष्टोत्तरसहस्रमष्टोत्तर शतंवाजुहुयात् ॥ त्रातारमिंद्रमितिमंत्रेणतदेवद्रव्यैरिंद्रप्रीतयेऽष्टोत्तर शताष्टाविंशतिवाजुहुयात् ॥ येपश्चादितिमंत्रेणएतै रेवद्रव्यैःपूर्वोक्तसंख्ययावरुणप्रीतयेजुहुयात् ॥ चतुरवदानविधिनाहविर्गृहीत्वा चतुर्विंशतिनक्षत्रदेवता अष्टाष्टचर्वाहुति भिर्होमः । ततोरक्षोघ्नसूक्तेनप्रत्यृचमष्टाष्टसंख्ययापायसहोमः ॥ रुद्रंजलाशमितिहोमः ॥ वास्तोष्पतइतिहोमः ॥ पूर्वोक्त क्षेत्राधिपतिमंत्रेणहोमः श्रीसूक्तेनप्रतिमंत्रंहोमः ॥ सर्वत्रसमिदाज्यचरून् अष्टाष्टसंख्ययाहोमंकुर्यात् ॥ सर्वत्रतत्तद्देवता प्रीतयेत्यागश्च ॥ सर्वत्रशांत्युदकेसंपातश्च ॥ एवंहोमंसमाप्य ॥ स्थापितदेवतानांपुनःपूजनं ॥ बलिदानंचकार्यं ॥ ततो पूर्णाहुतिः ॥ तच्छमाप्नोस्विष्टकृदाद्यभ्याधानाद्युत्तरतंत्रम् ॥ ततोयजमानः रुद्रकलशंदक्षिणतःस्पृशन् ॥ रुद्रंजलाषभेषज मितिमंत्रंशतवारंजपेत् ॥ ततोरुद्रसूक्तानिपूर्वंजपेत् ॥ अथरुद्रकुंभनिर्ऋतिकुंभःगतदेवताः पंचोपचारैःसंपूज्यअभिशे कार्थंप्रार्थयेत् ॥ भगवत्प्रसादेनयजमानाभिषेकंकरिष्ये ॥ अस्मिन्समयेग्रहपीठदेवतानांपंचोपचारैःपूजनं ॥ सर्वकलशो दकंपात्रांतरंगृहीत्वा सपत्नीकेयजमानेसापत्ये अभिशेकःकार्यः ॥ अभिशेकमंत्राः ॥ प्रत्नोहोतिसूक्तं ॥ १ ॥ अक्षीभ्या मितिसूक्तं ॥ २ ॥ शांताद्यौरितिसूक्तं ॥३॥ अपनःशोशुचदघमितिसूक्तं ॥४॥ अभित्वेतिसूक्तं ॥ ५ ॥ रक्षोहणमितिसूक्तं ॥६॥ आपोहिष्ठेतिसूक्तं ॥७॥ सुरास्त्वेतिपौराणश्लोकाः ॥ योसौवज्रधरोदेवोमहेंद्रोगजवाहनः ॥ मूलशांतंशिशोर्दोषं मातापित्रोर्व्यपोहतु ॥ योसौशक्तिधरोदेवो हुतभुङ्मेषवाहनः ॥ सप्तजिह्वश्चदेवोग्निर्मूलदोषंव्यपोहतु ॥ योसौदंडधरोदेवो

धर्मोमहिषवाहनः ॥ मूलशांतिंशिशोर्दोषंमातापित्रोर्व्यपोहतु ॥ योसौदंडधरोदेवोनिर्ऋतिराक्षसाधिपः ॥ प्रशामयतु मूलोत्थंदोषंगंडांतसंभवम् ॥ योसौपाशधरोदेवोवरुणश्चजलेश्वरः ॥ नरवाहःप्रचेतानोदोषंबालस्यशांतिदः ॥ योसौ निधिपतिर्देवःखड्गभृद्वाजिवाहनः ॥ मातृपित्रोःशिशोश्चैवमूलदोषंव्यपोहतु ॥ योसौपशुपतिर्देवःपिनाकीवृषवाहनः ॥ आश्लेषामूलगंडांतंदोषमाशुव्यपोहतु ॥ विघ्नेशःक्षेत्रपोदुर्गालोकपालानवग्रहाः ॥ सर्वदोषप्रशमनंसर्वेकुर्वंतिशांतिदा ॥ इतिमंत्रैश्चाभिशेकंकृत्वा ॥ ततोरुद्रनिर्ऋतिशांतिकलशोदकेनान्येनशतच्छिद्रमंतर्धायाभिषिक्तो यजमानोधौतेवाससीपरि- धायतिलकंकृत्वा त्र्यायुषमितिमंत्रेणविभूतिंधृत्वा मुख्यदेवतापूजनं ॥ ॐउत्तिष्ठब्रह्मणस्पतेदेवांव्यग्नेनंबोधय ॥ आयुः प्राणंप्रजांपशुंकीर्त्तिंयजमानंचवर्द्धयइति विसर्जनं ॥ ततश्रेयोग्रहणंदक्षिणादानानिकुर्यात् अथदक्षिणादानप्रकारः ॥ तत्र आचार्यायसवत्सांपयस्विनींधेनुंदक्षिणांदद्यात् ॥ ब्रह्मणेवृषभम् ॥ रुद्रजापिनेकृष्णमनड्वाहं ॥ रुद्रप्रतिमासोपस्करातत् कुंभश्च ॥ ऋत्विग्भ्योयथाशक्तिदक्षिणाःदद्यात् ॥ धेन्वनडुहोरसंभवेदशकर्षपाणाधेनु अष्टावनडुहिस्मृता इतिमूल्यंदेयं यथाशक्तिवा ॥ शतंतदर्द्धंदशवापायसादीनाब्राह्मणान भोजयेत्शांतिपाठंजपित्वा यस्मात्कोशेतिपाठः ॥ कृतंकर्मेश्वरा र्पणंकुर्यादिति ॥ ॥ अथपूर्वमनुक्तंशतमूलाद्यत्रोच्यते ॥ स्वयमुत्पादयेत्प्रोक्षेत्मूलानांचशतंपिता ॥ मंगल्याश्चपवित्राश्च ओषध्यःकथयाम्यहं ॥ लक्ष्मणाशतमूलाचशिरोषेवेतसस्तथा ॥ सहकाश्वेतमूलाचविष्णुक्रांताथशंखिनी ॥ सर्पाक्षी मीननेत्राचपुत्रापारीकृतांजली ॥ पालाशोबिल्वकश्चैवरोचनाचंदनद्वयम् ॥ कृष्णमांसीशिरोशीरंचालकंचतथामला ॥ गोजिह्व तुलसोइष्याशतंपुष्पीसलांगली ॥ ब्रह्मदंडोद्रोणपुष्पोप्रियंगुःसितसर्षपाः ॥ पिप्पलीकाकजंघाचत्रायमाणाहुहू रतथा ॥ ज्योतिष्मतीचगांधारीनिर्गंधा पूर्णकोषिका ॥ भगक्षमासुभद्राचगुडुचीसेंद्रवारुणो ॥ अलंबुकारुदंतीचकदली केतकीतथा ॥ गोक्षरंशतपर्वाचअरिष्टिकापराजिता छिन्नरुहाशतपर्वानिकुंभाचसुवर्चला ॥ अश्वगंधाहस्तिकर्णाहरिद्रा द्वितयंतथा ॥ उष्ट्रोमधुकारश्चअश्वत्थोवकुलस्तथा ॥ सर्जराचार्यमार्गोयमंद्वारश्चातिमुक्तकः ॥ मालतीस्वर्णपुष्पाच श्रीपर्णीश्रीफलंतथा ॥ दर्भमूलंकरवीरमदयंतीविकंकतः ॥ पाटलासुरदारुश्चअर्द्धमूदनिकस्तथा ॥ फलंमन्मथवृक्षस्य

पलाशस्यचपल्लवाः ॥ रास्नानदीवृक्षमूलंसुरदारुविंदारिका ॥ श्वेतवीर्याश्वेतपाकानीलोत्पलंतथैवच ॥ नागकेसरसींदारी
कुमारींचैवनिक्षिपेत् ॥ तीर्थांबुपंचगव्यंचसर्वौषध्यश्वकांचनं ॥ यथासंभवतोवापिग्राह्यंमूलशतंशुभमिति ॥ शतमूलनामानि
गृह्याणि ॥ केचिच्छतमूलानांहोमंकुर्वंतिकेचिन्नकुर्वंति अतएवशांतिद्योतादावनुक्तत्वात् तन्मतमालोच्यास्माभिरपिशतमूल
होमोनलिखितः ॥ ॥ शतमूलाशतंवेतसोवंजुलः ॥ सहकासहदेवीश्वेतमूलापुनर्नवा ॥ मोननेत्रामस्माक्षीपुत्रपारीपुत्र
जीवः ॥ कृतांजलीअंजलिनीहाथाजोडाइतिप्रसिद्धाः पलाशंकघरःबिल्वकौबिल्वः ॥ रोचनंचंदनद्वयंश्वेतंपीतंच ॥ उशीरं
वीरणं ॥ अमलाभूम्यामलकीगोजिह्वागलजामीतिप्रसिद्धाः ॥ लांगलीकंलिहारीतिप्रसिद्धा ॥ ब्रह्मदंडीअधःपुष्पीद्रोण
पुष्पीकरांबुकः ॥ काकजंघाकाकांगीज्योतिष्मतीकंगुका ॥ गांधारींदेवगाधारीपूर्णकोशीकाकोशातकी ॥ भगक्षमा
शिग्रुः ॥ सुभद्रासारिवा ॥ अलंबुकानुविविशाखपर्वाचवा ॥ अरिष्टकानागबला ॥ अपराजिताछिन्नरुहा ॥ पिंडगुडीची
शतपत्राकमलिनी ॥ निकुंभालतीजातीस्वर्णा पुष्पाकुशलीश्रीफलंबिल्वंमदयंतीयूथिकी ॥ त्रिकंकतःस्राववृक्षः ॥ अर्द्ध
मूदनिकापालंका ॥ मन्मथवृक्षःआम्रः ॥ सुरदारुर्देवदारुः ॥ बिदारिकाभूकूष्माडीं ॥ श्वेतवीर्यागिरिकर्णी ॥ श्वेतपाकां
गुंजाशेषाणिस्वनामप्रसिद्धानि ॥ इतिवनस्पतिप्रकाशः ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौषट्पन्नागरद्विवेदि
रविशंकरकृतेमूलनक्षत्रशांतिप्रयोगरश्मिःपंचचत्वारिंशत् ॥ ४५ ॥

॥ ॐश्रीमन्महापुरुषोत्तमायनमः ॥ अथाश्लेषाशांतिः ॥ तत्राश्लेषाफलं ॥ आश्लेषायाःक्रमेणपंचसप्तद्वित्रि
चतुरष्टैकादशषट्नवपंचेतिदशधाविभक्त नाडीषुक्रमेणराज्यंपितृनाशोमातृनाशः कामभोगःपितृभक्तिर्बलंहिंसकत्वंयागो
भागोधनमितिफलानि ॥ अथपादविभागेनफलं ॥ तत्रप्रथमपादःशुभः ॥ द्वितीयपादेधननाशः ॥ तृतीयेमातुः ॥
चतुर्थेपितुः ॥ आश्लेषांत्यपादत्रयजाताकन्याश्वसुरंहंति आश्लेषासर्वपादेषुशांतिःकार्याप्रयत्नतः ॥ जातस्यद्वादशाहेतु
शांतिकर्मसमाचरेत् ॥ असंभवेतुजन्मर्क्षेअन्यस्मिन्वाशुभेदिने ॥ ॥ अथप्रयोगः ॥ द्वादशाहेतदसंभवेजन्मर्क्षेन्यस्मिन्
शुभदिनेवाप्रातर्नित्यविधिंविधाय ॥ तैलाभ्यंगोद्वर्त्तनादिनास्नातोयजमानः देशकालौसंकीर्त्य ममास्यकुमारस्यकुमार्या

वाआश्लेषाचतुर्थ चरणजननसूचितपित्रारिष्ट शांतिद्वाराश्रीपरमेश्वरप्रीत्यर्थं सग्रहमखांशौनकोक्तांअश्लेषाशांतिकरिष्ये ॥
प्रथमद्वितीयतृतीयपादोत्पतोसंकल्पेतथोहः ॥ तत्रादौनिर्विघ्नतासिध्यर्थं महागणपतिपूजनं स्वस्तिपुण्याहवाचनंमातृका
पूजनंनांदिश्राद्धं आचार्यादिवरणंकरिष्येइतिसंकल्प्य ॥ सर्षपविकीरणंकृत्वा ॥ आपोहिष्ठेतिकर्मभूमिंप्रोक्षयेत् ॥ ईशकोणे
पंचवर्णैःस्वस्तिकंविरच्य ॥ तत्रस्वस्तिकेपूर्ववत्कलशंस्थाप्य तदुपरि अष्टदलांकितवस्त्रेसौवर्णिं शिवप्रतिमांपूर्वोक्तमंत्रेण
संस्थाप्य ॥ शोडशैरुपचारैःसंपूज्य ॥ तस्माद्रुद्रकुंभाच्चतुर्दिक्षुपूर्वादिक्रमेणकलश चतुष्टयंसंस्थाप्यतेषुयेपश्चाज्जुहतीति
मंत्रेणवरुणमावाह्यक्रमेणसंपूज्य मध्यमेरुद्रकुंभेजपः ॥ तत्रसूक्तानि ॥ ये३स्यांस्थप्राच्यांदिशिहेतयो नामदेवास्तेषांवो
अग्निरिषवः ॥ तेनोमृडततेनोधिब्रूततेभ्योवोनमस्तेभ्योवस्वाहा ॥ १ ॥ ये३स्यास्थदक्षिणायांदिश्यविश्यवोनामदेवा
स्तेषांवःकामइषवः ॥ तेनोमृड० ॥२॥ ये३स्यांस्थप्रतिच्यांदिशिवैराजानामदेवास्तेषांवाआपइषवः तेनोमृड० ॥३॥
ये३स्यांस्थोदीच्यांदिशिप्रविध्यंतोनामदेवास्ते षांवोवातइषवः ॥ तेनोमृड० ॥ ४ ॥ ये३स्यांस्थध्रुवायांदिशिनिलिंपा
नामदेवास्तेषांवओषधीरिषवः ॥ तेनोमृड ॥५॥ ये३स्यांस्थोर्ध्वायांदिश्यवस्वंतोनामदेवास्तेषांवोबृहस्पतिरिषवः ॥
तेनोमृड ततेनोधिब्रूततेभ्योवोनमस्तेभ्योवःस्वाहा ॥ ६ ॥ ॥ प्राचीदिगग्निरधिपतिरसितोरक्षितादित्याइषवः ॥
तेभ्योनमोधिपतिभ्योनमोरक्षितृभ्यो नमइषुभ्योनमएभ्योअस्तु ॥ यो३स्मान्द्वेष्टियवयंद्विष्मस्तंवोजंभेदध्मः ॥ १ ॥
दक्षिणादिगिंद्रोधिपतिः स्तिरश्चिराजिरक्षितापितरइषवः ॥ तेभ्योनमो० ॥ यो३स्मान्द्वेष्टि० ॥२॥ प्रतीचीदिग्वरुणोधि
पतिःप्रदाकूरक्षितान्नमिषवः ॥ तेभ्योनमो० ॥ यो३स्मान्द्वेष्टि० ॥३॥ उदीचीदिक्सोमोधिपतिस्वजोरक्षिताशनीरिषवः ॥
तेभ्योनमो० ॥ यो३स्मान्द्वेष्टि० ॥ ४ ॥ ध्रुवायादिग्विष्णुरधिपतिःकल्माषग्रीवोरक्षितावीरुधइषवः ॥ तेभ्योनमो० ॥
यो३स्मान्द्वेष्टि० ॥ ५ ॥ ऊर्ध्वादिग्बृहस्पतिरधिपतिःश्वित्रोरक्षितावर्षमिषवः ॥ तेभ्योनमो० ॥ यो३स्मान्द्वेष्टि० ॥६॥

रुद्रजलाषभेषजनीलशिखंडकर्मकृत् ॥ प्राशंपतिपाशोजह्वरसान्कृष्त्रोषधे ॥१॥ ये१स्यांप्राचीदिगितिसूक्तंपुनःपठनियम् ॥२॥ उदितस्त्रयोअक्रमन्व्यापःपुरुपोवृकः ॥ हिरुग्वयंतिसिधंवोहिरुग्देवोवनस्पतिर्हिरुग्मंतुशत्रवः ॥ १ ॥ परेणैतुपथा वृकःपरमेणोततस्करः॥ परेणदत्वतिरज्जुःपरेणाघायुरर्षतु ॥२॥ अक्षौचतेमुखंचतेव्य।घ्रजंभयामसि ॥ आत्सर्वान्विंशतिं नखान ॥३॥ व्याघ्रंदत्वंतांवयंप्रथमंजंभयामसि ॥ आदुष्टेनमथोअहिंयातुधानमथोवृकं ॥ ४ ॥ योअद्यस्तेनआयंतिस संपिष्टोअपायति ॥ यथामंपथ्वंसेनैत्विंद्रोव त्रेणहंतुतम् ॥ ५ ॥ मूर्णामृगस्यदंताअपिशीर्णाउपष्टयः ॥ निम्रुलेगोधा भवंतुनीचायंछशयुर्मृगः ॥ ६ ॥ यत्संयमोवियमोवियमोयनसंयमः ॥ इंद्रजाःसोमजाअथर्वणमसिव्याघ्रंजभंन ॥ ७ ॥ ॥ ३ ॥ भवाशर्वौमन्वेवांतस्यवित्तंययोर्वामिदंप्रदिशियद्विरोचते ॥ यावस्येशाथेद्विपदोयश्चतुष्पहस्तौनोमुंचतमंहसः ॥ ॥१॥ ययोरत्यध्ववर्यंउतयेदूरेचोघोषैविदिताविषुभृतामसिष्टौ ॥ यावस्येशाथे० ॥२॥ सहस्राक्षोवृत्रहणाहुवेहंदूरेगव्यूति स्तुवंनेम्युग्रौ ॥ यावस्येशाथे० ॥३॥ यावारेभाथेवहुसाकमग्रेप्रचेदस्त्राष्ट्रमभिभांजनेषु ॥ यावस्येशाथे० ॥ ४ ॥ ययो र्वधांनापपद्यतेकश्चनांतर्देवेषुतपानुपेषु ॥ यावस्येशाथे० ॥ ५ ॥ यःकृत्यानून्मूलयातुधानोनितस्मैधतंवज्रमुग्रौ ॥ यावस्थेशाथेद्विपदोयश्चतुष्पदस्तोनोमुंचतमंहसः ॥ ६ ॥ अधिनोब्रूतंपृतनासूग्रौशंवज्रेणसृजतंयःकिमीदिनः ॥ स्तौमिभ वासर्वौनाथितोजोरुविमितोनोमुंचतमंहसः ॥ ७ ॥ ब्रह्मजनज्ञानंप्रथमंपुरस्ताद्विशीमतः सुरुचोवेनआवः ॥ सबुध्न्या उपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः ॥ १ ॥ अनाप्तायेवःप्रथमायानिकर्माणिचक्रिरे ॥ वीरान्नोअत्रमादमंतद्वएतत् पुरोदधे ॥ २ ॥ सहस्रधारएवतेसमस्वरन्दिवोनाकेमधुजिह्वाअसश्चतः ॥ तस्यस्पृशोननिमिषतिभूर्णयःपदेपदेपाशिनः सन्तिसेतवे ॥३॥ पर्युषुप्रधन्वावाजसातयेपरिवृत्राणिसक्षणिः ॥ द्विषस्तदध्यर्णवेनेयसेसनिस्रसोनामासित्रयोदशोमास

इंद्रस्यगृहः ॥ ४ ॥ न्वे१तेनारात्सीरसौस्वाहा ॥ तिग्मायुधौतिग्महेतिसुशेवौसोमारुद्राविहसौमृडतन्नः ॥ ५ ॥ अवैते नारात्सीरसौस्वाहा ॥ तिग्मायुधौतिग्महेतीसुशेवौसोमारुद्र।विमृसुमृडतन्नः ॥ ६ ॥ अपैतेनारात्सीरसौस्वाहा ॥ तिग्मायुधौतिग्महेतीसुशेवौसोमारुद्राविहसुमृडतन्नः ॥ ७ ॥ मुमुक्तमस्मादुरितादवद्याज्जुषेथांयज्ञममृतमस्मासुधत्तम् ॥ चक्षुषेहेतोमनसोहेतेब्रह्मणोहेतेतपसश्चहेते ॥ ८ ॥ मेन्यामेनिरस्यमेनयस्तेसंतुये३स्माँअभ्यघायंति ॥ यो३स्माँश्चक्षुषा मनसाचित्याकूत्याचयोअघायुरभिदासात् ॥ ९ ॥ त्वंतानग्नेमेन्यामेनिन्कृणुस्वाहा ॥ १० ॥ इंद्रस्यग्रहोसि ॥ तंत्वा प्रपद्येतंत्वाप्रविशामिसर्वगुःसर्वपुरुषः सर्वात्मासर्वतनूःसहयन्मेस्तितेन ॥११॥ इंद्रस्यशर्मासि ॥ तंत्वाप्रपद्ये० ॥ १२ ॥ इंद्रस्यवर्मासि ॥ तंत्वाप्रपद्ये० ॥१३॥ इंद्रस्यवरूथमसि ॥ तंत्वाप्रपद्ये०॥१४॥ येपन्थानोबहवोदेवयानाअन्तराद्यावा पृथिवीसंचरंति तेषामज्यानियतमोवहाति तस्मैमादेवाःपरिधत्तेहसर्वे ग्रीष्मोहेमंतः शिशिरोवसंतःशरद्वर्षास्वितेनो दधात ॥ आनोगोषुभजताप्रजायांनिवातईद्वशरणेस्याम ॥ १५ ॥ इदावत्सरायपरिवत्सरायसंवत्सरायकृणुतावृहंन मस्ते।तांवयंसुमतौयज्ञियानानविभद्रेसौमनसेस्याम ॥ २ ॥ अनडुद्भ्यस्त्वंप्रथमंधेनुभ्यस्तमरुंधति ॥ अधेनवेवयसेशर्म यच्छश्चतुष्पदे ॥ ३ ॥ शर्मयच्छत्वोषधःसहदेवीररुंधति ॥ करत्पयस्वंतंगोष्ठमयक्ष्मोउतपूरुषान ॥४॥ विश्वरूपांसुभगा मच्छावदामिजीवलाम् ॥ सानोरुद्रस्यास्तांहेतिंदूरंनयतुगोभ्यः ॥५॥ मह्यमापोमधुमदेरयंतांमह्यंसूरोअभरज्योतिषेकं ॥ मह्यंदेवाउतविश्वेतपोजामह्यंदेवःसविताव्यचोधात् ॥ १॥ अहंविवेचपृथिवीमुतद्यामहमृतुंरजनयंसप्तसाकम् ॥ अहंसत्य मनृतंयद्वदाम्यहंदैवींपरिवाचंविशश्च ॥२॥ अहंजजानपृथिवीमुतद्यामहमृतूंरजनयंसप्तसिंधुन् ॥ अहंसत्यमनृतंयद्वदामियो अग्निषोमावनुषेसखाया । ३ ॥ वैश्वानरोरश्मिभिर्नःपुनातुवातंप्राणेनेषिरोनमोभिः ॥ द्यावापृथिवीपयसापयस्वती

ऋतावरीयज्ञियेनःपुनीताम् ॥ ४ ॥ वैश्वानरींसूनृतामारभध्वंयस्याआशास्तन्वोवीतपृष्टाः ॥ तयागृहंतःसधमादेषुवयं
स्यामपतयारयीणाम् ॥ ५ ॥ वैश्वानरींवर्च सआरभध्वंशुद्धाभवतः शुचयःपावकाः ॥ ईहेडयासधमादंमदंतोज्योक्पश्येम
सूर्यमुचरंतं ॥ ६ ॥ यमोमृत्युरघमारोनिर्ऋथोवभ्रुःशर्वोस्तानीलशिखंडः ॥ देवजनाःसेनयोत्तस्थिवांसस्तेअस्माकंपरिं
वृजंतुवीरान् ॥ १ ॥ मनसाहोमैहरसाघृतेनशर्वायास्त्रउतराज्ञेभवाया ॥ नमस्येभ्योनमएभ्यःकृणोम्यन्यत्रास्मदघविषा
नयंतु ॥ २ ॥ त्रायध्वंनोअघविषाभ्योवधाविश्वेदेवामरुतोविश्ववेदसः ॥ अग्नीषोमावरुणःपूतदक्षावातापर्जन्ययोःसु
सुमतौस्याम ॥ ३ ॥ यांतेरुद्रइषुमास्यदंगेभ्योहृदयायच ॥ इदंतामद्यत्वद्वयंविषूचीं विवृहामसि ॥ ४ ॥ यास्तेशतं
धमनयोंगान्यनुविष्ठिता ॥ तासांतेसर्वासांवयंनिर्विषाणिह्वयामसि ॥ ५॥ नमस्तेरुद्रास्यतेनमःप्रतिहितायैनमोविसृज्य
मानायैनमोनिपतितायै अप्स्वं१तर्यओषधीविरुधआविवेश ॥ यइमाविश्वाभुवनानिचाक्लृपत्तस्मैरुद्रायनमोअस्त्वग्नये ॥
॥७॥ भवाशर्वौमृडतंमाभियातंभूतपतिपशुपतिनमोवाम् ॥ प्रतिहितामायतांमाविस्राष्टं मानोहिंसिष्टंद्विपदोमाचतुष्पदः
॥८॥ शुनेक्रोष्ट्रेमाशरीराणिकर्त्तमलिक्लवेभ्योगृध्रेभ्योयेचकृष्णाअविश्यवः ॥ मक्षिकास्तेपशुपतेवयांसितेविघसेमा
विदंत ॥९॥ क्रंदायतेप्राणाययाश्चतेभवरोपयः ॥ नमस्तेरुद्रकृण्मःसहस्राक्षायामर्त्य ॥ १० ॥ पुरस्तात्तेनमः कृण्मउत्तरा
दधरादुत ॥ अभिवर्गादिवस्पर्यंतरिक्षायतेनमः ॥ ११ ॥ मुखायतेपशुपतेयाक्षुंनिचषितेभव ॥ त्वचेरूपायसंदृशेप्रतीची
नायतेनमः ॥१२॥ अंगेभ्यस्तउदरायजिह्वायाआस्यायते ॥ दद्भ्योगंधर्वायतेनमः ॥ १३ ॥ अस्त्रानीलशिखंडेन
सहस्राक्षेणवाजिना ॥ रुद्रेणार्द्धकघातिनातेनमासमरामहि ॥ १४ ॥ सनोभवःपरिवृणक्तुविश्वतआपइवाग्निःपरिवृणक्त
नोभवः ॥ मानोभिमांस्तनमोअस्त्वस्मै ॥ १५ ॥ चतुर्नमोअष्टकृत्वोभवायदशकृत्वः पशुपतेनमस्ते ॥ तवेमेपंचपशवो

विभक्तागावोअश्वाःपुरुषाअजावयः ॥१६॥ तवचतस्रःप्रदिशस्तवद्यौस्तवपृथिवीतवेदमुग्रोर्व१तरिक्षम् ॥ तवेदंसर्वमात्मन
यवत्प्राणत्पृथिवीमनु ॥ १७ ॥ उरुःकोशोवसुधानेस्तवायन्यस्मिन्निमाविश्वाभुवनान्यंतः ॥ सनोमृडपशुपतेनमस्तेपरः
क्रोष्टारोअभिभाश्वानःपरोयंत्वधरुदोविकेश्यः ॥ १ ॥ धनुर्बिभर्षिहरितंहिरण्ययंसहस्रघ्नींशतवधंशिखंडिनं ॥ रुद्रस्येषु
श्चरतिदेवहेतिस्तस्यैनमोयतमस्यांदिशी३तः ॥२ ॥ यो३भियातोनिलयतेत्वांरुद्रनिचिकीर्षति ॥ पश्चादनुप्रयुंक्षेतंविद्धस्य
पदनिरिव ॥ ३ ॥ भवारुद्रौसयुजासंविदानावुभावुग्रौचरतोवीर्याय ॥ ताभ्यांनमोयतमस्यांदिशी३तः ॥ ४ ॥ नमस्ते
स्त्वायतेनमोअस्तुपरायते ॥ नमस्तेरुद्रतिष्ठतआसीनायोतेनमः ॥५॥ नमसायंनमःप्रातर्नमोरात्र्यानमोदिवा ॥ भवाय
चशर्वायचोभाभ्यामकरंनमः ॥६ ॥ सहस्राक्षमतिपश्यंपुरस्ताद्रुद्रमस्यंतंबहुधाविपश्चितम् ॥ मोपारामजिह्वयेयमानम् ॥
॥७॥ श्यावाश्वंकृष्णमसितंमृणंतंभीमंरथंकेशिनः पादयंतम् ॥ पूर्वेप्रतिमोनमोअस्त्वस्मै ॥ ८ ॥ मानोभिस्रामत्यंदेवहे
तिमानः क्रुद्धःपशुपतेनमस्ते ॥ अन्यत्रास्मद्दिव्यांशाखांविधुनु ॥ ९ ॥ मानोहिंसीरधिनोब्रूहिपरिणोवृङ्ग्धिमाक्रुधः ॥
मात्वयासमरामहि ॥१०॥ मानोगोषुपुरुषेषुमागृधोनोअजाविषु ॥ अन्यत्रोग्रविवर्त्तयप्यारूणांप्रजांजहि ॥१॥ यस्य
तक्माकासिकायाहेतिरेकमश्वस्येववृषणःक्रंदएति ॥ अभिपूर्वंनिर्णयतेनमोअस्त्वस्मै ॥ २ ॥ योंऽ१तरिक्षेतिष्ठतिविष्ट
भितोयज्वनःप्रमृणन्देवपीयून ॥ तस्मैनमोदशभिःशक्वरीभिः॥३॥ तुभ्यमारण्याःपशवोमृगावनेहिताहंसाःसुपर्णाःशकुना
वयांसि ॥ तवयक्षंपशुपतेअप्स्व१तस्तुभ्यंक्षरंतिदिव्याआपोवृधे ॥ ४ ॥ शिशुमाराअजगराःपुरीकयाजषामत्स्यारज
सायेभ्योअस्यसिनतेदूरंनपरिष्ठास्तितेभवसद्यःसर्वापरिपश्यसिभूमिंपूर्वस्माद्धंस्युत्तरस्मिन्समुद्रे ॥ ५ ॥ मानोरुद्रतक्मना
माविषेणमानःसंस्त्रादिव्येनाग्निना ॥ अन्यत्रास्मद्विद्युतंपातयैताम् ॥६॥ भवोदिवेभवईशेपृथिव्याभवआपप्रउर्व३तरिक्षम्॥

तस्मैनमोयतमस्यांदिशि३इतः ॥७॥ भवंराजन्ययजमानायमृडपशूनांहिपंशुपतिर्बभूथं ॥ यश्रद्दधातिसंतिदेवाइतिचतुष्पदे
द्विपदेस्यमृडय ॥ ८ ॥ मानोमहांतमुतमानोअर्भकंमानोवहंतमुतमानोवक्ष्यतः मानोहिंसीः पितरंमातरं चस्वातन्वंरुद्रमारी
रिषोनः ॥९॥ रुद्रस्यैलवकारेभ्योसंसूक्तगिलेभ्यः इदंमहास्येभ्यश्वभ्योअकरंनमः ॥१०॥ नमस्तेघोषिणीभ्योनमस्ते
केशिनीभ्यः ॥ नमोनमस्कृताभ्योनमः संभुंजतीभ्यः ॥ ११ ॥ नमस्तेदेवसेनाभ्यस्वस्तिनोअभयंचनः ॥ १२ ॥
भवाशर्वाविंब्रूमोरुद्रंपशुपतिंश्चयः इषूर्याएषांसंविद्मतानःशंतुसदाशिवाः ॥ १ ॥ यस्तेसर्पोवृश्चिकतृष्टदंशमाहेमंतजंश्रोम्र
मलेगुहाशये ॥ क्रिमिर्जिन्वत्पृथिवियग्रदेजंतिमाद्वृषिंतन्नःसर्पन्मोपसृपद्यच्छिवंतेनमोमृड ॥२॥ तस्मैप्राच्यादिशोअंतर्देशा
द्भवमिष्वासमनुष्ठातारमकुर्वन् ॥ भवएनमिष्वासः प्राच्यादिशोअंतर्देशादनुष्ठातानुतिष्ठति नैनंशर्वोनभवोनेशानः ॥ नास्य
पशून्नसमानांहिनस्तियएवंवेद ॥ १ ॥ तस्मैदक्षिणायादिशोअंतर्देशाच्छर्वमिष्वासमनुष्ठातारमकुर्वन् ॥ शर्वएनमिष्वासो
दक्षिणायादिशोअंतर्देशादनुष्ठानुतिष्ठति नैनंशर्वोनभवोनेशानः ॥ नास्यपशून्नसमानानहिनस्तियएवंवेद ॥ २ ॥ तस्मै
प्रतीच्यादिशोअंतर्देशात्पशुपतिमिष्वासमनुष्ठातारमकुर्वन् ॥ पशुपतिरेनमिष्वासः प्रतीच्यादिशोअंतर्देशादनुष्ठातानुतिष्ठति
नैनंशर्वोनभवोनेशानः ॥ नास्यपशून्नसमानान्हिनस्तियएवंवेद ॥ ३ ॥ तस्माउदीच्यादिशोअंतर्देशादुग्रंदेवमिष्वासमनु
ष्ठातारमकुर्वन् ॥ उग्रएनंदेवमिष्वासउदीच्यादिशोअंतर्देशादनुष्ठातानुतिष्ठति नैनंशर्वोनभवोनेशानः ॥ नास्यपशून्न
समानान्हिंनस्तियएवंवेद ॥ ४ ॥ तस्मैध्रुवायादिशोअंतर्देशाद्रुद्रदनुष्ठातारमकुर्वन् ॥ रुद्रएनमिष्वासोध्रुवायादिशोअंत
र्देशादनुष्ठातानुतिष्ठति नैनंशर्वोनभवोनेशानः ॥ नास्यपशून्नसमानान्हिंनस्तियएवंवेद ॥ ५ ॥ तस्माऊर्ध्वायादिशो
अंतर्देशान्महादेवमिष्वासमनुष्ठातारमकुर्वन् ॥ महादेवएनमिष्वासऊर्ध्वायादिशोअंतर्देशादनुष्ठातानुतिष्ठति नैनंशर्वोन

भवोनेशानः ॥ तस्यपशून्नसमानान्हिंनस्तियएवंवेद ॥ ६ ॥ तस्मैसर्वेभ्योअंतर्देशेभ्यईशानमिष्वासमनुष्ठातारमकुर्वन् ॥
ईशानएनमिष्वासस्सर्वेभ्योअंतर्देशेभ्योअनुष्ठातानुतिष्ठति नैनशर्वोनभवोनेशानः ॥ नास्यपशूनसमानान्हिंनस्तियएवंवेद ॥
॥७॥ निवरुद्रोपनीषद् अदश्यंत्वाविरोहतंदिवीतः पृथिवीभव ॥ अपश्यमस्यंतंरुद्रंनीलग्रीवंशिखंडितम् ॥ १ ॥ दिवउग्रो
वारुक्षत्प्रष्ठात्भूम्यांमधि ॥ जनासःपश्यतेमनीलग्रीवंविलोहितम् ॥२॥ एषएत्यवीरहारुद्रोजलाषभेषजीः ॥ वीतेक्षेममनी
नशद्वातिकारोप्येतुते ॥३॥ नमस्तेभवभामायनमस्तेभवमन्यवे ॥ नमस्ते अस्तुबाहुभ्यामुतोतद्रशवेनमः ॥४॥ शिवांया
मिषुंगिरिशंतहस्तेषिमरिष्यस्तवे ॥ शिवागिरित्रतान्कृणुमाहिंसीत्पुरुषान्मम ॥ ५ ॥ शिवेनवचसात्वागिरिशाच्छावदा
मसि ॥ यथानःसर्वइज्जगदयक्ष्मंसुमनाअसत् ॥६॥ यातइषुःशिवतमाशिवंबभूवनेधनुः ॥ शिवाशरव्या३यातयतयानो
मृडजीवसे ॥७॥ यातरुद्रशिवातनुरघोरापापकाशिनि ॥ तयानस्तन्वा३शंतमयागिरिशंत्याभिविचाकशत् ॥८ ॥ असौ
यत्ताम्रा अरुणउतबभ्रुर्विलोहितः ॥ यंचेमेअभितोरुद्रादिक्षुश्रिताः सहस्रशोवैषांहेडईमहे ॥ ९ ॥ अदश्यंत्वावरोहतंनिल
ग्रीवंविलोहितं ॥ उतत्वागोपाअदृशंन्नुत्वोदहार्यः ॥ उतोत्वाविश्वाभूतानितस्मैदृष्टायतेनमः ॥१॥ नमोस्तुनीलशिखंडाय
सहस्राक्षायवाजिने ॥ अथोयेअस्यसात्यानस्तेभ्योहमकरंनमः ॥२॥ नमोसितआयुधायानातवानायधृष्णवे ॥ उभाभ्या
मकरंनमोबाहुभ्यांतवधन्वने ॥ ३ ॥ प्रमुंचधन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् ॥ याश्चतेहस्तइषवःपराताभगवोवप ॥४॥ अवतत्य
धनुस्त्वंसहस्राक्षशतेषुते ॥ विशीर्यशल्यानांमुखंशिवोनःशंभुराभव ॥ ५ ॥ विज्यंधनूःशिखंडिनोविशल्योवाणवांउत ॥
अन्नेशन्नःस्येशवःशिवोअस्यनिषंगतिः ॥ ६ ॥ परितेधन्वनोहेतिरस्मान्वृणक्तुविश्वतः ॥ अथोयइषुधिस्तवारेअस्मिन्निधे
हितम् ॥ ७ ॥ यातेहेतिर्मीढुष्टमहस्तेबभूवतेधनुःतयात्वंविश्वतोअस्मानयक्ष्मायापरिभुज ॥ ८ ॥ येवामीरोचनेदिवियेच
सूर्यस्यरश्मिषु ॥ येषामप्सुसदस्कृतंतेभ्यःसर्पेभ्योनमः ॥९॥ याइषवोयातुधानानांयेवावनस्पतीनाम् ॥ येवावटेषुशेरते
तेभ्यःसर्पेभ्योनमः ॥१०॥ यःस्वजनानांनीलग्रीवोयःस्वजनांहरित्तः ॥ कल्माषपुच्छमोषधेजंभयाश्वरुंधति ॥१॥ बभ्रुश्च
बभ्रुवर्णश्चनीलगलवालाः शिवपश्यसर्वेणनीलशिखंडेनभवेनमरुतापिता ॥ २ ॥ विरूपाक्षेणबभ्रुणाचंवदिश्यतोहतः ॥

सवनीलशिखंडवीरकर्मणिकर्मणि ॥३॥ इमामस्यप्राशंजहियेनेदंविभजामहि ॥ नमोभवायनमः शर्वायनमःकुमारशत्रवे ॥ ४॥ नमोनीलशिखंडायनमः सभाप्रपादिनेयस्यहरीअश्वतरौगर्दभावभितस्करौ ॥ ५॥ तस्मैनीलशिखंडायनमः सभाप्रपादिनेनमः सभाप्रपादिनइति ॥६॥ इतिमध्यकुंभेजपः ॥ शेषेषुकलशेषु पूर्वोक्तानिसूक्तानिऋत्विजोजपेयुः ॥ तदुत्तरेपंचवर्णै चतुर्विंशतिदल पंकजंविरच्य ॥ तत्रकलशं स्थापयेत् ॥ तदुपरिअष्टदलांकितेवस्त्रेहेमनिर्मितआश्लेषा प्रतिमायां सर्पानस्थापयेत् ॥ तत्र ॥ ॐयेअग्निजाओषधीजाअहीनांयेअप्सुजाविद्युतआबभुवुः ॥ येषांजातानि बहुधामहांतितेभ्यः सर्पेभ्योनमसाविधेम ॥ इतिसंस्थाप्यावाह्यध्यायेत् ॥ सर्पोरिक्त त्रिनेत्रश्चद्विभुजः पीतवस्त्रकः ॥ फलकासोधरस्तीक्ष्णो दिव्याभरणभूषितः ॥ इतिध्यात्वा तद्दक्षिणतः हेममूर्त्तापुष्यदेवतां बृहस्पतिंस्थापयेत् ॥ ॐबृहस्पतिर्नइतिमंत्रेण ॥ एवंतदुत्तरेकृताग्र्युत्तारण हेमनिर्मितमूर्त्तौमघादेवतांपितॄन्संस्थाप्य ॥ संविंशंत्विहपितरः स्वानःस्योनंकृण्वंतःप्रतिरंतआयुः ॥ तेभ्यःशकेमहविषानक्षमाणाज्योग्जीवंतःशरदःपुरूचीः ॥ इतिमंत्रेणपितॄन्संस्थाप्य॥ आवाह्यततःचतुर्विंशति पंकजभूमिस्थदलेषुपूर्वदलमारभ्य प्राग्दक्षिण्येनपूर्वाधिपतिभादि पुनर्वसुदेवता दितिपर्यंतचतुर्विंशतिवाहनादिकुर्यात् ॥ सयथा ॥ ॐभगायनमः भगंआवाहयामि ॥ एवंसर्वत्र ॥ अर्यम्णेनमः अर्यमणंआवाहयामि ॥२॥ वायवेनमःवायुंआ०॥ इंद्राग्निभ्यांनमः इंद्राग्नीआ० ॥ मित्रायनमः मित्रंआ०॥ इंद्रायनमः इंद्रंआ०॥ निर्ऋतयेनमः निर्ऋतिंआ० ॥ ॐअद्भ्योनमः आपआ०॥ विश्वेभ्योदेवेभ्योनमः विश्वान्देवान्नावा० ॥ विष्णवेनमः विष्णुंआ० ॥ वसवेनमः वसून्नावा०॥ वरुणायनमः वरुणंआ०॥ अजैकपदेनमः अजैकपादंआ०॥ अहिर्बुध्न्यायनमः अहिर्बुध्नंआ०॥ पूष्णेनमः पूषणआ० ॥ अश्विभ्यांनमः अश्विनौआ० ॥ यमायनमः यमंआ० ॥ अग्नयेनमः अग्निंआ०॥ प्रजापतयेनमः प्रजापतिंआवा० ॥ सोमायनमः सोमंआ० ॥ रुद्रायनमः रुद्रंआ० ॥ अदित्यैनमः अदितिंआ० ॥ ततोपूर्वादिक्रमेण इंद्रादिलोकपालान तत्तन्नाममंत्रेणावाह्य ॥ षोडशोपचारैःसंपूज्य ॥ कौस्तुभेतुतैत्तरीयकमंत्रैः पुष्यमघापूर्वादिनक्षत्राणा

मेवावाहनमुक्तंनतुनक्षत्रदेवतानां ॥ ततोआचार्यःस्थंडिलेवरदनामानमग्निं प्रतिष्ठाप्यतदीशान्यांग्रहान्प्रतिष्ठाप्यसंपूज्य तदीशान्यांकलशंसंस्थाप्य ॥ अभ्यात्तानादिपूर्वतंत्रंकृत्वा ॥ ततः अग्नेर्दक्षिणतउदकुंभंसदर्भंसंस्थाप्य पत्नेहितिसूक्तेनाज्य होमपूर्वकंसंपात्याभिमंत्र्यग्रहेभ्यउक्तरीत्याहोमः ॥ अष्टोत्तरसहस्राष्टोत्तरशतसंख्ययाहोमोप्रधानदेवतायाः ॥ अष्टोत्तर शतमष्टाविंशतिवा अधिदैवप्रत्यधिदैवयोःगुरुपितृमंत्राभ्यांहोमः॥ ततोष्टाष्टसंख्ययानाममंत्रैःशेषनक्षत्राधीशानांचतुर्विंशति संख्यकानांहोमः ॥ एवमेवाष्टाष्टासर्वितृदुर्गायैशिवायतथादुर्गावास्तोष्पती अग्निक्षेत्राधीशमित्रा वरुणमग्नीनांमंत्रैर्होमं विधाय ॥ एवंक्रमेणसर्वहोमः ॥ स्थापितदेवतानांपुनःपूजनंबलिदानंच ॥ ततःपूर्वोक्तरीत्यापूर्णाहुतिः ॥ अभ्यात्ताना द्युत्तरतंत्रंपरिसमाप्य ॥ सर्पादिदेवतानामुपस्थानंततोभिशेकःपूर्ववत् ॥ योसौवज्रधरोदेवोमहेंद्रोगजवाहनः ॥ सर्पजातं शिशोर्दोषंमातापित्रोर्व्यपोहतु ॥ योसौशक्तिधरोदेवोहुतभुग्मेषवाहनः ॥ सप्तजिह्वाश्चदेवोग्निः सर्पदोषंव्यपोहतु ॥ योसौदंडधरोदेवोधर्मोमहिषवाहनः ॥ सर्पजातंशिशोर्दोषंमातापित्रोर्व्यपोहतु॥ योसौखड्गधरोदेवोनिर्ऋतिराक्षसाधिपः॥ प्रशामयतुसर्पोत्थंदोषंगंडांतसंभवम् ॥ योसौपाशधरोदेवोवरुणश्चजलेश्वरः ॥ नक्रवाहप्रचेतानः सर्पदोषंव्यपोहतु ॥ योसौदेवजगत्प्राणोमारुतोमृगवाहनः ॥ मातापित्रोःशिशोश्चैवंसर्पदोषंव्यपोहतु ॥ योसौपशुपतिर्देवपिनाकीवृषवाहनः॥ आश्लेषामूलगंडांतंदोषामाशुव्यपोहतु॥ योसौवागीश्वरोदेव अधिदेवोबृहस्पतिः॥ मातापित्रोःशिशोश्चैवगंडदोषंव्यपोहतु पितरःसर्वभूतानारक्षंतुपितरःसदा ॥ सर्पनक्षत्रजातस्यवित्तंचज्ञातिवांधवान् ॥ सुरास्त्वेति०॥ एवंशतछिद्रकलशाभिशेकेण अभिषिक्तोयजमानः तानिवस्त्रालंकरणानित्यक्त्वा अन्येवाससीपरिधायआज्यमवेक्ष्यतत्पात्रं विधायआचार्यायसदक्षिणं दत्वाऽव्यायुषमितिविभूतिधारणंकृत्वा ॥ पूजांतेताम्रपात्रेफलपुष्पादियुक्तमर्घ्यंगृहीत्वा ॥ सर्पाधीशनमस्तुभ्यं नागानांच गणाधिप ॥ गृहाणार्घ्यंमयादत्तं सर्वारिष्टप्रशांतयेतिविशेषार्घ्यंदत्वा देवतानांविसर्जनंप्रतिमादानंचकृत्वा ततोदक्षिणा दानं ॥ आचार्यायधेनुंदत्वा ॥ ऋत्विग्भ्योकृष्णमनड्वाहंचान्येभ्योदक्षिणांदत्वा ॥ गच्छगच्छेत्यग्निंनत्वाविसृज्य ॥ यथाशक्तिब्राह्मणभोजनंविधाय ॥ यस्मात्कोशेतिपठित्वा ॥ शांतागौरीदिशांतिसूक्तंपठेत् ॥ ततःसुहृद्भिःसहभुंजीत ॥

कृतंकर्मेश्वरार्पणंकुर्यात् ॥ ॥ श्रीकृष्णायगोपीजनवल्लभाय० ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौपट्पत्रागरद्विवेदि रविशंकरकृतेआश्लेषाजननशांतिप्रयोगरश्मिःषट्चत्वारिंशत् ॥ ४६ ॥

॥ अथज्येष्टाशांतिप्रयोगरश्मिः ॥ तत्रादौनक्षत्रफलं ॥ ज्येष्ठायादशभागेषुआद्यमातामहीमृतिः मातामहं द्वितीयेचतृतीयेहंतिमातुलं ॥ तूर्येजातेमातरंचहत्यात्मानंचपंचमे ॥ गोत्रजान्षष्टभागेयःसप्तमेतुभयंकुले ॥ अष्टमे स्वाग्रजंहंतिनवमेश्वसुरंतथा ॥ दशमांशकजातस्तुसर्पंहंतिशुभंध्रु म् ॥ ज्येष्टर्क्षेतुपुमान्जातोज्येष्टभ्रातुर्विनाशकः ॥ ज्येष्ट क्षेकन्यकाजाताहंतिशीघ्रंधवाग्रजं ॥ पादत्रयेजातनरोज्येष्टाप्यत्रप्रजायते ॥ ज्येष्टांतेपादजातस्तुपितुः स्वस्यचनाशकः॥ ॥ अथप्रयोगः ॥ द्वादशाहेशांन्त्युक्तशुभदिनेवागोप्रसवंकृत्वा ॥ देशकालौसंकीर्त्य । अस्यशिशोर्ज्येष्टाजननसूचित सकलारिष्टशांतिपूर्वकं श्रींपरमेश्वरप्रीत्यर्थं सग्रहमखांज्येष्टाजननशांतिंकरिष्येइतिसंकल्प्य ॥ तत्रादौनिर्विघ्नतासिध्यर्थं महागणपतिपूजनं स्वस्तिपुण्याहवाचनंमातृकापूजनं नांदिश्राद्धंआचार्यादिवरणंचकरिष्ये शांतिकलशकरणंच ॥ एतानि कृत्वाततोआचार्यः ब्रह्मजज्ञानंअन्यश्चेतिपठित्वा सर्षपविकीरणभूमिप्रोक्षणहेमनिर्मित इंद्रप्रतिमाग्न्युत्तारणानिकृत्वा ॥ ततआचार्येस्थंडिलात्पूर्वस्यांदिशिकलशस्थापनंकृत्वा तूष्णींगंधेनाभ्यर्च्य ॥ शालितंडुलैःकलशंपूरयित्वा तत्रपूर्वोक्त प्रकारेणपूर्णपात्रंनिधाय तदुपरिसाष्टदलवस्त्रेइंद्रावाहनंकुर्यात् ॥ तद्यथा ॥ मानोविदन्नितिमंत्रस्याथर्वामरीचइंद्रोगायत्री इंद्रावाहनेविनियोगः ॥ ॐमानोविदन्न्वियाधिनोमोअभिव्याधिनोविदन ॥ आराच्छरव्याअस्मद्विषुचीरिंद्रपातय ॥ ॐभूर्भुवःस्वर्जनदेशच्यासहितइंद्रंचतुर्दंतविलसदैरावतारूढंवज्रांकुशधारिणंद्विभुजमावाहयामि ॥ तत्वरितःपूर्वादिक्रमेण इंद्राद्यष्टौलोकपालान ॥ तत्तन्मंत्रेण नाममंत्रेणवाआवाह्य ॐभूर्भुवःस्वर्जनदेशच्यासहितइंद्रायनमः ॥ तथाचइंद्राद्यावाहित लोकपालेभ्योनमः आसनंसमर्पयामि ॥ एवंसर्वत्र ॥ शोडषोपचारैःसंपूज्य ॥ पूजासमाप्तिपर्यंतंमौनीभवेत् ॥ वस्त्रार्पण कालेरक्तवस्त्रद्वयं ॥ नैवेद्यकालेशष्कुल्यादिनानाभक्षनिवेदनंकुर्यात् ॥ महाराष्ट्रदेशेशष्कुलीनांखाजीकरंजीतिप्रसिद्धं नाम ॥ ततःशालितंडुलकलशादुत्तरतः पूर्वादिचतुर्दिक्षुचतुरः कुंभानमध्येशतछिद्रंचसंस्थाप्य ॥ तद्यथा ॥ पूर्वोक्तमंत्रैः

पंचस्थलेप्रत्येकमंत्रावृत्त्याभूमिंस्पृष्ट्वा तत्रॐव्रीहिमत्तमितियवान्निक्षिप्यतस्योपरिआकलशेष्वितिकलशपंचकान्संस्थाप्य ॥ आपूर्णेतिशतछिद्रकुंभरहितपूर्वादिदिक्कुंभचतुष्टयेषुउदकेनापूर्य ॥ तेषुगायत्रीमंत्रेणगोमूत्रं ॥ यस्तेगंधइतिगोमयं इति पूर्वोक्तमंत्ररीत्याक्षीरं दधिघृतंदुग्धंदधिघृतं मधुसर्करापंचरत्नानि पंचमृत्तिकापंचपल्लवान हिरण्यंकुशान्दूर्वासर्वौषधीः प्राग्दक्षिण्येनमंत्रावृत्त्याकुंभचतुष्टयेषुनिक्षिप्य परिधत्तइतिमंत्रेणवस्त्रयुग्मवेष्टितेषुतेषु पूर्णपात्राणिनिधायतेषु क्रमेणपूर्वोक्त मंत्रेणवरुणमावाह्य षोडशोपचारैःसंपूज्य ॥ ततःकलशेषुवरुणपूजनंकुर्यात् ॥ ततश्चतुर्षुकुंभेषुऋत्विजश्चत्वारिसूक्तानि जपेयुःसूक्तानितु ॥ अभयगणस्याथर्वाऋषिः सप्तर्षयोदेवताद्वेजगत्यौतिस्रउष्णिहःसूक्तजपेविनियोगः ॥ ॐअभयंद्यावा पृथिवीइहास्तुनाअभयंसोमः सवितानःकृणोतु ॥ अभयंनोस्तूर्वं१तरिक्षंसप्तऋषीणांचहविषाभयंनोअस्तु ॥ १ ॥ अस्मै ग्रामायप्रदिशश्चतस्रऊर्जंसुभूतं स्वस्तिसविताः नःकृणोतु ॥ अशत्रुरिंद्रोअभयंनःकृणोत्वन्यत्रराज्ञामभियातुमन्युः ॥२ ॥ अनमित्रंनोअधरादनमित्रंनउत्तरात् ॥ इन्द्रानमित्रंनःपश्चादनमित्रंपुरस्कृधि ॥ ३ ॥ ॐइयेनोसिगायत्रछंदाअनुत्वारंभे ॥ स्वस्तिमासंवहास्ययज्ञस्योदृचिस्वाहा ॥ ४॥ ॐऋभुरसिजगच्छंदाअनुत्वारंभे ॥ स्वस्तिमासंवहास्ययज्ञस्योदृचिस्वाहा ॥५॥ ॐवृषासित्रिष्टुप्छंदाअनुत्वारंभे ॥ स्वस्तिमासंवहास्ययज्ञस्योदृचिस्वाहा ॥ ६॥ इत्यभयसूक्तम् ॥ ततइंद्रसूक्तं॥ पुरुषसूक्तं ॥ ततोरुद्रसूक्तं ॥ इतिपूर्वोक्तक्रमेणसूक्तानिजपेत्वा ॥ स्थंडिलेऽग्निंप्रतिष्टाप्य तदीशान्यांसकलशान्ग्रहान् संस्थाप्य ॥ अभ्यातानादिपूर्वतंत्रांतेसोदकुंभंपत्नीहोतिसंपात्यग्रहहोमंकृत्वा पूर्वोक्तरीत्याप्रधानहोमंकुर्यात् ॥ एव मष्टोत्तरसहस्रमष्टोत्तरशतमष्टाविंशति अष्टौवाएकैकेनमिदाज्यचरुतिलान्हुत्वा ततःदिक्पालपूजनं बलिदानादिकंच कृत्वा ॥ पूर्णाहुतिःकार्या ॥ ततोभ्यातानाद्युत्तरतंत्रंसमाप्य भार्यासहितंमौंजपाशबद्धंशिशुंचयजमानमासनेउपविश्य पूर्वोक्तसूक्तैरभिषेकःकार्यः ॥ तत्रशांतिसूक्तेंद्रसूक्ताभ्यांअभिषेकइतिविशेषः ॥ इतिमंत्रैरभिषिक्तोयजमानः पद्मासनस्थो शुक्लवस्त्रचंदनकुसुमानिधृत्वा आज्यावलोकनंकुर्यात् ॥ तत्रमंत्ररूपंरूपमितिचित्रंदेवानामिति तच्चक्षुरितिमंत्रैरवलोकित

माज्यपात्रंसदक्षिणंब्राह्मणायदत्वा ॥ ततःइंद्रकलशसमीपमागत्यतत्पुरतउपविश्यगंधादिभिः पंचोपचारैरिंद्रंसंपूज्याचमन
तांबूलेनिवेद्य ॥ गंधपुष्पफलयुक्तमर्घ्यंनिवेदयेत् ॥ तत्रमंत्रः ॥ नमस्तेसुरनाथायनमस्तुभ्यंशचीपते ॥ गृहाणार्घ्यंमया
दत्तंगंडदोषप्रशांतये॥ इतिमंत्रेणार्घ्यंदद्यात् ततःत्र्यायुषमितिमंत्रेणविभूतिधारणंकृत्वा ॥ अनंतरंदेवताविसर्जनंश्रेयोग्रहणं
दक्षिणादानंआचार्यहस्तेप्रति मादानंचकार्यं ॥ ततःकर्मसाद्गुण्यार्थंआचार्यायसुशीलांपयस्विनीरक्तवर्णा सवस्त्रांसवत्सां
हेमशृंगादिसर्वालंकारभूषितां विधिनागांदद्यात् ॥ दानमंत्रः ॥ यक्षगंधर्वसिद्धैश्चपूजितोसिशचीपते ॥ दानेनानेनदेवेश
गंडदोषंप्रशामय ॥ इतिमंत्रेणसदक्षिणांगांदत्वा ॥ ततोष्टोत्तरशतंब्राह्मणानभोजयेत् ॥ तेभ्योदक्षिणांदत्वाप्रणिपत्य ॥
क्षमध्वमपराधानितिक्षमाप्येंद्रं प्रार्थयेत् ॥ अज्ञानादथवाज्ञानाद्धि कृत्पादा धनस्यवयन्यूनमतिरिक्तंच तत्सर्वंक्षंतुमर्हसि
इतिप्रार्थ्य ॥ गच्छगच्छेत्यग्निंविसृज्य ॥ मौजगाशंनदीकेनेषुत्यतरायस्मात्कोशेति कर्मसमापनोयमंत्रंपठित्वा कर्मेश्वरार्पणं
कुर्यात् ॥ यथायजमानःसाक्षतजलंहस्ते गृहीत्वावदेत् ॥ ज्येष्ठाशांतिसुकृतंयन्मयालब्धंतेनदेवेंद्रनामेश्वरप्रीयतामिति ॥
शांतायोदितिशांतिसूक्तंपठेत् ॥ भूयसीदक्षिणादिकंपूर्ववदाचरेदिति ॥ ॥ इतिश्रीमदथर्ववेदगृह्यसूत्रप्रयोगभानौवटपन्नागर
द्विवेदिरविशंकरकृतेज्येष्टानक्षत्रजनन शांतिप्रयोगरश्मिःसप्तश्चत्वारिंशत् ॥४७॥

॥ ॐश्रीगणेशायनमः ॥ अथचित्रादिनक्षत्रोत्पत्तौततत्फलानि ॥ चित्राद्यर्द्धेपुष्यमध्येद्विपादेपूर्वाषाढाधिष्ण्य
पादेतृतीये ॥ जातःपुत्रश्चोत्तराद्येविधत्तेपित्रोर्भ्रातुः स्वस्यचापिप्रनाशनं ॥ उत्तराफाल्गुन्याद्यपादेइत्यर्थः ॥ द्विमासं
श्चोत्तरांदोषःपुष्येचैवत्रिमासकः ॥ पूर्वाषाढाष्टमेमासिचित्राषण्मासिकंफलं । उत्तराप्रथमेपादेतिलपात्रंतथैवच ॥ अजा
चित्रासुवैदद्यात् पूर्वाषाढेतुकांचनं ॥ तिष्येतुगांसवत्सांचसुशीलांचपयस्विनीमिति ॥ उत्तरातिष्यचित्रार्थंपूर्वाषाढोद्भव
स्यच ॥ कुर्याच्छांतिंप्रयत्नेननक्षत्राकारमंबुधः ॥ सुवर्णेनतदर्द्धेनयथावित्तानुसारतः ॥ नक्षत्राधिपतेरूपंकृत्वा वस्त्रद्वया-
न्वितं ॥ पूजयेदितिशेषः ॥ पूषाश्विनागुरुसार्पमघाचित्रेंद्रमूलभे ॥ एषुर्क्षेषुजातस्यकुर्याद्गोजननंतथेतिगोप्रसवंकृत्वा
नक्षत्राधिपतिप्रतिमांसंपूज्य ॥ आजादानंकार्यं ॥ उत्तरार्द्धेजातस्यकेवलगोमुखप्रसवमात्रंनतुपूजादानं ॥ एवंपुष्यद्वितीय

तृतीयपादयोर्जनने गोप्रसवनक्षत्राधिपपूजा गोदानानिकार्याणि ॥ प्रथमपादचतुर्थ पादयोर्जननेकेवल गोमुखप्रसव
मात्रम् ॥ उत्तराफाल्गुनीप्रथमपादेजनने नक्षत्राधिपपूजांतिलमात्रदानंचकुर्यात् ॥ नात्रगोमुखप्रसवः ॥ एवंपूर्वा
षाढातृतीयेपादेजनने नक्षत्रेशपूजांकांचनदानं उत्तरापूर्वाषाढयोरुत्तरभागेषु दोषविशेषानुक्तेर्न पूजादिकं ॥ मघाप्र
थमपादजनने मूलवत्फलं ॥ तत्रगोप्रसवनक्षत्रेशपुजा ग्रहमखाःकार्याः ॥ मघायाआद्यघटिद्वये जननेनक्षत्रगंडांत
शांतिरपि ॥ द्वितीयतृतीयांत्य पादजननेगोप्रसवमात्रं ॥ रेवत्यंतघटिद्वयेश्विन्याद्यघटिद्वये जननेनक्षत्रगंडांतशांति
गोप्रसवमखाःकार्याः ॥ इतरभागेषुकेवल गोप्रसवमात्रं ॥ एवंविशाखाचतुर्थ पादजननेशालक देवरनाशादिदुष्ट
फलोक्तेग्रहमखःकार्यः ॥ यत्रकालेदुष्टफलमात्रमुक्तंशांतिर्नोक्तातत्रग्रहमखः कार्येतिकमलाकरोक्तेःएवमितरत्राप्युह्यं ॥
॥ अथचित्राशांतिप्रयोगः ॥ जननाद्द्वादशाहे शांत्युक्तनक्षत्रकाले वाकर्त्तादेशकालौस्मृत्वा अस्यशिशो चित्रापूर्वार्द्ध
जन्मसूचित सर्वारिष्टनिरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थं गोमुखप्रसवशांत्याख्यंकर्मकरिष्ये इतिसंकल्प्य ॥ तदंगत्वेन
गणेशांबिकयोः पूजादिकंकरिष्येतिसंकल्प्य ॥ गणेशांबिकयोः पूजनमाचार्यदिनां वरणंतत्पूजनंच ॥ तेनयथा
विधिनागोमुखप्रसवंकृत्वा ॥ ततोनक्षत्राधिपंपूजयेत् ॥ देशकालौसंकीर्त्यअस्यशिशोः चित्राद्यपादद्वयेजन्मसूचित
सकलारिष्टनिवृत्तिद्वारानक्षत्रेशरूपी श्रीपरमेश्वरप्रीत्यर्थं यथासंभवद्रव्यैर्नक्षत्राधिशपूजनमहंकरिष्ये ॥ अत्रकेचिद्गणेशां
बिकयोःपूजनंकुर्वंति ब्रह्मजज्ञानंअव्यसश्चेति यथासंभवंपठित्वा ॥ ततःपंचगव्येनयागभूमिप्रोक्षणंकृत्वा ॥ पूर्वस्यांदिशि
गोमयेनोपलिप्तभूमौश्वेतचूर्णेनाष्टदलंविधाय ॥ तत्रतंदुलपुंजंकृत्वा तत्रकलशंस्थापयेत् ॥ तदुपरिअष्टदलांकितवस्त्रेषोडश
माषमितांकृताग्र्युतारगांत्वष्टुःप्रतिमांनिधाय आवाहनाद्युपचारैःपूजयेत् ॥ तत्रमंत्रः ॥ ॐतत्सवितु० ॥ ॐभूर्भुवःस्व
र्जनदेवोत्वष्ट्रेनमः त्वष्टारंस्थापयामीतिक्रमेणावाहनादिभिरुपचारैःपूजयेम् ॥ तत्रासहस्रबाहुरितिपुरुषसूक्तेनशोडषोपचारः
पंचामृतस्नानांतेरुद्राभिशेकेणाभिषिच्य नमस्कारान्कृत्वा ॥ अनयापूजयाचित्राधिपतित्वष्टाप्रीयतां अथअजादानं ॥
पूजासंभारान्संपाद्य ॥ पवित्रपाणिः कर्ताजीवास्थेति विधिवदाचम्यदेशकालौसंकीर्त्य ॥ अस्यशिशोःचित्रापूर्वार्द्धजन्म

सूचितसर्वारिष्टशांतिपूर्वकंअशेषपापक्षयार्थं श्रीपरमेश्वरप्रीत्यर्थं अजाप्रदानंकरिष्ये ॥ तदंगत्वेनब्राह्मणवरणं पूजनंच करिष्येइतिसंकल्प्य ॥ पूगीफलंगृहीत्वा अमुकप्रवरान्वितामुकगोत्रोत्पन्न अमुकशर्माहंअमुकप्रवरान्वितोमुकगोत्रोत्पन्नं अमुकशर्माणंब्राह्मणं अस्यदजाप्रतिगृहीतारंत्वामहंवृणे वृतोस्मीतिद्विजंवाचयेत् ॥ दानप्रतिगृहीत्रे ब्राह्मणायइदमासनं इत्यादिविधिनाद्विजंसंपूज्य ॥ ततःसप्तधान्योपरिस्थितांप्राङ्मुखींसवत्सांपूजयेत् ॥ ॐभूर्भुवःस्वर्जनदेंअजायैनमः ध्यानादिदक्षिणांतैरुपचारैः संपूज्यालंकारान्दत्वा ॥ शृंगभूषणार्थंसुवर्णं ॥ पादभूषणार्थंरजतं ॥ भालभूषणार्थंसुवर्ण तिलकं ॥ नेत्रभूषणार्थंताम्रंआरक्तवस्त्रंच ॥ दोहनार्थंकांस्यपात्रं ॥ एतानिसमर्प्य ॥ पुष्पांजलिंदत्वा ॥ सर्वत्रप्राङ्मुखो दाताप्रतिग्राहिंउदङ्मुखःहस्तेजलंदद्यात् ॥ अमुकगोत्रोत्पन्न० अमुकशर्माहं अदःगोत्रोत्पन्नाय अमुकशर्मणेविप्रायइयमजां अव्यंगांहेमशृंगींरौप्यखुरींताम्रपृष्ठींसुवर्णतिलकांघंटाभरणीं कांस्यदोहांवस्त्राच्छादितां अस्यशिशोःचित्रापूर्वार्द्धजन्मसूचित सर्वारिष्टनिरसनार्थंनक्षत्राधिपत्वष्टारूपी श्रीपरमेश्वरप्रीतये ब्राह्मणायतुभ्यमहंसंप्रददेनममेतित्यजेत् ॥ अजास्तनर्नाभि मध्ययोर्मध्यभागंधृत्वाविप्रहस्तेजलंक्षिपेत् ॥ मंत्रनासे अजश्लक्ष्णेयज्ञसंपत्करेशुभे ॥ सृष्टात्वंदहमेपापंजन्मांतरशतैःकृतं॥ दानसांगतासिध्यर्थंइमांदक्षिणांतुभ्यमहंसंप्रददे ॥ द्विजमजांचप्रदक्षिणीकृत्य ॥ ततःशांतायौरितिशांतिपाठंकृत्वा तस्याः पश्चाज्जलं क्षिपेत् ॥ गृहाद्बहिर्गत्वाहस्तौपादौप्रक्षाल्याचम्य ॥ आदित्यमीक्षेत् ॥ गृहंप्रविश्यकर्मेश्वरार्पणंकुर्यात् ॥ अनेन दानेनश्रीवासुदेवःप्रीयतां ॥ इत्यजादानं ॥ ततोऽभिषेकस्तुपूर्ववत् ॥ चित्राणिसाकमितिसूक्तेनेतिविशेषः ॥ होमश्चापि एतेनैवसूक्तेनशेषंसर्वंपूर्ववत् ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौषट्पत्तनागरद्विवेदिरविशंकरकृतेचित्राशांतिप्रयोग रश्मिःसप्तचत्वारिंशत् ॥ ४७ ॥

॥ अथपुष्यनक्षत्रशांतिप्रयोगरश्मिः ॥ पुष्यद्वितीयतृतीयपादयोर्जननेगोप्रसवंकृत्वा नक्षत्राधीशंसंपूज्य ॥ गोदानंकार्यं ॥ प्रथमचतुर्थपादयोर्जननेकेवलगोप्रसवंकृत्वानतुपूजादानं ॥ ॥ अथप्रयोगः ॥ कर्त्ताजननाद्द्वादशाहे तदसंभवेशांत्युक्तशुभदिनेवादेशकालावुच्चार्य अस्यशिशोःपुष्यद्वितीयतृतीयपादयोर्जननसूचित सकलारिष्टनिरसनद्वारा

श्रीपरमेश्वरप्रीत्यर्थं गोमुखप्रसवाख्यांशांतिंकरिष्ये इतिसंकल्प्य ॥ ततःगणेशांबिकयोःपूजनादि आचार्यादीनांवरणं कृत्वा गोमुखप्रसवंकुर्यात ॥ ततोनक्षत्रेशंपूजयेत् ॥ तद्यथा ॥ देशकालावुच्चार्य अस्यशिशोः पुष्यद्वितीयतृतीयपादयो र्जन्मसूचितसकलारिष्टनिरसनद्वारापुष्याधिपबृहस्पतिप्रीत्यर्थं नक्षत्रेशपूजनमहंकरिष्ये ॥ ततःपुरुषसूक्तेनषोडशोपचारैः संपूज्य ततःआचार्योब्रह्मजज्ञानंअव्यसश्चेतिपठित्वा ॥ ततःसर्षपैर्दिग्बंधनंकुर्यात् ॥ पंचगव्येनभूशुद्धिंविधाय ॥ प्रति मायाअग्न्युत्तारणादिविधिंकृत्वा ॥ ततःसाष्टदलभूमौविधिनाकलशंसंस्थाप्य ॥ तत्रबृहस्पतिमावाहयेत् ॥ तत्रमंत्रः ॥ ॐ बृहस्पतिनःपरिपात्विति ॥ आवाह्यविधिनानक्षत्रेशपूजयेत् ॥ अनयापूजयानक्षत्राधीशःप्रीयतांनममेइतिपूजांनिवेद्य॥ अथ गोदानम् ॥ पूजासंभारान्संपाद्य॥ कर्त्तादेशकालावुच्चार्य अस्यकुमारस्यपुष्यद्वितीयतृतीयपादयोर्जन्मसूचितसर्वारिष्टशांति पूर्वकाशेष पापक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थं ब्राह्मणायगोप्रदानंकरिष्ये ॥ तथाचब्राह्मणवरणंब्राह्मणपूजनंगोपूजनंचकरिष्ये इतिसंकल्प्य ॥ उदङ्मुखंद्विजंसंपूज्य ॥ अथगोपूजनं ॥ प्राङ्मुखींसवत्सांगांविधिनापूजयेत् ॥ यज्ञाउपह्वयेसुदुघामिति मंत्रेणयज्ञसाधनभूताय।मितिचमंत्राभ्यांषोडशोपचारैःसंपूज्य पूजाकालेधूपदीपात्पूर्वंगवेअलंकारान्दद्यात् ॥ शृंगभूषार्थ सुवर्णं ॥ पादभूषार्थंरजतम् ॥ भालभूषणार्थंआदर्शसुवर्णंच ॥ नेत्रभूषणार्थंरत्नद्वयं ॥ कंठभूषणार्थंघंटाचामरं ॥ यज्ञो पवीतंच ॥ सर्वावयवभूषार्थंपट्टकूलं ॥ पृष्ठभूषणार्थंताम्रं ॥ पुच्छभूषणार्थंमुक्ताफलानि ॥ सप्तधान्यानि ॥ दोहनपात्रम् ॥ एतानिसमर्प्य ॥ प्रार्थनांतेजलकुशाक्षतान् ससुवर्णमाज्यपात्रंगृहीतहस्तं गोपुच्छंधृतांकंकृत्वा विप्रायदत्वा ॥ तदुपरिजलं सिंचनंकुर्वन्निितिवदेत् ॥ गोस्तारयतु ॥ पुण्यंवर्द्धतां ॥ शिवाआपःसंतुसौमनस्यमस्तु ॥ अक्षतंचारिष्टंचास्तु ॥ दीर्घमायुः श्रेयःशांतिःपुष्टिस्तुष्टिश्चास्तु ॥ अमुकगोत्रोत्पन्नःअमुकशर्माहंअमुकगोत्रोत्पन्नाय अमुकशर्मणेब्राह्मणायइमांगांसवत्सां रुद्रदैवत्यांदोग्ध्रीं अव्यंगांहेमशृंगींरौप्यखुरींसद्वस्त्राच्छादितां सुशीलांकांस्यदोहिनी कान्वितांपयस्विनीं ताम्रपृष्ठींघंटा चामरआदर्शगंधपुष्पाद्यर्चितां सर्वालंकारयुतां ॥ यद्वासर्वालंकाराभावे यथाशक्तिद्रव्ययुतां ॥ अस्यकुमारस्यपुष्यद्वितीय तृतीयजन्मसूचित सकलारिष्टशांतिपूर्वकगोरोमतुल्य संवत्सरावधिसकलभोगपरिपूर्वक ईश्वरप्रीतिकामः अमुकशर्मणे

ब्राह्मणायतुभ्यमहंसंप्रददे ॥ दानवाक्यं ॥ यज्ञसाधनभूतायाविश्वस्याघोघनाशिनी ॥ विश्वरूपधरोदेवःप्रीयतामनया गवा ॥ इतिमंत्रांतेदेवस्यत्वा० ॥ प्रतिगृह्णतांप्रतिगृह्णामि० ॥ दानसांगतासिध्यर्थंदक्षिणांदत्वा ॥ अनेनगोदानेनकर्मांग रूपीपरमेश्वरःप्रीयतांनमम ॥ इतिगोदानं ॥ ततःस्थापितकलशोदकेनसपत्नीकं सापत्यंयजमानं हिरण्यवर्णइत्यादिमंत्रै रभिषिच्यप्रतिमांसंपूज्य ॥ अभ्यारउत्तिष्ठेतिविसृज्य श्रेयोग्रहणंदक्षिणादानं आचार्यहस्तेसोपस्करप्रतिमादानंचकृत्वा विप्रान्संपूज्यतान सदन्नेनभोजयेत् मीलितेभ्योब्राह्मणेभ्योभूयस्यादिदानानि यथाशक्तिकृत्वा शांताघौरितिपठित्वा यस्मात्कोशेतिजप्त्वा कृतंकर्मेश्वरार्पणंकुर्यादिति ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौ षट्पन्नागरद्विवेदिरविशंकर कृतेपुष्यजननशांतिप्रयोगरश्मिरष्टचत्वारिंशत् ॥ ४८ ॥ ॥ जगदंबार्पणमस्तु ॥

॥ अथपूर्वाषाढाजननशांतिप्रयोगरश्मिः ॥ पूर्वाषाढातृतीयपादजननेनक्षत्रेशपूजासुवर्णदानं ॥ प्रथमद्वितीय चतुर्थपादजननेदोषाभावान्नतुपूजादिकं ॥ ॥ अथप्रयोगः ॥ कर्त्तादेशकालावुच्चार्यअस्यशिशोः पूर्वाषाढातृतीयपाद जननसूचितसकलारिष्टशांतिद्वारा श्रीपरमेश्वरप्रीत्यर्थं पुरुषसूक्तविधिनानक्षत्राधिपप्रतिमापूजनंकरिष्ये ॥ तदंगगणेशां बिकापूजनादिआचार्यादीनांवरणं ॥ सर्षपविकीरणं ॥ पंचगव्येनभूमिशोधनंकृत्वाग्न्युत्तारणादि सर्वंपूर्ववत्परिसमाप्य॥ पूर्वस्यांदिशिकलशस्थापनं ॥ तदुपरिनक्षत्राधिपंस्थापयेत् ॥ ॐआपोहिष्ठा० ॥ अद्भ्योनमः आपस्थापयामीतिरीत्या सर्वत्रपुरुषसूक्तेनषोडशोपचारानदत्वा संप्रार्थ्यपूजानिवेदन ॥ अत्रसर्वत्राग्निस्थापनांतेउदकुंभं प्रत्नोहीतिसंपात्याभि मंत्र्याभिषेककालेअभिषेकःकार्यः एवंसर्वत्रज्ञेयं ॥ अथसुवर्णदानं ॥ देशकालौस्मृत्वा अस्यकुमारस्यपूर्वाषाढातृतीय पादजन्मसूचितसकलारिष्टनिरसनपूर्वकं शुभफलाप्तयेनक्षत्राधीशप्रीतये ब्राह्मणायसुवर्णदानंकरिष्ये ॥ तदंगतयाब्राह्मण पूजनंकरिष्ये ॥ ततःसंपूज्य ॥ हिरण्यगर्भ०प्रयच्छमे ॥ इदंसुवर्णंअग्निदैवतं अमुकगोत्रायामुकशर्मणे ब्राह्मणायतुभ्यमहं संप्रददे॥ दानसांगतासिद्धयेइमांरजतमयींदक्षिणांतुभ्यमहंसंप्रददे ॥ अनेनसुवर्णदानेनकर्मांगरूपीपरमेश्वरप्रीयतांनमम॥ ततःस्थापितकुंभोदकेन सपरिवारंयजमानंपूर्वोक्तैर्मंत्रैर्ब्राह्मणारभिषिंचेयुः ॥ आज्यावलोकनादिशांतिपाठांतंसर्वंपूर्ववत्

कृत्वा यस्मात्कोशेतिकृतं कर्मेश्वरार्पणंकुर्यादिति ॥ ॥ इतिश्रीमदथर्वगृह्यप्रयोगभानौषट्पन्नागर द्विवेदिरविशंकरकृते पूर्वाषाढाजननशांतिप्रयोगरश्मिः रेकोनपंचाशत् ॥४९॥

॥ अथोत्तराफाल्गुनीजननशांतिप्रयोगरश्मि तत्राउत्तराफाल्गुनीप्रथमपादजनने नक्षत्राधीशपूजातिलपात्र दानं ॥ तत्रगोप्रसवः ॥ शेषेषुपादेषुदोषाभावान्नपूजादिकं ॥ अथप्रयोगः ॥ जननाद्द्वादशाहेतदसंभवेतन्नक्षत्रदिनेवा देशकालावुच्चार्य अस्यबालकस्यउत्तराप्रथमपाद जननसूचितसर्वारिष्टोपशांतिद्वारा श्रीपरमेश्वरप्रीत्यर्थं पुरुषसूक्तेनविधि नायथामिलितोपचारैर्यथामिलितोपद्रव्यैर्नक्षत्राधीश पूजनमहं करिष्ये ॥ तदंगगणेशांबिकपूजनपूर्वकं स्वस्तिपुण्याह वाचनादिकरिष्येइतिसंकल्प्य ॥ स्वस्तिवाचनांतेआचार्यंकृत्वा सर्षपविकीरणादिप्रार्थनांतेसाष्ट दलभूमौविधिनाकलशं प्रतिष्ठाप्यपुर्णपात्रेसाष्टदलवस्त्रेहेमनिर्मितकृताग्न्यु त्तारणप्रतिमायांनक्षत्राधीशंपूजयेद् ॥ तत्रमंत्रः ॥ ॐभगंस्तेहस्तमग्र हित्सविताहस्तमग्रहीत् ॥ पत्नीतमसिधर्मणाहंगृहपतिस्तव ॥ इतिमंत्रेणभगायनमः ॥ भगमावाहयामि॥ ततःआसनादि षोडशोपचारैस्तेनैवमंत्रेणपुरुषसूक्तऋग्भिश्चसंपूज्य ॥ प्रार्थनापूर्वकनमस्कारांतेअनयापूजयाश्रीनक्षत्राधीशःप्रीयतामिति वदेत् ॥ इतिपूजानिवेदनं ॥ अत्रापिपूर्ववदुदकुंभसंपातादिकंज्ञेयं अथतिलपात्रदानं ॥ यथाशक्तिताम्रपात्रेवातिलान् क्षिप्त्वा ॥ कर्तादेशकालावनुकीर्त्य ॥ अस्यकुमारस्यउत्तराप्रथमपादजनन सूचितसर्वारिष्टशांतिपूर्वकअशेषपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं ब्राह्मणायतिलपात्रदानंकरिष्ये ॥ तदंगब्राह्मणवरणं तत्पूजनंचकरिष्ये इतिसंकल्प्य ॥ विप्रस्यपाद प्रक्षालनंगंधमाल्यादिपूजांयथाशक्तिकृत्वा ॥ स्वस्त्यस्तुवांइतिवाक्यानिपठेत् ॥ दानवाक्यं ॥ तिलाःकाश्यपसंभूता तिलाःपापहरास्मृताः ॥ तिलपात्रप्रदानेनऋक्षदोषंव्यपोहतु ॥ इदंतिलपात्रदानंअस्यशिशोःउत्तराप्रथमपादजननसूचित सकलारिष्टशांतिपूर्वकअशेषपापक्षयार्थं अमुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे ॥ दानसांगतासिध्यर्थंदक्षिणादानं ॥ अनेनतिलपात्रदानेनकर्मांगरूपीपरमेश्वरःप्रीयतांनममेतिदानदिवेदनं ॥ ततःपूर्वस्थापितकलशोदकेन सापत्यंसपत्नीकं

यजमानं पूर्वोक्तैर्मंत्रैरभिषिच्य ॥ ततःस्थापितदेवतानांपंचोपचारैःपूजनं ॥ ततःउत्तिष्ठेतिमंत्रेणविसृज्य ॥ ततोश्रेयो गृहणंदक्षिणादानंआचार्यहस्तेसोपरस्करप्रतिमादानंचकृत्वा ॥ ब्राह्मणान्यथामिलितान्भोजयीत्वा शांतिसूक्तादिपठनं सर्वंपूर्ववत्कृत्वा यस्मात्कोशेतिकर्मसमापनीय मंत्रंपठीत्वाकृतंकर्मेश्वरार्पणंकुर्यादिति ॥ ॥ इतिश्रीमदर्थवगृह्यसूत्रप्रयोग भानौषट्पन्नागर द्विवेदिरविशंकरकृतेउत्तराफाल्गुनीजननशांतिप्रयोगरश्मिःपंचाशत् ॥ ५० ॥

॥ अथमघानक्षत्रजननशांतिप्रयोगः ॥ मघाप्रथमपादजनने मूलवत्फलंतत्रगोप्रसवनक्षत्रेश पूजागृहमखाः कार्याः ॥ अवशिष्टत्रये केवलगोप्रसवमात्रम् ॥ ॥ अथप्रयोगः ॥ जननात्द्वादशाहेतदसंभवेशांत्युक्तशुभदिनेवा कर्त्ता देशकालावनुकीर्त्य ॥ अस्यशिशोःमघाप्रथमपादजननसूचित सकलारिष्टनिरसनद्वाराश्रीपरमेश्वरप्रीत्यर्थं गोमुखप्रसव शांतिंकरिष्ये ॥ तत्रादौनिर्विघ्नतासिध्यर्थं गणपतिपूजनमहंकरिष्ये इतिसंकल्प्य ॥ गणेशपूजनादिकंसर्वंपूर्ववत् ॥ आचार्यवरणंतत्पूजनंचकृत्वाः ॥ ततःआचार्योब्रह्मजज्ञानमितिकर्मसमारंभणीयमंत्रपाठादिकंकृत्वा सर्षपविकीरणादि प्रार्थनांतेवेद्यामुक्तरीत्यागोमुखप्रसवशांतिंकृत्वा नक्षत्राधीशंपूजयेत् ॥ तद्यथा ॥ देशकालौसंकीर्त्य अस्यकुमारस्यमघा प्रथमपादजन्मसूचित सकलारिष्टप्रशांतिपूर्वकशुभफलावाप्त्यर्थं नक्षत्राधिपतिपितृस्वरूपि श्रीपरमेश्वरप्रीत्यर्थं ग्रहमख पूर्वकयथासंभवद्रव्यैर्नक्षत्राधीषपूजनमहंकरिष्ये ॥ तदंगगणपतिपूजनपूर्वकं स्वस्तिपुण्याहवाचनमातृकापूजनं नांदिश्राद्धं आचार्यऋत्विग्वरणंचकरिष्ये इतिसंकल्प्यएतानिकृत्वा ॥ ततोआचार्यःयदत्रसंस्थिता मितिसर्षपविकीरणंकुर्यात् ॥ आपोहिष्ठेतिमंत्रैःपंचगव्येन शुद्धोदकेनच भूप्रोक्षणंप्रतिमाग्न्युत्तारणंचकृत्वा ततःस्थंडिलपूर्वतःगोमयोपलिप्त भूमौशुभ्र चूर्णादिनापंचवर्णैरष्टदलंविरच्य तत्रपुण्याहवाचनोक्तताम्रमयंमृन्मयंवाकलशंप्रतिष्ठाप्य तदुपरिपूर्णपात्रेसाष्टदलवस्त्रेमघा देवतापितृनावाहयेत् ॥ तत्रमंत्रः ॥ संविशंत्विहपितरःस्वानःस्यानकृण्वंतःप्रतिरंतआयुः ॥ तेभ्यःशकेमहविषानक्षमाणा ज्योग्जिवंतःशरदःपुरूचिः ॥ इतिमंत्रेणपितृन्संस्थाप्य ॥ ॐभूर्भुवःस्वर्जनदेपितृभ्योनमः पितृन्नावाहयामि ॥ ततः

पूर्वोक्तरीत्यापुरुषसूक्तेनशोडषोपचारः ॥ अनयापूजयाश्रीनक्षत्राधीशः प्रीयतांनममेतिवदेत् ॥ ततःस्थंडिलेऽग्निंस्थाप यित्वातदीशान्यांसकलाशान्गृहान्संस्थाप्य तदीशान्यांद्वितीयंकलशं तदुपरियेपश्चाज्जुह्वतीतिमंत्रेणवरुणंसंस्थाप्यसंपूज्य तत्रऋत्विजमुपवेश्यतेनशांतिकलशोक्त प्रकारेणशांतिपाठंकारयेत् ॥ ततोभ्याधानादिपूर्वतंत्रावाघारावाज्यभागौकृत्वा ग्रहमखप्रकरणोक्तप्रकारेण गृहाणांहोमः ॥ ततःप्रधानहोमंकृत्वा प्रत्नोहोतिउदकुंभसंपातपूर्वकं कलशेसंपातान्दत्वा ॥ स्थापितदेवतानांपुनःपूजनंदिक्पालेभ्यो प्रतिदिशंबलिंदत्वा पूर्णाहुतिःकार्या ॥ अभ्याधानाद्युत्तरतंत्रंकृत्वाकलशोदकैः सऋत्विगाचार्योपूर्वोक्तमंत्रैरभिशेकंकुर्यात् ॥ अभिशेकानंतरंविभूतिं कृत्वाज्येमुखंविलोक्यदेवान् विसृज्यश्रेयोग्रहणं दक्षिणादानंप्रतिमादि सर्वोपहारमाचार्यायदत्वा यथाशक्तिब्राह्मणान् सदन्नेनभोजयीत्वान्येभ्यो भूयसींदत्वाशांता द्यौरितिशांतिसूक्तंजप्त्वा यस्मात्कोशेतिपठित्वाकृतं कर्मेश्वरार्पणंकुर्यात् ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौषट् पन्नागरद्विवेदि रविशंकरकृतेमघाजननशांतिप्रयोगरश्मिरेकपंचाशत् ॥ ५१ ॥ ॥ श्रीदक्षिणकालिकार्पणमस्तु ॥

॥ अथविशाखानक्षत्रजननशांतिप्रयोगरश्मिः ॥ विशाखाचतुर्थपादजननेदेवरनाशादि दुष्टफलोक्तेर्गृहमख पूर्विकाशांतिकार्या ॥ आद्यपादत्रयेषुदोषाभावात्नशांत्यादिकं ॥ ॥ अथप्रयोगः ॥ देशकालावुच्चार्यअस्यशिशोः विशाखातुर्यपादजननसूचित सकलारिष्टनिरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थंसग्रहमखांशांतिंकरिष्य इतिसंकल्प्य गणेश पूजादिसर्वंपूर्ववत्कार्यम् ॥ नक्षत्रप्रतिमानामग्न्युत्तारणपूर्वकंस्थापनं ॥ ततोग्रहहोमप्रधानहोमश्चाभिशेकादिकंसर्वंपूर्व दिति ॥ प्रतिमालक्षणमुक्तं ॥ ताम्रस्फटिकरक्तचंदनसुवर्णरजत लोहसीसंकांस्यमितिनवद्रव्याणिसुवर्णमेकमेववासर्वेषा मिति ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौ षट्पन्नागर द्विजातिरविशंकरकृतेविशाखाजनन शांतिप्रयोगरश्मि र्द्विपंचाशत् ॥ ५२ ॥

॥ अथव्यतिपातवैधृतसंक्रांतिजननशांति प्रयोगरश्मिः ॥ कुमारजन्मकालेतुव्यतिपातश्चवैधृतिः ॥ संक्रमण स्यरवेस्तत्रजातोदारिद्र्यकारकः ॥ अनित्यंमृत्युमाप्नोतिनात्रकार्याविचारणा ॥ स्त्रीणांचशोकदुःखंचसर्वनाशकरोभवेत् ॥

संक्रमणशब्देनसंक्रमणकालात्पूर्वाः पराश्चषोडशघटिकाग्राह्यंते ॥ द्वात्रिंशद्दंडैःसंपूर्णसूर्यमंडलस्यराश्यंतरप्रवेशात् ॥ इति शांतिसारेस्पष्टम् ॥ गोमुखप्रसवंकुर्याच्छांतिंचसनवग्रहाम् ॥ ॥ अथप्रयोगः ॥ उक्तकालेगोमुखप्रसवंकृत्वादेशकालौ संकीर्त्यअस्यशिशोः व्यतीपातजन्मसंसूचितसर्वारिष्ट परिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं सग्रहमखांशौनकोक्तांव्यतीपात जननशांतिंकरिष्ये ॥ तदंगगणपतिपूजनपूर्वकं स्वस्तिपुण्याहवाचनं नांदिश्राद्धंआचार्यऋत्विग्वरणंचकरिष्ये ॥ अथ संक्रांतिदिनेजननेसंकल्पः ॥ अस्यशिशोःसंक्रांतिपर्वनाडीमध्ये जननसूचितसकलारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं सग्रहमखांशौनकोक्तांशांतिंकरिष्ये ॥ तदंगगणपतिपूजनादिपूर्ववत् ॥ अथत्राएकदिनेव्यतीपातसंक्रमणसत्वेतुतंत्रेणै कैवशांतिःकर्तव्या ॥ अत्रपूजाहोमादेःप्रसंगात्सिद्धिः ॥ द्विगुणोत्रप्रधानहोमइतिभाति ॥ तत्रसंकल्पेविशेषः ॥ अस्य कुमारस्यव्यतीपात संक्रांत्योर्जननसूचितसर्वारिष्ट परिहारद्वाराश्रीप्रीत्यर्थंसग्रहमखां शौनकोक्तांव्यतीपातसंक्रांतिशांतिं तंत्रेणकरिष्ये ॥ तदंगगणपतिपूजनादिकंपूर्ववत् ॥ ततःवृताचार्यंगंधादिनासंपूज्य तस्मैपट्टवस्त्रयुगंकुंडलयुगमंगुलीयकंच दद्यात् ॥ ततआचार्योयदत्रसंस्थितमिति सर्षपविकीरणंपंचगव्येन आपोहिष्ठेत्यद्भिश्चग्रहपूर्वदिग्भागं प्रोक्ष्यस्वस्त्ययनंत्य सूक्तमितिमंत्रौप्रार्थ्य ॥ तत्रगोमयलिप्तेरंगवल्लिभिरलं कृतेसनेदेशेपूर्वोक्तशांतिक्रमरीत्या कलशस्थापनादिकृत्वा ॥ पंच द्रोणपरिमितंव्रीहिराशिंकृत्वा तदुपरिसार्द्धद्रोणद्वयमित तंदुलराशिंतदुपरिसपादद्रोणमितं तिलराशिंकृत्वा तत्राष्टदलंच कृत्वा तत्राव्रणकुंभंस्थापयेत् ॥ इतिक्रमः ॥ तत्रकलशेसर्वौषध्यादिपंचरत्नांतानि पूर्वोक्तानिवस्तूनितत्तन्मंत्रैर्निक्षिप्य वस्त्रयुग्मेनावेष्ट्यतदुपरिसूक्ष्मवस्त्रयुतपूर्णपात्रंनिधाय तदुपरिनिष्कंतदर्द्धंतदर्धान्यतरपरिमितहेमनिर्मित सूर्यप्रतिमांनिधाय तत्रसूर्यावाहनादिउपचारैःसंपूजयेत् । तद्यथा ॥ व्याहृतीनांपरमेष्ठीप्रजापतीर्बृहती ॥ विषासहिप्रथर्वादित्योजगती आदित्यस्थापनेविनियोगः ॥ ॐभूर्भुवःस्वर्जनदों ॐविषासहिंसहमानं सासहानंसहीयांसं ॥ सहमानंसहोजितंस्वर्जितं गोजितंसंधनाजितं ईड्यन्नामवइन्द्रमायुष्मान्भूयासं ॥ १॥ ॐभूर्भुवःस्वर्जनदोंसूर्यायनमः सूर्यआवाहयामि ॥ तद्दक्षिणे अग्नेमन्वेतित्रह्माग्निःत्रिष्टुप् अग्निस्थापनेविनियोगः ॥ ॐअग्नेमन्वेप्रथमस्वप्रचेतसः पांचजन्यस्यबहुधायमिंधते ॥

विशोविशःप्रविशिवांसमीमहेसनोमुंचत्वंहसः ॥ ॐभू० अग्निंआवाहयामि ॥ २ ॥ उत्तरेधातादधात्वंगिराइशानो गायत्रीइशानस्थापनेविनियोगः ॥ ॐधाताददातुनोरयिमिशानोजगंतस्पतिः ॥ सनःपूर्णेनयच्छतुरुद्रंआवाहयामि ॥ ३॥ संक्रमणशांतिपृथक्करणपक्षेपिप्रधानदेवता सूर्यंतद्दक्षिणेग्निंउत्तरेरुद्रमितिदेवतात्रयमावाह्यसंपूज्य ॥ ॐभूर्भुवःस्वर्जनदों सूर्याद्यावाहित देवताभ्योनमः आसनंपाद्यमर्घ्यं माचमनीयंस्नानं वस्त्रयुग्मंयज्ञोपवीतंगंधंअक्षतपुष्पधूपदीप नैवेद्यतांबूल दक्षिणाःसमर्प्य पुष्पांजलींअंतेप्रार्थनापूर्वकंनमस्कारानकृत्वा ॥ अनयापूजयाश्रीसूर्याद्यावाहितदेवताःप्रीयंतामितिपूजा निवेदनं ॥ ततःएकऋत्विजसूर्यप्रतिमांस्पृशन् सर्वसौरमंत्रानजपेत् ॥ ॐउदस्यकेतवइतिसूर्यसूक्तस्यकण्वपुत्रःप्रष्कण्वो अनुष्टुबादिनानाछंदांसिजपेविनियोगः ॥ अथसूर्यसूक्तप्रारंभः ॥ ॐउदस्यकेतवोदिविशुक्राभ्राजंतईरते ॥ आदित्य स्यंनृचक्षसोमहिव्रतस्यमीढुषः ॥ दिशांप्रज्ञानांस्वरयंतमर्चिषासुपक्षमाशुंपतयंतमर्णवे ॥ स्तवामसूर्यंभुवनस्यगोपांयोरश्मि भिर्दिशआभातिसर्वाः ॥ २ ॥ यत्प्राङ्प्रत्यङ्स्वधयायासिशीभंनानारूपेअहनिकर्षिमायया ॥ तदादित्यमहितत्तेमहि श्रवोयदेकोविश्वंभूरिभूमजायसे ॥ ३ ॥ विपश्चितंतरणिंभ्राजमानंवहंतियंहरितःसप्तबह्वीः॥ स्रुताद्यमत्रिर्दिवमुन्निनाय तंत्वापश्यंतिपरियांतमाजिम् ॥ ४ ॥ मात्वादभन्परियांतमार्जि स्वस्तिदुर्गाअतियाहिशीभं ॥ दिवंचसूर्यपृथिवींचदेवी महोरात्रेविमिमानोयदेषि ॥ ५ ॥ स्वस्तितेसूर्यचरसेरथाययेनोभावंतौपरियासिसद्यः ॥ यंतेवहंतिहरितोवहिष्ठाः शतमश्वायदिवासप्तबह्वीः ॥ ६ ॥ सुखंसूर्यरथमंशुमंतंस्योनंसुवन्हिमधितिष्ठवाजिनं ॥ यंतेवहंतिहरितोवहिष्ठाः शत मश्वायदिवासप्तबह्वीः ॥ ७ ॥ सप्तसूर्योहरितोयातवेरथेहिरण्यत्वचसोबृहतिरयुक्त ॥ अमोचिशुक्रोरजसःपरस्ताद्विधूय देवस्तमोदिवमारुहत् ॥ ८ ॥ उकेतुनाबृहतादेवआगन्नपावृक्तमोत्रिज्योतिःरश्रैत् ॥ दिव्यःसुपर्णसवीरोव्यरूयददितेः पुत्रोभुवनानिविश्वा ॥ ९ ॥ उद्यन्रश्मीनातनुषेविश्वारूपाणिपुष्यसि ॥ उभासमुद्रौक्रतुनाविभासिसर्वाल्लोकान्परिभूर्भ्रा

जंमानः ॥ १० ॥ ॥ पूर्वापरंचरंतोमाययैतौशिशूक्रीडंतौपरियातोर्णवं ॥ विश्वान्योभुवनाविचष्टेहैरण्यैरन्यंहरितोवहंति
॥१॥ दिषित्वात्रिंरधारयत्सूर्यामासायकर्त्तवे ॥ सएंषिसुधृतस्तपन्विश्वाभूतावचाकशत् ॥ २ ॥ उभावंतौसमर्पसिवत्सः
संमातरांविय ॥ नत्वेइंतदितः पुराब्रह्मदेवाअमीविदुः ॥ ३ ॥ यत्समुद्रमनुश्रितंतत्सिषासतिसूर्यः ॥ अध्वास्यवितंतो
महान्पूर्वश्चापरश्चयः ॥ ४ ॥ तंसमाप्नोतिजूतिभिस्ततोनापचिकित्सतितंनामृतंस्यभक्षंदेवानांनावरुंधते ॥ ५ ॥ उदुत्यं
जातवेदसंदेवंवहंतिकेतवः ॥ दृशेविश्वायसूर्यं ॥ ६ ॥ अपत्येतायवोयथानक्षत्रायंत्यक्तुभिः ॥ सुरायविश्वचंक्षसे ॥७॥
अदृश्रन्नस्यकेतवोविरश्मयोजनांअनु ॥ भ्राजंतोअग्नयोयथ। ॥ ८ ॥ तरणिर्विश्वदर्शतोज्योतिः कृदसिसूर्य ॥ विश्वमा
भासिरोचनं ॥ ९ ॥ प्रत्यङ्देवानांविशः प्रत्यङ्देषिमानुषीः ॥ प्रत्यङ्विश्वंस्वर्दृशे ॥ १० ॥ ॥ येनापावकचक्षसा
भुरण्यंतंजनांअनु ॥ त्वंवरुणपश्यसि ॥ १ ॥ विद्यामेषिरजस्पृथ्यमानोअक्तुभिः ॥ पश्यन्जन्मानिसूर्य ॥ २ ॥ सप्तत्वा
हरितोरथेवहंतिदेवसूर्य ॥ शोचिःषकेशंविचंक्षणम् ॥३॥ अयुंक्तसप्तशुंध्युवःसूरोरथस्यनप्त्यः ॥ ताभिर्यातिस्वयुक्तिभिः
॥४॥ रोहितोदेवमारुहन्तपसातपस्वी ॥ सयोनिमैतिसउंजायतेपुनः ॥ सदेवानामधिपतिर्बभूव ॥ ५ ॥ योविश्वचर्षणी
रुतविश्वतोमुखोयोविश्व तस्पाणिरुतविश्वथस्पृथः ॥ संबाहुभ्यांभरतिसंपतत्रैर्द्यावापृथिवीजयन्देवएकः ॥ ६ ॥ एकं
पाद्विपंदोभूयोविचंक्रमेद्विपात्त्रिपाधमभ्येतिपश्चात् ॥ द्विपाद्धषटपदोभूयोविचंक्रमेतएकंपदस्तन्वं१समासते ॥ ७ ॥
अतंद्रोयास्यन्हरितोयदास्थाद्वेरूपेकृणुतेरोचंमानः ॥ केतुमानुद्यन्त्सहमानोरजांसिविश्वांआदित्यप्रवतोविभासि ॥ ८ ॥
त्वण्महांअसिसूर्यबडांदित्यमहांअसि ॥ महांस्तेमहतोमहिमात्वमादित्यमहांअसि ॥ ९ ॥ रोचंसेदिविरोचंसेअंतरिक्षे
पतंगपृथिव्योरोचंसेरोचंसेअप्स्वं१तः ॥ उभासमुद्रौरुच्याव्यापिपदेवोदेवासिमहिषःस्वर्जित् ॥ १० ॥ ॥ अर्वाङ्म

रस्तात्प्रयंतोव्यध्व आसुर्विषश्चित्पतयन्पतंगः ॥ विष्णुर्विचितःशवसाधितिष्ठन्प्रकेतुनासहतेविश्वमेजंत ॥ १ ॥ चित्रश्चि
कित्वान्महिषः सुपर्णआरोचयंरोदसीअंतरिक्षं ॥ अहोरात्रेपरिसूर्यंवसानेप्रास्यविश्वातिरतोवीर्याणि ॥ २ ॥ तिग्मोवि
भ्राजत्तन्वं३शिशानोरंगमासःप्रवतोररांणः ॥ ज्योतिष्मान्पक्षीमहिषोवयोधाविश्वाआस्थात्प्रदिशःकल्पमानः ॥ ३ ॥
चित्रंदेवानांकेतुरनीकंज्योतिष्मान्प्रदिशः सूर्यउद्यन् ॥ दिवाकरोतिद्युम्नैस्तमांसिविश्वातारीदुरितानि शुक्रः ॥४ ॥ चित्रं
देवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवीअंतरिक्षंसूर्यआत्माजगतस्तस्थुषश्च ॥ ५ ॥ उच्चापतंत
मरुणंसुपर्णंमध्येदिविस्तरणींभ्राजमानं ॥ पश्यामत्वासवितारंयमाहुरजस्त्रंज्योतिर्यदविंददत्रिः ॥६॥ दिवस्पृष्ठेधावमानं
सुपर्णमादित्याःपुत्रंनाथकामउपयामिभीतः ॥ सनःसूर्यप्रतिरदीर्घमायुर्मारिषामसुमतौतेस्याम ॥७॥ सहस्राण्यंवियता
वस्यपक्षौहरेर्हंसस्यपततस्स्वर्गम् ॥ सदेवांत्सर्वानुरस्युपदद्यसंपश्यंयातिभुवनानिविश्वा ॥ ८ ॥ रोहितःकालोअभवद्रोहि
तोग्रेप्रजापतिः ॥ रोहितोयज्ञानांमुखंरोहितस्स्वंराभरत् ॥ ९ ॥ रोहितोलोकोअभवद्रोहितोत्यंतपद्दिवम् ॥ रोहितो
रश्मिभिर्भूमिंसमुद्रमनुसंचरत् ॥१०॥ सर्वादिशःसमंचरद्रोहितोधिपतिर्दिवः ॥ दिवंसमुद्रमादूभूमिंसर्वंभूतंविरक्षति ॥१॥
आरोहन्छुक्रोबृहतीरतंद्रोद्वेरूपेकृणुतेरोचंमानः ॥ चित्रश्चिकित्वान्महिषोवातमायायावतो लोकानभियद्विभाति ॥ २ ॥
अभ्यं१न्यदेतिपर्यन्यदस्यतेहोरात्राभ्यांमहिषःकल्पमानः ॥ सूर्यंवयंरजसिक्षियंतंगातुविदंहवामहेनाधमानाः ॥ ३ ॥
पृथिवींप्रोमहिषोनाधमानस्यगातुरदब्धचक्षुः परिविश्वंबभूव ॥ विश्वंसंपश्यन्सुविदत्रोयजत्रइदंशृणोतुयदहंब्रवीमि ॥४॥
पर्यस्यमहिमापृथिवींसमुद्रंज्योतिषाविभ्राजन्परिद्यामंतरिक्षं ॥ सर्वंसंपश्यत्सुविदत्रोयजत्रइदंशृणोतुयदहंब्रवीमि ॥५॥
अबोध्यग्निःसमिधाजनानांप्रतिधेनुमिवायतीमुषासं ॥ यह्वाइवप्रवयामुज्जिहानाःप्रभानवः सिस्रतेनाकमच्छ ॥६॥ इति

सूर्यसूक्तंपठेत् ॥ ततोएकऋत्विक्रुद्रप्रतिमांस्पृशन् मृत्युंजयमंत्रमष्टोत्तरशतमष्टाविंशतिवारंवाजपेत् ॥ ततश्चत्वारऋत्विज
श्चतुर्दिक्षुकुंभंस्पृष्ट्वा पूर्वोक्तक्रमेणसूक्तानिजपेयुः ॥ तत्रापिपूर्वमनुक्तत्वादग्निसूक्तंलिख्यते ॥ ॐ अग्नाविष्णुमहितद्वां
महित्वंपाथोघृतस्यगुह्यस्यनाम ॥ दमेदमेसप्तरत्नादधानौप्रतिवांजिह्वाघृतमाचरण्यात् ॥ १ ॥ अग्नाविष्णुमहिधामप्रियं
वांवीथोघृतस्यगुह्यांजुषाणौ ॥ दमेदमेसुष्टुत्यावावृधानौप्रतिवांजिह्वाघृतमुच्चरण्यात् ॥२॥ स्वाक्तंमेद्यावापृथिवीस्वाक्तं
मित्रोअंकरयम् ॥ स्वाक्तंमेब्रह्मणस्पतिः स्वाक्तंसविताकरत् ॥ ३ ॥ इंद्रोतिभिर्बहुलाभिर्नोअद्ययाच्छ्रेष्ठाभिर्मघव
छूरजिन्व ॥ योनोद्वेष्टयधरःसस्पदीष्टयमुद्विष्मस्तमुप्राणोजहातु ॥ ४ ॥ उपप्रियंपनिप्नतंयुवानमाहुतीवृधं अगन्मबिभ्रतो
नमोदीर्घमायुःकृणोतुमे ॥ संमासिंचंतुमरुतःसंपूषासंबृहस्पतिः ॥ संमायमग्निःसिंचतुप्रजयाचधनेनचदीर्घमायुःकृणो
तुमे ॥५॥ इत्यग्निसूक्तं ॥ ततःपूर्वोक्तशांतिक्रमरीत्यासूक्तानिजपित्वा ॥ ततःकुंभपश्चिमदेशेऽग्निस्थंडिलेस्वगृह्योक्त
विधिनाप्रतिष्ठाप्य ॥ कुंभस्योत्तरतोग्रहणामावाहनादिपूजांकृत्वा तदीशान्यांकलशेवरुणंसंपूज्य तत्रएकंब्राह्मणंशांति
पाठजपार्थंवृणुयात् ॥ ततोग्नेपश्चिमतःउपविश्यअभ्यात्तानादिपूर्वतंत्रंप्रत्नो हीत्युदकुंभंसंपात्याभिमंत्र्य उक्तरीत्याग्रहहोमं
कृत्वा सूर्यमष्टोत्तरशतचर्वादिद्रव्यैरग्निरुद्राभ्या मष्टाविंशतिमिश्रवार्युक्त द्रव्यैर्होमःकार्यः ॥ त्र्यंबकमंत्रेणअष्टोत्तरशत
होमश्च ॥ होमांतेस्थापितदेवतानांपंचोपचारैःपूजनं ततःचरुतिलाज्यद्रव्येणास्विष्टकृतंहुत्वा ॥ ततःप्रायश्चित्ताहुत्यंते
बलिदानं ॥ ततःपूर्णाहुतिः ॥ अग्न्यर्चनांतेधृतनूतनवस्त्रयोर्दंपत्योःसबालयोः अभिशेकःपूर्वोक्तशांत्युक्तरीत्याकार्यः ॥
ततःवासःआचार्याय समर्प्यसपत्नीकःश्वेतवस्त्र चंदनादिधृत्वा भूषणमालादिनालंकृतः आज्यावलोकनंकृत्वा तत्पात्र
सदक्षिणंब्राह्मणायदत्वा त्र्यायुषमितिविभूतिंधृत्वास्थापितदेवतानां उत्तरपूजनांतेदेवतांविसृज्य ततःश्रेयोग्रहणंमूर्त्तिदानं
चकृत्वा ततोवस्त्रहेमांगुलीयकैराचार्यंसंपूज्य ॥ व्यतीपातजननदोषशांत्यर्थं गोवस्त्रस्वर्णानितुभ्यंसंप्रददे इतिआचार्याय
तानिदत्वा दीनांधकृपणेभ्योभूयसींदत्वा तदर्थंप्रच्छादनपटंतथैवदद्यात् ॥ ऋत्विग्भ्योयथाशक्तिदक्षिणांदत्वाशतंब्राह्मणान्

ऋत्विग्भिः सहमिष्टान्नैभोजयित्वा शांताद्यौरितिशांतिसूक्तंपठित्वा यस्मात्कोशेतिकर्म समापणीयमंत्रंजप्त्वा कर्मपूर्णतां
वाचयीत्वा कृतंकर्मेश्वरार्पणंकुर्यादितिकर्मणानेनभगवान् कर्मरूपीप्रीयतांनमम ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौ
षट्पन्नागर द्विवेदिरविशंकरकृते व्यतीपातसंक्रमणशांतिप्रयोगरश्मिः त्रिपंचाशत् ॥५३॥

॥ अथकालिकायैनमः ॥ ।. अथवैधृतिशांतिप्रयोगरश्मिः ॥ उक्तकालेगोससवंकृत्वा देशकालौसंकीर्त्य
अस्यशिशोःकुमार्यावा वैधृतौजननसूचितसकलारिष्ट परिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थं सग्रहमखांशौनकोक्तांवैधृतिजनन
शांतिंकरिष्ये ॥ तदंगगणपतिपूजनपूर्वकं स्वस्तिपुण्याहवाचनं मातृकापूजनंनांदीश्राद्धंआचार्य ऋत्विग्वरणंचकरिष्ये ॥
एतानिपूर्ववत्कृत्वा ॥ ब्रह्मजज्ञानंअव्यसश्चेतिपठित्वा वृताचार्यःसर्षपविकीरणादिप्रार्थनांते गोमयोपलिप्तभूमौपंचद्रोण
परिमितव्रीहिराशिं कृत्वातंसमंकृत्वा तदुपरिसार्द्धद्रय परिमितद्रोणराशिंतंदुलेनकृत्वा तदुपरिसपादद्रोणपरिमिततिल
राशिंकृत्वा तत्राष्टदलेकुंभंविधिनाप्रतिष्ठाप्य तन्मध्येपंचगव्यमंत्रैः पंचगव्यंक्षिपेत् ॥ कलशोपरिपूर्णपात्रेसाष्टदलवस्त्र
हेमनिर्मितप्रतिमात्रयंसंस्थाप्य ॥ तद्यथा ॥ सव्याहृरिकरुद्रमंत्रेणमध्येरुद्रमावाह्य तद्दक्षिणेसूर्यमंत्रेणसूर्यमावाह्य उत्तरतःसोम
मंत्रेणसोममावाह्य॥ देवतात्रयंशोडषोपचारैःसंपूज्य ॥ ततोरुद्रप्रतिमांस्पृष्ट्वामृत्युंजयमंत्रेण अष्टोत्तरशतंजपः ॥ सूर्यप्रतिमां
स्पृष्ट्वासर्वंसौरजपः न ततःसोमप्रतिमांस्पृष्ट्वाशकधूममितिमंत्रेणाष्टोत्तरशतंजपः ॥ अथस्थंडिलेऽग्निंप्रतिष्ठाप्यतदीशांन्यां
ग्रहपीठदेवतामावाह्य तदीशांन्यांकलशेवरुणंसंपूज्य ततःअभ्यात्तानादिपूर्वतंत्रंहोमं॥ प्रत्नोहीत्युदकुंभसंपातश्च ॥ कृत्वा॥
ग्रहपीठदेवताहोमंकृत्वा ॥ ततःप्रधानहोमः ॥ अत्रप्रधानंरुद्रंप्रत्येक मष्टोत्तरशतसंख्याकाभिः समिच्चर्वाज्याहुतिभिः ॥
सूर्यसोमंचप्रत्येकमष्टाविंशति संख्याभिस्तदाहुतिभिः ॥ मृत्युंजयंत्र्यंबकमंत्रेणाष्टोत्तरशतसंख्याकाभिस्तिलाहुतिभिर्हुत्वा॥
होमांतेस्थापितदेवतानांपंचोपचारैःपूजनं ॥ चरुतिलाज्यद्रव्येणस्विष्टकृतंहुत्वा ततःप्रायश्चित्तहोमांते बलिदानं ततः
पूर्णाहुतिः ॥ ततःअग्न्यर्चनांतेअभ्यात्तानाद्युत्तरतंत्रंसर्वंविधाय ॥ ततःदंपत्योःसबालयोरभिषेकः ॥ तत्रमंत्राः ॥ पूर्वोक्त
प्रकारेणरुद्रसूक्तेनसूर्यसूक्तेन ततःसोमसूक्तेनवरुणसूक्तेनअभिशेकः कार्यः ॥ अभिशेकेसर्वत्रमौंजीबंधनमितिज्ञेयं ॥ तत्र

सोमसूक्तस्यानुक्तत्वादत्रलिख्यते ॥ अथसोमसूक्तम् ॥ ॐशकधूमंनक्षत्राणि यद्राजानमकुर्वत ॥ भद्राहमस्मैप्रायंछनिदं राष्ट्रमसादिति ॥ १ ॥ भद्राहन्नोमध्यंदिने भद्राहंसायमस्तुनः ॥ भद्राहन्नोअह्नांप्रातरात्रीभद्राहमस्तुनः ॥ २ ॥ अहोरात्राभ्यांनक्षत्रेभ्यःसूर्याचंद्रमसाभ्याम् ॥ भद्राहमस्मभ्यं राजन्छकधूमत्वंकृधि ॥ ३ ॥ योनोभद्राहमकरःसायंनक्तमथोदिवा ॥ तस्मैतेनक्षत्रराजशकधूमसदानमः ॥ ४ ॥ इतिसोमसूक्तं ॥ सुरास्त्वेत्यादिपौराणमंत्रैश्चाभिषिंचेयुः ॥ ततो यजमानोरूपंरूपमितिमंत्रेणाज्यावलोकनंकृत्वा तत्पात्रंसदक्षिणंद्विजाय दत्वात्र्यायुषमितिविभूतिधारणंकृत्वा प्रतिमानामुत्तरपूजांतेविसर्जनंकृत्वा ततोश्रेयोग्रहणंआचार्यहस्तेसोपस्कर प्रतिमात्रयदानंकृत्वा आचार्यायवस्त्रद्वयंदत्वा गांहेमांगुलीयकादिसुवर्णप्रछादनपटंचदत्वा ॥ ऋत्विग्भ्यश्चदक्षिणांदत्वा ॥ शतंब्राह्मणान्ऋत्विग्भ्यश्चभोजयेत् ॥ शांताद्यौरिति शांतिपाठंकृत्वा यस्मात्कोशेतिजप्त्वा ॥ कृतंकर्मार्पणमीश्वरायेतिवदेत् ॥ संक्रांतिदिनेवैधृतिसत्वेदेवताभेदाशांतिद्वयं पृथक्कार्यमिति ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोग भानौषदुपन्नागर द्विवेदिरविशंकरकृते वैधृतीशांतिप्रयोगरश्मिश्चतुःपंचाशत् ॥ ५४ ॥

॥ अंबायैनमः ॥ ॥ अथैकनक्षत्रजननशांतिप्रयोगरश्मिः ॥ ॥ एकस्मिन्नेवनक्षत्रेभ्रात्रोर्वापितृपुत्रयोः ॥ प्रसूतिश्चोभयोर्मृत्युभयो एकस्यनिश्चितः ॥ पितृनक्षत्रेमातृनक्षत्रेवाकन्यायापुत्रस्य वोत्पत्तौगोमुखप्रसवरहित शांतिमात्रंकार्यं ॥ अथप्रयोगः ॥ देशकालौसंकीर्त्य ॥ ब्रह्मजज्ञानंअव्यसश्चेति यथासंभवंपठित्वा ॥ अस्यशिशोःपित्रैकनक्षत्रोत्पत्ति सूचितसर्वारिष्टपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थं एकनक्षत्रजननशांतिंकरिष्ये ॥ एवंमात्रादिनक्षत्रोत्पत्तौ संकल्पे तथोहःतवादौनिर्विघ्नतासिध्यर्थं गणपतिपूजनपूर्वकं स्वस्तिपुण्याहवाचनं मातृकापूजनं नांदिश्राद्धंआचार्य ऋत्विग्वरणं चकरिष्ये इतिसंकल्प्य ॥ एतानिकृत्वा ॥ अत्रनांदीश्राद्धमावश्यकम् ॥ इतिमयूखेस्पष्टं ॥ अन्यमतेनावश्यकं ॥ अत्रग्रहमखोनावश्यकः ॥ ततःआचार्योयदत्रसंस्थितमितिसर्षपविकीरणं पंचगव्येनभूमिप्रोक्षणप्रार्थनानिचकृत्वा ॥ ततः

स्थंडिलादीशांन्यांअष्टदले परिविधिनाकलशंसंस्थाप्य तत्ररक्तवस्त्रेयस्मिन्नक्षत्रे जन्मतन्नक्षत्रप्रतिमांचित्राणि साकमिति सूक्तेनतन्नक्षत्रदेवताप्रतिमांबापूजयेत् ॥ वस्त्रार्पणकालेवस्त्रद्वयंसमर्पयेत् ॥ ततोग्निस्थंडिलेप्रतिष्ठाप्य ॥ इछाचेद्ग्रहपीठ देवतास्थापनंअथवाप्रथक्स्थापनम् ॥ अभ्यात्तानादिपूर्वतंत्रंपरिसमाप्य॥ पन्नोहीतिसूक्तेनाज्यहोमउदकुंभसंपातश्चकार्यः॥ एवंनक्षत्रदेवतानक्षत्राणिचचर्वादिद्रव्यैः प्रतिदैवतमष्टोत्तरशतंचित्राणी साकमितिसूक्तेनहोमंकृत्वा ॥ स्विष्टकृदादिप्राय-श्चित्तहोमांतेग्रहस्थापनपक्षे बलिदानंचकृत्वा ॥ अकृतपक्षेवलिदानाभावः ॥ अस्मिन्पक्षेसुवर्णप्रतिमायां विष्णुरौप्यप्रतिमायांरुद्रंचसंपूज्य ॥ आचार्यायान्यस्मैवासदक्षिणांदत्वा ॥ देशकालौसंकीर्त्य ॥ अस्यशिशोःपित्रैकनक्षत्रोत्पत्तिसूचित सकलारिष्ट परिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थं ब्राह्मणायहरिहरमूर्त्तिदानंकरिष्ये ॥ तदंगब्राह्मणवरणंतत्पूजनंचकरिष्ये ॥ द्विजंसंपूज्य ॥ स्वस्त्यस्तुइत्यादिवाक्यान्पठेत् ॥ दानवाक्यं ॥ त्रिविधस्यास्यविश्वस्य पितरौविश्वतोमुखौ ॥ प्रीयेतांमूर्त्तिदानेनदेवौहरिहरावुभौ ॥ इमेमूर्त्तीदक्षिणा सहितेएकनक्षत्रजननारिष्ट परिहारार्थंअमुकशर्मणेब्राह्मणाय तुभ्यमहंसंप्रददे तेनहरिहरप्रतिमाद्वय दानेनभगवान्कर्मांगरूपींपरमेश्वरःप्रीयतांनमम ॥ ततःदानांतेपूर्णाहुतिहोमः ॥ तातोभ्यात्तानाद्युत्तरतंत्रंपरिसमाप्य अग्न्यर्चनांतेआचार्यः कलशोदकेनययोरेकनक्षत्रे जन्मतयोरभिषेकःपूर्वोक्तरीत्या अभिषेकंकृत्वा ॥ ततोविभूतिंधृत्वा ॥ नक्षत्रेदेवताःसंपूज्यविसृज्यश्रेयोग्रहणंकृत्वा ॥ आचार्यायप्रतिमादानंगोवस्त्रालंकार दानंच यथासंभवंकृत्वा माषत्रयपरिमितं सुवर्णंऋत्विग्भ्योदत्वा ॥ ततोधान्यवस्त्रादिभिःसहयान शय्यासनादीनांब्राह्मणांतरेभ्योदानंदत्वा न्येभ्योभूयसींदत्वा ॥ तैःसहाचार्यर्त्विजोभोजयित्वा ॥ पूर्णतांवाचयित्वाशांताद्यौरितिशांतिपाठं कृत्वा यस्मात्कोशेतिकृतं कर्मेश्वरार्पणंकुर्यादिति ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौषदुपन्नागरद्विवेदि रविशंकरकृतेएकनक्षत्रजननशांतिप्रयोगरश्मिःपंचपंचाशत् ॥ ५५ ॥

॥ ॐश्रीमन्महाकालिकायैनमः ॥ ॥ अथग्रहणशांतिप्रयोगरश्मिः ॥ ग्रहणेसूर्यचंद्रस्यप्रसूतिर्यदिजायते ॥ इत्थंसंजायतेयस्तु तस्यमृत्युर्नसंशयः ॥ व्याधिपीडाचदारिद्र्यंशोकश्चकलहोभवेत् ॥ अत्रगोमुखप्रसवःकार्यइतिभाति ॥

ग्रहमखस्तुकृताकृतः ॥ अथप्रयोगः ॥ सूर्यग्रहणप्रसूतौ तत्कालस्थितनक्षत्रस्यनक्षत्रदेवतायाप्रतिमां सूर्यस्यचयथाशक्ति
हेम्नाप्रतिमेविधायराहोः सीसेननागाकृतिंकृत्वा ॥ शौचांतेदेशकालौसंकीर्त्य ममभार्यायाःसूर्यग्रहणकालीनप्रसूतिसूचित
सर्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीतयेसग्रहमखांशांतिंकरिष्ये ॥ तदंगगणपतिपूजनपूर्वकंस्वस्तिपुण्याहवाचनं मातृका
पूजनंनांदिश्राद्धमाचार्यवरणंचकरिष्ये ॥ इतिसंकल्प्य ॥ ततःआचार्योब्रह्मजज्ञानं अव्यसश्चेतियथाकालंपठित्वा यदत्र
संस्थितमितिसर्षपविकीरणं पंचगव्यशुद्धोदकाभ्यां भूमिप्रोक्षणंप्रार्थनांते शुचिदेशेगोमयोपलिप्त भूमौअष्टदलेनवंसदशं
क्षालितंश्वेतवस्त्रंप्रसार्य तत्रमध्येसूर्यप्रतिमांसूर्यमंत्रेण अग्न्युत्तारणपूर्वकंप्रतिष्ठाप्य ॥ तद्दक्षिणेनागाकृतिराहुप्रतिमायांराहुं
मंत्रेणराहुंसंस्थाप्य ॥ ततःसूर्यस्योत्तरतःनक्षत्रदेवतांतन्मंत्रैर्नाममंत्रैर्वापूजयेत् ॥ नात्रकलशस्थापनादि ॥ पूजाकाले
सूर्यरक्तवर्णैर्वस्त्रगंधाक्षतपुष्पैःपूजयेत ॥ कृष्णगंधाक्षतपुष्पैःराहुंपूजयेत् ॥ ततोस्थंडिलेऽग्निंप्रतिष्ठाप्य तदीशान्यांग्रहपीठ
देवतांचसंस्थाप्य ॥ तदीशान्यांकलशेवरुणंसंपूज्य अभ्यात्तानादिपूर्वतंत्रंप्रत्नोहोहीत्युदकुंभंसंस्पात्याभि मंत्र्यत्यागंचतत्र
कृत्वा ॥ ततःसवितारंअर्कसमिदाज्यचरुतिलानां प्रत्येकमष्टोत्तरशताहुतिभिः ॥ राहुंदूर्वाज्यचरुतिलैस्तावत्संख्याभिः
नक्षत्रदेवतांजलवृक्षसमिदाज्यचरु तिलैस्तावत्संख्ययाहोमंकृत्वा ॥ शेषेणस्विष्टकृद्धोमः ॥ एवंप्रधानहोमंकृत्वा प्राय-
श्चित्तांतेवलिदानंपूर्णाहुतिश्च ॥ ततःअभ्यात्तानाद्युत्तरतंत्रंसमाप्य ॥ अग्न्यर्चनांतेग्रहकलशोदकेन अथर्वापंचगव्यंच
रत्नंपंचत्वक् पंचपल्लवैरोषधकल्कैश्च मिश्रितलौकिकजलैरभिषेकः ॥ ततःपूर्वोक्तप्रकारेणअभिषेकंकृत्वा ॥ आचार्यं
संपूज्यतस्मैप्रतिमात्रयंदक्षिणांचदत्वा ॥ ततोग्रहाणांपूजनविसर्जने प्रतिमाप्रतिपादनं ब्राह्मणभोजनसंकल्पश्चेतिसर्वंपूर्व
शांतिप्रकरणोक्तवत्कार्यं ॥ वेधकालेजन्मनिनैवशांतिः किंतुदुष्टकालादूरुद्रभिषेकःकार्यइतिभाति ॥ शांताद्यौश्चेति
यस्मात्कोशेतिपठित्वा ॥ कृतंकर्मेश्वरार्पणंकुर्यात् ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौ षट्पन्नागरद्विजातिरविशंकर
कृतेसूर्यग्रहणेजननशांतिप्रयोगरश्मिः षट्पंचाशत् ॥ ५६ ॥

॥ अथचंद्रग्रहणजननशांतिप्रयोगरश्मिः ॥ कर्त्तादेशकालौसंस्मृत्य ममभार्यायाःचंद्रग्रहणकालीनप्रसूतीसूचित

सर्वारिष्टपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थं सग्रहमखांशांतिंकरिष्ये ॥ तदंगगणपतिपूजनपूर्वकंस्वस्तिपुण्याहवाचनं नांदि
श्राद्धादिकरिष्येतिसंकल्प्येएतानिकृत्वा । ततःआचार्यवरणंतत्पूजनंचकृत्वा ॥ ततोआचार्यःसर्षपविकीरणादिप्रार्थनांते
गोमयोपलिप्तभूमौनवंश्वेतंवस्त्रंप्रसार्यतस्योपरिमध्येराजतंचंद्रबिंबंशकधूममितिसोममंत्रेणआवाह्यतद्दक्षिणे राहुंउत्तरेनक्षत्र
देवतांनक्षत्रसूक्तेनावाह्य शोडषोपचारैसंपूज्य ॥ ततःस्थंडिलेऽग्निंप्रतिष्ठाप्य॥ तदीशान्यांग्रहानावाह्य॥ अभ्यात्तानादिपूर्व
तंत्रंसमाप्य ॥ प्रधानहोमः ॥ चंद्रमष्टोत्तरशतसंख्याकाभिः पलाशसमिदाहुतिभिस्तावतिभिराज्याहुतिभिः तिलाहुति
भिश्चर्वाहुतिभिश्चराहुमष्टोत्तरशतसंख्याकाभिः प्रत्येकंदूर्वातिलाज्यचर्वाहुतिभिः ॥ नक्षत्रदेवतांप्रत्येकमष्टोत्तरशतसंख्या
काभिः ॥ जलवृक्षसमिदाज्यचरुतिलाहुतिभिः ॥ शेषेणस्विष्टकृदादि सर्वंहुत्वाअभ्यात्तानाद्युत्तरतंत्रंविधाय सूर्यग्रहण
शांतिवत्सर्वंकृत्यं कर्त्तव्यमित्यलंविस्तरेण ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौ षट्पन्नागरद्विवेदिरविशंकरकृते
चंद्रग्रहणेजननशांतिप्रयोगरश्मिःसप्तपंचाशत् ॥ ५७ ॥

॥ अथविघ्नहर्त्रेनमः ॥ अथनक्षत्रगंडांतशांतिप्रयोगरस्मिः ॥ रेवत्यश्लेषाज्येष्टानक्षत्राणामत्यघटिद्वयमश्विनी
मघामूलानामाद्यघटिद्वयमितिघटिका चतुष्टयमित त्रिविधंनक्षत्रगंडांतम् ॥ अथस्पष्टोर्थः ॥ रेवतीनक्षत्रस्यअंतघटिका
द्वयमितिघटिकाचतुष्टयपरिमितसंधिनक्षत्रंगंडांतं ॥ अेवंअश्लेषामघानक्षत्रयोः ज्येष्टामूलनक्षत्रौचज्ञेयौअश्विनीमघामूलाना
पूर्वार्द्धेबाध्यतेपिता ॥ पूषाहिशंक्रपश्चार्द्धेजननी बाध्यतेशिशोः ॥ पूषारेवती ॥ अहिरश्लेषा ॥ शुक्रज्येष्ठा ॥ सर्वेषांगंड
जातानांपरित्यागोविधियते ॥ वर्जयेद्दर्शनंयावत्तस्यांषाण्मासकंभवेत् ॥ शांतिर्वापुष्कलाकार्यासोममंत्रेणभक्तिमान् ॥
अथप्रयोगः ॥ षण्मासोत्तरमथवाजननादेकादशे हनिप्रथमतोगोप्रसवंकृत्वा देशकालौसंकीर्त्यममास्यशिशोः रेवत्य
श्विनीसंध्यात्मकगंडांतजननसूचितसर्वारिष्टनिरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थं नक्षत्रगंडांतशांतिंकरिष्ये ॥ तदंगगणपति
पूजनपूर्वकंस्वस्तिपुण्याहवाचनं मातृकापूजनंनांदिश्राद्धंचकरिष्येइतिसंकल्प्य ॥ एतानिकृत्वा ॥ ततोअस्मिन्कर्मणि
याजुषदैवज्ञाचार्यंवृत्वा ततोऋत्विग्वरणांतेतंचंदनशुक्लमाल्यैः क्षौमवासोभ्यांसंपूजयेत् ॥ षोडशपलमष्टपलंवाचतुःपलंवा

कांस्यपात्रंविधायनिर्माणकाले सोममंत्रंपठेत् ॥ यद्वापूर्वनिर्मितकांस्यपात्रस्य पुनर्निर्माणंसोममंत्रेणकुर्यात् ॥ चंद्रप्रति
मायाअग्न्युत्तारणंकृत्वा ॥ ततोआचार्यःयदत्रेतिसर्षपविकीरणादि भूसंस्कारंकृत्वा प्रार्थनांतेस्थंडिलात्पूर्वस्यांदिशि
गोमयोपलिप्तभूमौ अष्टदलंविरच्य ॥ तदुपरिकांस्यपात्रंनिधाय तस्मिन्पायसंपयोवानिक्षिप्य तत्रनवनितपूर्णशंखंनिधाय
तस्मिन्पायसंपयोवानिक्षिप्य तत्रनवनितपूर्णशंखंनिधाय तस्मिन्राजतंचंद्रबिंबंसंस्थाप्य सोमोहमितिध्यानपूर्वकं चंद्रशक
धूमनक्षत्राणीतिमंत्रेणआवाहनादि शोडषोपचारैस्तत्रचंद्रपूजनंकुर्यात् ॥ नत्रंश्वेतसदृशंवस्त्रद्वयंसमर्पणीयं ॥ पुष्पाणिश्वेतानि
सहस्रमर्पणीयानि ॥ मौक्तिकंदक्षिणातदभावे यथाशक्तिद्रव्यंवादद्यात् ॥ पूजांतेसोममंत्रऋष्यादिस्मरणपूर्वकंसहस्रं
जपेत् ॥ तदुत्तरतस्ताम्रकलशंपूर्वोक्तप्रकारेणसंस्थाप्य तत्रराजतप्रतिमायांबृहस्पतिमंत्रेणवागीश्वरंसंपूज्य ॥ तदुत्तरतः
क्रमेणतेनैवविधिनानिहितकुंभचतुष्टये गंधादिकंपूर्वोक्तक्रमेणनिक्षिप्य ॥ ततश्चतुर्षुक्रमेणविभूतिकुंकुमचंदनकुष्टगोरोच
नानिसिंचेत् ॥ तेषुवरुणंसंपूजयेत् ॥ ततःपश्चिमदेशेस्थंडिलादि अग्निप्रतिष्टापनांतंकृत्वा स्थापितकलशोत्तरभागेग्रहाना
वाहनादिवरुणपूजनांतंकृत्वा ॥ ततःअभ्यात्तानादिपूर्ववतंत्रंविधाय ॥ पूर्ववत्प्रत्नोहीत्युदकुंभ संपात्याभिमंत्र्यपूण्याहहोमं
चकृत्वा ॥ ततःग्रहपीठदेवतानां पूर्वतंत्रानुसारेणहोमंकृत्वा ॥ नात्रप्रधानदेवताहोमः ॥ ततःस्विष्टकृतादिप्रायश्चित्त
होमांतेबलिदानं ॥ ततःपूर्णाहुतिः होमांतेअभ्यात्तानाद्युत्तरतंत्रंविधाय पूर्णपात्रविमोकाद्यग्न्यर्चनांतेवरुणकलशचतुष्टय
स्थोदकेनदिवा गंडांतजातं बालंपितरासहरात्रिजातं संध्ययोजातमुभाभ्यां सहाभिशिंचेत् ॥ ॐसहस्राक्षेणेतिमंत्रस्य
यक्ष्मनाशनःप्रजापत्यइंद्रस्त्रिष्टुप् अभिषेकेविनियोगः ततःसर्वकलशोदकैः पूर्वोक्तशांत्युक्तरीत्याभिषेकःकार्यः ॥ ततः
अभिषेकांतेसुस्नातः सत्नीकःकर्त्ताघृतचंदनादिविभूतिधारणंकृत्वा ॥ आचार्यायशंखदानंकुर्यात् ॥ इमंसचंद्रंशंखंसवस्त्र
युगंसमौक्तिकंनवनीताद्युपस्करसहितं गंडदोषापनुत्तये दैवज्ञाययाजुषेतुभ्यमहंसंप्रददे इतितत्सांगतासिध्यर्थं सहिरण्यां
धेनुंदद्यात् ॥ ततोवागीश्वरंताम्रपात्रसहितं तुभ्यंगंडदोषशांत्यर्थंसंप्रददेइति ॥ बृहस्पतिप्रतिमादानंतदंगत्वेनयथाशक्ति
दक्षिणादानंच ॥ ततःस्थापितदेवतानामुत्तरपूजनपूर्वकं बिसर्जनमाचार्यायहस्तेप्रतिमादानंच ॥ ततःसहस्राक्षेणेतिमंत्रस्या

युर्वृध्यर्थं यथाशक्तिजपोदशावर ब्राह्मणभोजनंचेति ॥ शांताद्यौरितिशांतिपाठः यस्मात्कोशेतिजपःकृतं कर्मेश्वरार्पणं
कुर्यादिति ॥ ॥ इतिश्रीमदर्थवगृह्यसूत्रप्रयोग भानौषट्पन्नागर द्विवेदिरविशंकरकृतेनक्षत्रगंडांत शांतिप्रयोगरश्मि
रष्टपंचाशत् ॥ ५८ ॥

॥ अथाश्लेषामघागंडांतशांतिप्रयोगरश्मिः ॥ कर्त्ताब्रह्मजज्ञानंअव्यसश्चेति कर्मप्रारंभणीयकौमंत्रौस्मृत्वा
जीवास्थेतिमंत्रेणविधिवदाचम्यप्राणानायम्य देशकालावुच्चार्य अस्यशिशोःअश्लेषामघासंध्यात्मकगंडांतजननसंसूचित
सकलारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं नक्षत्रगंडांतशांतिंकरिष्ये ॥ तत्रादौगणेशपूजनपूर्वकं स्वस्तिपुण्याहवाचनं
मातृकापूजनंनांदिश्राद्धंचकरिष्ये इतिसंकल्प्य ॥ गोमुखप्रसवंसंकल्पादौकृत्वा ॥ ततोवृताचार्यःनांदिश्राद्धांतेसर्षपवि
कीरणांदिप्रार्थनांतेगोमयोपलिप्त भूमौअष्टदलंविरच्य तदुपरिकांस्यपात्रंनिधाय तन्मध्येपायसंदुग्धंवानिक्षिप्य तत्रनव
नीतपूर्णशंखंनिधाय तस्मिनराजतंचंद्रबिंबंसोममंत्रेणावाह्य संपूज्यपूजांतेचंद्रमंत्रेणसहस्रंजपःकार्यः ॥ ग्रहमखहोमःकार्यः ॥
प्रत्नोहीत्युदकुंभसंपातस्वस्त्ययनहोमश्चकृत्वा ॥ बृहस्पतिमंत्रेण नात्रप्रधानदेवताहोमः ॥ ग्रंथांतरेतुताम्रकधशेराजत
प्रतिमांबृहस्पतिमंत्रेणवागीश्वरंसंपुज्य ॥ तदुत्तरेकुंभचतुष्टयेषु वरुणंसंपूज्य अभिषेकपूर्त्तिदानादिकंसर्वंपूर्ववत् ॥ ॥इति
श्रीमदथर्वगृह्यसूत्रप्रयोगभानौषट्पन्नागर द्विवेदिरविशंकरकृते द्वितीयनक्षत्रगंडांतप्रयोगरश्मि रेकोनषष्ठिः ॥ ५९ ॥

जगदंबार्पणमस्तु ॥ ॥ अथतृतीयनक्षत्रगंडांतशांतिप्रयोगरश्मिः ॥ आदौगोप्रसवंकृत्वा देशकालौसंकीर्त्य
अस्यशिशोःज्येष्टामूलसंध्यात्मक गंडांतजननसंसूचितारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीतये नक्षत्रगंडांतशांतिंकरिष्ये ॥
तदंगगणेशपूजनादि नांदीश्राद्धांतेआचार्यंवृत्वा तेनभूशुध्यादिप्रार्थनांते स्थंडिलपूर्वभागेपद्मोपरि कांस्यपात्रंनिधाय
तस्मिन्पायसंक्षीरंवानिक्षिप्य तस्मिन्नवनीतपूर्णशंखंनिधाय तस्मिन्शंखेराजतंचंद्रबिंबं चंद्रमंत्रेणावाह्य तदुत्तरेवागीश्वर
प्रतिमांसंपूज्य तदुत्तरेकुंभचतुष्टयेषुवरुणंसंपूज्य ॥ ततःपश्चिमेस्थंडिलेऽग्निंतदीशान्यां ग्रहांश्चावाह्यअभ्यात्तानादिपूर्वतंत्रं
समाप्य प्रत्नोहीत्युदकुंभंसंपात्यस्वस्त्ययनहोमादि ग्रहमखोक्तरीत्याहोमंसमाप्य ॥ नात्रप्रधानदेवताहोमः प्रायश्चित्त

होमादिशेषंसर्वंपूर्ववत् ॥ ततःअभ्यात्तानाद्युत्तरतंत्रं सर्वंपूर्ववत्परिसमाप्य दशावरब्राह्मणभोजनंदक्षिणादानादिसर्वं पूर्ववत्॥ ॥ इतीश्रीमदथर्ववेदगृह्यसूत्रप्रयोगभानौषट्पन्नागरद्विवेदिरविशंकरकृतेतृतीयगंडांतशांतिप्रयोगरश्मिःषष्ठिः॥६०॥

॥ अथतिथीगंडांतशांतिप्रयोरश्मिः ॥ ॥ पंचमीषष्ठ्योर्दशम्येकादश्योःपंचदशीप्रतिपदोःसंधिभूतंघटिद्वयंतिथिगंडातंतिथिगंडांतेपूर्वार्द्धेजन्मनितत्कालं स्नात्वावृषभदानं तन्मौल्यदानंवाकृत्वा सूतकांतेशांतिःकार्या ॥ उत्तरार्द्धेजन्मनि शांतिमात्रं ॥ ॥ अथप्रयोगः ॥ तिथिगंडपूर्वार्द्धेजन्मनिकर्त्तास्नातः पुत्रमुखावलोकनात्पूर्वंवृषभदानंकुर्यात् ॥ तत्रसंकल्पे विशेषः ॥ अस्यशिशोस्तिथिगंडांत पूर्वार्द्धजन्मसूचितसर्वारिष्टनिरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थंअनडुहदानमहंकरिष्ये ॥ तदंगअनडुहपूजनंब्राह्मणपूजनंचकरिष्ये ॥ द्विजंसंपूज्य ॥ अश्वस्यास्यतरस्येतिमंत्रेण वृषभंसंपूज्य ॥ मंत्रः ॥ ॐअश्वंस्यास्यतरस्याजस्यपेत्वंस्यच ॥ अर्थऋषभस्ययेवाजास्तानस्मिन्धेहितनूवशीन् ॥ स्वस्त्यस्तु ॥ दीर्घमायुःश्रेयःशांतिः पुष्टिस्तुष्टिश्चास्तु ॥ अमुकगोत्रोत्पन्नः अमुकशर्माहंअमुकगोत्रोत्पन्नाय अमुकशर्मणेब्राह्मणाय इमंवृषभंरुद्रदैवत्यंअन्वयं गंहैमश्रृंगंरौप्यखुरं वस्त्राच्छादितंसर्वालंकारसहितं अस्यशिशोःतिथिगंडपूर्वार्द्धजन्मसूचित सर्वारिष्टनिरसनार्थंदशवेनुफल प्राप्तये अमुकशर्मणेब्राह्मणायतुभ्य महंसंप्रददेनममेतित्रिः दक्षिणपूर्वपादंकरेधृत्वा विप्रहस्तेजलंक्षिपेत् ॥ दानवाक्यम्॥ धर्मस्त्वंवृषरूपेणजगदानंदकारक ॥ अष्टमूर्त्तेरधिष्ठानमतः पाहिसनातन ॥ प्रतिगृह्यतांप्रतिगृह्णामि ॥ दानसांगता सिध्यर्थं इमांदक्षिणांतुभ्यमहंसंप्रददे ॥ अनेनवृषभदानेनश्रीभगवान्कर्मांगरूपीप्रीयतां परमेश्वरइति ॥ इतिवृषभदानं वृषभासंभवेकार्षापणाष्टकंवा ॥ ततःसूतकांतेशुभदिनेवा कर्त्तादेशकालौसंकीर्त्य अस्यशिशोः तिथिगंडपूर्वार्द्धजन्म सूचितसर्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं शांतिंकरिष्ये ॥ तदंगगणपतिपूजनपूर्वकं स्वस्तिपुण्याहवाचनं मातृका पूजनंनांदिश्राद्धंचकरिष्ये ॥ इतिसंकल्प्य ॥ एतानिकृत्वा ॥ ततःआचार्यवरणंतत्पूजनंचकृत्वा ॥ ततोआचार्यःब्रह्मज ज्ञानमित्यादिपठित्वा यदत्रसंस्थितमिति सर्षपविकीरणादिप्रार्थनांते स्थंडिलपूर्वभागेपूर्वोक्तरित्या कलशस्थापनंकृत्वा तस्योपरिपूर्णपात्रेहैमवरुणप्रतिमायांये पश्चाज्जुहतीतिवरुणंपूजयेत् ॥ ततोऽग्निंप्रतिष्ठाप्यग्रहान्संपूज्य अभ्यात्तानादिपूर्व

तंत्रंविधाय ॥ स्वस्त्ययनहोम श्चतुरस्रमणौसंपातश्चकृत्वा पूर्वोक्तरीत्याग्रहहोमंकृत्वा वरुणमपिचर्वादिद्रव्यैः प्रतिद्रव्यं अष्टोत्तरशतंहुत्वा इत्यादिहोमांतेस्विष्टकृतादि बलिदानपूर्णाहुतिः अभ्यात्तानाद्युत्तर तंत्रंपरिसमाप्य अग्न्यर्चनांतेततः कलशद्वयोदकेन पूर्वोक्तशांतिक्रमरीत्यापूर्वमंत्रैःपित्रादित्रयाणांअभिषेकोयवव्रीहिमाषतिलमुद्गानांदक्षिणात्वेनविसर्जनादि यथाशक्तिब्राह्मणभोजनसंकल्पः शांताद्यौरितिशांतिसूक्तपठनं यस्मात्कोशेतिकृतं कर्मेश्वरार्पणंकुर्यात् अभिषेककालेसर्वत्र मौजीबंधनमंतेनदीफेनेषुविसर्जन मितिसर्वत्रज्ञातव्यम् ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौषट्पन्नागरद्विवेदिरविशंकर कृतेत्रिविधतिथिगंडांतशांतिप्रयोगरश्मिरेकषष्ठिः ॥६१॥

॥ श्रीमन्महेश्वरायनमः ॥ अथतिथिगंडांतार्द्धजन्मनितुनतात्कालिकदानं ॥ शांतौमातुःशिशोश्चाभिषेक विशेषःशेषंसर्वंपूर्ववत् ॥ ॥ इतितिथिगंडांतशांतिविशेषः ॥ ॥ अथऊग्नगंडांतशांतिप्रयोगरश्मिः ॥ कर्कसिंहयो र्वृश्चिकधनुर्मीनमेषयोश्चलग्नयोः संधिभूतैकाघटिकालग्नगंडांतम् ॥ तत्रपूर्वार्द्धेजन्मनिकांचनदानम् ॥ सूतकांतेशांतिः कार्या ॥ उत्तरार्द्धेजन्मनिशांतिमात्रम् ॥ अथप्रयोगः ॥ लग्नगंडपूर्वार्द्धेजन्मनिकर्तास्नातःपुत्रमुखमनालोक्यनालछेदनात् पूर्वंदेशकालौसंकीर्त्य अस्यशिशोः लग्नगंडपूर्वार्द्धजन्मसूचितसर्वारिष्ट निरसनद्वाराश्रीपरमेश्वरप्रीत्यर्थं ब्राह्मणायकांचन दानंकरिष्ये इतिसंकल्प्यद्विजंसंपूज्य ॥ स्वस्त्यस्त्वित्यादिवाक्यानपठेत् ॥ हिरण्यगर्भगर्भस्थं० ॥ प्रयच्छमे० ॥ इदं हिरण्यदानंलग्नपूर्वार्द्धजन्मसूचित सकलारिष्टपरिहारार्थं अमुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे ॥ दानसांगतासिध्यर्थं इमां दक्षिणांतुभ्यमहंसंप्रददे ॥ इतिकांचनदानं ॥ ततःसूतकांतेशांत्युक्तशुभदिनेवाकर्तादेशकालावुच्चार्य अस्यशिशोःलग्नगंड पूर्वार्द्धजन्मसूचित सकलारिष्टनिरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थंशांतिंकरिष्ये ॥ तदंगगणपतिपूजनपूर्वकं स्वस्तिपुण्याह वाचनंमातृकापूजनंनांदिश्राद्धंआचार्यादिवरणंचकरिष्ये इतिसंकल्प्य एतानिकृत्वा ॥ वृताचार्यःब्रह्मजज्ञानमित्यादियथा संभवंपठित्वा ॥ यदत्रमित्यादिसर्षपविकीरणादिप्रार्थनांतेस्थंडिल पूर्वभागेविधिनाकलशंप्रतिष्ठाप्य तस्योपरिहेमनिर्मित वरुणप्रतिमांवरुणमंत्रेणपूजयेत् ॥ ततःस्थंडिलेऽग्निंप्रतिष्ठाप्य तदीशान्यांग्रहनावाह्य ॥ ततअभ्यात्तानादिपूर्वंतंत्रंविधाय

पूर्वतंत्रांतेपूर्वोक्तरीत्याग्रहहोमंस्वस्त्ययनहोमंचकृत्वा ॥ वरुणंप्रतिद्रव्येणअष्टोत्तरशतसंख्याभिः समिदाज्यचरुतिलयवानांचाहुतिभिर्हुत्वा ॥ शेषेणस्विष्टकृतमित्यादि बलिदानपूर्णाहुतिः ॥ ततअभ्यात्तानाद्युत्तरतंत्रंविधाय अग्न्यर्चनांतेकलशद्वयोदकेन पित्रादित्रयाणां अभिषेकोयवव्रीहितिलमुद्गानांदक्षिणात्वेन दानविसर्जनादि यथाशक्तिद्विजान्सदन्नेनभोजयेत् ॥ भूयस्यादिशांतिपाठांतंकर्मसर्वंपूर्ववत् यस्मात्कोशेतिकृतंकर्मेश्वरार्पणंकुर्यादिति ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौ षट्पन्नागरद्विजातिरविशंकरकृते तिथिगंडांतार्द्धजन्मविशेषसहित लग्नगंडपूर्वार्द्धजननशांतिप्रयोगरश्मिः द्विषष्टिः ॥ ६२ ॥

॥ अंबायैनमोनमः ॥ अथलग्नगंडउत्तरार्द्धजननशांतिप्रयोगरश्मिः ॥ उत्तरार्द्धजन्मनितु तात्कालिकदानं ॥ सूतकांतेशुभदिनेवाकर्त्तादेशकालौस्मृत्वा अस्यशिशोःलग्नगंडउत्तरार्द्धजन्मसूचित सकलारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं सहग्रहमखांशांतिंकरिष्ये ॥ तदंगगणेशपूजनाभ्युदयिकांतेआचार्यः सर्षपविकीरणादिसर्वंपूर्ववत्कुर्यात् ततः कुंभेहेमप्रतिमायांवरुणंसपूज्य वरुणोद्देशेनप्रतिद्रव्यमष्टोत्तरशतसंख्यया समिच्चर्वाज्यतिलयवानांहोमःकार्यः ॥ यवव्रीहिमाषतिलमुद्गानांदक्षिणात्वेनदानानि ॥ शेषंसर्वंपूर्ववदित्यतिशयेनालं ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौषट्पन्नागरद्विवेदिरविशंकरकृते लग्नगंडांतशांतिप्रयोगरश्मिस्त्रिषष्ठि ॥ ६३ ॥

॥ अथदिनक्षयादिशांतिप्रयोगरश्मिः ॥ दिनक्षयेनभद्रायांप्रसूतिर्यदिजायते ॥ यमघंटेदग्धयोगेचदारुणि ॥ दुष्टयोगतिथीनांचनिशिद्धांशेषुभेतदा अतिदोषकरिप्रोक्तातस्मिन्पापयुतेतीथी ॥ अथयमघंटादीनांलक्षणानि ॥ तत्रादौ यमघंटलक्षणं ॥ मघाविशाखाआर्द्राचमूलमृक्षंचकृत्तिका ॥ रोहिणीहस्तइत्येतेयमघंटाक्रमाद्रवेरिति ॥ रविवारमारभ्येत्यर्थः ॥ अथदग्धयोगलक्षणं ॥ षष्ठीचशनिवारेण शुक्रेणैवतुसप्तमी ॥ अष्टमीगुरुवारेणनवमीचंद्रजेनतु ॥ दशमीभूमिपुत्रेणसोमेनैकादशीतथा ॥ सूर्येणद्वादशीयुक्तादग्धयोगाःप्रकीर्त्तिताः॥ बुधेतृतीयाकुजपंचमीषुषष्ठीगुरौचाष्टमिशुक्रवारे॥ एकादशीसोमशनिर्नवम्यांद्वादश्यमर्कातिथिदग्धयोगाः ॥ अथमृत्युयोगलक्षणं ॥ त्यजरविअनुराधा उत्तराषाढचंद्रेशत

भिषमपिभौमेचांद्रजेचाश्विनिषु ॥ मृगशिरगुरुवारेसार्पदैवंचशुक्रेरविसुतमपि हस्तेमृत्युयोगावदंति ॥ १ ॥ अथकालदंडानंदयोगश्चलक्षणं ॥ कालदंडोभानुवासरभरणीयोगः अश्विन्यादिसाभिजिन्नक्षत्राणांचतुर्भिः क्रमेणादित्यवासरादिषु योगेनसंपन्नेष्वष्टाविंशतियोगेषुपठितः आनंदःकालदंडश्चेति ॥ दुर्योगतिथीनांचनिषिद्धभागस्तु विष्कंभवज्रयोस्तिस्रषट्चगंडातिगंडयोः ॥ परिघार्द्धंपंचशूलेव्याघातेकघटित्यजेत् ॥ चतुःषडर्कनिग्रर्कभूततिथ्याद्यनाडिकाः ॥ अष्टांक८ मनु१४ तत्व१६ आशा१० बाणसंख्याविसर्जयेत् ॥ इत्युक्ताज्ञेया ॥ दिनक्षयादिदोषेष्वेकैकदोषदूषितकालेजननेशिवे रुद्रैकादशी ॥ अभिषेकःकार्यः ॥ द्वित्रादिदोषसमुच्चये ग्रहयज्ञाश्वत्थप्रदक्षणादिसमुच्चयः दीपंशिवालयेभक्त्याघृतेन परिदापयेत् ॥ गाणपत्यंपुरुषसूक्तं सौरंमृत्युंजयंशुभं ॥ शांतिजाप्यंकृत्वा मृत्युंजयीभवेदितिवाक्याद्बहुदोषे उक्तजपादिसमुच्चयेपि ॥ कृष्णायनमः ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौ षट्पन्नागरद्विवेदि रविशंकरकृतेदिनक्षयादिजननशांतिप्रयोगरश्मिश्चतुःषष्टि ॥ ६४ ॥

॥ अथविषघटिशांतिप्रयोगरश्मिः ॥ तत्रकौस्तुभे ॥ तिथिवारनक्षत्राणांविषनाड्याउक्तास्तथापिज्योतिर्ग्रंथेषुनक्षत्र विषघटिनाडीमेवमहादोषत्वेनोक्तेर्नक्षत्र विषघटिष्वेवजननेउक्तशांतिःकार्याः ॥ तिथ्यादीविषघटीनामुपदोषत्वाद्रुद्राभिषेकंकुर्यात् ॥ अथविषघटीलक्षणम् ॥ तत्रादौतिथीनांविषनाडिः ॥ तिथी१५॥ इषु५॥ नाग८ अद्रि७ गिरी७ इश११ वारिधि४ गज८ अद्रि७ दिक्१० पावक३ दिक्१० भस्कर१२ मुनि७ भ८॥ संख्याप्रथमातिथेः ॥ क्रमात्परंविषाख्यं घटिकाचतुष्टयमिति ॥ अस्यार्थः ॥ प्रतिपदां१५ पंचदशघटिकानंतरं चत्वारिनाड्यःविषं ॥ एवंतिथिद्वितीयायांअष्टघटिकानंतरंघटिचतुष्टयंविषं ॥ एवमग्रेप्यूह्यम् ॥ अथवारविषघटिः विंशति२० चतुः४ द्वादश१२ दिक्१० शैल७ बाणाश्च५ तत्त्वानि२५ यथाक्रमेणसूर्यादिवारेषु भवत्यानंतरंनाडयोविषाख्यं घटिकाचतुष्टयमिति ॥ अस्यार्थः ॥ आदित्यवरेविंशति२० घटिकानंतरंचतस्रोविषनाड्यः ॥ सोमवासरेघटिचतुष्टयानंतरंचतस्रोविषनाड्यः ॥ भौमवासरे द्वादशघटिकानंतरंचत्वारिनाड्यःविषं ॥ एवमग्रेप्यूह्यं ॥ अथनक्षत्रविषनाडिः ॥ खमार्गणाः५० वेदपक्षा२४ खरामा३०

व्योमसागरा४० वेदिचंद्रा१४रूपदस्रा२१खरामा३० व्योमवाहव:२० द्विरामा३२ खाग्नय:३० शून्यदस्रा२० कुंजरभूमय १८रूपपक्षा२१ व्योमदस्रा२० वेदचंद्रा१४ चतुर्दश१४ शून्य चंद्रा१० वेदचंद्र१४ अक्ष५वेदवाहव:२४ शून्यदस्रा२० शून्य चंद्रा१० पूर्णचंद्रा१० गजेंद्रव:१८ तर्कचंद्रा१५ वेदपक्षा२४खरामा३०॥ अश्विन्यादिक्रमात् ॥ आभ्य:परांस्युःघटिकाच तस्रोविषनाडयाइत्येवंव्यवस्थापूर्ववद्बोद्धव्या॥ अथस्पष्टोर्थ:॥ अश्विन्यांपंचाशद्घटिका५० भ्योनंतरं चतुर्नाड्योविषम्॥ भरण्यांचतुर्विंशतिघटिकानंतरंचतुर्नाडयोविषम् ॥ कृत्तिकायांत्रिंशत् घटिकानंतरंघटिचतुष्टयंविषम् ॥ एवमग्रेप्यूह्यम् ॥ विषनाडीषुसंजातःपितृमातृधनात्मनां ॥ नाशकृद्दिवशस्त्राग्निःक्रूरैलंघेशकेपिच ॥ ॥ अथप्रयोगः ॥ कर्ताशौचांतेदेश कालाद्यनुस्मृत्य विषनाडयामेतच्छिशूजननसूचित सर्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं वृद्धगर्गोक्तविधिनाशांतिं करिष्ये ॥ तदंगगणपतिपूजनपूर्वकं स्वस्तिपुण्याहवाचनंमातृकापूजनं नांदिश्राद्धमाचार्यवरणंचकरिष्ये इतिसंकल्प्य ॥ एतानिकृत्वा ॥ बृह्मजज्ञानेत्यादिपठित्वा आचार्यःयदत्रेतिसर्षपविकीरणं पंचगव्येनभूमिप्रोक्षणं स्वस्त्ययनंप्रार्थनांते यथाशक्तियथालक्षणनिर्मितां हैमवतीनांरुद्रादित्य प्रतिमांचतसृणांअग्न्युत्तारणंकृत्वा स्थंडिलपूर्वभागेपूर्वोक्त रीत्याभुवं स्पृष्ट्वातत्रौषधयः संवदंतइतिचतुःप्रस्थपरिमितान् व्रीहीन्प्रक्षिप्यतैः स्थंडिलंपरिकल्प्यतत्रैकं कलशंप्रतिष्ठाप्य कलशेउदक पूरणादिपूर्णपात्रनिधानांतंतत्तन्मंत्रैःकृत्वाः पूर्णपात्रोपरिसाष्टदलवस्त्रे प्रतिमाचतुष्टयमुदक्संस्थंक्रमेण निधायतदावाहनादि षोडशोपचारैःदेवताःसंपूजयेत्॥ तद्यथा॥ गृहमखोक्तरुद्रमंत्रेणरुद्रम्॥ यममंत्रेणयमं॥ अग्निमंत्रेणाग्निं॥ मृत्युमंत्रेणमृत्युं॥ एवंक्रमेणतत्तन्मंत्रैरावाह्यतैरेवमंत्रैःसंपूज्य॥ ततोस्थंडिलेऽग्निंप्रतिष्ठाप्यस्थापितोत्तरभागेगृहपूजनं कलशस्थापनांतंकृत्वा॥ ततःअभ्यात्तानादिपूर्वतंत्रंसमाप्य ॥ नक्षत्रविषघटिश्चेत् ॥ पत्नोहीत्युदकुंभंसंपात्य स्वस्त्ययनहोमश्चकार्यः ॥ तिथिवार विषनाडीशांतौकेवलंस्वस्त्यनहोममात्रंकुर्यादिति ततोग्रहहोमः ॥ रुद्रयमअग्निमृत्यूनयज्ञियवृक्षचरुसमिद्घृततिलाहुतिभिः प्रतिदैवतंप्रतिद्रव्यमष्टोत्तरशत संख्याभिःजुहुयात् ॥ एवंसऋत्विगाचार्यो प्रधानहोमंकृत्वा प्रायश्चित्तहोमांतेबलिदानं ततःपूर्णाहुतिः ॥ ततोभ्यात्तानाद्युत्तरतंत्रंसमाप्य ॥ अग्न्यर्चनांतेकलशद्वयोदकेनाभिषेकः ॥ पूर्वोक्तमंत्रैरभिषेकः ॥

प्रीयतांभगवानीशपिनाकीसर्वतोमुखः ॥ तत्रमूर्तिप्रदानेनसर्वाभिष्टप्रदोभव ॥ १ ॥ इषत्याग्नेयतःकालो दंडहस्तः प्रसन्नधीः॥ रक्तवृक्नीलकायश्चमहिषस्थःशिवंकुरुः ॥२ ॥ पिंगभ्रूश्मश्रुकेशांतः पिंगाक्षचरणोरुणः छागस्थःसहसूत्रश्च ज्वलनोरक्तलोचनः ॥ तत्रमूर्तिप्रदानेनमम पापंविनाशय ॥ ३ ॥ दंष्ट्राकरालवदतोनीलांजनसमाकृतिः ॥ रक्ताक्षो सिगदायाणिर्मृत्युर्मापातुसर्वदा ॥ ४ ॥ इतिचतुर्भिःश्लोकैश्चाभिषेकःकार्य ॥ ततोविभूतिधारणंस्थापितदेवतानांपूजनंच कृत्वा ततःश्रेयोग्रहणंदक्षिणादानं आचार्यहस्ते ॥ प्रीयतांभगवानीशइत्यादिभिश्चतुर्भिः श्लोकैः प्रतिमाचतुष्टयदानंच कृत्वातस्मै गोभूहिरण्यवस्त्राणितन्निष्क्रयंवादद्यात् ॥ कृतस्यकर्मणःसांगतायैइमां दक्षिणांतुभ्यमहंसंप्रददेइति ॥ एवं कृत्विग्भ्योपियथाशक्तिदक्षिणादानं॥ अभ्यात्तानाद्युत्तरतंत्रंसर्वंपरिसमाप्य ॥ ततोगृहपीठदेवताआचार्यहस्तेप्रतिपादनं ब्राह्मणभोजनंशांताद्यौरिति सूक्तपाठः यस्मात्कोशेतिपठित्वा ॥ कृतंकर्मेश्वरार्पणंकुर्यादिति ॥ ॥ इतीश्रीमदथर्वगृह्यसूत्र प्रयोगभानौषट्पन्नागरद्विवेदीरविशंकरकृतेविषनाडीजननशांतिप्रयोगरश्मिः पंचषष्ठिः ॥ ६५ ॥

॥ अथयमलजननशांतिप्रयोगरस्मिः तत्रश्रोताग्निमतः सोग्नयेमरुत्वतेत्रयोदशकपालं पुरोडाशंनिर्वपेदिति ॥ अथयस्यवधूर्गौवाजनयेच्चेद्यमोततः समरुद्भ्यश्चरुंकुर्यात् पूर्णाहुतिमथापिवेतिकारिकोक्तेः ॥ अथश्रौताग्निमतस्तुसंकल्प करणेविशेषः ॥ ममभार्यायायमलजननसूचितसर्वारिष्टपरिदारद्वाराश्रीपरमेश्वरप्रीत्यर्थं मारुतेष्टचायक्ष्येइतिसंकल्पः ॥ स्मार्त्ताग्निमतस्तु ॥ ममभार्यायायमलजननसूचित सर्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं मारुतस्थालीपाकेनयक्ष्ये॥ अथनिरग्निकयजमानशांतिकरणेसंकल्पः ॥ ममभार्यायायमलजननसंसूचितसर्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं सग्रहमखांकात्यायनोक्तांशांतिंकरिष्ये ॥ इतिसंकल्प्यः ॥ तत्रादौगणेशपूजनपूर्वकं स्वस्तिपुण्याहवाचनं मातृकापूजनं नांदिश्राद्धंआचार्यादिवरणंचकरिष्ये ॥ एतानिकृत्वावृताचार्यःयदत्रसंस्थितमिति सर्षपविकीरणादिप्रार्थनांतंविधाय ॥ ततःस्थंडिलपूर्वभागे गोमयोपलिप्तभूमौश्वेतचूरणादिनाष्टदलं विरच्यतत्रप्रागादिक्रमेणैशान्यांता सुदिक्षुपूर्वोक्तविधिना कलशाष्टकपूरणांतं कृत्वा हिरण्यंकषायादिसहितं प्रक्षिप्य ॥ कषायस्तुक्षीरवृक्षाणांकषायः ॥ ततःदूर्वाऔषधीसर्वौषधीश्च

प्रक्षिप्य गंधादिमक्षेपवरुणपूजनांतंकृत्वा ॥ अथकलशाष्टकोदकैराचार्योदंपत्योरभिषेकंकुर्यात् ॥ ततःपूर्वोक्तशांतिरीत्या तत्तद्देवतामुक्तैर्दंपत्योरभिषेकंकुर्यात् ॥ ततअभिषिक्तौदंपतीश्वेतवस्त्रचंदन पुष्पसौवर्णभूषणैश्चालंकृत्यदर्भेषूपविश्यतौतत्रो दङ्मुखौतिष्ठतः तत्समीपेप्राङ्मुखआचार्यः स्थंडिलेऽग्निंप्रतिष्ठाप्यैशान्यांग्रहपूजां कलशस्थापनांतंकृत्वा अभ्यात्तानादि पूर्वतंत्रंविधाय ॥ अपस्तिसृभिराज्याहुतिभिः इंद्रंसप्तभिः वरुणंपंचभिः आपःएकयाग्निंअष्टभिराज्याहुतिभिः पूर्वत्राभिषे कायमुक्तैश्चतुर्विंशतिमंत्रैः ॥ अग्निंसोमंपवमानं पावकंमारुतंमरुतः यमंअंतकं मृत्युंचैकैकया।चर्वाहुत्यानाममंत्रैर्होमंकुर्या त्तद्यथा ॥ स्वस्त्यनहोमः ॥ अथप्रधानहोमः ॥ तत्रादौग्रहपीठदेवता होमंकृत्वा ततःपूर्वोक्त अभिषेकमंत्रैराज्येनचतु र्विंशतिआहुतिर्जुहुर्यात् ॥ तेचमंत्राः ॥ ॐआपोहिष्ठा० ॥ महेरणायचक्षसेस्वाहा ॥ १ ॥ अद्भ्यइदंनमम ॥ एव मग्रेपि ॥ योव०शि० ॥ उषतीरिवमातरःस्वाहा ॥ २ ॥ तस्माअरं०॥ आपोजनयथाचनःस्वाहा ॥ ३ ॥ इंद्रस्यौजस्थ इतिद्वयोर्वामदेवाइंद्रोगायत्रीआज्यहो।मेविनियोगः ॥ ॐइंद्रस्यौजस्थ० ॥ स्वाहा ॥१॥ इंद्रस्यौजस्थ०॥ स्वाहा ॥२॥ इंद्रोमहीतिपंचानांवामदेव इंद्रस्त्रिष्टुप्इंद्रप्रीत्यर्थमाज्यहोमेविनियोगः ॥ ॐइंद्रोमहि० ॥१॥ ॐइंद्रोमहिम० ॥२ ॥ ॐइंद्रो जघान० ॥३॥ ॐसिंहिशीर्ष० ॥४॥ ॐअहीनांस० ॥५॥ स्वाहेतिसर्वत्रइंद्रायेदंनमम ॥एतदेवमंत्रसप्तकंस्पष्टीक्रियते ॥ तद्यथा ॥ ॐइंद्रस्यौजस्थेंद्रस्यसहस्थेंद्रस्यबलंस्थेंद्रस्यवीर्यं।१स्थेंद्रस्यनृम्णंस्थ ॥ जिष्णवेयोगायब्रह्मयोगैर्वोयुनज्मि ॥१॥ इंद्रस्यौजस्थेंद्रस्य० ॥ जिष्णवे० ॥२॥ इतिद्वीः॥ अथपंचकम् ॥ ॐइंद्रोमेहिमरंधयन्मित्रश्चवरुणश्च ॥ वातापर्जन्योउ भा ॥१॥ इंद्रोमेहिमरंधयत्पृदाकुंचपृदाकम् ॥ स्वजंतिरश्चिराजिकसर्णोलंदशोनसिम् ॥ २ ॥ इंद्रोजघानप्रथमंजनितारं महेतव ॥ तेषांमुतृह्यमाणानांकःस्वित्तेषांमसद्रसः ॥ ३ ॥ संहिशीर्षाण्यग्रभंपौंजिष्ठइवकर्वरं ॥ सिंधोर्मध्यंपरेत्यव्यनिज महेविषम् ॥ ४ ॥ अहीनांसर्वेषांविषंपरावहंतुसिंधवः ॥ हतास्तिरश्चीराजयोनिपिष्टासःपृदाकवः ॥ ५ ॥ इतीदंमंत्र सप्तकं ॥ ॐउदुत्तममितित्र्यृचस्यवरुणस्त्रिष्टुप् आपप्रीत्यर्थेआज्यहोमेविनियोगः ॥ ॐउदुत्तमं० ॥ अथावय० ॥ स्वाहेदं

अद्भ्यः ॥ अथवाशन्नोदेवीतिमंत्रःप्रयोज्यः ॥ ॐवैश्वानरेतिसप्तर्चस्याथर्वाग्निस्त्रिष्टुप् अग्निप्रीतये आज्यहोमेविनियोगः॥ ॐवैश्वानरोरश्मिभिर्नःपुनातुवातःप्राणेने षिरोनभोभिः ॥ द्यावापृथिवीपयसापयस्वतीऋतावरीयज्ञियेन पुनीतां ॥१॥ वैश्वानरींसूनृतामारभध्वंयस्याआशास्तन्वोवीतपृष्ठाः ॥ तयागृहणंतःसधमादेषुवयंस्यामपतयोरयीणाम् ॥ २ ॥ वैश्व- नरींवर्चसआरभध्वं शुद्धाभवंतःशुचयःपावकाः इहेडयासधमादंमदंतोज्योक्पश्येमसूर्यमुच्चरंतम् ॥३॥ यत्तेदेवीनिर्ऋति राबबंधदामग्रीवास्वविमोक्यंयत् ॥ तत्तेविष्याम्यायुषेवर्चसे बलायादोमदमन्नमद्धिप्रसूतः ॥ ४ ॥ नमोस्तुतेनिर्ऋते तिग्मतेजोयस्मयान्विचृताबंधपाशान् ॥ यमोमह्यंपुनरित्त्वांददातितस्मैयमायनमोअस्तुमृत्यवे ॥ ५ ॥ अयस्मयेद्रुपदे बेधिषइहाभिहितोमृत्युभिर्येसहस्रं ॥ यमेनत्वंपितृभिःसंविदानउत्तमंनाकमधिरोहयेमं ॥ ६ ॥ संसमिद्युवसेवृषन्नग्ने विश्वान्यर्यआइडस्पदेसमिध्यसेसनोवसून्याभर ॥ ७ ॥ इतिपत्तृवमैकैकयाज्यंजुहुयात् ॥ अथनिर्वापचरुहोमः ॥ अत्र दानधर्मेणेचरुमवदाय अग्न्यादिनवदेवताभ्योजुहुयात् ॥ ताश्च ॥ ॐअग्नयेस्वाहा ॥ अग्नयइदंनमम ॥ यथालिंगंसर्वत्र त्यागः ॥ ॐसोमायस्वाहा ॥२॥ ॐपवमानायस्वाहा ॥३॥ ॐपावकायस्वाहा ॥४॥ ॐमारुतायस्वाहा ॥५॥ ॐमरुद्भ्य स्वाहा ॥ ६ ॥ ॐयमायस्वाहा ॥७॥ ॐअंतकायस्वाहा ॥८ ॥ ॐमृत्यवेस्वाहा ॥ मृत्यवेदंनमम ॥ ततःस्विष्टकृतादि बलिदानांतेपूर्णाहुतिःकार्या ततःअभ्यात्तानाद्युत्तरतंत्रंविधाय पूर्णपात्रविमोकाद्यग्न्यर्चनांते ग्रहकलशेनाभिषेकःकार्यः पूर्वोक्तमंत्रैः ॥ ततोविभूतिधारणांतेस्थापितदेवतापूजनं विसर्जनंचकृत्वा श्रेयोग्रहणंआचार्यहस्ते प्रतिमादानांतं कृत्वा द्विजान्भोजयित्वा ॥ स्वस्तिभवंतोब्रुवंत्वितिवाचयेत ॥ तेचस्वस्तीतिवदेयुः॥ तेभ्यआशिषोगृहीत्वा भूयस्यादियथा शक्तिदानंमिलितेभ्योब्राह्मणेभ्योदत्वा शांताद्यौरितिशांतिपाठंपठित्वा यस्मात्कोशेतिजप्त्वा ॥ कृतंकर्मेश्वरार्पणंकुर्यादिति अथदासीमहिषीवडवागोहस्तिनीनांयमलजनने पीयंशांतिःकार्या इयंशांतिगृहोत्पातेषु उलूककपोतगृध्रश्येनानांगृहप्रवेशे

स्तंभप्ररोहेवल्मिकप्ररोहेमधुजनने अशनशयनपानभंगेपल्लिपतनेशरटप्ररोहणे छंत्रध्वजविनाशेषु अग्न्युत्पातेषुचकार्येति चकात्यायनमतम् ॥ साचसाग्निकैःकात्यायनैः स्वगृह्याग्नौकार्यानिरग्निकैस्तैरन्यैश्च लौकिकाग्नौइतिविशेषः ॥ ॥ इति श्रीमदथर्ववगृह्यसूत्र प्रयोगभानौषट्पञ्चागर द्विवेदिरविशंकरकृते उत्पाताद्युपयोगीशांतिसहितयमलजनन शांतिप्रयोग रश्मिःषट्षष्टि ॥ ६६ ॥

॥ अथपौषेस्त्रीप्रथमप्रसूति शांतिप्रयोगरश्मिः ॥ शौनकः ॥ सिंहेतुगावो महिषीतुमाघेनभेचमासेवडवा प्रसूतिः ॥ पौषेतुभार्याप्रथमप्रसूतिः कृत्वाप्तुशांतिंस्वगृहेश्नुतेसुखं ॥ १ ॥ माघेबुधेतुमहिषीश्रावणेवडवादिवा ॥ सिंहे गावस्त्रियः पौषेस्वामिनोमृत्युदायकाः ॥ ॥ अथप्रयोगः ॥ कर्त्ताशौचांतेदेशकालौसंकीर्त्य ममभार्यायाः पौषमासेप्रथम प्रसूतिसूचितसर्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं सग्रहमखांशौनकोक्तांशांतिंकरिष्ये ॥ तदंगगणपतिपूजनपूर्वकं स्वस्तिपुण्याहवाचनमातृकापूजनं नांदिश्राद्धंआचार्यादिवरणादिकरिष्ये ॥ इतिसंकल्प्य ॥ एतानिकृत्वा ॥ वृताचार्यो ब्रह्मजज्ञानंअव्यसश्वेतिपठित्वा यदत्रसंस्थितमितिसर्षपविकीरणादि प्रार्थनांतंविधाय ॥ ततोगृहस्यैशानभागेस्वस्तिक द्वयंविरच्य तत्रदक्षिणोत्तरयोश्चपूर्वोकरीत्या भूमिंस्पृष्ट्वा ॥ व्रिहिमत्तमितित्रिहिभिस्तेषुदेशेषुराशिद्वयंकुर्यात् ॥ कलश मंत्रेणदक्षिणोत्तरक्रमेण प्रक्षालितकुंभद्वयं राश्योपरिनिधाय ततःसौवर्णादिनिर्मितरुद्रसूर्यप्रतिमयोरग्न्युत्तारणंकृत्वा पूर्व निर्मितस्थंडिलेविधिवदग्निंप्रतिष्ठाप्य अग्निध्यानांतेस्थापित देवताकुंभेशान्यांग्रहपूजनादिकलशस्थापनांतंकृत्वा ॥ ततः आचार्योभ्याधानादि पूर्ववत्तंत्रंपरिसमाप्य ॥ तत्रादौग्रहपीठदेवताः प्रसिद्धरीत्याकृत्वा ॥ रुद्रंसूर्यंचप्रत्येकंप्रतिद्रव्येणा ष्टोत्तरशतसंख्याभि स्तिलाज्यचरुद्रव्येहोमःकार्यः ततोआचार्यःकुंभद्वयसमीपेउपविश्य ॥ तीर्थोदकेनकलशद्वयोदकेना पूर्य ॥ यस्तेगंधमितेगंधंसर्वौषधीः दूर्वांपंचपल्लवान्पंचपल्लवत्वचः एतानिपूर्वोक्ततत्तन्मंत्रैःकलशेनिक्षिप्य पूर्णपात्र निधानांतंकृत्वा ततःसाष्टदलवस्त्रद्वयेप्रतिमेसंस्थाप्य ॥ तद्यथा॥ आतेपितरितिमंत्रस्यगृत्समदोरुद्रस्त्रिष्टुप् ॥ रुद्रावाहने विनियोगः॥ ॐआतेपित० ॥ रुद्रंसांगंसपरिवारंसायुधमावाहयामि ॥ ततउत्तरकलशेविषासहिंसहमानेत्यस्याथर्वासूर्यो

जगती॥ सूर्यावाहनेविनियोगः॥ ॐविषासहिंसहमान०॥ इतिसूर्यमावाह्यषोडशोपचारैःसंपूज्य॥ ततःएकऋत्विकदक्षिण कलशेचत्वारिपूर्वोक्तानिरुद्रसूक्तानिजपेत् ॥ अन्यऋत्विकउत्तरकुंभेपूर्वोक्तसौरमंत्रान्जपेत् ॥ यद्वामूलमंत्रं[illegible]वद्धोम समाप्तिस्तावज्जपेत् ॥ ततोआचार्यःअग्नेःपश्चादुपविश्यपूर्वोक्तमंत्रेणअग्न्यर्चनादिकृत्वा नवग्रहादिप्रधानदेवतानांतत्तन्मंत्रै र्विहितद्रव्यैर्होमंकृत्वा ॥ ततःस्विष्टकृतादिप्रायश्चित्तांते बलिदानंततःपूर्णाहुतिः ॥ ततोभ्याधानाद्युत्तरतंत्रंसमाप्याग्न्यर्च नांतेकलशत्रयोदकेनाभिषेकः ॥ ततोविभूतिधारणंस्थापित देवतापूजनविसर्जनश्रेयोग्रहणानिकृत्वा ॥ ततःदक्षिणादानं तदंतेयथाशक्तिद्विजान्सदन्नेनसंतर्प्याशिषो गृहीत्वाशांताद्यौरितिपठित्वायस्मात्कोशेतिकृतंकर्मेश्वरार्पणंकुर्यात् ॥ इती श्रीमदथर्ववगृह्यसूत्रप्रयोगभानौषट्पञ्चागर द्विवेदिरविशंकरकृते पौषमासेप्रथमप्रसूति शांतिप्रयोगरश्मिःसप्तषष्टिः ॥६७ ॥

इयंशांतिर्महिषीवडवाप्रसूतावपिज्ञेया ॥ ॥ अथाधोमुखशांतिप्रयोगरश्मिःबृहच्छौनकोये॥ प्रसवेतुयथानारीबालकंतु अधोमुखं ॥ वंशारिष्टकरं चैवमातापित्रोर्विशेषतः बालकंतुपरित्यज्ययावच्चूडोपकर्मणि ॥ मातापित्रौर्विशेषेणतन्मुखं नावलोकयेत् ॥ तस्यारिष्टविनाशाय कुर्याच्छांतिंयथाविधिः ॥ अत्रादौगेप्रसवः कार्यइतिभेभाति ॥ अथप्रयोगः ॥ जननात्द्वादशादेशांत्युक्त शुभदिनेत्रआदौगोप्रसवंकृत्वा ततोदेशकालौसंस्मृत्य ॥ अस्यकुमारस्यकुमार्यावाअधोमुख जननसूचितसकलारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं सग्रहमखेबृहच्छौनकोक्तांशांतिंकरिष्ये ॥ तत्रादौगणेशपूजा पूर्वकंस्वस्तिपुण्याहवाचनं मातृकापूजनंनांदीश्राद्धंकरिष्य इतिसंकल्प्य ॥ एतानिकृत्वा ॥ ततोआचार्यवृत्वातेनसर्षपवि कीरणादिप्रार्थनांते स्थंडिलपूर्वभागेस्वस्तिकंविरच्य तत्रयथाशक्तिव्रिहिराशिंकृत्वा तस्योपरिविधिना कलशंप्रतिष्ठाप्य पूर्णपात्रेसाष्टदलवस्त्रे अग्न्युत्तारणपूर्वक सुवर्णनिर्मितप्रतिमायां॥ त्र्यंबकमित्यस्यवशिष्ठो मृत्युंजयरुत्र्यंबकोनुष्टुप् पूजने विनियोगः ॥ ॐत्र्यंबकंयजामहे० ॥ इतिमंत्रेणवाह्यषोडशोपचारैःसंपूज्य ॥ प्रार्थनांतेएकऋत्विककुंभं स्पृष्ट्वाचत्वारिरुद्र सूक्तानिजपेत् ॥ यद्वारुद्रैकादशनिर्जपेत् ॥ ततःस्थंडिलेग्निंप्रतिष्ठाप्य तदीशान्यांग्रहस्थापनादि कलशपूजनांतेअभ्याधा नादिपूर्ववत्तंत्रंसमाप्य रास्त्यग्रहोमःकार्यः ॥ अत्रमृत्युंजयंअष्टोत्तरशतसंख्याकाभिः ॥ यज्ञीयवृक्षसमिदाज्याहुतिभि

स्वात्रतीभिश्चर्वाहुतिभिस्तिलाहुतिभि राज्याहुतिभिश्चहोमःकार्यः ॥ अथग्रहपीठदेवता होमांतेमृत्युंजय प्रधानहोमः ॥ ततःस्विष्टकृदादिप्रायश्चित्त होमांतेबलिदान ॥ ततःपूर्णाहुतिः ततोभ्यात्तानाद्युत्तरतंत्रंसमाप्य अग्न्यर्चनांतेमृत्युजय कलशसमीपेमाताबालंत्यक्त्वा पराङ्मुखोभवेत् ॥ ततोआचार्यःबालंगृहीत्वामात्रेदद्यात् ॥ दत्तोस्माभिरयंबालोयुष्म द्दत्तमगृह्यच ॥ दीर्घायुरपिबालोयंपूर्ववत्कुलवर्द्धनः ॥ ततःकलशद्वयोदकं कचित्पात्रेआदायपूर्वोक्तऋग्भिः ॥ पौराण मंत्रैश्चदंपत्योरभिषिंचेत् ॥ ततोविभूतिधारणंस्थापित देवतापूजनंविसर्जनं श्रेयोग्रहणंआचार्यहस्तेप्रतिमादानंदक्षिणादानं चकृत्वा दशावरान्ब्राह्मणान्भोजयित्वा ॥ शांताद्यौरितिशांतिसूक्तंजप्त्वा यस्मात्कोशत्युच्चार्यकृतंकर्मेश्वरार्पणंकुर्यादिति॥ ॥ इतिश्रीमदथर्ववेदगृह्यसूत्रप्रयोगभानौ षट्पन्नागरद्विवेदिरविशंकरकृते अधोमुखजननशांतिप्रयोगरश्मिःरष्टषष्ठि ॥ ६८ ॥

॥ अथत्रिकप्रसवशांतिप्रयोगरश्मिः ॥ सुतत्रयेसुताचेत्स्यात्तत्रयोवासुतोयदि ॥ मातापित्रोः कुलस्यापितदा निष्टंमहद्भवेत् ॥ ज्येष्ठनाशोवित्तहानिरितिसर्वंभवेत्ध्रुवं ॥ ॥ अथप्रयोगः ॥ कर्त्ताशौचांतेदेशकालौस्मृत्वा मम भार्यायाःसुतत्रय जन्मानंतरंकन्याजननेसूचित सर्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं सग्रहमखांशौनकोक्तांशांतिं करिष्ये ॥ इतिसंकल्प ॥ कन्यात्रयजन्मानंतरंपुत्रजननेतु ॥ ममकन्यात्रयजन्मानंतरं पुत्रजननसूचितसकलारिष्ट निरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थं सग्रहमखांशांतिंकरिष्ये ॥ इतिसंकल्प्य ॥ तत्रादौगणेशपूजापूर्वकंस्वस्तिपुण्याहवाचनं मातृकापूजनंनांदिश्राद्धंचकरिष्येतिसंकल्प्यैतानिकृत्वा ॥ ततोआचार्यादीनवृत्वातान् गंधादिभिःसंपूज्य ॥ ततोआचार्यः ब्रह्मजज्ञानमव्यसश्चेतिपठित्वा यदत्रसंस्थितमिति सर्षपविकीरणादिप्रार्थनांतेस्थंडिलपूर्वभागे ग्रहपूजाकलशस्थापनवरुण पूजनांतंकृत्वा तदुत्तरेउदक्संस्थानांपंचकलशानां पूर्वोक्तविधिनायथाशक्ति धान्योपरिस्थापितानामुपरि यथाशक्तिहेम निर्मिताःब्रह्माविष्णुमहेशेंद्रप्रतिमाः स्थापयित्वातासुदेवताःपूजयेत् ॥ तत्रमंत्राः ॥ ब्रह्मजज्ञानमथर्वाब्रह्मात्रिष्टुप्ब्रह्मा वाहनेविनियोगः ॥ ॐब्रह्मजज्ञानं०॥ प्रतद्विष्णुरथर्वाविष्णुर्गायत्री विष्णवावाहनेविनियोगः ॥ ॐप्रतद्विष्णु०। मानो विदन्ब्रह्माइश्वरोनुष्टुप् महेशावाहने.विनियोगः ॥ ॐमानोविदन्० ॥ त्रातारमिंद्रगर्गइंद्रस्त्रिष्टुप् इंद्रावाहनेविनियोगः ॥

ॐत्रातारमिंद्र० ॥ धाताददात्वंगिराइशानोगायत्री इशानस्थापनेविनियोगः ॥ ॐधातादद०॥ इतिक्रमेणावाह्यताः शोडषोपचारैःसंपूज्य ॥ ततएकऋत्विक्रुद्रकुंभंस्पृष्ट्वाचत्वारि रुद्रसूक्तानिजपेत् ॥ ततःपूर्वोक्तक्रमेणशांतिसूक्तादि सूक्तानिपठेत् ॥ ततःअग्निस्थापनाद्यभ्यात्तानादिपूर्वतंत्रांतंविधाय ॥ ततःस्वस्त्ययनहोमंकुर्यात् ॥ ब्रह्माणंविष्णुंमहेशं इंद्रंरुद्रंप्रत्येकं समिदाज्यतिलचरूणांप्रत्येकमष्टोत्तरशताहुतिभिर्होमःकार्यः ॥ यथालिंगंसर्वत्रत्यागः॥ ततःग्रहहोमपुरःसरं प्रधानहोममुक्तमंत्रैःकृत्वा ॥ ततःस्विष्टकृतादिप्रायश्चितहोमांतेबलिदानंपूर्णाहुतिश्च ॥ ततोभ्यात्तानाद्युत्तरतंत्रंविधाय ॥ ततोग्न्यर्चनांतेषट्कलशोदकेन सकुटुंबयजमानाभिषेकः ॥ पूर्वोक्तप्रकारेणाभिषेकंकुर्यात् ॥ ततआज्यावलोकनं ॥ तत्पात्रंसदक्षिणंद्विजायदत्वा ॥ अथविभूतिधारणं स्थापितदेवतानामुत्तर पूजनंविसर्जनंचश्रेयोग्रहणं आचार्यहस्ते प्रतिमादानंतस्मैहिरण्यांधेनुंचदत्वा ब्राह्मणानभोजयीत्वा शांतिपाठंचकारयित्वा यस्मात्कोशेतिपठित्वा कृतंकर्मेश्वरार्पणं कुर्यादिति ॥ ॥ इतीश्रीमदथर्ववेदगृह्यसूत्रप्रयोगभानौ षट्पन्नागरद्विवेदीरविशंकरकृते त्रिकजननशांति प्रयोगरश्मिः रेकोनसप्तति ॥ ६९ ॥

॥ श्रीमन्महाकालिकायैनमः ॥ अथभद्राजननशांतिप्रयोगरश्मिः ॥ अथातोविष्टिजातानां मातापितृकुलस्य च ॥ महारिष्टप्रदंप्रोक्तंद्विपदादिविनाशकृत् ॥ मातापितृसुहृद्बंधुकुलादीनांभयप्रदम् ॥ तद्दोषपरिहारार्थंशांतिंकुर्यात् प्रयत्नतः ॥ ॥ अथप्रयोगः ॥ कर्ताएकादशाहेवातदसंभवे शुभदिनेवागोमुखप्रसवंकृत्वा ॥ ततःदेशकालौसंकीर्त्य ॥ अस्यशिशोःभद्राजनन सूचितसकलाशुभनिवृत्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं सग्रहमखांशांतिंकरिष्ये ॥ कन्याजननेतु ॥ अस्याकुमार्याःभद्राजननेतिविशेषः ॥ तत्रादौनिर्विघ्नतासिध्यर्थं महागणपतिपूजनपूर्वकं स्वस्तिपुण्याहवाचनंमातृका पूजनंनांदिश्राद्धंआचार्यऋत्विग्वरणंचकरिष्ये इतिसंकल्पः ॥ एतानिकृत्वा वृताचार्यःब्रह्मजज्ञानं अव्यसश्चेतिपठित्वा जीवास्थेतिविधिवदाचम्य यदत्रसंस्थितमितिसर्षपविकीरणादिप्रार्थनांते स्थंडिलपूर्वभागेपीठोपरिप्रसारितवस्त्रे ग्रहाना वाह्यसंपूज्य तदीशान्यांकलशेवरुणंसंपूज्य तदुत्तरेउदकसंस्थकलशपंचकेस्वर्णप्रतिमासु ब्रह्मविष्णुमहेश्वरइंद्ररुद्रानावाह्य

पूजयेत ॥ पंचदेवतानापंचपूर्वोक्तमंत्रैर्यथाविधिपूजनंचकृत्वा ॥ ततोएककऋत्विक्रुद्रकुंभंस्पृष्ट्वाचत्वारिरुद्रसूक्तानिजपेत्॥
प्रत्येकमेकादशवारंसूक्तानांजपः ॥ ततएककऋत्विक्शांतिसूक्तंजपेत् ॥ ततस्थंडिलेऽग्निंप्रतिष्ठाप्यसंपूज्य अभ्यात्तानादि
पूर्वतंत्रंकृत्वा स्वस्त्ययनहोमःकार्यः ॥ ततोब्रह्माणंविष्णुंमहेशं इंद्रंरुद्रंचप्रत्येकं समिदाज्यचरुतिलैः प्रतिद्रव्यमष्टोत्तर
शतसंख्याहुतिभिःहोमःकार्यः ॥ यथालिंगंसर्वत्रत्यागः ॥ ततःऋत्विगाचार्यःसग्रहहोम पुरःसरंप्रधानहोमंपूर्वोक्तमंत्रैः
कृत्वा ॥ होमकालेऋत्विजःगणपतिसूक्तंपौरुषं सौरंमृत्युंजयमंत्रंरुद्रंचउच्चैःपठेयुः ॥ ततःस्विष्टकृतादिप्रायश्चित्तहोमांते
बलिदानंचपूर्णाहुतिः॥ ततोभ्यात्तानाद्युत्तरतंत्रंसमाप्य॥ ततोभ्यर्चनांतेषट्कलशोदकेन सकुटुंबंयजमानोपरिअभिषेकः
ततःआज्यावलोकनंतत्पात्रं सदक्षिणंद्विजायदत्वा ॥ अथविभूतिधारणं स्थापितदेवतानामुत्तरपूजनंविसर्जनं श्रेयोग्रहणं
आचार्यहस्तेप्रतिमादानं तस्मैसहिरण्यंधेनुदानंचकृत्वा ॥ ब्राह्मणान्भोजयित्वा शांतिपाठंकारयित्वा यस्मात्केशेति
समापनं ॥ कृतेनानेनकर्मणाभगवानकर्मरूपीश्वरार्पणमस्तु ॥ ॥इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौषट्पन्नागरद्विवेदि
रविशंकरकृतेभद्राजननशांतिप्रयोगरश्मिःसप्ततिः ॥ ७० ॥

॥ श्री अथऊर्ध्वदंतजननशांतिप्रयोगरश्मिः ॥ उपरिप्रथमंयस्यजायतेथशिरोद्विजाः ॥ दंतैर्वासहयस्य
स्याज्जन्मभार्गवसत्तम ॥ द्वितीयेचतृतीयेचचतुर्थेपंचमेतथा ॥ यदादंताश्चजायंत मासेचैवमहद्भयं ॥ मातरंपितरंवाथखा
देदात्मानमेवच ॥ बालानामष्टमेमासिषष्ठेमासिततः पुनःदंतायस्यचजायंते मातावाम्रियतेपिता ॥ बालकःपीड्यतेवात्र
स्वयमेवनसंशयः ॥ केचित्तुअष्टमेमासिदंतजन्मशुभमाहुः ॥ ॥ अथप्रयोगः ॥ ममास्यशिशोः प्रथममूर्ध्वदंतजनन
सूचितसर्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं सग्रहमखांशांतिंकरिष्ये ॥ तदंगगणपतिपूजनपूर्वकंस्वस्तिपुण्याहवाचनं
नांदिश्राद्धंचकरिष्ये इतिसंकल्प्य एतानिकृत्वा ॥ शांतिकर्मसुसर्वत्रशांत्युदकंकार्यमितिज्ञेयम् ॥ अतएवशांत्युदकंकृत्वा
ततोआचार्यवरणांतेआचार्यः ब्रह्मनज्ञादियथासंभवंमंत्रानुच्चार्य ॥ यदत्रेतिसर्वपत्रिकोरणांते प्रतिमानामग्न्युत्तारणंच
कृत्वा होमदेशोत्तरभागेगजपृष्ठनौकायां सौवर्णपीठेवास्वस्तिकयुतंबालमुपविश्य ॥ सर्वौषधिसर्वगंधादियुक्तजलैः स्नाप

यित्वा स्थंडिलपूर्वभागेविधिनाकलशंप्रतिष्ठाप्य तस्योपरिपूर्णपात्रेउदक्संस्थंक्रमेणधातारं वह्निंसोमंवायुंपर्वतान् केशवंच
षट्प्रतिमाः नाममंत्रेणावाह्य संपूज्याग्निंप्रतिष्ठाप्य तदीशान्यांग्रहान्संपूज्य अभ्यात्तानादिपूर्वतंत्रंसमाप्यधातारंसकृच्चरुणा
वह्न्यादिपंचदेवताःएकैकयाज्याहुत्याहोमयेत् ॥ धात्रेत्वाजुष्टंनिर्वपामीत्यादितंत्रेतिर्वापप्रोक्षणे ॥ अत्रयथालिंगंसर्वत्र
त्यागः ततःस्वस्त्यनहोमः ॥ ततःग्रहपीठदेवताहोमांतेचरुमादाय ॥ ॐधात्रेस्वाहेतिसकृदाहुतिः ॥ ततःस्रुवेणाज्यं
गृहीत्वापंचाहुतिर्जुहुयात् ॥ सायथा ॐवह्नयेस्वाहा ॥१॥ ॐसोमायस्वाहा ॥२॥ ॐवायवेस्वाहा ॥३॥ ॐपर्वतेभ्यः
स्वाहा ॥ ४ ॥ ॐदेवदेवायस्वाहा ॥५॥ यथालिंगंत्यागः ॥ चर्वाज्याभ्यांस्विष्टकृतं ॥ ततःप्रायश्चित्तहोमांतेबलिः
पूर्णाहुतिश्च ॥ ततोभ्यात्तानाद्युत्तरतंत्रंसमाप्य ॥ पूर्णपात्रविमोकनाद्यग्न्यर्चनांतेकलशद्वयोदकेनाभिषेकः ॥ ततोविभूति
धारणंस्थापितदेवताना मुत्तरपूजनंविसर्जनं श्रेयोग्रहणंआचार्यहस्तेप्रतिमादानांतंकृत्वा ॥ शांतिदिनमारभ्यसप्तदिन
पर्यंतंप्रत्यहंयथाशक्तिब्राह्मणान्भोजयेत् ॥ अष्टमदिनेकांचनादिदानंतेभ्यः कार्यंदिनाष्टकंब्रह्मचर्यादिव्रतचर्यांतेपरमेश्वरा
र्पणंकुर्यात् ॥ यस्मात्केशेतिजपः ॥ कृतेनानेनकर्मणाकर्मांगदेवताप्रीयतांनमम ॥ अथसदंतजननशांतिः ॥ देशकालौ
संकीर्त्य अस्यशिशोःसदंतजननसूचितसकलारिष्ट परिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थं सग्रहमखांशोनकोक्तांशांतिंकरिष्ये ॥
तदंगगणेशपूजनादि नांदिश्राद्धांतेचार्यः कलशेप्रतिमासुधातारमित्यादि षट्देवतासंपूज्य ॥ ग्रहहोमादिसर्वंउर्ध्वदंत
शांतिवत्कार्यमित्यलमाडंबरेणेति ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौ षट्पन्नागरद्विवेदि रविशंकरकृतेसदंतजनन
शांतिसहितोर्ध्वदंतशांतिप्रयोगरश्मिरेकसप्तति ॥ ७१ ॥

॥ अथद्वितीयादिमासेदंतजननशांतिः ॥ देशकालौसंस्मृत्यास्यशिशोः ॥ द्वितीयमासेदंतजन्मसूचितस० ॥
सग्रहमखांशांतिंकरिष्ये ॥ एवंतृतीयमासेदंतजन्मसूचितेत्यादि संकल्पवाक्यंययानिर्मितंयोजयेत् ॥ गणेशपूजनादि
यस्मात्केशेत्यंतंसर्वंपूर्वशांतिवत्कार्यमित्यलंविस्तरेण ॥ ॥ इतीश्रीमद० रविशंकरकृते द्वितीयतृतीयचतुर्थपंचमेमासेदंत
जननशांतिप्रयोगरश्मिर्द्विसप्तति ॥७० ॥

॥ अथषष्टमाष्टममासयोर्दंतजननशांतौविशेषः ॥ देशकालौसंकीर्त्यअस्यशिशोः षष्टममासेदंतजननसूचित सर्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं सग्रहमखांशांतिंकरिष्ये ॥ तदंगगणेशपूजनादिश्राद्धांतेवृताचार्यः स्थंडिल पूर्वभागेकलशंविधिनाप्रतिष्ठाप्य तस्योपरिपूर्णपात्रेसुवर्णनिर्मितबृहस्पतिमावाह्य संपूज्यस्थंडिलेग्निंप्रतिष्ठाप्य ग्रहपूजनादि कलशस्थापनांतेअभ्यात्तानादिपूर्वतंत्रंसमाप्य स्वस्त्ययनहोमोग्रहहोमश्च ॥ अत्रप्रधानंबृहस्पतिमष्टोत्तरशतसंख्ययादधि मध्वाज्यक्तअश्वत्थसमिदाहुतिभिःहोमयेत् ॥ ततोहोमांतेग्रहयज्ञअकृतपक्षे केवलाज्येनस्विष्टकृतंहुत्वा ततःप्रायश्चित होमाद्यग्न्यर्चनांतेकलशोदकेनभिषेकः ततोविभूतिधारणादि शांतिसूक्तपाठांतंकर्मसर्वंपूर्ववत्कार्थं ॥ ॥ इतिश्रीमदथर्व गृह्यसूत्रप्रयोगभानौ षट्पन्नागरद्विवेदिरविशंकरकृते षष्टमाष्टममासयोर्दंतोत्पत्ति शांतिप्रयोगरश्मिस्त्रिसप्ततिः ॥ ७३ ॥ अष्टमादिषुमासेषुदंतजन्मशुभावहमितिज्योतिर्निबंधोक्तेः ॥

॥ श्रीमहाकालिकायैनमोनमः ॥ ॥ अथगणेशायनमः ॥ अथप्रससववैकृतशांतिप्रयोगरश्मिप्रारंभः ॥ यत्रगर्भेविपर्यासोमानुषाणांगवामपि ॥ अद्भूतानिप्रसूयंतेतत्रदेशस्यविप्लवः ॥ मानुषामानुषाणांचगोअश्वामृगपक्षिणाम् जायंतेजातिभेदाश्चसदंतविकृतास्तथा ॥ बहुशीर्षाअशीर्षाश्चबहुकर्णाविशेषतः ॥ एकशृंगाद्वित्रिशृंगातथैवत्रिचतुर्भुजाः ॥ दीर्घकर्णामहाकर्णागजकर्णाश्चमानवाः ॥ राजश्रेष्ठेकुलेनाशोधनस्यबहुसंक्षयः ॥ अष्टोत्तरसहस्राणिचरुभैर्जुहुयात्घृतम् ॥ समिधातुपालाशानांतर्पयेत्पूर्ववद्विजान् ॥ अशिराजायतेजंतुर्यथाद्वित्रिशिरास्तथा ॥ अत्रसूर्याद्भूतेसूर्यंपूजयेज्जुहुयादपि ॥ दध्याज्यमधुसंयुक्ताःसमिधस्त्वर्कसंभवाः ॥ मृगीजनयतेसर्पान्मंडूकांश्चैवमानवाः । अत्राद्भुतेगीतपूजाहोमंच कारयेत् ॥ औदुंबरस्यसमिधौरुधिसर्पिःसमन्विताः ॥ स्त्रीगर्भपातोयमलंप्रसूयंतेथवास्त्रियः ॥ सदंताश्चैवजायंतेजाते मात्रावसंतिच ॥ बुधाद्भुतेबुधायात्रापूजाहोमौसमाचरेत् ॥ ॥ संक्षेपेणयथाप्राज्ञमित्थंजननशांतयः ॥ अनेनप्रीयतांदेवो गभवान्शंकरोमम ॥ १ ॥ अत्रमूलवचनानिकौस्तुभ मयूखादिशांतिग्रंथेभ्यो ज्ञेयानिविस्तरभया द्वालानांदुरधिगमत्वा च्चनलिखितानि ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्र प्रयोगभानौषट्पन्नागर द्विवेदिरविशंकरकृते प्रसववैकृतिशांतिप्रयोग रश्मिश्चतुःसप्तमिः ॥ ७४ ॥ ॥ इतिजननशांतयःसमाप्ताः ॥

॥ अथसर्वशांत्युपयोगीकर्मविशेषं सर्वशांतिष्वनुक्तत्वादत्रस्फुटीक्रियते ॥ तदुक्तंकौशिकसूत्रभाष्ये ॥ अथ पापनक्षत्रेजातेस्त्रीवापुरुषोवायोजातस्तस्य शांतिरुच्यतेत्युपक्रम्यनक्षत्र कल्पोक्तंसर्वंचेत्युपसंहारः कृतःमध्येअभ्यासोपि दर्शितः ॥ तत्रार्द्रादिपापनक्षत्राणिदर्शितानि ॥ अतएवसर्वेषुपापनक्षत्रेषुगंडशांतिषुच शिष्टाइदंकर्मकुर्वंति ॥ तस्मात् गर्गोक्तशौनकोक्त प्रागुक्तगोप्रसवादि सर्वशांतिषुबुधैरिदंकर्मकर्त्तव्यमिति ॥ आप्लवनासेचनेचक्षीरौदनप्राशनंच एतानि त्रिणिकर्माणिसर्वत्रकार्याणि ॥ अथवाप्रत्नोहीतिसूक्तेनोदकमभिमंत्र्य पापनक्षत्रजातंशिरसि पूर्वोक्तऋतुशांतिप्रकरणोक्त मंत्रैरभिषेकंकुर्यात् एतएवाग्रेस्फुटीकृतः ॥ अथसर्वशांतिषुब्रह्मवेदाध्यायिभिः कार्यानक्षत्रकल्पोक्ता पापनक्षत्रशांति रुच्यते ॥ तत्रगृह्यसूत्रेकौशिकः ॥ प्रत्नोहीतिपापनक्षत्रेजातायेति ॥ अथकौशिकसूत्रभाष्येचापि ॥ अथपापनक्षत्रेजाते स्त्रीवापुरुषोवायोजातस्तस्यशांतिरिति ॥ तथापापनक्षत्राण्युक्तानितत्रैव ॥ आर्द्राऽश्लेषामघाचित्रास्वातिविशाखाज्येष्ठा मूलंशतभिषाभरणीत्येतानि ॥ एतेषुयोजायतेतस्येदंकर्मगंडेनसंधौच मूलनक्षत्रेदंकर्मकुर्यात् ॥ ॥ अथप्रयोगारंभः ॥ श्रीपर्ण्यादिप्रशस्तदारुमये पीठेउपविश्यसपत्निकोयजमानःसंकल्पयेत् ॥ अत्राद्य०तिथौअमुकपापनक्षत्रोत्पन्न शिशोर्जन्म जनितपीडोपशांतये सूत्रोक्तामुकनक्षत्रशांतिं सग्रहमखांकरिष्येतिसंकल्प्य ॥ गणेशांबिकापूजनादि सर्वंअभ्यात्तानांतं कृत्वा ॥ अत्रसमूलंबर्हिस्तरणं ॥ समूलइध्माउपसमाधायेतिविशेषः ॥ तत्रपूर्वोक्तरीत्याग्रहस्थापननक्षत्रदेवतास्थापनादि ग्रहहोमांतंकृत्वा सपाशामुंजरज्वाकंठेकट्यांपादयोःबध्वातीर्थोदकपूरितंघटंस्थाप्य ॥ प्रत्नोहीतिसूक्तेनसंपातानदद्यात् ॥ तद्यथा ॥ प्रत्नोहिकेत्यृचस्यसूक्तस्थापर्वांगिरा स्त्रिष्टुप्घटोदकसंपाताज्यहोमेविनियोगः ॥ ॐप्रत्नोहिकमीड्यो अध्वरेषु सनाच्चहोतानव्यश्चसत्सि ॥ स्वांचाग्नेतन्वंपिप्रायस्वास्मभ्यंचसौभगमायंजस्वइदंप्रजापतये० ॥ ज्येष्ठघ्न्यांजातोविचृतो र्यमस्यमूलबर्हणात्परि पाह्येनं ॥ अत्येनंनेषद्दुरितानिविश्वादीर्घायुत्वायंशतशारदाय प्रजापतइदं० ॥ व्याघ्रेह्न्यजनिष्ट विरोनक्षत्रजाजायमानःसुवीरः ॥समावधीत्पितरं वर्द्धमानोमामातरं प्रमिनीज्जनित्रिंस्वाहा इदंप्रजापतयेनममेतित्यागः

संपातश्च ॥ पुनस्तेनैवसूक्तेनआगमक्षीरोदनेसंपातानदत्वा पुनस्तेनैवसूक्तेनदर्सर्पिजुली अभिमंत्र्यघटेनिक्षिप्य पुनस्ते नैवसूक्तेनआगमक्षीरोदनमभिमंत्र्य सपत्निकस्तेनैवसूक्तेनप्राशयेत् ॥ ततोदिक्पालपूजनं बलिदानंपूर्णाहुतिः ॥ ततो भ्यात्तानाद्युत्तरतंत्रं ॥ अथवापूर्णाहुत्यनंतरं तेनैवसूक्तेनतथाचपूर्वोक्तैः सूक्तैःसशिशुंसपत्नीकं यजमानमभिषिच्य ॥ अभ्यात्तानाद्युत्तरतंत्रंसमापयेत्॥ आचार्यायगां॥ ऋत्विग्भ्योयथाशक्तिदक्षिणांदत्वाग्रीवापाशंमौंजंनदीफेनेषुनिदधानि॥ कटिपाशंचोदकेमक्षिपति ॥ ॐनदीनांफेनांअनुतान् विनश्यन भ्रूणघ्निपूषनदुरितानिमृक्ष्वेतिमंत्रार्द्धेण ॥ ततोब्राह्मण भोजनं ॥ भूयसींदक्षिणादत्वा शांताद्यौरीतिसूक्तंप्रजप्य यस्मात्कोशेतिपठित्वा कृतंकर्मेश्वरार्पणंकुर्यात् ॥ ततःसुहृद्भिः सभुंजीततिलककरणंब्राह्मणाशिशोग्रहणादि सर्वपूर्ववत्ज्ञेयमित्यलमतिशयाडंबरेण ॥ ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोग भानौ षट्पन्नागरद्विवेदिरविशंकरकृते सूत्रोक्तसर्वपापनक्षत्रजननशांतिप्रयोगरश्मिःपंचसप्ततिः ॥ ७५ ॥

कलिमलाहरणेक्षमतांगतात्रिबुधवृंदनिसेवितपादुका ॥ मयिमनोविदधातुदयान्वितं जयदयाधिकताधिगता यतः ॥ १ ॥ श्रमेणानेनमहताभक्तभक्तस्यकालिके ॥ ममप्रीणातुदेवित्वंक्षमासाराहिमातृता ॥ २ ॥ रमातातविबोधेन प्रथमःकालिकाश्रयात् ॥ धैर्यरामात्मजेनायं प्रकाशश्चप्रकाशितः ॥ ३ ॥ इतिस्वाभिष्टदेवतास्तुति पूर्वकंस्वात्मनाम प्रकाशनम् ॥ श्रीजगदंबार्पणमस्तु ॥ इतिश्रीमदथर्वगृह्यसूत्रप्रयोगभानौषट्पन्नागर द्विवेदिरविशंकरकृते पचसप्ततिप्रयोग संदर्भितोयंप्रथमःप्रकाशःसमाप्तिमगमत् ॥ १ ॥ ॥ अज्ञानदोषान्मतिविभ्रमाच्चयत्किंचिदूनंलिखितंमयात्र ॥ तत्सर्व मार्यैऽपरिशोधनीयं दोषोनदेयोखलुलेखकस्य ॥ १ ॥ यादृशंपुस्तकंदृष्टंतादृशंलिखितंमया ॥ यदिशुद्धमशुद्धंवाममदोषो नदीयताम् ॥ २ ॥ नारायणाय० ॥

॥ अथर्ववेद प्रयोगभानौ प्रथमप्रकाशःसमाप्तोयम् ॥

॥ जगदंबार्पणंभूयात ॥ श्रीरस्तु ॥

॥अथर्ववेद प्रयोगभानौ प्रथमप्रकाशः समाप्तम्॥

[OrderDescription]
,CREATED=03.08.19 14:13
,TRANSFERRED=2019/08/03 at 14:40:51
,PAGES=104
,TYPE=STD
,NAME=S0001278
,Book Name=M-59-ARTHVED PRAYOGBHANU
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF

FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF

FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,